M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Sor. 83

Title: Vyaptigamugam

Pala

83

		Vyāptyanugama	Title
			Author
			Editor
		Sam. 1831	Year, Vols.
			Publisher
83.			Remarks

श्रीगणेशाय नमः ॥ प्रतियोगितावच्छेदकावच्छिन्नत्वं यत्र भवतीति यथाश्रुतमूलात्प्रत्ययार्थे साध्ये तादृशप्रतियोगितावच्छेदकाव
च्छिन्नत्वं प्रतीयते तेन तस्य वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणमहानसीयवह्नित्वाद्यवच्छिन्नाभावमादाय दोषो दुर्वारः स
र्वेषामेव वह्न्यादीनां तादृशाभावप्रतियोगितावच्छेदकविशिष्टतया तादन्यत्वासंभवात् यत्पदस्य यद्रूपावच्छिन्नपरं तथा यद्रूपावच्छिन्न
स्य प्रतियोगितावच्छेदकाः ये ये धर्माः प्रत्येकं तदवच्छिन्नान्यत्वमित्यर्थे साध्यतावच्छेदकस्य तत्तत्प्रतियोगितावच्छेदकधर्मावच्छि
न्नभेदकूटे न प्रत्येकं सामानाधिकरण्यपर्यवसितेन वह्न्यादिसाध्यकहेतौ वह्नित्वादिविभिन्नवह्न्यादिव्यक्त्यंतर्भावेन महानसीयव
ह्नित्वाद्यवच्छिन्नभेदे प्रत्येकं सामानाधिकरण्यसत्त्वेऽपि एकव्यक्तिकसत्त्वादिसाध्यके सत्त्वादौ हेतुमन्निष्ठाभावप्रतियोगिता
वच्छेदकविशिष्टसत्त्वाद्यवच्छिन्नभेदसामानाधिकरण्यसत्त्वादव्याप्तिः यद्रूपावच्छिन्नं प्रतियोगितावच्छेदकावच्छिन्नावि स्म०
कप्रतीतिविषयद्रूपत्येकदोषोद्धारेऽपि यद्रूपं प्रतियोगितावच्छेदकभिन्नं प्रतियोगितावच्छेदकाविषयकप्रतीतिविरोधादुक्त १
स्य दूषणं तस्य प्रतियोगितावच्छेदकविशिष्टविषयकप्रतीतिविषयत्वस्य साध्यतावच्छेदकविशिष्टनिवेशनमनुचितं स

वं स्वरूपसंबंधरूपावच्छिन्नत्वविवक्षणाद्यद्रूपावच्छिन्नं प्रतियोगित्वं तत्ताभावप्रतियोगितावच्छेदकानवच्छिन्नमित्यर्थे शुद्धवह्नित्वादि
रूपसाध्यतावच्छेदकावच्छिन्नप्रतियोगित्वं महानसीयत्वादिविशिष्टवह्नित्वाद्यनवच्छेद्यत्वं सुलभमेव यद्रूपावच्छिन्नं प्रतियोगित्वं ता
दृशप्रतियोगिताभिन्नमित्युक्तौ समवायादिना घटादौ साध्ये संयोगादिना घटादिहेतावव्याप्तिः संयोगादिसंबंधावच्छिन्नघट
त्वाद्यवच्छिन्नप्रतियोगितायां हेतुमन्निष्ठाभावप्रतियोगिताभेदसत्त्वात् तदुद्धं वा चंडीपत्वादित्यादावव्याप्तिवारणाय हेतुमन्निष्ठाभा
वप्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वस्य निवेशनीयतया व्यभिचारिमात्र एव वा संबंधांश एवावच्छिन्नसाध्यताव
च्छेदकावच्छिन्नप्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताभेदसत्त्वेनातिव्याप्तिः स्यादिति प्रतियोगिताभेद
मुपेक्ष्य प्रतियोगितावच्छेदकावच्छिन्नभेदोपादानं साध्यतावच्छेदकसंबंधावच्छिन्नत्वं भेदानुयोगी साध्यतावच्छेदकावच्छिन्नप्र
तियोगितायां निवेश्यातिव्याप्तिवारणे केवलान्वयिसाध्यके तादृशप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिरिति रीत्या मिश्रव्याप
रिष्कारेऽपि गौरवमित्युपाध्यायोपदिष्टमनत्वया तास पक्षमवलंब्य व्याचष्टे प्रतियोग्यसमानाधिकरणेति न च नत्सध्यापासिन

२

साध्यतावछेदकेप्रतियोगितावछेदकभेदस्य विशेषोपिसुद्रवह्नित्वादौ महानसीयत्वादिविशिष्टवह्नित्वादिभेदस्यासत्त्वात् सा
ध्यतावछेदके प्रतियोगितावछेदकाविषयकप्रतीतिविषयत्वमेव विवक्षणीयं तदपेक्षया साध्यतावछेदकावछिन्न
प्रतियोगित्वप्रतियोगितावछेदकानवछेदत्वात् तिविशदपक्षितं गौरवमितिवाच्यं प्रत्येकं घटादौ घटपटोभयत्वावछिन्न
भेदवत्सु द्रव्यवह्नित्वादौ महानसीयत्वावछिन्नभेदेन पर्याप्त्या विशिष्टवह्न्यभावीयप्रतियोगितावछेदकत्वावछिन्नभेदस्य
सुघटत्वात् अवछेदकाविषयकप्रतीतिविषयत्वविवक्षायां तरेरौवप्रतीकारात् अवछेदकत्वस्य वह्नित्वमहानसीय
त्वादिनिष्ठस्य संबंधभेदेन भिन्नत्वेपि तत्तत्प्रतियोगितावछेदकत्वत्वादिनानुगतरूपेणाव्यासज्यवृत्तितापादकवर्तित्व
कृशोवह्नित्वादेरवछेदकत्वपर्याप्त्यनधिकारस्यानुपपादितत्वेनोदीधितिकारस्यानुमतत्वात् सार्वभौमैस्तु विशेषधर्म श्रम०
वछिन्नप्रतियोगिताकृदानतिरिक्तसामान्यधर्मावछिन्नप्रतियोगितासंबंधस्याविशेषरूपेणाव्यासज्यवृत्तेरपि सामान्य २
धर्मावछिन्नप्रतियोगितासंबंधत्वेनानुगतेनव्यासज्यवृत्तित्वमितिकंठरवेणोक्तं एवं सति महानसीयवह्निभिन्नवह्नि

मान् धूमादित्यादौ साध्यतावछेदकमहानसीयवह्निभिन्नत्ववह्नित्वयोः प्रत्येकं धूमादिसमानाधिकरणाभावप्रतियोगि
तावछेदकत्वपर्याप्त्यनधिकरणत्वेपि प्रकृतानुमितिविधेयतावछेदकतायादृशरूपावछिन्नपर्याप्तत्वादृशरूपावछि
न्नानुयोगिताकतादृशावछेदकतावछिन्नभेदस्यैवव्याप्तिघटकत्वोपगमेपि न नातिव्याप्तिः उक्तस्थलेयानुमितिविधे
यतावछेदकतापर्याप्त्यवछेदक दर्शितधर्मद्वयनिष्ठद्वित्वाद्यवछिन्नेहेतुमन्निष्ठाभावप्रतियोगितावछेदकत्वपर्याप्ति
मतिविशेषेण तदवछिन्नभेदासत्त्वात् साध्यतावछेदकवृत्तिवह्नित्वमहानसीयवह्निभिन्नत्ववह्नित्वोभयत्वाद्यनुपस्थि
ति काले तदवछिन्नेऽनवछेदकत्वस्य दुर्ग्रहत्वया अनुमित्यनुत्पादोव्यापकताज्ञानकारणतावादिनामिष्टापत्तेन ह
पेणानवछेदकत्वग्रहात् दूषणात्वछिन्नविधेयतावछेदकताकानुमित्यनुपपत्तिः अकेवलान्वयिग्रंथेयं यदुक्तं तैर्वयर्थ्य
नेयत्वतत्त्वेन हेतौ निवेशे हेतुव्यक्तिभेदेनव्याप्तिभिर्यत्साधनानुमित्युपयोगिनी पक्षीयधूमादिव्यक्तिव्यापकतायाः पूर्व
वह्न्यादेर्ग्रहीतत्वादितियद्रूपविशिष्टस्युक्तं तथाच धूमत्वादिरूपहेतुतावछेदकधर्मेणैव विशिष्यनिवेशनतद्रूपावछि

२ त्रहेतुकानुमित्यौपयिकव्याप्तिनिर्वचनं महानसादौ धूमवह्न्यादिसहचारग्रहाद् धूमादौ तद्धूमत्वाद्यवच्छिन्ननिरूपितानाद्यवपक्षी
यधूमादिसाध्यसाधनमत्वाद्यवच्छिन्ननिरूपितायास्त्र्यपि व्यापकतायास्तदसंभवात्तदघटितव्याप्तेः पक्षधर्मे धूमे ग्रहादनु
मितिनिर्वाहइतिभावः नच सामानाधिकरण्यस्य व्याप्तित्वपक्षे हेतुव्यक्तिभेदेन व्याप्तिभेदस्यावश्यकत्वइति अनुग
तरूपेण हेतुनिवेशोव्यर्थइतिवाच्यं हेतुव्यक्तिभेदेन व्याप्तिभेदे प्यनुगतरूपेणाहेतुनिवेशे धूमव्यापकवह्निप्र
तियोगिकधूमनिष्ठसामानाधिकरण्यत्वादिना धूमादिनिष्ठसकलवह्निसामानाधिकरण्यव्यक्तीनामनुगमात्तत्सामान्यप्र
त्यासत्याक्षेपे हेतुनिष्ठव्याप्तेरपि प्रथमं ग्रहसंभवेनानुमित्युपपत्तेः तत्तद्व्यक्तित्वेन हेतुनिवेशे ननु सामान्यप्रत्या
सत्यापक्षीयहेतुनिष्ठव्याप्तेरपि व्याप्तित्वेन दुर्ग्रहतयानुमित्यनुपपत्तेः हेतुतावच्छेदकाश्रयाधिकरणत्वमु
मान्यप्रत्यासत्यापि पक्षीयहेतुनिष्ठव्याप्तेर्व्याप्तित्वेन दुर्ग्रहतयानुमित्यनुपपत्तेः प्रतियोगितानवच्छेदकत्वमात्रेण साध्यतावच्छेदकनि
पेक्ष्य तद्विशिष्टनिरूपिताधिकरणत्वप्रवेशप्रयोजनमग्रेवक्ष्यते प्रतियोगितानवच्छेदकत्वमात्रेण साध्यतावच्छेदकनि गम० ३
वेशे वह्नित्वत्वादिना वह्नित्वादिकमनवगाहमानात् प्रतियोगितानवच्छेदकवत्सामानाधिकरण्यावगाहिज्ञानाद्वह्निमानित्या

घनुमितिस्यात् नचेष्टापत्तिसंभवः कदाचिद्वह्नित्वेन कदाचित् द्रव्यत्वादिना वह्न्यनुमितिरितिनियमानुपपत्तेः नचानवच्छेदकत्वेन
तत्तद्धर्मावगाहित्वमेव व्याप्तिग्रहस्यानुमितौ विधेयतावच्छेदकतया तत्तद्धर्मभाननियामकमितिवाच्यं अनवच्छेदकत्वेन वह्नित्वा
दिभानेद्रव्यत्वादिभानस्यापि प्रायशः संभवात् एवं तत्तत्साध्यतावच्छेदकावगाहिव्याप्तिज्ञानाविशेषितत्वाविशिष्टसाध्यतावच्छे
दकानवगाहिव्याप्तिज्ञानस्य हेतुत्वे व्यभिचारस्य हेत्वाभासतानुपपत्तिश्चेति विशिष्टसाध्यतावच्छेदकस्य व्याप्तिघटकतालाभा
यप्रतियोगितावच्छेदकावच्छिन्नेनेत्यनुक्त्वा प्रतियोगितानवच्छेदकोपि धर्मस्तदवच्छिन्नेनेत्युक्तं पत्र वह्नित्वत्वादिविशेषणाव
च्छिन्नस्य साध्यतावच्छेदकतात्तत्र तेन तेन रूपेणैव तत्तद्धर्माणां व्याप्तिघटकतायत्र च स्वरूपत एव वह्नित्वाद्यखण्डधर्माणां साध्यता
वच्छेदकत्वं तत्रापि विशेषणानवच्छिन्नतत्तद्धर्मघटित तत्तद्धर्मवदितरा वृत्तित्वरूपवह्नित्वत्वादिना तन्निवेशेन तु स्वरूपत एव अ
नवच्छेदकत्वरूपाधिविकमग्रेवक्ष्यामः तत्तद्व्यक्तिसामानाधिकरण्येन तत्तद्व्यक्तिगमकताप्रयोजकं पर्वतीयधूमे महानसीयवह्निसामा
नाधिकरण्याग्रहेपितत्तःपर्वते लाघवज्ञानादिवशान्महानसीयवह्न्यनुमितेरितिशेषणायुरस्कारेणाभानेनिर्विशेषणकसामाना

४ त्मकस्य स्वरूपतो भानस्यासंभवात् वह्न्यादीतरावृत्तित्वस्य वह्न्यादिमात्रवृत्तिधर्मे तरसाधारणेपि तन्मात्रपुरस्कारेण व्यापकतावच्छेदक
त्वग्रहस्यापि वह्नित्वावच्छिन्नविधेयताकानुमितिहेतुत्वमुपपद्यते सकलवह्न्यादिवृत्तित्वविषयतानिवेशे गौरवात् सकलवह्न्या
वृत्तित्वस्य वह्न्यादीतरवृत्तिसाधारणतया तन्मात्रपुरस्कारेण व्यापकतावच्छेदकत्वग्रहस्य न हेतुतासंभवः तथा सति
इंधनादिहेतुनापि वह्नित्वावच्छिन्नानुमितिप्रसंगात् सकलवह्न्यादिवृत्तिद्रव्यत्वादेरिंधनादिव्यापकतावच्छेदक
त्वसत्त्वात् वह्नित्वादिनिष्ठतद्व्यक्तित्वधूमजनकतावच्छेदकजातित्वादेर्वह्नित्वादिमात्रवृत्तित्वेपि तेन रूपेण व्या
पकतावच्छेदकत्वग्रहाद्वह्निमानित्यनुमितिरनुभवविरुद्धा येन रूपेणोपस्थिते वह्नित्वादौ इतरसाधारणत्वसंश
योन ज्ञायते तत्पुरस्कारेण व्यापकतावच्छेदकत्वग्रहादेवोक्तानुमित्युत्पादानुभवात् अत एव ज्ञानत्वत्वानुभ
वत्त्वव्यापकगुणत्वव्याप्यतातित्वयोरविशेषेण ज्ञानत्वत्वरूपेण व्यापकतावच्छेदकत्वग्रहात् ज्ञानवानयमि रामः ४
त्यनुमितिर्न भवितुमर्हतीति दीधितिकारस्वरसमारणदूषणं प्रत्युक्तं अधिकमग्रे वक्ष्यामः तद्व्यक्तिसामानाधि

करणं च न तत्तद्व्यक्तिगमकताप्रयोजकं पर्वतीयधूमे महानसीयवह्निसामानाधिकरण्यग्रहेपि ततः पर्वते लाघव
ज्ञानादिवशान्महानसीयवह्न्यनुमितेरिति तावच्छेदकावच्छिन्नत्वेनैव तन्निवेशो न तु विशिष्यादर्शयति येन केना
पीति यावन्निरूपितत्वे तत्पर्याप्तं तद्रूपविशिष्टहेतुस्य तद्धर्मावच्छिन्नयावन्निरूपितव्याप्तिरिति तद्रूपावच्छिन्ननिष्ठा तद्धर्माव
च्छिन्नयावद्व्यक्तिगमकताप्रयोजिका व्याप्तिरित्यर्थः यथाश्रुते एकसाध्यव्यक्तिसामानाधिकरण्यस्यापरव्यक्तिप्रति
योगिकत्वासंभवेनासंगतेः प्रत्येकसाध्यतावच्छेदकव्यक्तिर्न सकलहेतुमद्वृत्तितावच्छेदिका तत्रानुगततद्रूपावच्छिन्ने
नापि तेन रूपेणानन्तमहेशहेतुव्यापकतासंभवः सकलसाध्यतावच्छेदकव्यक्तीनामेव चालनीन्यायेन हेतुसमानाधि
करणात्तद्धर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वादित्याशंकाभिप्रायस्यापरिहरतीदं दंड्यादाविति: परंपरासंबद्ध
मिति: स्वसमवायिसंयोगादिसंबंधेन साध्यसंबद्धमित्यर्थः एतच्च साध्यावृत्तित्वयोर्दंडत्वादेर्न व्यापकतावच्छेदकत्वस
भवदित्याशंकानिराकरणाय साध्यतावच्छेदकं दंडिसंयोगत्वादिरूपनानाधिकरणवृत्तितावच्छेदकावच्छिन्नहेतु

व्यापकतावच्छेदकमित्यर्थः एवकारेण दण्डादिरूपसखण्डधर्मस्य व्यवच्छेदः तथा च तत्र प्रतियोगितानवच्छेदकत्वस्य दुरुपपादत्वे
५ पि न क्षतिः दण्डत्वादिनैव प्रकारेण तद्धेतुकदण्ड्याद्यनुमितेरुपगन्तव्यत्वात् दण्डादौ व्यापकतावच्छेदकत्वभ्रमादेव दण्डादिप्रकार
कदण्ड्याद्यनुमितेरुपगमात् स्वाश्रयघटितपरंपरासंबन्धेन यत्र धर्मे व्यापकतावच्छेदकत्वग्रहस्तद्विशिष्टधर्मिप्रकारेणासामानाधि
करण्यप्रतियोगितया सा व्याप्तिग्राहिका व्याप्तिग्रहस्यैव वा तद्धर्मविशिष्टदण्डादिरूपस्वधर्मिणोऽनुमितिविधेयतावच्छेदकता
प्रयोजकत्वापगमेन दण्डिव्याप्त्याद्याकारानुमितेर्भ्रमत्वं न तादशायां नित्यत्वादिति भावः अयं महानसीयत्वादिसहि
तवह्नित्वादेर्धूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकत्वेऽपि शुद्धवह्नित्वादिरूपसाध्यतावच्छेदकस्य तादृशप्रतियोगिता
नवच्छेदकत्ववत्तद्विशिष्टदण्डस्य तादृशप्रतियोगितावच्छेदकत्वेऽपि दण्डत्वाद्यवच्छिन्नस्य तादृशप्रतियोगितानवच्छेदक रा०म०
त्वस्य सुघटत्वात्तस्य व्यापकतावच्छेदकत्वानुपगमान्न संगच्छते न वा तत्र दण्डी नास्तीति बुद्धौ तत्रोपलक्षितस्य दण्डप्रतियोगि ५
तावच्छेदकतापर्याप्तिभ्रमे सति तेन तु तत्ताभ्रमत्वं तत्रोपलक्षितत्वकैरेवानतिप्रसक्ततया तत्तांशस्यावच्छेदकान्तर्भा

वे गौरवादतो विशेष्यस्यावच्छेदकत्वपर्याप्त्यधिकरणतया दण्डत्वविशिष्टस्यापि तस्यानवच्छेदकत्वं दुर्घटं महानसीयवह्न्या
भावप्रतियोगितायां वह्नित्वादेरतिप्रसक्ततया तन्मात्रेऽवच्छेदकतापर्याप्त्यसंभवेन महानसीयत्वादेरवच्छेदकेऽन्तर्भावस्या
वश्यक इति शुद्धवह्नित्वादेस्तादृशप्रतियोगितानवच्छेदकत्वं सुघटमिति वाच्यं स्वरूपतो भासमानस्यैव स्वरूपतोऽवच्छे
दकतायाः सिद्धान्तसिद्धतया सखण्डपदार्थस्य दण्डादेः स्वरूपतोऽवच्छेदकत्वासंभवेन दण्डत्वादिविशिष्टस्यातिप्रसक्ततयात
ताद्रूप्यविशेषणमनन्तर्भाव्य तत्रावच्छेदकत्वपर्याप्तेरयोगात् अभावप्रतियोगितावच्छेदकतया भासमाने उपलक्ष
णीभूतधर्मान्तरस्य भानानुपगमे तु उपलक्षणतया दण्डत्वमात्रं तत्तद्दण्डावच्छिन्नाभावप्रतियोगितावच्छेदकतया भासमा
नं तद्दण्डांशे विषयीकुर्वत् दण्डिमति दण्डी नास्तीति प्रत्ययस्य दुर्वारत्वात् अत्र केचित् उक्तानुशये नैव दण्डत्वादावित्यादिपदो
पादानं व्यादिपक्षान्तु पृथिवीत्वादिव्याप्यजातित्वादिनानुगतीकृतघटत्वपटत्वमृत्तिकात्वपाषाणत्वादिमतः समवा
यादिना पृथिव्यादिहेतुकसाध्यस्य परिग्रहः समवायादिना हेतुभूतपृथिव्यादिमति तन्तुकपालादौ विशेषणतावच्छिन्नघ

६ दृशपदत्वाद्यवच्छिन्नाभावस्यासत्वात् सर्वत्रैव साध्यतावच्छेदकतादृशजातिमत्तयाविधाभावप्रतियोगितावच्छेदकत्वपर्य्याप्तेस्ता
सांव्यापकतावच्छेदकत्वासंभवेन तदनुगमकोक्तधर्मस्यैव परंपरासंबंधेन तथात्वोपगमस्यावश्यकत्वादित्याहुः अन्ये तु तत्तद्
उवाह्नास्तीत्यादौ प्रतियोगिविशेषणतया भासमानदंडादिष्वेव प्रतियोगितावच्छेदकत्वपर्य्याप्तिर्भासते तेन वह्निविशेषणतत्वादेस्तु
तदवच्छेदकत्वासंभवेन तदंतर्भावेन तदवच्छेदकतापर्य्याप्त्यसंभवात् न चान
तदवच्छेदकत्वमेव प्रतियोगिताव्यधिकरणस्य तदवच्छेदकत्वासंभवेन तदंतर्भावे न तदवच्छेदकतापर्य्याप्त्यसंभवात् न चान
वच्छिन्नमवच्छेदकत्वमेव निवेशनीयमिति वाच्यं एवं तु साध्यतावच्छेदकव्यभिचारितायतिप्रसंगात् अनवच्छिन्नमवच्छेदक
त्वमेव च स्वरूपतोऽवच्छेदकत्वं तत्तु एवं तु नास्त्येवातो दंडादेरनवच्छेदकत्वं तु घटं महानसीयवह्निर्नास्तीत्यादौ च महानसीयत्वा
देः प्रतियोगिन्येव विशेषणतया भानात् तदंतर्भावेनैव प्रतियोगितावच्छेदकत्वपर्य्याप्तिर्भासत इति विशेषः अथ वह्नित्वाद्यंश
एव सामानाधिकरण्यसंबंधेन विशेषणतया महानसीयत्वादिकमवगाह्य मानाम् महानसीयत्वविशिष्टवह्नित्ववान्नास्ती रा०म० ६
त्याद्याकारिकायाप्रतीतिस्तस्या उक्तयुक्त्या वह्नित्वाद्येव प्रतियोगितावच्छेदकत्वपर्य्याप्तिविषयकतया वह्नित्वादेरपि स्वरूपतव

च्छेदकत्वं तु घटमेव स्यात्पदि च वह्नित्वादेः समवायेन प्रतियोगितायां सामानाधिकरण्यसंबंधेन च महानसीयत्वादेस्तदवच्छेद
कतायामवच्छेदकत्वे गौरवान्महानसीयत्वादिसहितस्य वह्नित्वादेः प्रतियोगितायामिवावच्छेदकत्वं तु उक्तप्रतीतिस्तत्कं वृत्ती
वादिमान्नास्तीति प्रतीतिवदवच्छेदकत्वांशे भ्रमरूपैवेत्युच्यते तदा यत्र सामानाधिकरण्यसंबंधेन महानसीयत्वादिविशिष्ट
स्य वह्नित्वादेः साध्यतावच्छेदकता तत्र स्थलीयव्यभिचारिणि धूमादिहेतावतिव्याप्तिरिति स्वविशिष्टसंबंधिनिष्ठत्वादिनाति
वीच्य पारिभाषिकमेवावच्छेदकत्वं निवेशनीयं तच्च तत्तल्लक्षणघटकस्य स्वपदार्थस्य निवेशसत्त्वादृशत्वं एवं च महानसी
यत्वादिविशिष्टस्य वह्नित्वादेस्तत्र स्वपदेनोपादानसंभवात् विशिष्टवह्नित्वत्वादिकमेव पारिभाषिकमवच्छेदकत्वं तत्तदव
च्छिन्नमेदस्य च शुद्धवह्नित्वादावपि दुर्घटत्तयाचावच्छेदकं यादृशं संता दृशाविषयकप्रतीतिविषयत्वमेवानवच्छेदकत्व
पदेन विवक्षणीयं तथा सति सर्वत्रैव दंडादेः स्वरूपतो भानात्तन्नादिविशेषणविशिष्टस्यैवावच्छेदकत्वं तत्रैतस्य स्व
देनोपादेयतया तद्विशिष्टाविषयकप्रतीतिविषयत्वस्य दंडत्वादिविशिष्टस्य तु घटत्वाद्व्यापकतावच्छेदकत्वमव्याहृतमेवे

७ तिचेत् न पारिभाषिकस्वत्वघटितत्वेनाननुगतस्याभावकूटज्ञानासंभवेन प्रतियोगिताया: स्वरूपसंबंधरूपावच्छेदकत्वस्यागत्यागु
रुधर्मसाधारणस्यांगीकृत्याप्युपलक्षणतदेव हि निवेश्यमिति एवंच सामानाधिकरण्यसंबंधेन महानसीयत्वादिविशिष्टरणा:
वच्छिन्नवह्नित्वादेर्हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वेपि महानसीयत्वादिविशिष्टनिरूपितसमवायादेरेव प्रतियोगिता
वच्छेदकताघटकसंबंधत्वं तन्नोपेयते शुद्धसमवायादिनावह्नित्वादेरतिप्रसक्तत्वात् शुद्धसमवायादेस्तदवच्छेदकत्वाव
च्छेदकसंबंधत्वे महानसीयत्वादिसामानाधिकरण्योपलक्षितवह्नित्वावच्छिन्नाभावात्तद्विशिष्टवह्नित्वावच्छिन्नाभा
वस्यैवैलक्षण्यानुपपत्तेश्च तथाच साध्यतावच्छेदकताघटकशुद्धसमवायादिनाप्येवं वह्नित्वादेरनवच्छेदकत्वेन तुल्ये
भंनच महानसीयत्वादिसामानाधिकरण्यस्यापत्रोपलक्षणतया तस्यावच्छेदककोटौ न प्रवेश: यत्र विशेषणत्वं तत्र
तत्प्रवेशद्रूप्येवैलक्षण्यमिति वाच्यं उपलक्षणीभवत्तद्व्यावच्छिन्नप्रतियोगितावच्छेदकताकाभावबुद्धावपि तत्र राम०
दूयस्य प्रतियोगितावच्छेदकांशे प्रकारतया भानात् तत्राप्यवच्छेदकतावच्छेदकत्वभानस्यावश्यकतयाऽवच्छेदकशरी ७

रांशे प्रवेशद्वयोपलक्षणतायाउपलक्षणविधयाऽवच्छेदके तत्रासंभवात् यदुपलक्षितनिरूपितसमवायादेरवच्छेदकताघ
टकसंबंधत्वं तस्योपलक्षणतयाऽवच्छेदकत्वं यद्विशिष्टनिरूपितसमवायादेरवच्छेदकताघटकसंबंधत्वं तस्य विशेषणता
विधयाऽवच्छेदकत्वमित्यस्यैववाविशेषत्वात् एकत्वप्रागभावविशिष्टघटादे: संयोगादिसंबंधेनाभावस्य प्रतियोगि
तायामप्रसिद्धतया विशिष्टनिरूपितसंयोगादेरवच्छेदकत्वासंभवेनागत्या विशेषणताविधया प्रतियोगितावच्छेदकत्व
स्यान्यथैव वैलक्षण्यस्योपपादनीयतया शुद्धसमवायादेरेव विशिष्टसत्ताद्यभावप्रतियोगितावच्छेदकसंबंधतया तादृ
शाभावस्य तादृशसंबंधेन प्रतियोगिसमानाधिकरणतया दीधितिकृतां प्रतियोगितावच्छेदकविशिष्टसामानाधिक
रण्यपर्यन्तनिवेशस्याव्याप्तिसंगति: माभूद्वा विशिष्टनिरूपितसमवायत्वादिना प्रतियोगितावच्छेदकताघटकसंबंधता
तथापि महानसीयत्वादिसामानाधिकरण्योपलक्षितवह्नित्वादेस्तद्विशिष्टवह्नित्वादेश्च प्रतियोगितावच्छेदकतयो: वैल
क्षण्यं स्याधातद्धर्मावच्छिन्नविशेष्यपर्याप्तत्वाच्चविशेष्यविशेषणाभावापन्नयोर्धर्मयोर्धर्मिणोर्द्वयो: पर्याप्तत्वेनवै

त्येवतूपपादनीयं तावतापि च्छ्रखंडस्यासुद्ववह्नित्वादेर्हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वमुपपद्यते धर्म्मान्तरोपलक्षि
८ तवह्नित्वाद्यवच्छिन्नाभावस्य धूमादिमत्यवृत्तेर्विशिष्टवह्नित्वाद्यवच्छिन्नाभावप्रतियोगितावच्छेदकतायाश्च विशेषणांतर्भा
वेनैवपर्य्याप्तेः तन्नोपलक्षितदंडाद्यवच्छिन्नप्रतियोगिताक हेतुमन्निष्ठाभावप्रति योगितावच्छेदकता च तन्नावच्छिन्नासुद्ध
विशिष्ट एव पर्य्याप्ता साध्यतावच्छेदकताघटकसुद्धसंयोगसंबंधावच्छिन्ना चेति तादृशसंबंधेन दंडादेस्तादृशाभावप्रतियो
गितानवच्छेदकत्वं दुरुपपादमिति सामंजस्यमिति वदंति वस्तुतो गुरुधर्म्मस्य प्रतियोगितानवच्छेदकत्वे पारिभाषिकावच्छे
दकत्वं निवेशनीयं तच्छरीरे पादृशं स्वं निविष्टं तादृशधर्मभेदनिवेशोपि वह्नित्वादौ विशिष्टवह्नित्वादिभेदासत्वेन तादृशताद्
शधर्म्मविषयकप्रतीति विषयत्वं निवेशनीयमिति गौरवम् अतः प्रतियोगितावच्छेदकं यादृशयादृशरूपं स्वविशिष्टसंबंधिनि
ष्ठाभावप्रतियोगितावच्छेदकतत्तद्रूपं तत्तदतिरिक्तवृत्तित्वमेवानवच्छेदकत्वं तेन विवक्षणीयं तथा च सर्वासामेव दंडादि रम० ८
व्यक्तीनां हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतया क्वचिदपि दंडादिव्यक्तेर्न यावत्प्रतियोगितावच्छेदका

तिरिक्तवृत्तित्वं स्वस्य स्वातिरिक्तवृत्तित्वविरहादित्यखंडधर्मस्य व्यापकतावच्छेदकत्वानुसरणं एतच्चैकोक्त्यभिप्रायेणाय
थाश्रुतमूललक्षणमुपपादयितुं सार्वभौमप्रभृतिमतमनुसृत्य एकोक्त्यनादरे त्वनुगतरूपेण नानाव्यक्तिविधेयता
वच्छेदकानुमित्यौपयिकव्याप्तिर्यद्रूपावच्छिन्नमनवच्छेदकं यद्रूपं वा न्यवच्छेदकतानवच्छेदकं तद्रूपविशिष्टावच्छिन्नसामा
नाधिकरण्यं तद्रूपविशिष्टावच्छिन्ननिरूपिता व्याप्तिरित्येवंरीत्या निर्वचनीया तथा सति दंडसंयोगादिहेतुकापि दंडिमान
य मित्याकारिकानुमितिर्विशेषदर्शिनामपि निर्वहति एवमेकोक्त्या प्रतियोगिताधर्मिकोभयाभावघटितायाः ग्रंथको
रेणास्वरसमुपदर्शनीयाया व्याप्तेरपि दंडत्वादिविशिष्टदंडाद्यवच्छिन्ननिरूपितत्व निवद्धिः हेतुसमानाधिकरणविशेषाभा
वप्रतियोगितायां दंडत्वपृथिवीत्वव्याप्यजातित्वादिविशिष्टावच्छेद्यत्वाभावस्याव्याहतत्वात् दंडादिसामान्याभावप्रतियो
गितायामेव तद्धर्मविशिष्टनिरूपितविलक्षणावच्छेद्यत्वसत्वादिति ध्येयं॥ ॥इत्थं चेति हेतुतावच्छेदकोपलक्षितहेतु
सामानाधिकरण्यस्याधारणरूपमुपेक्ष्य विशिष्टसामानाधिकरण्यत्वेन सामानाधिकरण्यनिवेशनेन चेत्यर्थः नाव्याप्ति

९ पितेन विशिष्टसत्तात्वरूपहेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञानजन्यानुमित्यौपयिकव्याप्तिनिर्वाह इत्यर्थः तेन विशि
ष्टसत्तात्वोपलक्षितहेतुमत्ताज्ञानजन्यानुमित्यौपयिकव्याप्तौ तु उपलक्षितहेतुसामानाधिकरण्यं निवेश्यते अत्र तो द्रव्यत्वाव
भावेत्ताद्दशहेतुसामानाधिकरण्यसत्त्वात्ताद्दशहेतोर्न द्रव्यत्वाद्व्याप्तिरित्यभ्रांत्ता नं गुणादौ विशिष्टसत्तात्वाद्युपलक्षि
तहेतुमत्ताज्ञानसंभवे तत्र न द्रव्यत्वाद्यनुमित्यापत्तिः यत्र घटपटत्वव्याप्तिसंयोगत्वादिना हेतुता घटपटान्यतरत्वं च साध्यं त
त्रोभयवृत्तित्वविशिष्टाधिकरणाप्रसिद्ध्या हेतुतावच्छेदकोपलक्षितहेतुसामानाधिकरण्यगर्भव्याप्त्यंतरं स्वीकरणीयं अ
न्यथा तद्धेतुकतत्साध्यकानुमित्युच्छेदप्रसंगात् ईदृशव्याप्त्यंतरानभ्युपगमे साद्दशहेतुकानुमितिरप्युच्छिद्येतेत्यन्यदेतदस
मानाधिकरण्यसाहित्यतद्वृत्तित्वरूपसादृश्यघटितविविशिष्टाधिकरणाप्रसिद्ध्या विशिष्टाविधकरणतागर्भव्याप्त्यसंभवा राम० ९
त् अथैवं विशिष्टवैशिष्ट्यावगाहिज्ञाने विशिष्टनिरूपितसमवायस्यैव संबंधतया तेन संबंधेन व्याप्तिर्हेतुतावच्छेदकसंबंधे
न हेतुमत्वस्यावैविवक्षणीयतयैव निर्वहतीति कथमत्र विशिष्टपदोपादानं न च विशिष्टवैशिष्ट्यस्थले विशिष्टनिरूपितस

मवायत्वादिना न विशेषणासंबंधता अपि तु शुद्धस्यैव समवायादेर्विशेषणासंबंधः स्वविशिष्टनिरूपितसमवायादिस्तुवि
शेषणातावच्छेदकसंबंध इति मताभिप्रायेण तथा चोक्तस्थलेपि हेतुतावच्छेदकसंबंधः शुद्धसमवाय एवेति हेतुतावच्छेद
कसंबंधमात्रविवक्षया नप्रतीकार इति वाच्यं हेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञाने हेतुतावच्छेदकस्य यत्के परंपरा
संबंधभाननियमे व्यापकताशरीरघटकाभावाधिकरणोपितदीयतया ताद्दशसंबंधस्य निवेशितत्वात्ततएव हेतुतःप
क्षे साध्यानुमितिनिर्वाहे विशिष्टसत्तात्वेन सत्तादे द्रव्यत्वादिव्याप्तिस्वीकारस्य निरर्थकतायात्तात् न च दर्शितरीत्या विशि
ष्टव्यापकताग्रहस्य विशेषणव्यापकतावगाहित्वेपि विशिष्टापक्षधर्मताग्रहस्य विशेषणे तदवगाहित्वेपि च विशिष्टहेतु
कपरामर्शस्य विशेषणेसाध्यसामानाधिकरण्यावगाहित्वानियमात् विशेषणाद्धेतुकानुमितिसामग्र्या विशिष्टहेतुकानुमि
तिपूर्वमावश्यकत्वेतिवाच्यं साध्ये विशिष्टहेतोर्व्यापकताग्रहेपि विशिष्टहेतौ साध्यविरोधग्रह सत्वेऽनुमित्यनुत्पत्त्या
विशिष्टहेतुकस्थले विशिष्टाधिकरणाघटितहेतुसाध्यसामानाधिकरण्यविषयकस्यैव परामर्शस्यानुमितिहेतुता

१० यावाच्यत्वात् अन्यथा विरोधस्य ज्ञानकज्ञानाविरोधितया हेत्वाभासत्वस्य दुर्घटताप्रसंगात् साध्यवति विशिष्टहेत्वच
विकरणत्वभाने च विशेषणापरंपरासंबंधस्यापि तत्र भानत्तियमेन विशिष्टहेतुकपरामर्शस्य नियमतो विशेषणेऽपि
साध्यसामानाधिकरण्यावगाहित्वात् मैवं विशिष्टनिरूपितव्यापकताशरीरे विशेषणस्य धर्मिपारतंत्र्येणावचि
च्छिन्नाधिकरणविशेषणतया प्रवेशो न तु स्वातंत्र्येण तथा च तदग्रहे न विशेषणव्यापकतावगाहित्वनियमो नि
र्वहतीति विशेषणनिरूपितव्यापकतायास्तद्वन्निष्ठाभावप्रतियोगितावच्छेदकत्वपर्याप्तप्रतियोगितावच्छेदकता
काभावघटितत्वात् विशिष्टवन्निष्ठाभावप्रतियोगितावच्छेदकत्वरूपप्रतियोग्युपरागेणाभावभाने च विशिष्टवत्त्वा
न्तर्गतविशेष्यवत्त्वपरित्यागेन विशेषणवन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्यैव प्रतियोगितावच्छेदकपर्याप्तिभाना
संभवात् अभावप्रतियोगिप्रकारघटकस्य उपलक्षणतया भानानुपगमात् नच परंपरासंबंधेन विशेषणनिष्ठ राम० १०
व्याप्यवगाहिपरामर्शनिष्ठकारणताया उभयवादिसिद्धत्वात् विशिष्टहेतुकपरामर्शान्तरकारणत्वाकल्पनप्रयुक्तला

घवानुरोधेन विशिष्टस्य व्याप्तिग्रहस्थले अधिकरणे स्वातंत्र्येण विशेषणवत्त्वभानमुपगम्य विशेषणेऽपि व्याप्तिभानं कल्प
नीयमिति वाच्यं शाब्दधीद्भिन्ना विशिष्टवत्त्वगर्भव्याप्तिग्रहे स्वातंत्र्येण विशेषणगर्भव्याप्तिभानानियमात् तादृशव्या
प्तिबोधकशब्दस्य स्वातंत्र्येण विशेषणवत्त्वाभासकत्वात् अथ तत्र तदुत्तरं विशेषणे मानसव्याप्तिग्रह एवानुमित्यर्थं
कल्प्यते तत्कारणतायाः क्लृप्तत्वादिति चेन्न एवं सति दंडाद्युपलक्षिततद्धर्मिहेतुकानुमितेर्विलयप्रसंगात् तद्धेतु
कव्याप्तिग्रहस्थले परंपरासंबंधेनोपस्थिततद्दंडादौ व्याप्तिग्रहस्य कल्पनसंभवात् स्वातंत्र्येण सकलपरंपरासंबं
धघटितसकलविशेषणवत्त्वग्रहस्याप्रामाणिकतया विशेषणहेतुकपरामर्शस्य कारणतायाः क्लृप्तत्वानि
यमाच्च ननु वह्निसंयोगिसंयोगाद्यात्मकसाध्यसामानाधिकरण्यस्य व्याप्तित्वे एकैव वह्निसाध्यव्याप्तिरिति मूलग्रंथ
विरोधः महानसपर्वतादिनिष्ठधूमादिगतवह्निसंयोगिसंयोगादेरैक्यासंभवात् इत्यतस्त्वाह सामानाधिकरण्य
क्तीनामिति भेदेपीति अधिकरणभेदेनेत्यादिः निरूपकतावच्छेदकं वह्नित्वादिरूपसाध्यतावच्छेदकं अधि

करणतावच्छेदकं धूमत्वादिरूपहेतुतावच्छेदकं तदैक्यात् साध्यहेतुभेदेप्यभेदेन तदभेदतात्पर्येणैक्यं भाक्तमैक्यव्यव
११ हारः ननु तद्रूपायातद्व्यवहारसमर्थनमसंगतं सामान्यप्रत्यासत्त्यभावपक्षे विशिष्टपरामर्शनिर्वाहार्थं व्याप्त्यैक्यकथना
त्तत्स्विवोढव्यस्य च सामानाधिकरण्यस्य व्याप्तित्वे धूमत्वादेरेकोपि पक्षीय धूमादिनिष्ठसामानाधिकरण्यस्य सामान्यप्रत्या
सत्तिं विना पूर्वग्रहासंभवेन तत्स्मरणासंभवात् पक्षीय धूमे तदुपनयासंभवेनायोगात् अतोऽतिप्रसंगेन च धूमादिव्याप
कवह्न्यादिसामानाधिकरण्यमात्रस्य व्याप्तित्वासंभवात् धूमत्वादिरूपहेतुतावच्छेदकस्य द्विधा व्याप्तिशरीरप्रवेशस्या
वश्यकत्वं प्रदर्शयन् व्याप्तेर्भेदमभेदं च दर्शयति वस्तुतस्त्वित्यादिना प्रथमयत्नप्रदर्शनं तत्पक्षे धूमत्वत्वाद्यप्रवेशा
ल्लाघवेन सामान्यप्रत्यासत्तिपक्षे तज्ज्ञानस्यैवानुमितिहेतुत्वमिति सूचनाय रासभादिसाधारण्यादिति तत्साधार
णं च भ्रमं विनापि रासभादिलिंगकवह्न्याद्यनुमानापत्तिरिति भावः अव्यापकतया प्रविष्टहेतुतावच्छेदकधर्मिता राम०
वच्छेदकसामानाधिकरण्यप्रकारकज्ञानस्यैवानुमितिहेतुत्वोपगमात्तावन्मतिप्रसंगः धूमत्वादिप्रकारेणाभास ११

मतिरासभादौ साध्यसामानाधिकरण्यग्रहस्य धूमत्वाद्यंशे भ्रमत्वनियमात् वह्न्यभावाद्धूमत्वादिमन्निष्ठवह्न्यादिसामाना
धिकरण्यस्य व्याप्तित्वेपि तद्धर्मितावच्छेदकतया तद्धेतुतावच्छेदकविशिष्टवत्ताज्ञानस्य हेतुतायामवच्छेद्यपेयत्वात् अन्य
था विशिष्टसत्तादिव्यापकद्रव्यत्वादिनिरूपितविशिष्टसत्तादिनिष्ठसामानाधिकरण्योपलक्षितवत्ताज्ञानाद्गुणारूपपक्षेऽ
भ्रांतस्य द्रव्यत्वाद्यनुमानापत्तेः साध्यसामानाधिकरण्यविशिष्टवत्वस्य पक्षे साध्यनिश्चयं विनाऽदुर्निश्चेयतया तदुपलक्षि
तवत्तानिश्चयस्याप्यनुमितिहेतुतायाऽवश्यंतव्यत्वात् केवलसामानाधिकरण्यप्रकारेण पक्षधर्मताज्ञानस्यानुमिति
हेतुत्वे धूमाभाववाच्च पक्षे इत्यसिद्धिग्रहदशायामपि साध्ये धूमादिव्यापकताज्ञानादनुमित्यापत्तेश्च अत्र समानप्रकार
कतया धूमाभाववाच्च पक्ष इत्यादिबुद्धे धूमवृत्तिसामानाधिकरण्यवद्यावत्तपक्ष इत्यादिज्ञानाविरोधित्वादिति चेत् सत्यं
धूमत्वादिमति सामानाधिकरण्यमित्यस्य धूमत्वादिविशिष्टे विशेषणतापन्नसामानाधिकरण्यमित्यर्थः ननु धूमादि
वृत्तित्वविशेषितं सामानाधिकरण्यमिति तथा च एकधर्मिविशेषणतायत्र धूमत्वादिरूपहेतुतावच्छेदकसामानाधि

करणोभयंव्याप्तिरितिपर्यवसितंकारणंच धूमव्यापकवह्निसमानाधिकरणधूमवान्पर्वतइत्यादिरेवपरामर्शः तावतैवो
१२ क्तोभयस्यहेतुविशेषणतयाऽनुमितिजनकज्ञानविषयत्वरूपव्याप्तित्वनिर्वाहः द्वितीयपक्षेचधूम व्यापकवह्निसमाना
धिकरणवृत्तिधूमत्वद्धूमवान्पर्वतइतिज्ञानंहेतुः ननुस्वरूपतोधूमत्वाप्रकारकंतादृशधूमत्ववद्वान्पक्षइत्या कारकं ता
दृशज्ञानस्यधूमाभाववान्पक्षइत्याकारकासिद्धिज्ञानाप्रतिबध्यत्वात् एतन्मतेचहेतुतावच्छेदकवृत्त्यसाधारणधर्माव
च्छिन्नेसाध्यसमानाधिकरणवृत्तित्वमेवविरोधः ननुहेतुतावच्छेदकावच्छिन्नेसाध्यासामानाधिकरण्यं उपदर्शितज्ञानस्य
हेतुतावच्छेदकंधर्मितावच्छेदकीकृत्यसाध्यसामानाधिकरण्यानवगाहितयातथाविधविरोधज्ञानाप्रतिबध्यत्वात् यदि
चविरोधस्यानुमितिं प्रतिसाध्यादिदोषितयाहेत्वाभासत्वमुपपादयितुंशक्यतेतदासमानाधिकरणवृत्तित्वांशेनिर्धर्मिता
वच्छेदकंसमानाधिकरणवृत्तिमद्धूमवान्पर्वतइत्येतादृशमपिज्ञानंहेतुःस्यादेवतत्र अन्यथाधूमवत्त्वादिविषयतायाः राम०
कारणतावच्छेदककुक्षौप्रवेशेगौरवात् सामानाधिकरण्यप्रकारकत्वापेक्षयासमानाधिकरणवृत्तिप्रकारकत्वस्यगुरु १२

त्वेपिसामान्यस्याप्रत्यासत्तित्वेविशिष्टपरामर्शनिर्वाहानुरोधेनतेनरूपेणहेतुतायाअगत्योपगमात् अधाहेतुतावच्छेदक
धर्मसहितसाध्यसामानाधिकरण्यरूपाभिन्नेति प्रतिधूमादिकंभिन्नेत्यादिः द्वितीयासाध्यसमानाधिकरणवृत्तिहेतुतावच्छेद
करूपा अभिन्नासर्वधूमादिसाधारणी अनुगतरूपावच्छिन्ननानाव्यक्तिदण्डादिविशिष्टहेतुकस्थलेपिपरंपरासंबंधेन
दण्डत्वादौघटत्वादिधर्मस्यहेतुतावच्छेदकत्वोपपन्नत्वइतिभावः यद्यपिसाध्यसामानाधिकरण्यावच्छेदकरूपवत्त्वमात्रस्या
भिप्रायेणापिएकैकव्यक्तिन्यायादिरेवः संगच्छते तथापिस्वरूपसंबंधरूपावच्छेदकत्व प्रवेशस्यस्वरसउन्नीयततयास्वविशि
ष्टाधिकरणवृत्तिपदस्यसाध्यसमानाधिकरणकत्वरूपपारिभाषिकावच्छेदकत्वस्यैवचविवक्षणीयतयातदपेक्षयातादृ
शीव्याप्तिर्गुरुशरीरेतिकथंचिदीदृशव्याप्तेरैक्येपिपयत्तिसंभवेनतज्ज्ञानमनुमितिहेतुरित्येतादृशव्याप्तेरैक्यमुपपादितं॥ ॥
भिन्नादिमत्तमवलंब्यप्रतियोग्यसमानाधिकरणपदप्रयोजनमाह अयंकपिसंयोगीति अत्रैतद्वृक्षत्वादेरव्याप्यवृत्तिक
पिसंयोगाभावादिव्याप्यतोपगमेकपिसंयोगाद्यवच्छेदकमूलादेःपक्षतावच्छेदकत्वेनतदवच्छेदेनापिएतद्वृक्षादौकपिसंयोगादेः

१३ सिद्धिप्रसंगः नचेष्टापत्तिः सोष्मकगपरामर्शस्य भ्रमानुमित्यजनकत्वनियमात् नचतदवच्छेदेन हेतुमत्ताज्ञानस्यतद
वच्छेदेन साध्यानुमितिहेतुत्वादेतद्वृक्षत्वादिरूपव्याप्यवृत्तिहेतोश्च किंचिदवच्छेदेनावृत्तेर्नातिप्रसंगइतिवाच्यं यदि
स्वरूपसंबंधरूपावच्छेदकत्वावगाहिन्यामनुमितावपितादृशहेतुमत्ताज्ञानत्वेन हेतुत्वमुपेयते तदापितुल्ययुक्त्याएत
द्वृक्षत्वादेरिवमूलाद्यवच्छिन्नसंयोगादिविशेषव्यापिकपिसंयोगादिव्याप्यतयातेनहेतुनामूलाद्यवच्छेदेनकपिसंयो
गाद्यनुमितेर्निष्प्रत्यूहत्वादितिचेत् अत्रोपाध्यायाः साध्यस्यपक्षतावच्छेदकसामानाधिकरण्यंविनाव्याप्यस्यपक्ष
धर्मत्वमनुपपन्नमितिपक्षधर्मताबलात्पक्षतावच्छेदकसामानाधिकरण्यमिवसाध्येसिद्ध्यतिननुतदवच्छेदत्वम
पिः प्रमाणाभावादितितादृशानुमितेरप्रामाणिकतयातत्रपरामर्शहेतुताकल्पनमेवनास्तीतिनतदापत्तिरितिस राम०
मादधिरेमिश्रादपसक्तवाधानवतारेमूलाद्यवच्छेदेनकपिसंयोगादिसिद्धिरिष्टैवेतिवदंति एतत्तात्पर्यंग्रंथकृत्ताहेत्वा १३
भासेवक्ष्यति प्राचीनमतंदूषयितुमुपन्यस्यति यत्विमितितत्र असमानाधिकरणांतं ननुद्रव्यसंयोगत्वाव

च्छिन्नाभावसत्वएवावच्छेदकगर्भोक्तलक्षणाव्याप्तिः प्रसज्यतेतदेवतु विरोधात् वृक्षादौचसंयोगानवच्छेदकभा
गाप्रसिद्ध्या तत्सामान्याभावावच्छेदकस्यदुर्लभत्वान्मूलादीनांसर्वेषामेवतत्तत्संयोगावच्छेदित्वतआह संयोगसे
तिवृक्षत्वावच्छेदेनेति वृक्षत्वादेः प्रत्येकसकलसंयोगस्यातिप्रसक्तत्वात्तस्यसंयोगावच्छेदकत्वासंभवात् आका
ग्रादिसंयोगस्याप्यव्याप्यवृत्तेरेकस्याभावाद्वृक्षत्वेनतत्संयोगानतिप्रसक्तत्वासंभवादितिभावः ननुवृक्षत्वाद
वच्छेदेनवृक्षादौसंयोगसामान्याभावसत्वेवृक्षःसंयोगोनास्तीत्यादिप्रत्यक्षापत्तिरित्यतआह तत्रचेति अतींद्रिय
स्येति अतींद्रियप्रतियोगिकतयासंयोगसामान्याभावस्यातींद्रियत्वमितिभावः सामान्याभावप्रत्यक्षेयावद्व्यक्ति
योगियोग्यत्वस्यतंत्रत्वादितिभावः प्रतियोगितावच्छेदकयोग्यत्वस्यतंत्रत्वेत्वाहः परितइति ननुसंयोगसामान्या
भावस्यवृक्षेसत्वेमःत्वाद्भूतलपदमात्रसमवेतसंयोगसामान्याभावोऽप्यवश्यकःतद्व्यापकधर्मावच्छिन्नाभावस्य
तद्धर्मावच्छिन्नाभावनियतत्वादितियोग्यमात्रप्रतियोगिकोयमभावः कथंनसाक्षात्क्रियतइत्यतआह परितः

ति प्रतियोग्युपलब्धेर्विशिष्टाभावच्छेदेनाभावग्रहं तां प्रति विरोधित्वात्समुदुक्तप्रतिबंधकत्वं न संभवतीति तस्य दोषत्वकथनं
१४ दोषविधया प्रतिबंधकत्वलाभाय अथ प्रकृते संयोगाविषयकमेवोपनीतभानात्मकं वृक्षादिरूपाधिकरणज्ञानं तद
ग्रिमक्षणे वृक्षादौ तादृशसंयोगसामान्याभावग्रहप्रसंगः तादृशदोषस्य प्राक्सत्त्वात् एवं वृक्षे न संयोग इत्यादिलौकि
कप्रत्यक्षस्यालीकतया तत्र तादृशदोषस्य प्रतिबंधकत्वकल्पनमेवाशक्यमिति चेन्न वृक्षादौ संयोगसामान्याभावलौ
किकप्रत्यक्षस्याप्रसिद्धत्वेऽपि गुणादौ तत्प्रसिद्ध्या आधिकरणीयविषयतासंबंधेन संयोगाभावलौकिकप्रत्यक्षत्वावच्छि
न्नं प्रति स्वविषयसंयोगवत्त्वसंबंधेन प्रत्यक्षत्वेन प्रतिबंधकत्वकल्पनात् सर्वत्र द्रव्ये ततः संयोगविषयकेश्वरीयप्रत्य
क्षेऽपि सर्वदा तादृशसंबंधेन सत्त्वेनातिप्रसंगविरहात् इदमापाततः द्रव्यरूपाधिकरणविषयकसंयोगाभावविष
यकप्रत्यक्षस्य कदाचिदप्यनुदयेन तादृशप्रत्यक्षसामग्र्या एवाकल्पनेनापादकाभावादेवातिप्रसंगवारणासंभ राम०
वे तादृशप्रतिबंधकताकल्पनस्यायुक्तत्वात् कथंचिदापत्तिसंभवेऽपि तादात्म्यसंबंधेन द्रव्यत्वेनैव तादृशसंबंधेन सं १४

योगाभावलौकिकप्रत्यक्षं प्रति प्रतिबंधकत्वौचित्यात् मानाभावादिति लौकिकप्रत्यक्षस्य योग्यानुपलब्धिविर
हेणासंभवादुपनीतभानस्य संयोगाभावो वृक्षे वृत्तिरित्याकारकस्य विपरीतविषयकस्याप्युपनयवशेन संभवाद्विनि
गमनाविरहेण एकतरस्याप्रामाण्यासिद्धेः शब्दस्यालोकत्वासिध्या तदव्यवस्थापकत्वात् अनुमानस्य चालिं
गाभावेनासंभवादिति भावः ननु वृक्षादौ यावत्संयोगविशेषाभावानामनुभयसिद्धतया तत एव हेतोस्तत्राप्रत्यक्षस्या
पि तत्सामान्याभावस्यासिद्धिर्निष्प्रत्यूहैवेति शंकां निरस्यति नचेत्यादिना यः संयोगी यद्यावद्विशेषाभाववान् स सं
योगसामान्याभाववानिति व्याप्तेरसोढार्थविशेषणतया अप्रयोजकत्वादिदोषेणानिराकरणीयतया प्रथमतः सामा
न्यमुखीं व्याप्तिमनुमानोपष्टंभकतया दर्शयति योपदीयेति यद्धर्माश्रयस्य यावद्विशेषाभाववान् यः स तद्धर्मावच्छि
न्नाभाववानित्यर्थः संयोगत्वाश्रयस्य विशेषधर्मावच्छिन्नाभावकूटं वृक्षादौ वर्तत इति तत्रोक्तव्याप्तेः संयोगत्वाव
च्छिन्नाभावसिद्धिः प्रतियोगिनोपलक्षितत्वेन निवेशे संयोगवृत्तिकपि संयोगत्वादिरूपसामान्यधर्मावच्छिन्नाभावमा

२५ दायसिद्धसाधनं स्यादिति धर्मस्य यत्वतत्वेनोपादानं संयोगादिसंबंधावच्छिन्नसंयोगत्वाद्यवच्छिन्नाभावमादाय सिद्धसाधनवार
णाय समवायसंबंधावच्छिन्नाभाव एव साधनीयः स्वत्पसंबंधावच्छिन्नविशेषाभावकूटस्य तत्संबंधावच्छिन्नाभावव्यभिचा
रित्वे समवायसंबंधावच्छिन्नविशेषाभावकूटस्यापि तत्संबंधावच्छिन्नसामान्याभावव्यभिचारित्वं तुल्यन्यायेन संभाव्येतेति
प्रतियोगितावच्छेदकसंबंधानामपि यत्वतत्वेन व्याप्त्यावत्तभावः स्वतस्त्वसमवायसंबंधावच्छिन्नयावद्विशेषाभावहेतुना तत्
संबंधावच्छिन्नसंयोगसामान्याभावसिद्धिः तद्धर्मि[illegible]पविशेषाभावस्व उभयावृत्तितद्धर्मसमानाधिकरणधर्मावच्छिन्नाभावः स्व
तः संयोगत्वाद्यपेक्षया द्रव्यवृत्तिसंयोगत्वादेर्विशेषधर्मत्वेपि संयोगसामान्याभावं द्रव्यत्वादावनभ्युपगच्छतां स्ववयवविशेषद्रव्या
वच्छेदकदुर्भिक्षेरा द्रव्यवृत्तिसंयोगत्वाद्यवच्छिन्नाभावस्य द्रव्यत्वादावनभ्युपगमेपि च न संदिग्धासिद्धिः द्रव्यवृत्तिसंयोगत्वादीनामु
भयवृत्तित्वेन तदवच्छिन्नाभावव्यावृत्तेः न च हेतावुभयावृत्तित्वविशेषणस्यासिद्धिवारकत्वेपि व्यभिचारवारकत्वं यावद्वैयर्थ्यं पा राम०
वत्वविशिष्टस्य धीविशेषविषयत्वरूपस्य पारिभाषिकमेव तादृश्या धर्मावच्छिन्नप्रतियोगिताकत्वं न तु हेतुप्रविष्टमिति तु न सत् तथा २५

सतिपत् पदार्थस्य हेतुसाध्यशरीरप्रवेशेन सामान्यव्याप्तित्वानुपपत्तेरिति वाच्यं यावत्पदस्य व्यापकत्वार्थकत्वे यत्तद्धर्मसमा
नाधिकरणोभयावृत्तिधर्मावच्छिन्नाभावत्वनिरूपितायाआधेयत्वसंबंधावच्छिन्नव्यापकताया एव हेतुतया विशेषधर्मव्यापकत्वा
घटकाभावांतरस्येव च सामान्यधर्मव्यापकताघटकत्वे यावद्वैयर्थ्यानवकाशात् न च तादृशाभावत्वव्यापकत्वं तादृशाभावनिष्ठ
भेदप्रतियोगितायां आधेयतासंबंधेनानवच्छेदकत्वं एवं च संयोगविशेषाभावानां सर्वेषामेव समानाधिकरणवृत्तितया तन्निष्ठ
भेदप्रतियोगितायामाधेयसंबंधेनावच्छेदकत्वमधिकरणाप्रसिद्धमिति तदवच्छेदकत्वरूपहेत्वप्रसिद्धिरिति वाच्यं आधेय
त्वसंबंधावच्छिन्नावच्छेदकतासंबंधेन प्रतियोगितायाश्चाभावस्यैव प्रतियोगितावच्छेदकत्वस्यातो विवेशनीयत्वात् उक्तस्य
लेव्यधिकरणतादृशं संबंधावच्छिन्नाभावप्रसिद्धिसत्वात् यद्धर्मसमानाधिकरणोत्पन्नप्रतियोगितावच्छेदकत्वेन धर्मो वि
शेषणीयः नेत्वकुसुमीवादिमत्त्वादिव्याप्यधर्मावच्छिन्नप्रतियोगिताकयावदभाववत्त्वं तद्धर्मावच्छिन्नाभावाप्रसिद्धत्वात्
ष्टाभाववत्वासंभवेपि न क्षतिः न च भेदप्रतियोगितावच्छेदकवाच्यत्वघटाद्यन्यतरत्वादिव्याप्यधर्मावच्छिन्नसंयोगादिसंबंधा

वच्छिन्नप्रतियोगिताकयावदभाववत्तत्तद्रूपावच्छिन्नतत्संबंधावच्छिन्नप्रतियोगिताकाभाववत्त्वासंभवाद्व्यभिचारः वाच्यत्वादेः
१६ संयोगादिनावृत्तित्वात्तेन संबंधेन घटादेर्वृत्ताहृत्याभावविशिष्टितया घटत्वादेरेव तत्तत्प्रतियोगितावच्छेदकत्वसंभवेन गुरोर
न्यतरत्वस्य तत्तत्प्रतियोगितानवच्छेदकत्वादिति वाच्यं वाच्यत्वादिसाधारणस्यान्यतरनिष्ठप्रतियोगित्वस्य न्यूनवृत्तिघट
त्वादिनाऽवच्छेदासंभवद्गत्या गुरुणाप्यन्यतरत्वादिनैव तदवच्छेदात् वस्तुतोपि तत्संबंधावच्छिन्नप्रतियोगिताकाभावस्य साध्य
हेतुघटकत्वात् तत्संबंधावच्छिन्नप्रतियोगितावच्छेदकत्वेनैव सामान्यधर्मस्य विशेषणीयतया उक्तसामान्यधर्मस्याभेदप्रति
योगितावच्छेदकत्वेपि संयोगादिसंबंधावच्छिन्नप्रतियोगितानवच्छेदकतया तत्संबंधावच्छिन्नतदवच्छिन्नाभावाप्रसिद्धावपि तद्व्य
भिचारः अतएव भेदप्रतियोगितावच्छेदकतातित्वादिघटकनित्यत्वादेः समवायसंबंधावच्छिन्नप्रतियोगितावच्छेदकगर्भे
निवेशस्य गौरवेणासंभवेपि नऽऽतित्वादिसामान्यधर्मघटितहेतोर्व्यभिचारि नया सामान्यव्याप्तिभंगः वस्तुतस्तु यद्धर्मप्रति राम०
योगितावच्छेदकत्वविशेषणमनुपादेयमेव कंबुग्रीवादिमत्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नाभावनिष्ठभेदप्रतियोगिता १६

त्वस्य घटत्वादिघटितत्वात् तद्धर्मापेक्षया गुरुत्वात् तदवच्छिन्नाभावरूपव्यापकत्वाप्रसिद्धेर्यद्धर्मद्वयेन कंबुग्रीवादिमत्वरूपगुरुधर्मो
पादानस्य गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वपक्षेऽसंभवेन व्यभिचारानवकाशात् अभावीयावविशेषणाप्रवेशात् य
त्किंचिज्ज्ञात्वादियत्तदभाववत्तिज्ञात्वादिसामान्याभावासत्वेपि न सामान्यव्याप्तिभंगः पक्षेपि तद्धर्मघटितसाध्यहेत्वलाभ ननु
गमनेनैकव्याप्तिरिति संयोगसामान्याभावतदीयविशेषाभावकूटयोर्व्याप्तेर्यावत्वादिविशेषणवैयर्थ्यमेव तथापि एतद्दोष
स्यास्य भेदे वाच्यतया यथाकथंचित्संका संगतिः अथ वृक्षादौ यावत्संयोगाभावचत्तमुभयथा घासिद्धं तत्र विभुसंयोगाभावा
वच्छेदकस्यावयवविशेषस्य दिग्विशेषस्य वा दुर्वचत्वात् ध्वंसप्रागभावयोरत्यंताभावविरोधित्वे कालविशेषावच्छेदेनापि तत्र त
दभावासंभवात् तयोस्तद्विरोधितामते द्रव्यसंयोगसामान्याभावस्याप्युत्पत्तिकालावच्छेदेन वृत्ताविरोधात् नच मूलाद्याव
वच्छिन्नविभुसंयोगव्यक्तीनां भेदाद्यन्मूलावच्छेदेनाभावः सुलभ इति वाच्यं तासां भेदस्याप्रामाणिकत्वात् नच नानावयवा
वच्छिन्नसंयोगव्यक्तीनामभेदे तत्तत्संयोगव्यक्तौ तत्तदवच्छेदकव्यक्तीनां तादात्म्यसंबंधेन कारणतायां व्यभिचार इत्यवच्छेदकभे
देन संयोगभेदस्यावश्यकः स्यावश्यकत्वावच्छेदकव्यक्तीनां विशिष्य स्वावच्छिन्नसंयोगव्यक्तिषु हेतुता स्युपगमः अन्यथा मूला

दिमात्रावच्छिन्नमूर्त्तांतरसंयोगानामग्राद्यवच्छेदेनैव तद्वृक्षादिवृत्तिविभुसंयोगानां च वृक्षांतरावयवावच्छेदेनानुत्पत्तिप्रयोजकस्य
१७ दुर्लभत्वापातादिति वाच्यं अव्याप्यवृत्तेरवच्छेदकानभ्युपगमेन वृक्षादौ विभुसंयोगस्याव्याप्यवृत्तितया मूलाद्यवच्छिन्नत्ववि
रहेण तत्र मूलादीनां हेतुताविरहात् अव्याप्यवृत्तेरवच्छेदकोपगमेन तदवच्छेदकस्वरूपतत्तन्निष्ठावच्छेदकताख्यशक्तीनामिव त
त्तदवच्छेदकस्य जन्यतावच्छेदकसंबंधतया मूलाग्राद्यवच्छिन्नविभुसंयोगव्यक्तीनां भेदेपि व्यभिचारानवकाशात् अन्य
यामूलाद्यवच्छिन्नसंयोगस्य दिग्विशेषेप्यवच्छिन्नतया तत्राप्यवच्छेदकतासंबंधेन तत्तत्संयोगव्यक्तीनामुत्पत्त्या मूला
देस्तत्र व्यभिचारदुर्वारत्वात् न च मूलावच्छिन्नसंयोगानां अग्रावच्छिन्नसंयोगादेरिव प्राच्याद्यवच्छिन्नसंयोगादेरपि भेदः
स्वीकर्तुं शक्यते मूले प्राच्यां शरीरतरु संयोग इत्यादिप्रतीत्या एकसंयोगव्यक्तावेव मूलप्राच्याद्यवच्छिन्नत्वावगाहनात्
नचाग्रमूलयोः शरीरसंयोगद्वयस्याद्वत्तया तादृशप्रतीतेरपि संयोगद्वयावगाहित्वमस्मदनुमतमिति वाच्यं यत्र मूलप्र राम०
तीचीमात्रावच्छिन्न एकः शरीरसंयोगः अग्रप्राचीमात्रावच्छिन्नश्च शरीरांतरसंयोगस्तत्र मूले प्राच्यां शरीरसंयोग इति १७

प्रत्ययापत्तेः शरीरतरुसंयोगव्यक्तीनां एकैकासामेव शरीरावयवेन वृक्षावयवेन चावच्छिन्नतया व्यभिचारस्यापि दुर्निवारत्वात् सं
बंधसंकोचमंतरेण दुर्वारत्वाच्च नहि तत्र शरीरावयवावच्छिन्नशरीरतरुसंयोगमूलावच्छिन्नतदुभयसंयोगयोर्भेदसंभवः
तथासति मूलावच्छिन्नवृक्षसंयोगस्य शरीरे चरणावच्छिन्नशरीरसंयोगस्य वृक्षेऽव्याप्यवृत्तितया तत्र तदभावासत्त्वप्रसं
गात् · तत्तदवच्छेदकावच्छिन्ननानासंयोगसाधारणं तत्तदवच्छेदकावच्छिन्नत्वमेव तत्तदवच्छेदकजन्यतावच्छेदकं न तु सं
योगनिष्ठतत्तद्व्यक्तित्वमनंतकार्यकारणभावप्रसंगात् तथा चैकावच्छिन्नसंयोगस्यापरावच्छेदकावच्छिन्नत्वेपि तदव
च्छिन्नत्वविशिष्टस्य तस्य ततोत्पत्तिरिति न व्यभिचारशंकेत्यपि वदंति परे तु संयोगमात्रस्याव्याप्यवृत्तितासिद्धांतानुरोधे
न मूलाद्यवच्छिन्नतरुविभुसंयोगादीनां भेदस्वीकार आवश्यक इति · तदपि न सम्यक् · तादृशसंयोगव्यक्तीनां गगनादौ
दिग्देशविशेषरूपावच्छेदकनियमेनैव तादृशसिद्धांतसंगतेः अत्र वदंति द्रव्यमात्र एव संयोगसामान्याभावस्य प्रामा
णिकतायास्तत्रेत्यादिनोक्तेः नैवेत्यादिना गगनादेर्वैव संयोगसामान्याभावसाधकमनुमानमाशंकितं विभुद्वयसंयो

१८ गानमुपगमेन तत्र यावत्संयोगव्यक्तीनामेव प्रतिनियतदिग्देशावच्छिन्नतया तत्तद्व्यक्तित्वेन तत्र तदभावसत्वेऽविवादात्
नासिद्ध्यवकाशः विभुमात्रे संयोगसामान्याभावसिद्धावपि संयोगिद्रव्यत्वादित्यादौ व्याहतिसंगतेर्वृक्षादावेतत्व्याप्ति
वल्वात्संयोगसामान्याभावासिद्धावपि न क्षतिः प्रतियोग्यनवच्छेदकस्य तदभावावच्छेदकत्वनियमसत्वे च वृक्षत्वावच्छे
देन वृक्षादावपि संयोगसामान्याभावसिद्धेः संभवेन तत्रापि तदभावं साधयतो तादृशनियमवादिनामाशंकां न च प्रतियोग्य
नवच्छेदकवृक्षत्वादेरभावावच्छेदकत्वमित्यादिना निराकरिष्यति पूर्वमपि वृक्षत्वावच्छेदेन संयोगसामान्याभाववृत्ति
रविरोधमात्रेण प्रतियोग्यनवच्छेदकस्याभावावच्छेदकत्वनियमेन वातीत्याशयेनैव वृक्षादौ संयोगत्वसामान्याभाव
योर्वृत्तावच्छेदकभेदमुपपादितः वृक्षे न संयोग इति प्रत्यक्षं चव्यारितं न तु योपदीत्यादि नियमस्य तत्साधकत्वाशयेनेति न
संदर्भविरोधः यत्र यत्किंचिदवयवनाशान्महावृक्षनाशानंतरं खंडवृक्षोत्पत्तिक्षणे पूर्वोत्पन्नक्रियातोऽवस्थितयावत्त रा०म०
दवयवैर्गगनादिसंयोगानां विनाशः द्वितीयक्षणे च खंडवृक्षस्यापरावयवनाशात्तृतीयक्षणे च तन्नाशस्तत्र वृक्षे विभुसं १९

योगानुत्पत्त्या यावद्विशेषाभावसौलभ्यं नचैवं तादृशवृक्षे मूर्त्तान्तरेणापि संयोगस्तदवयवसंयोगजः तत्कर्मजो वा नसं
भवति तदवयवगगनादिसंयोगनाशकर्मणां मूर्त्तान्तरतदवयवसंयोगानामपि तदुत्पत्तिकाले विनाशाद् वयवावयविनो
श्चसंयोगानभ्युपगमेन स्वावयवसंयोगे तत्संयोगजननासंभवात् उत्पत्तिकाले च द्रव्यगुणावत्कर्मसत्वानुपपत्तेरिति
संयोगसाधके द्रव्यत्वस्य सद्धेतुत्वेन निर्वहतीति वाच्यं तादृशखंडवृक्षोत्तदवयवसंयोगजन्यस्य तत्कर्मजन्यस्य तत्क
र्मजन्यस्य च संयोग स्यासंभवेपि सर्वेषां वस्तूनां सदा गतिशीलत्वपवनादिपरमाणूनां कर्मभिस्तत्संयोगानामुत्पत्तेर्बाधक
विरहेणाद्रव्यस्य संयुक्तत्वनियमादित्यपि केचित् यावत्संयोगाभाव एव मान मिति ज्ञायमानलिंगस्य तु मितिकरण
त्वमताभिप्रायेण यत्तदर्थयोरिति साध्यहेतुघटकपदद्वयार्थयोः संयोगत्वघटत्वयोरित्यर्थः अननुगमादिति ए
करूपेणानिवेशासंभवादित्यर्थः एकव्याप्तेर्निर्वाहेपि तुमशक्यत्वादि ति शेषः तथा च घटत्वावच्छिन्नाभावघटादिविशे
षाभावे कूटपीव्याप्तेः संयोगसामान्याभावसिद्धावनुपयोगित्वाद्यावत्संयोगविशेषाभावे संयोगसामान्याभावोपविशे

पव्याप्त्येष्वंशेनिराकर्त्तव्यत्वान्नोक्तानुमानसंभवइतिभावः नतुप्रकृतहेतौप्रकृतसाध्यव्याप्तिग्रहेपि यथायोयत्रप्रवर्त्तितस्कार्यतया
१८ तज्ज्ञानातीत्याकारात्तत्तनयनादिप्रवृत्तितद्विषयककार्यताज्ञानयोर्व्याप्तिग्रहात् गवानयनादिप्रवृत्तिरूपलिंगेनगवानयनादिका
र्यताज्ञानस्यसिद्धिः तथाप्रकृतेसंयोगीयथावद्विशेषाभावेनतत्सामान्याभावव्याप्तिर्यथाविशेषणतावादिनास्वग्रहेपिघटादिवि
शेषाभावकूटेनतत्सामान्याभावव्याप्तिग्रहादेवसंयोगीयथावद्विशेषाभावेनहेतुनायत्कृधर्मितावलात्गगनादिषुसंयोगसा
मान्याभावसिद्धिर्दुर्वारैवव्यतिरेकिहेतुकानुमितौविवक्षासामान्यव्याप्त्यधीनविशेषसिद्धौव्याप्तिविशिष्टपक्षधर्मताज्ञानस्य
हेतुत्वानुपगमात्तन्नचविशेषाभावांतरेसामान्याभावांतरव्याप्तिग्रहात्संयोगविशेषाभावेनतत्सामान्याभावसिद्ध्युपगमेयाव
त्वादविशेषितकपिसंयोगादिप्रतियोगिकाभावेकपिसंयोगादिसामान्याभावव्याप्तिग्रहादेवसंयोगादिप्रतियोगिकाभावेनतत्सामा
न्याभावसिद्धिसंभवात्घादावादिविशेषणमनर्थकंप्रकृतहेतुतुल्यत्वनिखिलहेत्वंतरेषुतत्प्रविष्टतत्तत्पदार्थघटितप्रकृतसाध्यतुल्यस्य राम०
व्याप्तिग्रहापेक्षयाः स्वीकर्तुमशक्यत्वात् तादृशसकलहेतुसाध्यानांयुगपत्सहचारसवर्ज्जनुमशक्यत्वादितिवाच्यं उपस्थित १८
पावत्तादृशहेतुषुतादृशतत्तत्साध्यव्याप्तिग्रहापेक्षयासामंजस्यात् तावन्मात्रापेक्षयाप्यत्तत्तत्साधनधर्मिकतत्तत्साध्यव्याप्तिग्र

हाभावविशिष्टत्वन्नसाध्यसाधनोपस्थितेरनुमितिप्रतिबंधकतयास्वयापादनात् एवंसतियावत्त्वविशेषणानुपादानेजात्यादिविशेषघ
टत्वाद्यभावेजात्यादिसामान्याभावव्यभिचारोपस्थितिदशायांसंयोगादिसामान्याभावसाधनासंभवेनतादृशविशेषणसार्थक्यात्गगना
द्यवृत्तिस्वसमानाधिकरणनिरूढधर्मावच्छिन्नप्रतियोगिताकयत्किंचिदभावकंयद्यत्त्वंतत्तदन्योन्याभावः सत्तन्निष्ठाभावप्रतियोगिताव
छेदकइत्येतादृशपाठेऽस्मिन्सामान्यव्याप्तिस्थलाभिषिक्तव्याप्तेस्तथासंयोगत्वादौगगनादिनिष्ठाभावप्रतियोगितावच्छेदकत्वंसाधनी
यं तत्रचनानुगमोदोषइत्याशंक्यउक्तानुमानेउपाधिमाह एकावच्छेदेनेति अनवच्छिन्नतदीययावद्विशेषाभावाधिकरणा
त्व स्यउपाधित्वादित्यर्थः यथाक्षतेगुणादिनिष्ठायासंयोगाभावाधिकरणतायाअव्याप्यवृत्तित्वात्स्वावच्छेदकविरहेणा
उपाधेःसाध्यव्यापकत्वानिर्वाहात् नचगुणादिनिष्ठायायावत्संयोगाभावाधिकरणतायाअव्याप्यवृत्तित्वेपिगुणत्वाव
च्छिन्नत्वमावश्यकं अन्यथाअधिकरणतावच्छेदकप्रकारकज्ञानासंभवेनगुणादौतदभावग्रहासंभवादितिवाच्यंद्रव्यनिष्ठ
यावत्संयोगाभावाधिकरणतायाअपिद्रव्यत्वादिरूपैकावच्छेदकावच्छिन्नतयाउपाधेःसाधनाव्यापकतानिर्वाहापसप्तमी
निर्दृष्टपदस्याव्याप्यवृत्तित्वनिर्वाहकंविलक्षणावच्छेदकत्वंतस्यैवविवक्षणीयतयागुणादिनिष्ठसंयोगाद्यभावाधिकरणता

यत्ताद्दृशावच्छेदकत्वविरहेण साध्यव्यापकतापाय यथाश्रुते दुरूपपादत्वात् अथैवं कपिसंयोगादिसामान्यस्य मूलाद्यवच्छे
२० देनाभाववति कपिसंयोगादिमद्वृक्षादौ अनवच्छिन्नत्वेऽपि यावद्विशेषाभाववत्त्वविरहेण साध्योपाध्योर्न सामान्यव्याप्तिरिति
२१ वद्दिति चेत् अत्र केचित् अवच्छिन्नत्वैकावच्छेदकानवच्छिन्नत्वोभयाभाववत्त्वविशिष्टयावद्विशेषाभाववत्त्वमिहोपाधि
त्वेनाभिमतं पूर्वोपायावद्विशेषाभाववत्त्वेऽवच्छिन्नत्वाभावेनोक्तोभयाभाववत् कपिसंयोगवति वृक्षे कपिसंयोगिपर्याय
द्विशेषाभाववत्त्वं मूलाद्येकावच्छेदकावच्छिन्नमिति तदनवच्छिन्नत्वाभावादुभयाभाववदिति न उक्तोपाधिसाध्ययोः सामा
नव्याप्तिभङ्गः अथ वृक्षादिनिष्ठानां यावत्कपिसंयोगविशेषाभावाधिकरणतानां नैकावच्छेदकावच्छिन्नत्वं संभवति वृक्ष
घवृत्तकपिसंयोगादिव्यक्तीनां प्रत्येऽभावास्तेषां वृक्षादौ व्याप्यवृत्तितया तन्निष्ठतदधिकरणतानामनवच्छिन्नत्वात् न च
व्याप्यवृत्त्यधिकरणतानामनवच्छिन्नतयाऽन्यासां चैकावच्छेदकावच्छिन्नतया सर्वासां चैवतासामुभयाभावोऽक्षत इति वाच्यं राम०
सर्वासां तिपक्षनिष्ठसंयोगव्यक्तीनां दिग्देशविशेषावच्छिन्नानां यावतां तेऽभावाः पक्षनिष्ठतावन्निरूपिताधिकरणतानां स २०
र्वासामेकावच्छेदकविरहेऽपि द्वित्वादीनामवच्छेदकैक्यसंभवेन सर्वासां च तासामुत्तादृशानां दृशावच्छेदकमादायैकावच्छेद २१

कावच्छिन्नत्वं संभवति तदुभयाभाववत्त्वात् तद्वृत्तिसंयोगव्यक्तीनां वपेऽभावास्तेषां तन्निष्ठाधिकरणतास्तु चानवच्छिन्न
तयात्तदुभयाभावसत्त्वात्तत्रोपाधेर्पीवत्संयोगाभावरूपसाध्यव्यापकतापत्तेः स्वसमानाधिकरणयावदभावाधिकरण
तावच्छेदकावच्छिन्नत्वस्य एकावच्छेदकावच्छिन्नत्वरूपत्वे च वृक्षादिवृत्तिमूलाद्यवच्छिन्नकपिसंयोगाद्यभावाधिकर
णतानामपि न तथात्वसंभवः तत्समानाधिकरणाव्याप्यवृत्तिकपिसंयोगाद्यभावाधिकरणतानामपि तादृशयावदभा
वाधिकरणतान्तर्गतत्वात्तदवच्छेदकत्वस्याप्रसिद्धत्वादिति चेन्न एकावच्छेदकावच्छिन्नत्वस्य स्वसमानाधिकरण
किंचिदवच्छिन्न यावत्तदभावाधिकरणतावच्छेदकावच्छिन्नत्वरूपत्वस्याविवक्षितत्वेनानवच्छिन्नाधिकरणताभिः स
हावच्छिन्नाधिकरणतानामेकावच्छेदकावच्छिन्नत्वासंभवेऽपि क्षतिविरहात् अथवा यावद्विशेषाभाववत्त्वमित्यनेन या
वत्तदीयविशेषाभाववत्त्वावच्छिन्ननिरूपितमेकाधिकरणत्वं विवक्षितं न तु नानासमुदायः एकावच्छिन्नत्वं च एकमात्रवृत्ति
धर्मावच्छिन्नावच्छेदकावच्छिन्नत्वं न तु भिन्नावच्छेदककत्वं वृक्षादिवृत्तिसंयोगानां वृक्षनिष्ठाभावाः पर्याप्तिव्याप्यवृत्तयस्त

थविं अव्याप्यवृत्तिसाधारणायवच्छेदकत्वेन तेषामव्याप्यवृत्तित्वात् तत्साधारणयावत्त्वावच्छिन्ननिरूपिताधिकरणता एक
मात्रवृत्तिर्न मूलत्वाद्यवच्छिन्नतन्मूलत्वादिरूपावयवावच्छिन्नेति तत्रोभयाभावो कृत इति न साध्योपाध्योः सामान्यव्या
प्तिभंगः पक्षनिष्ठसंयोगसामान्यीययावद्विशेषाभावाधिकरणता च न तत्त्वेकावच्छिन्ना स्यां दिशि गगने न संयोग इ
त्यादिप्रतीतिविरहात् अपितु यत्किंचिदनुगतधर्मावच्छिन्नतावदवच्छेदकावच्छिन्ना यावत् संयोगाभाववत् गगनमिति
प्रत्ययात् एकरूपावच्छिन्नस्य प्रतियोग्यभावाधिकरणतावच्छेदकत्वे विरोधात् एकस्यापि विशेषरूपसामान्यरूपाभ्या
मुभयावच्छेदकत्वोपगमात् तथा च पक्षनिष्ठसंयोगविशेषाभावानां यावत्त्वावच्छिन्ननिरूपिताधिकरणतानतिरिक्तै
कावच्छेदकावच्छिन्नेत्ववतीति तस्या उक्तोभयवत्त्वादुक्तोपाधेः साधनाव्यापकत्वमिति वदन्ति तत्तुच्छं अनवच्छिन्नया
वद्विशेषाभाववत्त्वमेव उपाधिः नादृशोपाधिना साध्यसामान्यव्याप्तिविरहेपि संयोगसामान्याभावरूपपर्यवसितसाध्यव्या रा.म०
पकतयानादृशोपाधेः शुद्धोऽनित्यत्वातिरिक्तशब्दधर्मातिरिक्तधर्मवान्नेयत्वादित्यादौ पर्यवसितसाध्यरूपानित्यत्वव्याप २२

कत्वयाकृत त्वकत्वादेरिव सत्प्रतिपक्षोत्थापकत्वं व्याहतत्वात् तत्रापि न साध्यवत्त्वेऽप्युपाधिव्याप्यतयानादृशोपाधेः शु
द्धेन संयोगसामान्याभावरूपसाध्यवत्त्वेऽदोन्यत्रासिद्धौ पि साध्यपितुं शक्यतया एव अभावसाध्यकव्यतिरेकिणि प्रतियो
गिमात्रप्रसिद्धेरयोऽक्तित्वात् तत्र पाध्याभावेन साध्याभावसाधनं तु न सम्भवति संयोगरूपस्य तस्य साधने सिद्धसाधनेन स
त्प्रतिपक्षानिर्वाहात् सिद्धसाधनादितः साध्याभावसाधनासंभवेपि प्रतियोगिवैयधिकरण्यघटितसाध्यव्यापक
तावच्छेदकतया गृह्यमाणोपाधिविरोधकावच्छिन्नाभाववत्ताज्ञानात् पक्षे साध्यानुमितिप्रतिरोध इति तु सारं अथवा प्र
तियोग्यधिकरणत्वरूपपक्षधर्मावच्छिन्नसामान्याभावरूपसाध्यव्यापकतया एकावच्छेदकावच्छेदेनेत्यादेर्यथाश्रुत एवे
वतूपाधितानिर्वाहः यत्र प्रतियोगिमति यत्सामान्याभावस्तत्रैकावच्छेदकावच्छेदेन तस्य यावद्विशेषाभाववत्त्वमिति
सामान्यव्याप्तेः कपिसंयोगादिमतः कपिसंयोगादिसामान्याभावाधिकरणवृक्षादेरेकावच्छेदेन कपिसंयोगविशेषाभा
वकूटवत्त्वनियमेन सुग्रहत्वात् गुणादाविकावच्छेदेन यावद्विशेषाभावासत्त्वेपि न तत्र तत्प्रतियोग्यसत्त्वेनावच्छिन्नसाध्य

व्यापकत्वाकृतेः द्रव्ये च प्रतियोगिमत्त्वविशिष्टयावत् संयोगविशेषाभावाधिकरणे एकावच्छेदेन तद्दीपयावद्विशेषाभावा
सत्त्वात् प्रतियोगित्वमरूपावच्छेदकविशिष्टसाधनाव्यापकत्वं तस्य वृक्षादिवृत्तिसंयोगादिविशेषाभावाधिकरणताकूटं नग
नकतिपयाभावाधिकरणतानामन्तवच्छिन्नत्वेपि तत्तत्कूटस्य एकावच्छेदकावच्छिन्नत्वं पूर्ववदुपपादनीयं विशिष्टकपिसंयोगिप्य
सामान्याभावव्यापकत्वस्य तादृशैकावच्छेदकावच्छिन्नयावद्विशेषाभाववत्त्वे प्रसिद्धावपि तदभावेन प्रकृतसाध्यवद्भेदसाधने
न संभवति तस्य प्रकृतसाध्याव्यापकत्वात् प्रतियोगिमत्त्वविशिष्टकपिसंयोगिप्यसामान्याभाववद्भेदस्य कपिसंयोगादि
रूपप्रतियोगिरत्नेपि हेतुमति साध्यमानेनाकपिसंयोगसामान्याभाववद्भेदपर्यवसायी प्रतियोगिमद्भेदस्य तत्राबाधात् प्र
तियोगिमति चैकावच्छेदकावच्छिन्नतद्दीपयावद्विशेषाभावस्यासत्वे न तन्नाभावरूपहेतावसिद्धिरिति न व्यभिचारेत्र प
न निर्वाहः इति मैवं कचिद्धेनलादिसंयोगवति तत्सामान्याभावस्य सत्वे एकावच्छेदकावच्छिन्नतदीययावद्विशेषाभा
वसत्वान्तदीयप्रतियोगिमत्त्वविशिष्टतत्सामान्याभावव्याप्यत्वेनादृष्टोपाधेः व्यभिचारेत्रायवत्त्वं सत्त्वातिप्रत्तोस्यप

राम०
२२

कत्वं वा न संभवति प्रकृतसाध्यव्यापकस्य एकावच्छेदकावच्छिन्नयावद्विशेषाभाववत्त्वस्य त्वप्रसिद्धेः द्रव्यत्वेन तद्दीययावद्वि
शेषाभाववत्त्वस्यावच्छिन्नत्वेपि एकावच्छेदकावच्छिन्नत्वाभावात् गुरोश्च तस्यावच्छिन्नतायाः एवाभावात् प्रतियोगिमत्त्वविघ
कं एकावच्छेदकावच्छिन्नयावद्विशेषाभाववत्त्वपत्र द्रव्ये सर्वावयवावच्छेदेन विभि न्नाजलादिसंयोगव्याप्यः यावद्विशेषा
भावरूपहेतुमति तत्रैकावच्छेदकावच्छिन्नयावद्विशेषाभावरूप-- तद्दीय + उपाध्यभावेन प्रतियोगिमत्त्वविशिष्टतत्सामा
न्याभाववद्भेदसिद्धौ बाधकाभावात् प्रतियोगिमन्निन्नत्वविशेष्यवद्भेदपर्यवसाने न व्यभिचारसिद्धौ सामान्यव्याप्तिभं
गात् संयोगत्वगगनादिनिष्ठाभावप्रतियोगितावच्छेदकत्वसाधकानुमानौपयिकदर्शितव्याप्तौ चैकावच्छेदकावच्छेघ
स्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकयावदभावाधिकरणतानां न्यगगनादिकं पक्षनदन्यत्वस्योपा
धित्वं वा ध्वंसतेनेति। स्वानवच्छिन्नयावत्संयोगविशेषाभाववत्त्वस्योपाधित्वेनत्यर्थः इति विशेषव्याप्त्युपष्टम्भमनुमानं
परास्तं दूषणान्तरमप्याह क्वचिदपि तन्मते संयोगसामान्याभावस्य केवलान्वयितया अभाववत्त्वस्य वृत्तघाप्यतावच्छेद

का[..]इतरांशस्य व्यर्थत्वादित्यर्थः नचभावादित्येवहेतुरस्त्वित्यत आह अप्रमेयत्वादिति व्याप्तिग्राहकतर्कः [..]गा
इत्यर्थः विशेषव्याप्त्यनुपाध्यंतरमपि सुलभमित्याह निर्गुणत्वादीति आदिना निष्परिमाणत्वादेः परिग्रहः एवञ्च [..]न्यथा
नवच्छेदकं तत्तद्धर्मावच्छिन्नाभावावच्छेदकमिति व्याप्त्युपष्टम्भकतर्कत्वादेः संयोगत्वावच्छिन्नाभावावच्छेदकत्व[..]गु
गुणानमाशंक्य वा निराकुरुते नचेति गुणाद्यनवच्छेदकेति गुणत्वाद्याश्रयानवच्छेदकेत्यर्थः तदभावेति तदवच्छिन्नाभावेन तद्
दे: नचप्रमेयत्वावच्छेदेनापि गुणसामान्याभावो गुणस्य वर्तिष्टतु द्रव्ये तु तत्सामान्याभावसत्त्वमानाभाव इति किमनिष्टमि
सिद्धावं गुणे निरवच्छिन्नवृत्तिकस्य तस्य प्रमेयत्वावच्छिन्नवृत्तिकत्वस्यानिष्टस्यापादनात् प्रमेयत्वादीत्यादिना संयोग
भावस्यापि संयोगानवच्छेदकगुणत्वाद्यवच्छिन्नवृत्तिकत्वापादनेऽपि ध्वंसप्रागभावादौ व्याप्तिस्वीकारे गुणत्वादिना गुणा राम
दूषणं तस्याप्यव्याप्यवृत्तित्वप्रसंग इति भावः घटादौ द्रव्यत्वाद्यवच्छेदेन घटत्वाद्यभावप्रसंगस्तु घटत्वादेर्व्याप्यवृत्तितया न २५
[..]वच्छेदकाप्रसिद्धात्तदनवच्छेदकत्वरूपापादकाप्रसिद्धेर्न संभवतीति नाभिहितः गुणत्वाद्याश्रयस्पर्शसंयोगादेरवच्छे

द्दा[..]प्रसिद्धा न गुणत्वाद्यवच्छिन्नाभावावच्छेदकत्वापादकाप्रसिद्धिरिति भावः नन्वत्र तद्धर्माश्रयानवच्छेदकत्वि
त्यत्र यत्पदेन व्याप्यवृत्तिधर्मो विवक्षितः गुणत्वादिश्च व्याप्यवृत्तिरुपादिवृत्तित्वात्तदाश्रयानवच्छेदकत्वस्य
न तदवच्छिन्नाभावावच्छेदकत्वापादकता किंच तदवच्छिन्नानवच्छेदकत्वमेव तद्धर्मावच्छिन्नावच्छेद्यत्वानिरूपकावच्छेदक
त्वपर्यवसितं तदवच्छिन्नाभावावच्छेदकत्वनिपतंनतु तदाश्रयानवच्छेदकत्वं एवंच व्याप्यवृत्तिसाधारण्यात् गुणत्वादेर
वच्छिन्नघत्वातिप्रसक्तस्य तदनवच्छेदकत्वात् गुणत्वावच्छिन्नावच्छेदकाप्रसिद्ध्याऽऽपादकाप्रसिद्धेर्नप्रमेयत्वादेरव
च्छिन्नाभावावच्छेदकत्वापत्तिरित्याशंक्य तत्त्वात्वादौ संयोगत्वाश्रयानवच्छेदकत्वस्य संयोगत्वावच्छिन्नाभावस्यावच्छेदकताया
प्रसिद्धिमाह यथाचेति संयोगव्यक्तीनां प्रत्येकमतिप्रसक्तत्वात् द्रव्यत्वादेः संयोगत्वावच्छिन्नानवच्छेदकत्वेऽपि [..]
[..]द्वेषे संयोगसामान्याभावे मानाभावः इति न युक्तमिति कस्यचिन्मतं निराकर्तुं अवच्छेद्यतावच्छेदकस्यावच्छेदकतानति
[..]चमात्रमवच्छेदकत्वेतन्तु नत्ववच्छेद्यवृत्तितत्त्वद्धर्मत्वावच्छिन्नानतिप्रसक्तत्वमर्थोऽस्य सर्वं चनानुपपत्तिः नि

प्रतियोगित्वस्य सामान्यावच्छेदकत्वे दृष्टांतमाह घटपूर्ववृत्तित्वस्येति दंडनिष्ठघटकारणताघटितं तद्व्यवहितपूर्वकालसंबंधस्ये
त्यर्थः प्रतिदंडं भिन्नत्वेपि दंडत्वेन तत्सामान्यावच्छेदकमित्यभिप्रायेणान्वयः प्रतिदंडं भिन्नत्वेपीत्यनेन च दंडत्वं तत्सामान्ये कातिप्र
सक्तमिति सूचितं एवमग्रेपि तत्सामान्येति घटपूर्ववर्त्तित्वत्वावच्छिन्नेत्यर्थः अन्येकातिप्रसक्तत्वेपि अवच्छेद्यतावच्छेदकानु
गतरूपावच्छिन्नानतिप्रसक्तत्वात्तस्यावच्छेदकत्वे अन्यथा घटकारणतावच्छेदकत्वमेव तस्य भज्येत इति भावः ननु दंड
त्वस्य घटनियतपूर्ववृत्तितावच्छेदकत्वं न घटपूर्वनियतवर्त्तितायाः स्वरूपसंबंधरूपावच्छेदकत्वं अपि तु तद्व्यवहितपूर्व
कालनिष्ठाभावप्रतियोगितानवच्छेदकत्वरूपपारिभाषिकमेव तच्चातिप्रसक्तेपि निर्बाधमेव स्वरूपसंबंधरूपाव
च्छेदकताया एवावच्छेद्यानतिप्रसक्तत्वनियतत्वादिति किंच नियतपूर्ववर्त्तिजातीयत्वमेव कारणत्वं तत्तु नियतपूर्ववृत्ति
त्वमात्रं तथा सति फलानुपधायकानां गतादिदंडे घटनिरूपिततादृशकारणतायाविरहाद्दंडत्वेन तत्सामान्यस्या रा०न०
प्यवच्छेदकं न स्यादिति तत्र तत्सामान्यावच्छेदकतायाश्चाप्यसंभवदुक्तिकतापत्तेः नियतपूर्ववर्त्तिजातीयतायाश्च न प्रति २५

दंडभेदः तस्माद्दंडत्वरूपत्वात् अवच्छेद्यावच्छेदकयोरभेदेप्युपहितानुपहितभेदादवच्छेद्यावच्छेदकभावसंभवदृष्टा
लोव्याप्येकातिप्रसक्तसामान्यानतिप्रसक्तत्वेन सामान्यरूपावच्छिन्नावच्छेदकत्वे दृष्टांतांतरमाह वह्निसामानाधिकर
णस्यवेति प्रतिधूमं भिन्नत्वेपि धूमत्वं तत्सामान्यावच्छेदकमित्यनेनान्वयः तत्पदेनात्र वह्निसमानाधिकरणपरामर्शः
धूमत्वस्य तदनवच्छेदकत्वे तस्य वह्निव्याप्यतावच्छेदकत्वं नोपपद्येत न च व्याप्यतावच्छेदकत्वमपि स्वविशिष्टव्यापकसा
ध्यकत्वरूपं पारिभाषिकमेव तच्चातिप्रसक्तसाधारणमिति न दृष्टांतसंगतिरिति वाच्यं साध्यसामानाधिकरण्यावच्छेद
करूपवत्त्वं व्याप्तिस्तदवच्छेदकत्वं स्वरूपसंबंधविशेषः अत एव यत्र व्यर्थविशेषणघटितं तत्र नीलधूमत्वादिना हेतुतात
त्र्यव्याप्यत्वासिद्धिरिति प्राचीनमतानुसारेणैव तदभिधानात् अन्यथा पुनः स्वरूपसंबंधरूपकारणत्वप्रतियोगित्वादि
निरूपितमनुगतधर्मनिष्ठं स्वरूपसंबंधरूपमवच्छेदकत्वं दृष्टांततया वो ध्वंसयोगसामान्यस्य संयोगत्वरूपावच्छेद्यता
वच्छेदकरूपावच्छिन्नस्यस्तकत्वाच्चेतिप्रत्येकं संयोगादिव्यक्त्यतिप्रसक्तस्यापि द्रव्यत्वादेस्तद्रूपावच्छिन्नानतिप्रसक्तत्वा

दितिभावः यद्यप्येवमपि प्रमेयत्वादेः संयोगसामान्यातिप्रसक्तत्वेन तत्सामान्यावच्छेदकत्वप्रसङ्गात् उक्तव्याप्तिवत्वाद्द
वच्छेदेन संयोगसामान्याभावसिद्धिर्नेशङ्कते वारयितुं तथापि प्रतियोगिमत्त्वसंबंधिदेशकालयोरेव प्रतियोग्यनवच्छेदकयोर
भावावच्छेदकत्वनियमस्तयोरेव तदनुभवात्तु प्रतियोग्यनवच्छेदकमात्रस्य मानाभावादित्यत्र तात्पर्ये द्रव्ये संयोगसामा
न्याभावस्य कालभेदावच्छेदेन त्वयमनु यदं व्यवस्थापनीयतया संप्रदायविद इत्यनेनास्वरसो दर्शितः गुणसामान्यसाध्यक
स्थलेपि प्रतियोग्यसमानाधिकरणत्वपदव्यावृत्तिः संभवतीत्याशयेन गुणत्वावच्छिन्नस्यैव कालिकाव्याप्यवृत्तित्वं साध
यति: उत्पत्तीति गुणस्य सामान्याभावो वर्तत इत्यन्वयः ध्वंसप्रागभावयोरत्यंताभावविरोधिताया निराकृतत्वात् इति भा
वः एतेन तदवच्छेदेन संयोगादिसामान्याभावोपि सुतरां वर्तते व्यापकधर्मावच्छिन्नाभाववति व्याप्यधर्मावच्छिन्नाभावस्य
लनियमादिति सूचितं नचोत्पत्तिकालावच्छेदेन घटादौ गुणस्य प्रागभाव एव तत्सामान्याभावसत्वे तु मानाभावात्प्रति
योग्यनवच्छेदकत्व स्याप्रयोजकत्वात् इन्द्रियसन्निकर्षविरहेणाप्रत्यक्षायोगादिति वाच्यं तदात्वजन्यैकत्वेहेतुभूतस्यप्र

गा०
२६

कत्वावच्छिन्नाभावस्यावश्यकत्वात्तस्येदस्त्वसमनियतगुणत्वाद्यवच्छिन्नाभावरूपतया विवादायोगात् संयोगादिसाध्यक
द्रव्यत्वादिहेतुकस्थले उत्पत्तिकालावच्छिन्नसंयोगसामान्याभावमादाय व्याप्यवृत्तिसंभवेपि नित्यद्रव्यमात्रवृत्तिहेतुस्थले व्या
वृत्तिदानायाह प्रलयेति महाप्रलयस्य जन्यभावानधिकरणतया तदानीं संयोगाद्यसत्त्वादिति भावः तदानींच गगनादौ नित्यै
कत्वपरिमाणादिसत्वेन गुणसामान्याभावासत्वात्संयोगस्येत्येवोक्तं अत्र प्रमाणं महाप्रलये गगनेन संयोग इत्यादि प्रामा
णिकव्यवहार एव तादृशव्यवहारस्य ध्वंसावगाहित्वेनेति प्रसंगाद्व्यवहारानादरे वातीन्द्रिये गगनादौ गोत्वाद्यभावस्याप्यप्रमा
णिकतापत्तेः प्रत्यक्षासंभवात् अनुमानस्याप्रयोजकत्वाच्चातेवह्निमान् धूमादित्यत्र व्यावृत्तिदानायाह तथैति दहनस्य दह
नत्वावच्छिन्नस्य प्रतीतेरित्यंतद्रव्यस्याव्याप्यवृत्तित्वादित्यन्तहेतुः प्रत्यक्षप्रमाणमुक्तायुक्तिमप्याह वृत्तेरिति संयोगरूपसं
बंधस्येत्यर्थः वृत्तिमतो व्याप्यवृत्तित्वस्य संयुक्तस्य तत्संबंधेन व्याप्यवृत्तितापाः असंभवित्वादित्ययमाशयः संबंधिसत्ता
याः संबंधाधीनत्वाद्यदवच्छेदेन संबंधो नास्ति तदवच्छेदेन तत्संबंधावच्छिन्नतद्भाववत्त्वमावश्यकं संयोगादेः संबंधस्य

समवायस्याव्याप्यवृत्तित्वेपिनसंयोगादेर्व्याप्यवृत्तितागुणादौसमवायसत्वेपिसंयोगाद्यसत्ववत्संयोगाद्यनवच्छेदकाच्छिन्ने
संयोगादिमतितत्समवायसत्वेपितदभावोपपत्तेरिति केचित्तु वृत्तेरव्याप्यवृत्तित्वेवृत्तिमतोप्यव्याप्यवृत्तित्ववद्वृत्तेर्व्याप्यवृ
त्तित्वेवृत्तिमतोपिव्याप्यवृत्तित्वंयुक्तिमत्त्वात् संयोगादिमतियोगिकत्वविशिष्टसमवायोपिनव्याप्यवृत्तिरित्याहुः वह्निमान्
धूमादित्यादौकालविशेषावच्छेदेनहेतुमतिवर्त्तमानंसाध्याभावमादायघटत्ववाकालत्वादित्यादौप्रटाद्यवच्छेदवकाले
वर्त्तमानंकालिकसंबंधावच्छिन्नाभावमादायचव्याप्तिवृत्तिदानाय प्रतियोगिमतिदेशेतदनाधारकालावच्छेदेनप्रति योगि
मतिचकालेतदनाधारदेशावच्छेदेनाभावसत्तामाह एवमितिप्रतियोगिमतोदेशस्यप्रतियोग्यनधिकरण कालावच्छे
देनप्रतियोगिमतःकालस्यचप्रतियोग्यनधिकरणदेशावच्छेदेनाभाववत्त्वमित्यर्थः इदानीमत्रघटोनास्तीत्यादिप्रत्यये
देशनिष्ठायाःकालावच्छिन्नाधारतायाःकालनिष्ठायादेशविशेषावच्छिन्नाधिकरणतायावाविषयत्वमित्यत्रविनिगम राम०
नाविरहादुभयस्यैवविषयत्वादितिभावः तत्रसाध्यकेति गुणत्वाद्यवच्छिन्नसाध्यकइत्यादावव्याप्तिवारणायेत्यर्थः तत्रस्व २७

समानाधिकरणांतं स्वव्याप्यवृत्तिसाध्यके प्रतियोगिवैयधिकरण्याघटितव्याप्तेरप्रसिद्धयातद्वृत्तित्वैवव्याप्तिर्व्याप्यवृ
त्तिसाध्यकेतुप्रतियोगिवैयधिकरण्यानुपस्थितिदशायामपिहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वसामा
न्याभावग्रहाद्दनुमितिस्तुत्यत्प्रतियोगिवैयधिकरण्याघटितापिव्याप्तिरस्तिप्रतियोगिवैयधिकरण्यघटितव्याप्तिस्तु मूलपंक्ते
रप्रसिद्धानुमितिप्रयोजिकाचेत्याशयेनमूलकृतस्तदुपादानमित्याह नोपादेयमिति व्याप्यवृत्तिसाध्यके सार्वत्रिकमुपादा
नंप्रतिक्षिप्तंनतुतदुपादानस्यसार्वत्रिकत्वमुक्तम् व्याप्यवृत्तेरपिसाध्यस्याव्याप्यवृत्तित्वग्रहदशायांप्रतियोगिवैयधिकरण्यघ
टितव्याप्तिज्ञानादेवानुमित्युपगमात् व्याप्यवृत्तेरपिसाध्यस्याव्याप्यवृत्तित्वभ्रमदशायांप्रतियोगिवैयधिकरण्यघटित व्या
प्तिज्ञानादेवानुमित्युपगमेपिव्याप्यवृत्तिसाध्यकेसर्वत्रतादृशविशेषणोपादानानियमः तदघटितायाअपिव्याप्तेः सर्वत्रा
नुमितिपोषकत्वात् स्वव्याप्यवृत्तिसाध्यकेतुसर्वत्रतदुपादाननियम एवतदघटितव्याप्तेरप्रसिद्धेरितिनार्थः व्याप्यवृत्तिसाध्य
कत्वंचस्वसमानाधिकरणाभावप्रतियोगिसाध्यकत्वम् सत्तावान् द्रव्यत्वात्कालिकसंबंधावच्छिन्नाकाशाभाववान्वा

वृत्त्यात्मत्वाद्रिव्यादिकं च न तथा अतस्तत्र साध्यवति कालात्मादौ कालिकदैशिकविशेषणताभ्यां तदभावसत्त्वात् प्रति
योगिवैयधिकरण्यघटितत्वनियमेऽपि न दोषः संयोगाभाववान् गुणत्वादित्यादिकमपि अव्याप्यवृत्तिसाध्यकमेव एतेनाऽ
व्याप्यवृत्तिसाध्यकेऽपि सर्वत्र तदुपादाननियमो नास्ति ऽउक्तस्थलस्य संयोगत्वेनाभावं न तदनुपादादिति परास्तं उक्तस्थल
स्याव्याप्यसाध्यकत्वाभावात् केचित्तु व्याप्यवृत्तिसाध्यकत्वपक्षे तन्मते हेतुतत्प्रभावस्य दैशिकविशेषणतावृत्तिर्विवक्ष
णीयाऽतो हेतुमति कालादौ कालिकविशेषणतादिना साध्याभावसत्त्वेऽपि नाव्याप्तिः अभावस्याप्यभावत्वेन दैशिकविशे
षणतया वृत्तिः प्रामाणिकी अतो नाभावसाध्यकव्यभिचारिण्यतिव्याप्तिः यादृशप्रतियोगितानिरूपकाभावत्वादि
शिष्टे दैशिकविशेषणतया हेतुमति वृत्तित्वात् तादृशप्रतियोगितानवच्छेदकत्वविवक्षया कालिकसंबंधावच्छिन्नप्रतियो रा०म०
गिताकाकाशाभावाभाववान् इत्यादावव्याप्तेर्निरासः तत्राकाशाभावस्याकाशाभावत्वेनैव दैशिकविशेषणतयाऽऽत्म २८
निवृत्तिर्न तु उक्तसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन आत्मनि तादृशाभावाभावो नास्तीति प्रतीतेः वस्तुतस्त्वभा

वृसाध्यकस्थलेऽपि अत्र हेत्वधिकरणे तदीयप्रतिबंधकतावच्छेदकसंबंधेन वृत्तिरप्रसिद्धा तत्स्थलीयव्याप्तौ तत्संबंधानव
च्छिन्नसाध्याभावीयवृत्तिभिन्नहेत्वधिकरणावृत्तित्वस्याभावेन निवेशनीयात् तत्संबंधेन हेतुमति साध्याभावभ्रमदशायाम
नुमित्यभावोपपत्तये तत्संबंधानवच्छिन्नत्वेन साध्याभावीयवृत्तिर्विशेषिता अभावे साध्यप्रतियोगिकत्वस्यानविरोधि
भ्रमदशायां हेत्वधिकरणावृत्तौ तादृशवृत्तिभिन्नत्वानवगाहिन्या हृदेवानुमितिरित्यननुगमस्य वक्तुमशक्यत्वादिदृशासंभ
वात् तथा च नोपदर्शितस्थलेऽव्याप्तिरिति दिक् अत्र व्याप्यवृत्तिसाध्यकेऽपि संयोगाभाववान् नित्यगुणत्वादित्यादावनु
मित्यौपयिकद्विविधव्याप्तेः संभवेन सर्वथैव इत्युक्तं तावता व्याप्यव्याप्यवृत्तिसाध्यके क्वचित् तद्घटितव्याप्तेः संभवति
इति सुचिन्तितमित्याहुः यत्तु व्याप्यवृत्तिसाध्यकेऽव्याप्यवृत्तित्वग्रहाविषयसाध्यके सर्वथैव समानाधिकरणान्तस्यानुपा
देयतात् तत्र लाघवेन प्रतियोग्यसमानाधिकरणघटितव्याप्तेरेवानुमानाङ्गतास्वीकारादिति व्याख्यानं तदसत् तत्रापि
शकृदिना प्रतियोग्यसमानाधिकरणघटितव्याप्तेरेव पदाग्रहः तदानुमितेरुत्पादापत्तेः तादृशव्याप्तेरनुमानाङ्गत्वस्योप

गंतव्यत्वात् अन्यथापादृशव्यतिरेकिसाध्येम केवलान्वयित्वभ्रमस्तादृशसाध्यके लाघवेन साध्याभाववदवृत्तित्वमात्रस्यै
व व्याप्तित्वोपगमप्रसंगात् केवलान्वयिनोप्यस्य साध्यस्य न व्यतिरेकित्वभ्रमविषयत्वात्तत्साध्यके हेतुसामानाधिकरण्य
विशेषणपरित्यागस्यापि प्रसंगाच्चेत्यन्ये तु ननु प्रतियोग्यसामानाधिकरण्यगर्भव्याप्तेरनुमितिप्रयोजकत्वे प्रतियोगि
सामानाधिकरण्यानुपस्थितिदशायां तत्सामानाधिकरण्याविषयकादेव हेतुसमानाधिकरणाभावाप्रतियोगित्वज्ञा
नादनुमितिर्नोपपद्येतेत्यत आह नोपादेयं चेति व्याप्यवृत्तिसाध्यके अनुमितिपूर्वमव्याप्यवृत्तित्वग्रहाविषयसाध्यके स
र्वथैव प्रतियोग्यसामानाधिकरण्यमुपादेयं व्याप्तिशरीरे तदभावेनीयमितिनेत्यर्थः सर्वथैवेत्यनेन तत्साध्यकस्थले क
दाचिदनुमितिपूर्वं साध्ये हेतुमत्यव्याप्यवृत्तित्वज्ञानं तत्र पत्रशाखादिना प्रतियोगिसामानाधिकरण्यघटितव्याप्तेरेवग्र
हस्तत्र च तदनुमितिनिर्वाहाय प्रतियोगिसामानाधिकरण्यघटितव्याप्तेरनुमितिप्रयोजकत्वेपि प्रतियोगिसामाना रा०म०
धिकरण्यानुपस्थितिकाले कथं तदनुमितिनिर्वाहः प्रतियोगिसामानाधिकरण्यमनुपादायापि व्याप्तेरनुमितिप्रयो २९

जकत्वमुपेयं वक्ष्यमाणादिशानुगमाच्च न व्यभिचारः साध्यादिभेदे तु पलक्षणां प्रतियोगिसामानाधिकरण्योपस्थि
त्यनुपस्थितिरूपदशाभेदेनैकसाध्यकेपि अनुमितिप्रयोजकव्याप्तिभेदोगमनायोबोध्यइति पत्नुवादिमतं परिष्कुर्वंति
यत्तु प्रतियोग्यसामानाधिकरण्येत्यत्र प्रतियोगिपदं स्वप्रतियोगिपरं स्वं च शब्दवाच्यं अन्यथा प्रतियोगित्वस्य सामान्य
रूपेण केवलान्वयितया प्रतियोग्यसमानाधिकरणाभावस्यैव दुर्लभत्वापत्तेः तथा च स्वपदस्य तत्तदभावपरतया तत्त द
भावप्रतियोग्यसमानाधिकरणविशिष्टत्वेन हेतुमद्वृत्तीनां तत्तदभावव्यक्तीनां प्रतियोगितावच्छेदकत्वाभावकूटज्ञानम
नुमितिकारणं वाच्यं तादृशं च ज्ञानमसर्वज्ञस्य दुर्घटमतः प्रतियोगिपदस्य प्रकृतसाध्यपरतया साध्याभावनिष्ठसा
ध्यसामानाधिकरण्याभावविशिष्टः सन् हेतुमद्वृत्तिरभाव एवानुगतरूपेण निवेश्यः संदिग्धे तु सर्वेषामेव हेतुसमानाधि
करणाभावानां सर्वत्र हेतुधिकरणे साध्यसमानाधिकरणतया साध्यसामानाधिकरण्याभावविशिष्टस्य हेतुमद्वृत्तित्वं
न प्रसिद्ध्यतीति साध्याभावनिष्ठत्वं साध्यसामानाधिकरण्यविशेषणं तथा सति सिद्धौ तु सर्वत्र साध्याभावभिन्नाभावे तत्र

सिद्धिसंभवाद्व्यभिचारिणि चाव्यभिचारनिरूपकाधिकरणे एव साध्याभावे साध्यसामानाधिकरण्याभावविशिष्टत्वाद्धेतुम
द्वृत्तित्वमिति साध्याभावस्यापि लक्षणघटकतया नातिव्याप्तिः संयोगेन प्रमेयसामान्यसाध्यकसद्धेतौ साध्याभावातिरिक्ताभा
वाप्रसिद्ध्या हेतुमति साध्यासामानाधिकरण्याभावविशिष्टाभावाप्रसिद्धिरिति साध्यतावच्छेदकावच्छिन्नाभावनिष्ठसाध्यसामा
नाधिकरण्यस्याभावो निवेशनीयः एवं च व्याप्यवृत्तिसाध्यके साध्यतावच्छेदकावच्छिन्नसाध्याभावनिष्ठसाध्यसामानाधिकरण्य
प्रसिद्ध्या ईदृशव्याप्तिर्न सिद्ध्यतीति तत्साध्यके प्रतियोग्यसामानाधिकरण्यघटितैव व्याप्तिरित्युक्तं नोपादेयं चेत्यादिनेति न
दपि न साध्यसामानाधिकरण्यविशेषणाभिन्नसाध्याभावे साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वनिवेशप्रयोज
नाभावाद्व्याप्यवृत्तिसाध्यकेपि संबंधान्तरावच्छिन्नसाध्याभाव एव साध्यसामानाधिकरण्यप्रसिद्ध्या तत्राप्युक्तव्याप्तिप्रसिद्धेः
व्याप्यवृत्तिसाध्यकस्थले द्विविधव्याप्तिर्न त्वव्याप्यवृत्तिसाध्यके इति साध्यभेदेन व्याप्तिभेदाभावे तत्संभवतीत्यत आह साध्या राम०
दिभेदेनेति साध्यतावच्छेदकादेर्व्याप्तिघटकतया तद्भेदेन भेदस्यावश्यकत्वादित्यर्थः॥ ॥यद्यपि ज्ञात्वादौ गुणकर्मान्यत्वादि ३०

सामानाधिकरण्योपलक्षितस्य सत्त्वादिव्याप्तिरस्त्येव गुणादौ तदुपलक्षितसत्त्वाद्यनुमितेः प्रमात्वात्तथापि गुणादौ गुणक
र्मान्यत्वविशिष्टसत्त्वादेरनुमितेर्भ्रमत्वात्तत्र तादृशानुमित्यौपयिकव्याप्तिस्वीकारे सद्धेतुपरामर्शादपि भ्रमः स्यादिति
तादृशानुमित्यौपयिकव्याप्तिर्गुणादिवृत्तिहेतौ न स्वीकर्तुं शक्यते ऽतः साध्यतावच्छेदकविशिष्टवैशिष्ट्यविषयकानुमित्यौपयि
कव्याप्तिशरीरे प्रतियोगितावच्छेदकविशिष्टवैयधिकरण्यपर्यन्तं निवेशयन्न तादृशातिव्याप्तिं वारयति प्रतियोग्यसामाना
धिकरणं चेति न च तत्रापि व्याप्तिस्वीकारे क्षतिविरहः गुणो गुणकर्मान्यत्वविशिष्टसत्तावानित्यादौ तादृशव्याप्तिसत्त्वेपि बाधे
नैव हेतोर्दुष्टत्वोपपत्तिः द्रव्यपक्षकतादृशसाध्यकगुणत्वादिहेतौ च समीचीनताया एवोपगमात् बाधानवतारदशायां च गु
णादौ ज्ञात्वादिलिंगकविशिष्टसत्तावैशिष्ट्यानुमितिभ्रमरूपाप्रमात्मकसद्धेतुपरामर्शादपि स्वीक्रियत एव गंधप्राग
भावकालावच्छिन्नो घटो गंधवान् पृथिवीत्वादित्यादौ बाधानवतारदशायां प्रमात्मकपरामर्शात्तद्विशिष्टानुयोगिकवैशिष्ट्या
वगाहिन्या अप्रमानुमितेर्निर्णीतकारणानुमतत्वादिति वाच्यं प्रमानुमितिजनकपरामर्शस्य भ्रमत्वसंभवेन तदुत्पादनभावप

कमित्यभिप्रायात् गंधप्रागभावावच्छिन्नो घटो गंधवान् पृथिवीत्वादित्यादौ परामर्शस्य कथंचिदपि भ्रमत्वासंभवेनागत्या
तत्र भ्रमात्मकपरामर्शो भ्रमानुमितित्वे कारणं तद्गुणो विशिष्टसत्तावान् जातिमत्वादित्यादिविशिष्टप्रतियोगिकवैशिष्ट्य
विषयकानुमितिस्थले तु पटे तु गंधप्रागभाववान् घटो गंधवानित्यादिविशिष्टानुयोगिकवैशिष्ट्यविषयकानुमितिस्थ
ले समसिद्धिव्यभिचारासंकीर्णबाधोदाहरणं विनाभिहितं तच्चतोमशिरोक्तेनोपयुक्तस्थलेव्याप्तिर्नास्तीत्याशयः समनुनीयते
न्तु यद्विशिष्टनिरूपितत्ववसमवायो विशेषणाविशेषिणो विशिष्टाभावस्य प्रतियोगितावच्छेदकसंबंधः शुद्धसमवायादे
स्तथात्वे दंडाद्युपलक्षितपुरुषादिमत्वविरोधितादृशपुरुषाद्यभावान्तदविरोधितद्विशिष्टपुरुषाद्यभाववैलक्षण्यानिर्वा
हात् वचनादुपलक्षितपुरुषाद्यभावस्य स धर्मो न प्रतियोगितावच्छेदकः अपि तु प्रतियोगितासमानाधिकरण एव
प्रतियोगितावच्छेदकस्यैव प्रतियोगिनि विशेषणतादृशस्यैव चोपलक्षणत्वादिति तादृशाभावयोर्विशेष इति राम०
वाच्यं उपलक्षणेन दंडादिनाव्यावृत्तप्रतियोगिनिष्ठप्रतियोगितायां पुरुषत्वादेरतिप्रसक्ततया तन्मात्रेण तदवच्छेदकता ३१

याः पर्याप्त्यसंभवेन दंडादेरपि तदवच्छेदककोटाववश्यमंतर्भावात् अत एव पुरुषादिमात्रेण न दंडाद्युपलक्षितपुरुषा
द्यभावस्य विरोधः तदवच्छिन्नाभावमात्रस्यैव तद्विशिष्टाभावत्वे सत्तान्यपृथिवीसमवेतत्वं न सत्तान्यवायुत्वादित्यादौ ग्रंथकृता
कूटघटितलक्षणातिव्याप्तिदानमपि विरुद्धमिति पृथिवीसमवेतत्वविशिष्टाभावस्य वाय्वादौ सत्वेन वायुत्वादेस्तत्र साध्यस
द्धेतुत्वात् पृथिवीसमवेतत्वोपलक्षिताभावस्यैव साध्यतया पृथिवीसमवेतत्वस्य प्रतियोगितानवच्छेदकत्वे समवायेन
सत्ता नास्त्यावच्छिन्नाभावस्यैव साध्यत्वे पर्यवसानात्स्पर्शादेरपि साध्याभावकूटांतर्गततया वायुत्वादेस्तादृशकूटवृत्ति
त्वस्यासंभवात् तथा च प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्याविवक्षयापि नातिव्याप्तिः प्रतियोगितावच्छे
दकसंबंधेन गुणादेर्विशिष्टसत्तानधिकरणत्वात् न च साध्यतावच्छेदकसंबंधेन प्रतियोग्यसामानाधिकरण्यनिवेशक
ल्पाभिप्रायेणातिव्याप्तिसंगतिः गुणादौ कर्मान्यत्वविशिष्टसत्ताविशिष्टाभावमादाय हि न्यायमनुमितावपि शुद्धसमवायादेः साध्य
संबंधत्वोपगमादिति वाच्यं तथापि दीधितिकारस्य दर्शोपकृद्व्याप्तेः त्वासंभवेनग्रंथस्य संदर्भविरोधस्य वज्रलेपायिततत्वा

दिति चेन्न विशिष्टनिरूपितसंबंधस्य विशिष्टाभावप्रतियोगितावच्छेदकत्वं सर्वत्र न संभवतीति प्रागुक्तत्वात् अगत्या वि
शिष्टाभावप्रतियोगिता विशेषणांतर्भावेन पर्याप्ता उपलक्षिताभावप्रतियोगितात तद्दंडादिरूपावच्छेदकोपलक्षित वि
शेष्य एव घट्योस्तु पर्याप्तयोर्विशेषस्यापपादनीयत्वात् विशिष्टातिरिक्तत्वमेते विशिष्टसत्त्वाभावः सहजतत्एव प्रतियो
ग्यसमानाधिकरणाद्धेतुभयसाध्यकानुसरणं नोमिम संगइति हेतुमति विशिष्टाभावादेः शुद्धप्रतियोगिवैयधिकरण्येऽपि
विशिष्टप्रतियोगिसामानाधिकरण्यविरहे ज्ञानप्रमानुमितिजनकपरामर्शस्य प्रमात्वप्रसंगइत्यर्थः व्याप्यवृत्तिसाध्यकेऽपि प्रति
योगिवैयधिकरण्यावगाहि परामर्शस्यानुमितिहेतुतायाउक्तसाध्यस्य व्याप्यवृत्तित्वेऽपि नातिप्रसंगाप्रसक्तिः मनुमत्तत्वादि
हेतौ भूतत्वविशिष्टमूर्तत्वत्वादिरूपत्तदुभयत्वावच्छिन्नस्यैव न व्याप्तिं नेतु तदुभयवृत्तिर्बुद्धिविशेषविषयत्वरूपतदुभयत्वा राम०
वच्छिन्नस्य तथात्व विशिष्टातिरिक्तत्वामते विशिष्टसत्तादिसाध्यकज्ञात्यादिहेतौ विव उक्तोभयसाध्यकमूर्तत्वादिहेतावपि प्रथा ३२
क्तप्रतियोग्यसामानाधिकरण्यनिवेशपक्षेनातिव्याप्तिप्रसक्तिरित्यभिमानं न्वेत्या दिनानिराकरोति नचेति सहजतएव

प्रतियोगिपदस्यतत्त्वावच्छेदकं विशिष्टपरतां विनैव उभयत्वं उभयव्यवहारविषयतावच्छेदकं विशिष्टत्वात् एकविशिष्टा
परत्वात् अनतिरिक्तं अतिरिक्तमित्यनुक्तानानतिरिक्तमित्यभिधानं उभयपदार्थतावच्छेदकत्वावच्छेदेनातिरिक्तत्वला
भाय न त्रपदस्यानुयोगितावच्छेदकावच्छेदेनाभाववोधकत्वव्युत्पत्तेः तावताएकविशिष्टापरत्वमुनपनिहव्यासज्यवृत्तिधर्म
स्य उभयपदार्थतावच्छेदकमस्तु प्रकृते च उभयत्वमेकविशिष्टापरन्तमेवेतिशंकाव्युदासः अत्र हेतुर्वैशिष्ट्यविरहेऽपि घटत्वप
टत्वयोरुभयत्वस्यानुपत्युक्तसिद्धत्वादिति घटत्वपटत्वयोः सामानाधिकरण्यविरहे पितत्रोभय व्यवहारविषयतावच्छेदकस्याप्र
त्यक्षसिद्धत्वादित्यर्थः अत एवात त्रोभयव्यवहारात् पपन्नेरिति भावः यद्यपि घटत्व घटत्वोभयमिति प्रतीतौ कालिकसंबंध
घटितसामानाधिकरण्यरूपवैशिष्ट्यस्य विषयतासंभवस्तथापि वाच्यत्व घटत्वोभयं समवेतमित्यादिप्रतीतिव्यवहारविरहे
राउभयं समवेतं इतिप्रतीतिव्यवहारयोः समवायिसमवेतत्वरूपवैशिष्ट्यविषयतापाभ्युपगंतव्यतया घटत्वपटत्वोभयं
समवेतमित्यादौ तादृशवैशिष्ट्याप्रसिद्ध्या व्यासज्यवृत्तिधर्मएव विषयइति भावः तथा च तदनुरोधेन व्यासज्यवृत्तिधर्मे विशेष

स्यउभयव्यवहारविषयतापर्याप्त्यावश्यकत्वेएकविशिष्टापरत्वस्यतद्व्यवहारविषयत्वमप्रामाणिकमितितन्न तन्मते त्वो
भयवान्मन्त्रीत्यादित्यादावेकविशिष्टापरत्वस्यसाध्यतावच्छेदकत्वप्रसक्तिस्तथास्त्यनुमितेरुभयवान्इत्याकारकत्वानुप
पत्तेरितिनिष्कृष्टं ननुमन्तैत्वाधिकरणेमनसिप्रभृ तन्मन्तैत्वोभयंनास्तिइतिबुद्धेरेकविशिष्टापराभावावलंबनेनैवोपप
त्तिः मनसिप्रतियोगिसत्वेनोभयत्वविशिष्टधर्मावच्छिन्नाभावासत्वादिति क्वचिदेकविशिष्टापरस्यापिउभयव्यवहारविषयता
वच्छेदकत्वमावश्यकमित्यतआह नवेति तदवच्छिन्नाभावः उभयव्यवहारविषयतावच्छेदकावच्छिन्नाभावः तदवच्छिन्ना
भावात् एकविशिष्टापरत्वावच्छिन्नाभावात् नअनतिरिक्तइतिविपरिणतेनसंबंधः प्रतियोगितावच्छेदकविशिष्टेनैव
प्रतियोगिनाअभावस्यविरोधादेकस्याधिकरणेपिव्यासज्यवृत्तिधर्मावच्छिन्नाभावसत्वेबाधकाभावादितिभावः एतेनमन्तै
त्वस्यव्यासज्यवृत्तुभयत्वावच्छिन्नव्यभिचारितापिव्यवस्थापिता आवश्यकमन्त्रैकाधिकरणे व्यासज्यवृत्तिधर्मावच्छिन्न — राम०
दभावः अन्यथासमवायघटितसामानाधिकरण्येनघटत्वविशिष्टपटत्वाद्यप्रसिद्ध्याघटादौसमवायेनघटत्वपटत्वोभ — ३३

यनास्तीतिप्रतीतेरनुपपत्तिस्तत्रसमवायेपिसम्भवेतत्वरूपवैशिष्ट्यावच्छिन्नाभावस्यैवविषयतायाः स्वीकरणीयत्वात् अन्य
थाएककालीनत्वादिरूपवैशिष्ट्यावच्छिन्नस्यघटत्वादेः समवायेनघटादौसत्वेनतादृशप्रतीत्यनिर्वाहादित्याहवैशिष्ट्यवि
रहेपिघटत्वपटत्वयोरुभयत्वेनअभावस्यप्रत्यक्षसिद्धत्वादितिननुतथापिव्यासज्यवृत्तिनिरुक्तोभयत्वेनसाध्यत्वेनमन्तै
त्वस्यव्यभिचारितासंभवति एकप्रतियोगिमत्यपिअभावस्यप्रतियोगिसमानाधिकरणतयामन्तैत्वाधिकरणेमनसि
उभयाभावस्यप्रतियोग्यधिकरणत्वाभावात् हेतुमतिप्रतियोगिव्यधिकरणस्यैवसाध्याभावस्यव्यभिचारत्वात्
व्यभिचारलक्षणेपिप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यपर्यन्तस्यानिवेशादित्याशंकांनिरस्यति नचतत्रेत्यादिना
व्याप्तेरेव व्याप्तेरिवतथात्वेपीति मन्तैत्वस्यमनसिसत्वेपीत्यर्थः उभयत्वेनेतिउभयत्वविशिष्टवत्तायामनस्यसत्वादित्य
र्थः तथाचतत्रोभयत्वविशिष्टवैशिष्ट्यविषयकानुमितेर्मेमन याततत्रयोग्यकहेतोर्नसद्धेतुत्वस्वीकारसंभवः अतएवव्य
भिचारलक्षणेपिप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यपर्यन्तमेवनिवेश्यमितिभावः एकाधिकरणेउभयत्वविशिष्ट

सत्त्वेमानमाह नात्रोभयमितीति अत्रोभयमितिप्रत्ययाभावो न हेतुतयोक्तः उभयत्वेनैकस्य सत्त्वोपगमेऽप्युभयत्वाधिकरण
वृत्तितायास्तादृशप्रतीतिविषयतया एकस्मिन्नधिकरणे वृत्तित्वाभावेन तादृशप्रतीते भ्रमत्वस्यावश्यकत्वात् तादृशप्रमावि
रहोपपत्तेः इदं च एकोक्तामभिप्रायेणाभिहितं व्याप्यवृत्तिसाध्यकस्थले प्रतियोगिवैयधिकरण्यप्रवेशपक्षे पुनरव्याप्यवृत्ति
विशिष्टादिसाध्यकस्थल एव व्याप्तिर्वाध्येति केषांचिदभिधानं तत्तु तन्नापर्यालोचनविजृंभितं यतः साध्यादिभेदेन व्याप्ति
भेदे व्यभिचारिहेतौ वास्तवव्याप्तिसत्त्वं दुरुपपादमेव तत्स्थलीयसाध्यसाधनयोर्वास्तवव्याप्त्यघटकत्वात् अतो विशिष्टादिसा
ध्यकव्यभिचारिविशेषस्यानुमितिकारणीभूतप्रमात्मकपरामर्शविषयत्ववारणाय प्रतियोगितावच्छेदकावच्छिन्नपर्यं
तनिवेशफलं व्याप्यवृत्तिविशिष्टसत्तादिसाध्यस्थले सकलजातिमत्त्वादिरूपहेत्वधिकरणेषु वर्तमानत्वभ्रमदशायां किंचि
द्धेत्वधिकरणे व्याप्यवृत्तित्वभ्रमसत्त्वे प्रतियोगिसामानाधिकरण्यविषयकव्याप्तिज्ञानादेवानुमितेः स्वीकरणीयतया राम०
यास्तु तत्प्रतियोगिसामानाधिकरण्यज्ञानस्य तद्धेतुत्वे विशिष्टसत्तासामानाधिकरण्यस्यान्यजातिसमानाधिकरणाभावप्रतियो ३४

गितानवच्छेदके विशिष्टसत्तात्वमिति ज्ञानमेवानुमितिहेतुः स्यादिति तस्य प्रमात्वातिप्रसंग इति तथा विवक्षा तथा सति साध्या
भावीयप्रतियोगितावच्छेदकावच्छिन्नासमानाधिकरणत्वविशिष्टहेतुसमानाधिकरणाभावत्वसत्त्वेन तादृशाभावप्रतियोगि
तावच्छेदकत्वस्य विशिष्टसत्तात्वे सत्त्वेन तत्तदनवच्छेदकत्वग्रहस्य प्रमात्वासंभवादिति ध्येयं ॥ ननु प्रतियोगिसमाना
धिकरणस्याभावविशेषणत्वे लक्षणे अत्यन्तपदवैयर्थ्यं स्वाद्यधिकरणानिष्ठवह्न्यादिभेदस्य प्रतियोगिसमानाधिकरण
त्वेनैव साध्यतावच्छेदके तत्प्रतियोगितावच्छेदकताया अकिंचित्करत्वात् अथ प्रतियोगितावच्छेदकसंबंधेनान्योन्याभावो
पि प्रतियोगिसमानाधिकरण इति चेत्तत् तदात्यन्तपदे उपात्तेपि संबंधान्तरावच्छिन्नात्यन्ताभावमादाय असंभवप्रसंगः सा
ध्यतावच्छेदकसंबंधेन प्रतियोगिसामानाधिकरण्यनिवेशे तु तावतैव भेदस्यापि वारणसंभवतीत्याशंकायां सांप्रदायि
कोपदर्शितमत्यन्तपदस्य योजनमाह अत्यन्तपदं चेति अत्यन्ताभावत्वनिरूपकप्रतियोगिसामानाधिकरण्यस्येति लाभा
य इत्यभिमानात् यः स्वपस्य प्रतियोगिनोऽत्यन्ताभावस्तादृशप्रतियोगिसामानाधिकरण्यपर्यन्तस्याभावविशेषणत्व

लाभायेत्यर्थः अत्यंताभावत्वनिरूपकप्रतियोगितापाइति प्रतियोगितानवच्छेदकेत्यत्रयाप्रतियोगितानिविष्टत्तत्रात्यंता
भावत्वरूपानुयोगितानिरूपकत्वस्यविशेषणत्वलाभायेत्यर्थः क्रमेणव्यावृत्तिमाह अन्यथेति सर्वस्यैवाभावस्येति
हेतुसमानाधिकरणाभावत्वेनोपादेयस्यसर्वस्यगोत्वाद्यभावस्येत्यर्थः स्वसमानाधिकरणाभावांतरभिन्नत्वात् स्वपस्य
समानाधिकरणांताहृशघटत्वाभावभेदवत्वादित्यर्थः स्वयानतिरिक्तत्वात् गोत्वाद्यभावाधिकरणस्वरूपत्वात् अभा
वाधिकरणकाभावप्रतियोगिकाभावस्याधिकरणाभूताभावस्वरूपतेतिसिद्धांतादितिभावः प्रतियोग्यसमानाधिक
रणाभावस्यहेतुभेदत्वापत्तेरितिगोत्वाद्यभावानामत्यंताभावत्वनिरूपकगोत्वादिरूप प्रतियोग्यसमानाधिकरण
त्वेपित्वनिष्ठभेदत्वनिरूपकघटत्वाद्यभावरूपप्रतियोगिसमानाधिकरणत्वविरहादितिभावः प्रतियोगितावच्छेदक
संबंधेनप्रतियोग्यसामानाधिकरण्यनिवेशस्यदैवतताहृशाभावाप्रसिद्धिः किंतुविशेषणताविशेषेणसाध्यतास्थलेत राम०
त्रातेऽभावेसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वस्यनिवेश्यत्वात् साध्यतावच्छेदकसंबंधस्यतत्रनिवेशेपि ३५

विशेषणताविशेषसंबंधेनयत्रसाध्यतातत्रैवतदप्रसिद्धिर्द्रष्टव्या अत्यंताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्य
निवेशेपिसर्वेषामेवाभावानांविशिष्टस्वाभावादिरूपात्यंताभावत्वनिरूपकप्रतियोगिसामानाधिकरण्यनियमात्त
दसमानाधिकरणाभावाप्रसिद्धेः याहृशप्रतियोगितेत्यादिनावक्ष्यमाणरीत्यनुसरणेप्रतियोगित्वेत्यंताभावत्वनिरू
पकत्वनिवेशेवैयर्थ्यमित्यत्राखरसबीजमेवहेतुसमानाधिकरणस्यभेदत्वादिनिरूपकाभावांतररूपप्रतियोगिसमा
नाधिकरणत्वेपिविवक्षितात्यंताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यवान्गोत्वाभावादिर्घटत्वाभावादिरू
पसाध्यस्यतन्निष्ठस्वभेदात्मकस्यप्रतियोगित्वादित्यर्थः अभावसाध्यकेतिघटत्वाभावादिसाध्यकपटत्वादिसाधनेत्य
र्थः अत्यंताभावत्वनिरूपकप्रतियोगितानिवेशेपिसंबंधांतरावच्छिन्नसाध्यात्यंताभावप्रतियोगितावारणायसाध्यता
वच्छेदकसंबंधावच्छिन्नत्वविशेषणस्यावश्यकत्वात्तद्विशेषणमनर्थकं साध्यतावच्छेदकसंबंधेनप्रतियोग्यसामानाधिकर
णनिवेशस्यसंबंधांतरावच्छिन्नाभाववारणेपिसर्वेषांवाभावेषुउक्तरीत्याअत्यंताभावत्वनिरूपकप्रतियोगिसामानाधिक

रराप्रस्यापि सत्वे न प्रकृतप्रतियोगितावदसमानाधिकरणस्यैव निवेशनीयतया साध्यनिष्ठप्रतियोगिताश्रयसमानाधि
करणस्य सद्धेतुत्वाधिकरणवृत्तित्वविशिष्टाभावे ऽसत्वेनाव्याप्त्यप्रसक्तेरिति स्वरसः वीजं तु साध्यवत्ति साधकस्थले प्रति
योगसमानाधिकरणस्य निवेशात्तत्रैवान्योन्याभावव्यावर्तकं पदं त्यंताभावपदं सार्थकमिति सार्वभौमेन लिखितं तन्न
तिपिसंबंधांतरावच्छिन्नप्रतियोगिताकात्यंताभावमादाय दोषवारणाय साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताया
स्तत्रावश्यं निवेशनीयतया ऽत्यंताभावत्वांशस्य निष्प्रयोजनकतया तादृशसंबंधविशेषावच्छिन्नप्रतियोगितानिवे
शस्य कृतत्वेनैव तत्पदसार्थक्यमिति संतत्वं संप्रदायानुमतात्यंताभावत्वनिरूपकप्रतियोगितानिवेशपक्षे निव्याप्ति
माशंकते अथेत्यादिना यदा गोत्वमिति कालिकसंबंधेन गोगोत्वयोर्हेतुसाध्यत्वेत्वा भाव्यगोमान पंगोत्वादि तिमति
शोहेतुत्स्त्वनिधाय कालिकसंबंधावच्छिन्नहेतुबोधकदामत्यपघटितोदाहरणाभिधानं एवमग्रेपि प्रलयस्येति व्यभि राम०
चारनिरूपकहेतुत्वाधिकरणस्येत्यादिः ध्वंसवत्वेनात्यंताभावानधिकरणत्वादिति प्राचामनुमतध्वंसप्रागभावयोरत्यन्ता ३६

भावविरोधित्वमादृत्य : एतदेवाभिप्रेत्योक्तपूर्वपक्षमाक्षेपं अथ कालिकसंबंधेन ध्वंसादिमत्यपि कालेऽत्यंताभाववृत्ताव
विरोधेः महाकालादौ समवायादिसंबंधावच्छिन्नरूपात्यंताभावस्य सत्वेतु मताचात् न च कालिकसंबंधावच्छिन्नगवा
त्यंताभावस्येतत्संबंधावच्छिन्नगोध्वंसाद्यभावरूपतायामत्यंताभावस्य नित्यप्रतियोगिकत्वमंगीकुर्वाणैः प्राचीनैरु
पगमात् कालिकसंबंधरूपप्रतियोगितावच्छेदकसंबंधेन गोध्वंसवति तत्संबंधावच्छिन्नगवात्यंताभाववृत्तिर्नैतेषाम
नुमतेति वाच्यं एवमपि कालिकसंबंधेन प्रतियोगिमत्यपि तत्संबंधावच्छिन्नात्यंताभावस्य कालिकसंबंधेन वृत्ताव
विरोधात् तेन संबंधेन प्रलये वर्तमानमत्यंताभावमादायातिव्याप्तिवारणासंभवात् अभावस्य संबंधविशेषनिवेशो
प्रयोजनाभावात् न च प्रतियोगिसमानाधिकरणपेनाघटितापि व्याप्तिरस्तु मिथ्योपपत्तिकीतद्विशेषणानुपस्थितिदशा
यां व्याप्त्यनुमितेरनुभविकतायाव दुर्निवारत्वात् तत्र च भावस्य संबंधविशिष्टेऽवस्थेऽप्रवेशः अन्यथा हेतुमति का
लिकादिसंबंधेन वर्तमानसाध्याभावमादायाव्याप्तेरिति तादृशव्याप्तिरेवोक्तस्थले प्रमात्वप्रसंगपरीयं ग्रंथ इति वा

यं यत्र हेतुमति साध्याभावः कालिकसंबंधेन वर्त्तते तत्र प्रतियोग्यसामानाधिकरण्यगर्भव्याप्तिग्रहस्य भ्रमतोपगमेऽनु
मितिविरहात्ताहृशव्याप्तावपि अभावस्य संबंधविशेषाप्रवेशात् मैवं प्रतियोग्यसामानाधिकरण्यानुपस्थितिदशायांस
त्तावान् द्रव्यत्वादित्यादावप्यभ्रांतस्यानुमितिरनुभवसिद्धा तदनुरोधेन भावसाध्यके दैशिकविशेषणतासंबंधेन
हेतुमद्वृत्तित्वगर्भायाम्पि व्याप्तेरनुमितिप्रयोजकताया वाच्यातथासतिताहृशव्याप्तिभ्रमात् पक्षस्थलेऽनुमिति
प्रसंगः परत्यापत्तद्रंथस्यसामंजस्यात् न च प्रतियोग्यसामानाधिकरण्यगर्भव्याप्तौ अभावस्य संबंधविशेषानिवेशात्
अभावीयसंबंधविशेषगर्भप्रतियोग्यसामानाधिकरण्यगर्भव्यभिचारस्य हि विरोधित्वेनैव प्रतियोग्यसामानाधिक
रण्यगर्भतदगर्भव्याप्त्योरनुगमस्यान्तयोरनुमित्यौपयिकत्वावच्छेदकतयाऽभावीयसंबंधविशेषघटितव्याप्तिग्रह
स्यताहृशव्यभिचारग्रहाप्रतिबंधकतया ताहृशव्याप्तेर्नानुमित्यौपयिकत्वनिर्वाहः इति वाच्यं ताहृशव्याप्तिसंग्रहाय वा राम०
भावीयसंबंधविशेषघटितप्रतियोग्यसामानाधिकरण्यघटितव्यभिचारस्य हि विरोधित्वे व्याप्त्यौनामनुगमनैौपत्वात् ३७

तावत्ताप्यभावीयसंबंधविशेषाघटितप्रतियोग्यसामानाधिकरण्यघटितव्याप्तेः संग्रहसंभवात् एवं सत्यव्यावर्त्तका
भावीयसंबंधविशेषघटितप्रतियोग्यसामानाधिकरण्यघटितव्याप्तिज्ञानादप्यनुमितिःस्यादिति चेदिष्टमेवैतत् एवं
सति प्रतियोग्यसामानाधिकरण्याभावीयसंबंधविशेषघटितव्याप्तिप्रमातोप्युक्तस्थलेऽनुमितिप्रसंगो दुर्वार इति चे
न्न कालकृतिरस्माकं वस्तुतस्तु दीधितिकृता स्वयं निष्कर्षेशीय हेतुमतिप्रतियोग्यनधिकरणत्वनिवेशकल्पे प्रतियो
ग्यनधिकरणत्वघटितव्याप्तावभावीयसंबंधनिवेशस्यानिष्प्रयोजनत्वेऽपि प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य हे
तुमद्वृत्तित्वगर्भायाम्प्यात्रव्याप्तौ न दोषसंबंधनिवेशनमावश्यकं अन्यथा संयोगी द्रव्यत्वादित्यादौ प्रतियोग्यनधिकरण
गुणादिवृत्तित्वविशिष्टस्यापि संयोगाभावस्य कालिकसंबंधेन हेत्वधिकरणकालवृत्तितया व्याप्तिप्रसंगात् एकसं
बंधेनैकाधिकरणवृत्तित्वविशिष्टस्यापि अन्यसंबंधेनाधिकरणांतरवृत्तित्वात् प्रतियोगिसामानाधिकरण्याभावनिवेशा
त्कल्पे पिगुणादौ नद्विशिष्टस्यसंयोगाद्यभावस्य कालिकसंबंधेन कालवृत्तित्वात् तत्कल्पेऽप्यव्याप्तिवारकत्वात् न

च प्रतियोगिसामानाधिकरण्यविशिष्टस्य तस्य कालवृत्तित्वे प्रतियोगिसामानाधिकरण्याभावविशिष्टस्य न तद्वृत्तित्व
संभवः भावाभावविशिष्टस्य एककालाधिकरणवृत्तित्वे प्रतियोगिसामानाधिकरण्याभावविशिष्टसंयोगाद्यभावस्य दैशि
कविशेषणतया पि द्रव्यवृत्तित्वप्रसंगादिति वाच्यं विरोधिनो भावाभावयोः कालिकसंबंधेनैकाधिकरणवृत्तिता वत्
भावाभावविशिष्टस्यापि कालिकसंबंधेनैकत्र वृत्तौ विरोधाभावात् घटाद्यभावस्य दैशिकविशेषणतासंबंधनिवेशे
ऽभावसाध्यके व्यभिचारिणाभावस्य दैशिकविशेषणतानभ्युपगमेऽतिव्याप्त्या साध्यनिरूपितप्रतियोगितावच्छे
दकसंबंधनिवेशे समवायसंबंधावच्छिन्नजात्यभावसाध्यकजातित्वादिहेतावव्याप्तिः जात्यादिरूपहेतुमति तादृशे
न समवायेन वृत्तेरप्रसिद्धेः तथापि साध्यनिरूपितप्रतियोगितावच्छेदकसंबंधातिरिक्तसंबंधेन यत्साध्याभावस्य वृत्ति
स्तदन्यहेतुमद्वृत्तेः प्रकृतप्रतियोगितानिरूपितानुयोगितावच्छेदकसंबंधेन हेतुमति वृत्तेर्वा ऽभावविशेषणत्वोपग राम०
मान्न दोषः उक्तस्थले हेतुमति कालिकालविशेषणवृत्तित्वविशिष्टनित्यस्यात्यंताभावप्रसिद्ध्याऽतिव्याप्तिसंगतिः अत्य ३८

ताभावत्वघटकनित्यत्वांशपरित्यागे ध्वंसस्य साधारण्यात् संसर्गाभावत्वनिवेशे महाप्रलये गोत्वरूपसामान्यधर्मावच्छिन्न
प्रतियोगिताकध्वंसोपगंतृमते ध्वंसाभावादापेक्षस्यालातिव्याप्तिः शक्यते वारयितुं मिथ्याशंसामाह संसर्गाभावेति दैशि
कविशेषणतयाविध्वंसस्य कालवृत्तित्वमित्याशयेन उक्तशंकासंगतिः अन्यथाऽभावस्य तादृशसंबंधेन वृत्तिनि
वेशेऽत्यंताभावभिन्नध्वंसमप्यादायातिव्याप्तेर्दुर्वारत्वात् नच प्रतियोग्यधिकरणे महाकाले गोध्वंसस्य दैशिक
विशेषणतासत्त्वेपि प्रतियोग्यनधिकरणप्रलये तस्य तादृशसंबंधोऽप्रामाणिक इति वाच्यं यदुपाध्युपविशिष्टस्य प्र
तियोग्यधिकरणत्वं तदन्योपाधिविशिष्टस्यैव महाकालस्य तदभावाधिकरणतया महाकालस्य दैशिकविशेषणता
तया ध्वंसाधारत्वे प्रलयात्मकोपाधेरपि तादृशसंबंधेन तदाधारताया आवश्यकत्वात् अन्यथा प्रलये गौर्नास्तीति
व्यवहारानुपपत्तेः यदास्पंद इति अत्र च व्यभिचारो निरूपाधिकरणं वं उपलयः त्वन्यद्व्यानधिकरणे तस्मिन्द्व्यणुका
सत्त्वात् पुनर्द्व्यणुकोत्पत्त्याद्यनुरोधेन परमाणूनां स्पंदस्वीकारस्यावश्यकत्वात् तथा च हेत्वधिकरणे तत्र द्व्यणुकस

मान्यध्वंसप्रागभावयोरसत्त्वादतिव्याप्तिरिति भावः द्व्यणुकनाशात्कुत्राक्रियापाउत्तरसंयोगताश्रयापायाद्यधिकरोचर
मपरमाणुसंयोगनाशरूपमहाप्रलयपूर्वं तत्रापि कृतोद्व्यणुकसामान्यध्वंससत्त्वादत्राप्यतिव्याप्तिर्न विचारसहत्वा
तोपदादृष्टमिति ज्ञानत्वमात्रेण साध्यानायां प्रलये ईश्वरीयज्ञानसत्त्वाद्ध्वंसहेतुरेवोत्पत्तोजन्यमिति विस्पष्टत्वाभिव्य
क्तिमुक्तिरिति मते खंडप्रलयेपि मुक्तात्मनि जन्यज्ञानसत्त्वान्नसद्धेतुत्वं संभवतीति अतो दुःखितिजन्यमात्रं प्रत्यदृष्टस्य हे
तुनया महाप्रलयाव्यवहितनाशकृत्कुरोपितज्जनकीभूतस्यादृष्टस्यावश्यकत्वादिति तदात्मज्ञानत्वदुःखत्वावच्छिन्ने
ध्वंससत्त्वात्रापि दर्शितस्थलयोरतिव्याप्तिः संभवतीत्यतः स्थलान्तरमाह यदेति यदात्मसमवेतमदृष्टं न प्रलयजन
कं सत्त्वं यदेन विवक्षितः व्यभिचारस्थानं खंडप्रलये तु सत्त्वादोषोध्यः खंडप्रलये निरुद्धाराउकादिध्वंसस्य घकत्वा
दिरूपसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वसंभवं व्युत्पादयति नन्वीति तयोः ध्वंसप्रागभावयोः सामान्याभावत्व रामू०
मतेपि सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वमतेपि ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वमते तन्तयोस्तथात्वमिते ३९

तत् सूचयितुं मतेयीति एकविशेषेति एकविशेषप्रागभाववतिनसामान्यावच्छिन्नं ध्वंसस्य विशेषान्तरध्वंसवतिनसामान्य
धर्मावच्छिन्नप्रागभावस्य संभव इत्यर्थः न्यूनानतिरिक्तवृत्तिधर्मस्यैवावच्छेदकतया तत्कालीनध्वंसादिप्रतियोगिताश्रूप
नागतादियदार्थसाधारण्यस्य तादृशप्रतियोगितावच्छेदकत्वासंभवादिति भावः यद्यप्येवं महाप्रलयवृत्तियोगिपो ध्वंसाः प्रत्येक
गोव्यक्तिमात्रवृत्तिप्रतियोगिताकाः इति न कस्यापि ध्वंसस्य प्रतियोगितायाः समनियतगोत्वं तथापि चरमध्वंसस्य यावत्प्रतियो
गिकत्वोपगमे तत्प्रतियोगितावच्छेदकत्वं गोत्वस्य संभवतीत्यभिप्रायेणासंसर्गाभावत्वं निवेश्य पूर्वोक्तस्थलमुपेक्ष्याद्या
राउकादिसाधकस्पंदादिहेतुकस्थले गतिव्याप्तिरभिहिता वस्तुतो ध्वंसप्रागभावयोर्व्यधिकरणप्रतियोगिकत्वविरहाच्चूर
मांशो ध्वंसस्यापि यावद्धेतुप्रतियोगिकत्वं न संभवतीति ध्येयं विरोधिनः प्रतियोगिनोऽधिकरणे कालएवच्छेदभावोव तेन दास्या
रो ध्वंसप्रागभाववतिकाले त्रयो वर्तत इति सूचनाय प्रतियोगिमत्त्व इत्येतिदृष्टान्तः विरोधाभावात् बाधकाभावाच्च नचाचहेत्वधि
करणे प्रलयादौ गोत्वावच्छिन्नाभावसत्त्वान्नोक्तस्थले गतिव्याप्तिरिति भावः नच प्रलये गोत्वावच्छिन्नाभावोऽप्रामाणिकः प्रत्य

त्वापेगमदनुमानस्याप्रयोजकत्वादितिवाच्यं प्रलयेगोनास्तीतिशब्दस्यैवप्रमाणत्वात् नहितादृशवाक्यस्याप्रामाण्यंकश्चिद्दृष्टै
तिनचध्वंसादिरवनञर्थोनात्यंताभावइतिवाच्यं अनुयोगितावच्छेदकसमानाधिकरणप्रतियोगिताकाभावमात्रस्य नञ
प्रतिपादनेऽतिप्रसंगात्तदवच्छिन्नप्रतियोगिताकाभावबोधकतया एवतस्यव्युत्पन्नतया अत्यंताभावमात्रस्यसामान्यधर्माव
च्छिन्नप्रतियोगिताकत्वमतेध्वंसादेर्नञ्प्रतिपादनासंभवात् अन्यथाप्रतियोगिमतितद्ध्वंसप्रागभाववतिचकालेकालिकसं
बंधावच्छिन्नप्रतियोगिताकस्यात्यंताभावस्यावृत्तेरत्यंताभावस्य तादृशात्यंताभावस्यकालमात्रावृत्तित्वनिर्देशिकविशेष
णतयोत्पादिः नतु ध्वंसप्रागभाववतिअत्यंताभाववृत्तौ तस्य तदविरोधित्वावच्छप्रतियोगिमतितद्वृत्त्यात्तस्यप्रतियोगपविरोधि
नाप्यकापघ्नोऽविशेषात इत्यत आह दर्पास्त्विति एकस्यप्रतियोगिमतः कालस्यदेशभेदावच्छिन्नप्रतियोगिपनवच्छेदकदेशा राम०
वच्छिन्नत्वथात्वंदैशिकसंबंधेनकालिकसंबंधावच्छिन्नात्यंताभाववत्वंतथाचप्रतियोग्यभावयोरैकावच्छेदे नएकत्रावर्तेर्मा ४०
नत्वविरोधित्वंतावतापिकृपातमेवेतिभावः अपरस्यध्वंसादिमतः स्वरूपावच्छिन्नध्वंसाधिकरणतावच्छेदकरूपावच्छिन्नत्व

प्यात्वमित्यनुषज्यते तथाचएकावच्छेदेनएकत्रवर्तमानतत्तयाध्वंसाद्यविरोधित्वंअत्यंताभावस्येतिभावः ननुकालवृत्तौ
देशस्यावच्छेदकत्वे किंयत्नमतआह देशेकालस्यैवेतियथादेशेदैशिकसंबंधावच्छिन्नाभावस्यवृत्तौदेशस्यावच्छेदकत्वे किं
यंत्रमतआह देशेकालस्यैवेतियथादेशे दैशिकसंबंधावच्छिन्नाभावस्यवृत्तौकालस्यावच्छेदकत्वमिदानीमत्रगौरवास्ती
त्यादिप्रतीतिवलात्तथाकालेकालिकसंबंधावच्छिन्नाभावस्यवृत्तावपिदेशादिरूपविशेषणस्यावश्यकत्वेन यथाविधप्रती
तिवलात्तथाकालो देशवान् इत्यप्रतीतेः कालावच्छेदे नदेशवृत्तिर्देशावच्छेदेनकालवृत्तिर्विषयत्वविनिगमकाभावा
त् अवच्छेदकत्वाधिकरणत्वयोरुभयोरेवप्रामाण्येनाऽऽदृतिभावः प्रतियोगिमत्यपिकालेवात्यंताभावस्यवृत्तौ तस्यासमा
नाधिकरणत्वेनयावच्छेदकत्वंतमादाययोक्तातिव्याप्तिर्वारिततेइत्यत आह तत्रान्येचेतिप्रतियोगिमत्यनयादाविरुद्धः
ततभावस्यांगवात्यंताभावस्यप्रतियोगिव्यधिकरणत्वात्प्रतियोगिसामानाधिकरण्याभाववत्वात् सामानाधिकरण्यस्या
व्याप्यवृत्तित्वात्मतत्वप्रतियोगिसामानाधिकरण्याभावस्याभावविशेषणत्वात् अन्यथासंयोगिसत्त्वादित्यादाववाति व्याप्तिः

तस्यव्याप्यवृत्तितापत्तेश्चप्रतियोग्यनधिकरणवृत्तित्वस्यैवनिवेशनिष्पत्तप्रसंगत्यादि वृत्तिगवात्पंताभावस्यान्यत्रप्रति
तस्यव्याप्यवृत्तितापत्तेश्चप्रतियोग्यनधिकरणवृत्तित्वस्यैवनिवेशानिष्पत्तप्रसंगत्यादि तदघटितात्वंताभावत्वयोर्व्याप्ति घ
योगिसमानाधिकरणात्वेपिलक्षणाघटकत्वाभावातादितिभाव : संसर्गाभावत्वंतदघटितात्यंताभावत्वयोर्व्याप्ति घ
टितत्वेनानवस्थाभाषंकतेनचेतिसंसर्गाभाव विशेषः सदातनसंसर्गाभावः संसर्गो दोषः तादात्म्यातिरिक्तसंबंधेनप्रति
योगिपरोपः तद्रूपत्वादवृत्तित्वेतिस्वाव्यवहितपूर्वक्षणादघ्येदेनतद्वतोऽन्यास्मिन्वर्ततेपघ्नत्वदन्यत्वेनेत्यर्थः तत्रजन्यात्वेषध्य
र्वसत्यमौनिपमानरस्यविशिष्टधोनियामकत्वरूपंसंबंधत्वघटकनिपमस्यन्यत्रसंसर्गाभावत्वशरीरेनकृतिरितित्त्व
दृन्याव्वृत्तित्वरूपनियमस्यैवतत्रप्रवेशावीपत्वादितिभावः स्वमतेनियमानंतभोवस्यानुपदंवक्ष्यमाणत्वादाहुरित्यु
कं नियमाघटितमितिआरोपस्याभावबुद्धिहेतुतायानियुक्तिकत्वात्तादात्म्यातिरिक्तसंबंधावच्छिन्नप्रतियोगिता राम० ४१
काभावत्वस्यैवसंसर्गाभावत्वरूपत्वादितिभावः प्रयोजनविरहइतिसाध्यतावच्छेदकसंबंधेनपादृशप्रतियोगितावच्छेदकत्वस्यनिवेशनीयतयान्योन्याभावत्वादितिरू
च्छेदकवच्छिन्नानधिकरणत्वेहेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वस्य

पकप्रतियोगितामादायदोषप्रसक्तेरितिभावः प्रतियोगितावच्छेदकसंबंधेनप्रतियोगिवैयधिकरण्यनिवेशकल्पमभिप्रे
त्याहाऽव्याप्तिश्चेतितन्मतेसंबंधांतरावच्छिन्नसाध्याभावमादायदोषवारणायसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वा
याश्यनिवेशनियतयातादात्म्यसंबंधेनयत्रसाध्यतामत्रतादात्म्यसंबंधावच्छिन्नसंसर्गाभावप्रतियोगित्वाप्रसिद्धाव्या
सिरप्याप्यधेतेत्यर्थः द्विगुणाद्यौनांदेशावृत्तावच्छेदकत्वमेवनत्वधिकरणत्वमितिमतेमतसामूलेत्वयिन्देशिकविशेषणतापन्नाधिकरणत्वमितिद्रव्यत्वमात्रस्पष्टेत्युच्चेमनोरूपहेत्वधिकरणएवसाध्याभावः प्रतियोगिव्यधिकरणइतिनाति
रात्तपान्नाधिकरणत्वमितिद्रव्यत्वमात्रस्पष्टेत्युच्चेमनोरूपहेत्वधिकरणएवसाध्याभावः प्रतियोगिव्यधिकरणइतिनाति
व्याप्तिसंभवइत्यतोमनोन्येतिसाध्याश्रूयानामपीतिसाध्यतावच्छेदकसंबंधेनेत्यादिः एवंचाधिकरणत्वस्थानेसंबंधित्व
न्नानिवेशे अन्योन्याभावोपीतितथाचनतादात्म्यसंबंधेनसाध्यतायामव्याप्तिरितिभावः द्विशिष्टस्यप्रतियोगिसामानाक
रणाभाववत्वेपिहेत्वधिकरणोभूतद्रव्याद्येकत्वकपिसंयोगसामानाधिकरण्याभावविशिष्टकपिसंयोगाभाववत्वंयत्रसा
मानाधिकरण्यविशिष्टवत्वंतत्रतदभावविशिष्टाधिकरणत्वाप्रसत्त्यात् अतः साध्याभावोनलक्षणाघटकंइतिनाव्याप्तिरि

तिभावः हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्याभावनिवेशनेनाव्याप्तिवारणसम्भवे कस्तेपि मूलोपात्तहेतुसामा
नाधिकरण्यांशनिवेशविपर्ययेभिप्रायेनानतथाविवक्षितं सार्वभौमैर्नादृतं प्रतियोग्यसामानाधिकरण्यावच्छेदकीभूताधिकरण
वच्छिन्नहेतुसामानाधिकरण्यस्याभावविशेषणत्वमुपेक्ष्य चवुपाध्यायमते प्रतियोग्यसमानाधिकरणत्वरूपविशेषणवै
शिष्ट्यावच्छेदेन हेतुसामानाधिकरण्यरूपविशेषणवैशिष्ट्यनिवेशनस्य बलाघवमित्यालोच्यते तदनुपादानादौ क्षितिकारणाप्र
तियोग्यसामानाधिकरणावच्छिन्नहेतुसामानाधिकरण्यं निवेशितं यथाश्रुतमूलमल्पं प्रमेवार्थः प्रतियोग्यसामानाधि
करणपहेतुसामानाधिकरण्ययोरुद्देश्यतावच्छेदकविधेयभावस्य विवक्षितत्वात् उद्देश्यतावच्छेदकविधेययोरवच्छेद्यावच्छे
दकभावत्वाभस्य च व्युत्पत्तिसिद्धत्वात् प्रतियोग्यसामानाधिकरणस्य हेतुसामानाधिकरण्यावच्छेदकत्वे प्रतियोग्यसामाना राम०
धिकरणरूपहेतुतावच्छेदकावच्छिन्नसंयोगाभावादेः सत्त्वादिव्याप्यत्वप्रसंगः सत्त्वादिसामानाधिकरणपावच्छेदकरूपव ४२
त्वस्य सत्त्वादिव्याप्तित्वादिति सार्वभौमोक्तदूषणमेतन्मते निरवकाशं तादृशव्याप्त्यावनेन पारिभाषिकस्यैवावच्छेदकत्वस्य

विवक्षितत्वात् तादृशस्य तथाविधहेतुतावच्छेदकव्यापकत्वात् अन्यथा विषयितासंबन्धेन घटत्वावच्छिन्नस्य ज्ञा
नत्वादिव्याप्यतापत्तेर्दुर्वारत्वात् तादृशसंबन्धेन ज्ञानत्वादिसामानाधिकरण्ये ज्ञानविषयतारूपे घटत्वादेरवच्छेदकत्वात्
नत्वव्याप्यवृत्तिसाधकाव्याप्तिवारणाय प्रतियोगिसमानाधिकरणभिन्नत्वरूपप्रतियोग्यसमानाधिकरणत्वं निवेश्यतां कि
मुक्तविवक्षया गुणादौ प्रतियोगिसामानाधिकरण्याभाववतीपि कपिसंयोगाभावादेः प्रतियोगिसमानाधिकरणभिन्नत्ववि
रहात् भेदस्याव्याप्यवृत्तितानुपगमात् इत्यत आह तद्वद्वृत्तीति प्रतियोगिमद्वृत्तीत्यर्थः नार्थः न प्रतियोग्यसमानाधिकरणा
पदेन विवक्षितः अव्याप्यवृत्तीति संयोगीसत्त्वादित्यादावित्यर्थः अतिप्रसंगादिति संयोगरूपसाध्याभाववद्द्रव्यादौ प्र
तियोगिसमानाधिकरणत्वात् भिन्नत्वविरहेणालक्षणघटकत्वादिति भावः अत्र च सामानाधिकरणपस्याव्याप्यप्र
तितायाः प्राकृतपंतदूषितत्वात् प्रतियोगिसामानाधिकरण्याभावनिवेशे यद्यप्यव्याप्तिवारणसम्भवः इत्येनाह तादृशानुप
पत्तिमेव यद्यपि पादिकल्पान्तरानुसरणबीजतया व्याचष्टे अत्र चेति असमानाधिकरणपनिवेशकल्पे चेत्यर्थः इत्यस्वरसादित्य

नेनान्वयः प्रतीतिः संयोगाभाववद्गुणेन संयोगसामानाधिकरण्यमित्यादिप्रतीतिः अन्यथा गुणादिनिष्ठसामानाधिकरण्यावच्छे
दकत्वाद्यभावविषयकतया कपिसंयोगी एतत्त्वादित्यादावपि कपिसंयोगादिरूपसाध्याभावस्य प्रतियोगिवैयधिकरण्यावच्छे
दकगुणादिवृत्तित्वावच्छिन्नतया लक्षणघटकस्यैवेत्यव्याप्तितादवस्थ्यादतो हेतीति प्रतियोगिवैयधिकरण्यं चेत्यर्थः हेत्वधिकरणे ॥ हे
त्वधिकरणनिरूपिते एतत्कल्पे च पृथक् हेतुसामानाधिकरण्येन निवेशप्रभेदेति भावः एवं च हेत्वधिकरणनिरूपितप्रतियो
ग्यनधिकरणवृत्तित्वमेवाभावे विशेषणं देयं न तु तदवच्छेदकावच्छिन्नत्वमनतिप्रयोजकत्वात् हेतौ प्रतियोग्यनधिकरण
निरूपितत्वं हेत्वधिकरणनिरूपितत्वयोर्निवेशापेक्षया तत्र हेत्वधिकरणनिरूपितत्वस्य हेत्वधिकरणे प्रतियोग्यनधिक
रणत्वनिवेशे च लाघवमित्यालोच्य तथैव निष्कर्षयति प्रतियोग्यनधिकरणीभूतेति प्रतियोगितावच्छेदकावच्छिन्नानधि राम०
करणेत्यर्थः तेन न दर्शितातिव्याप्तिः ॥ ॥ यस्य कस्यचिदित्यादिषु स्थलानामनधिकरणत्वमित्यनेनान्वयः प्रतियोगिता ४३
वच्छेदकावच्छिन्नस्य यस्य कस्यचिदनधिकरणत्वं स्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणप्रतियोगिभेदमात्रं तत्सामा

न्यस्यानधिकरणत्वं स्वप्रतियोगितावच्छेदकत्वेनानुगतीकृतप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वावच्छिन्नभेदः
प्रतियोगितावच्छेदकपदं किंचिदिति प्रतियोगितावच्छेदकं तत्तद्व्यक्तित्वेन निवेश्य तदवच्छिन्नाधिकरणत्वावच्छिन्नभेदो वा
विवक्षित इत्यर्थः नव्यमते संयोगसामान्याभावस्यैकत्वाद्व्यापितया तत्र साध्ये सत्त्वादिः सद्धेतुरेवेत्यतो द्रव्यत्वाभाववान्
वेति तत्प्रतियोगि तत्संयोगरूपसाध्याभावप्रतियोगीत्यर्थः तत्तत्संयोगत्वावच्छिन्नाभावाभावस्य तत्तत्संयोगादेः संयोग
सामान्यानतिरिक्तत्वादिति भावः द्रव्यत्वरूपाभावस्यैकव्यक्तिकतया व्यक्तिविशेषाभावरूपप्रतियोगिसामानाधिकरण्य
न घटत्वे इत्यतस्तस्य किंचिद्विशिष्टस्याभावरूपप्रतियोगिसामानाधिकरण्यमाह नित्यत्वादावित्यादिना जन्यत्वादिप
ऽग्रहः ननु विशिष्टाभावो विशिष्टस्यैव द्रव्यत्वस्य प्रतियोगी न तु शुद्धद्रव्यत्वस्येति कथं शुद्धद्रव्यत्वस्य प्रतियोगिवैयधि
करणानुपपत्तिरित्यत आह स्वाभावे इति न च सर्वस्यैवाभावस्य पूर्वोक्तगुणादिवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसमाना
धिकरणतया प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या नातिव्याप्तिसंभव इति वाच्यं प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिवै

पधिकरणापनिवेशपक्षेऽप्यसंभवस्य साध्यतावच्छेदकसंबंधेनात्तद्वैयधिकरणापनिवेशपक्षेचस्वरूपसंबंधावच्छिन्नसाध्यक
स्यत्वेसाध्यतावच्छेदकसंबंधेनसर्वेषामेवाभावानांप्रतियोगिसमानाधिकरणत्वादव्याप्तेः प्रसक्तत्वापत्संबंधेन स्वप्रति
योगितावच्छेदकानवच्छिन्नानधिकरणत्वंहेतुमतस्तत्संबंधावच्छिन्नतदभावीयप्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छि
न्नत्वसाध्यतावच्छेदकधर्मावच्छिन्नत्वोभयाभावश्चविवक्षणीयः एवंचोक्तस्य स्वरूपसंबंधेन प्रतियोग्यनधिकरणत्वा
प्रसिद्धावपिसंयोगादिसंबंधेनघटाघभावीयप्रतियोग्यनधिकरणीभूतहेतुमति घटघटाभावीयप्रतियोगितायां स्वरू
पसंबंधावच्छिन्नत्वतद्व्यत्वाभावत्वाद्यवच्छिन्नत्वोभयाभावस्यक्षेत्रत्वात् व्याप्तियाल्पिरित्यभिप्रायात् केचित्तुस्वप्रतियोगित्वा
भान्यानधिकरणाहेतत्वाधिकरणाकत्वेनगगनाभावस्यवत्ताहशप्रतियोगिव्यधिकरणः नचस्वप्रतियोगिसामान्यांतर्गतनि
त्यत्वादिविशिष्टगगनाभावाभावरूपप्रतियोग्यधिकरणाहेतत्वाधिकरणाकत्वेनतस्य नतथात्वसंभवइतिवाच्यंनित्यएवनि
त्यत्वविशिष्टगगनाभावाभावोनास्तीतिप्रत्ययात् तत्कालेपस्यच नित्यत्वेनित्यत्वविशिष्टगगनाभावाभावाभावत्वकल्प

राम०
४४

नेनैवोपपत्तेः गगनाभावेनतदकल्पनात् नित्यत्वविशिष्टगगनाभावाभावस्य गगनाभावप्रतियोगित्वादित्याहुः तत्रत
यापिपूर्वक्षणावृत्तित्वविशिष्टगगनाभावाभावरूपप्रतियोग्यधिकरणाहेतत्वाधिकरणाकत्वेनगगनाभावस्यप्रतियोगि
व्यधिकरणत्वासंभवात्पूर्वक्षणावृत्तावृत्तावपिपूर्वक्षणावृत्तित्वविशिष्टगगनाभावाभावोनास्तीतिप्रत्ययात्पूर्वक्षणावृ
त्तित्वविशिष्टगगनाभावाभावाभावत्वस्य पूर्वक्षणावृत्तित्वे कल्पयितुमशक्यत्वेन गगनाभावानतिरिक्तविशिष्टगगनाभा
वएवतत्वस्यकल्पनीयतया पूर्वक्षणावृत्तित्वविशिष्टगगनाभावाभावे गगनाभावप्रतियोगित्वावश्यकत्वादिति स्वरूप
संबंधेनगगनादेर्वृत्तिमत्वेनैषदोषइतिध्येयं नव्यास्तु निसंयोगसामान्याभावस्यासर्वमतसिद्धत्वविरहात् कथमितिजन्यद्रव्यवृ
त्तिहेतुकेहेत्वधिकरणान्यद्रव्येगुणसामान्याभावस्याप्युत्पत्तिकालावच्छेदेन स्वमतेसत्वात्तत्रतादृशप्रतियोगिवैयधिकर
रापेनघटेतेऽव्याप्त्यापत्त्या हेतुकानुसरणंगुणसामान्याभावत्वस्यकपिसंयोगस्वरूपाभावप्रतियोगितावच्छेदकत्वंस्फु
टीकर्तुंकपिसंयोगानांगुणात्वकीर्तनंतत्प्रतियोगितावच्छेदकेतितथाचतादृशाभावाञ्चापियत्किंचित्प्रतियोगितावच्छे

दकावच्छिन्नप्रतियोगिव्यधिकरणा। एवं तत्प्रतियोगितावच्छेदकत्वात् कपिसंयोगाभाववत्त्वस्याव्याप्तिरिति भावः। यादृशेति
यत्‌यत्‌ प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वावच्छिन्नभेदवत्त्वमित्यर्थे कपिसंयोगी एतत्त्वादित्यादौ यत्किंचित्क
पिसंयोगादिव्यत्त्वानधिकरणत्वेपि हेतुमतः कपिसंयोगत्वावच्छिन्नाधिकरणसामान्यभेदवत्त्वासंभवात् स्वपदेन तादृशी
प्रतियोगितेत्यादावनुगमकन्तेनेति नाव्याप्तिः द्रव्यत्वाभाववान् सत्त्वादित्यादौ हेतुमतो द्रव्यादेर्विशिष्टद्रव्यत्वाद्यभावरूपप्रति
योग्यधिकरणत्वेपि द्रव्यत्वाभावत्वावच्छिन्नाप्रतियोगितातदवच्छेदकावच्छिन्नानधिकरणत्वात् तस्य लक्षणघटके
तिन्नातिव्याप्तिः कपिसंयोगाभाववानात्मत्वादित्यादौ च कपिसंयोगाभावत्वावच्छिन्नाप्रतियोगितातदवच्छेदकावच्छि
न्नाधिकरणमेव हेतुमत् किन्तु गुणसामान्याभावत्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नानधिकरणमेव तदनवच्छेदकमे राम०
वसाध्यत्वावच्छेदकमिति नाव्याप्तिरिति भावः। नचैवं घटत्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नानधिकरणांक्षमवत् तादृ ४५
शप्रतियोगितानवच्छेदकं च द्वित्वमित्याद्याकारकस्याभावकूटावगाहिनः समूहालंबनज्ञानस्यैवानुमितिहेतुतया वि

शिष्टपरामर्शस्यानुमितिहेतुत्वमनुपपन्नं अभावकूटघटिततया व्याप्तेर्दुर्ज्ञेयत्वापत्तेश्चेति वाच्यं हेतुमन्निष्ठभेदप्रतियोगिता
यां स्वावच्छेदकावच्छिन्नवत्त्वसंबंधेनावच्छेदिकाया प्रतियोगितातदनवच्छेदकत्वस्य एकसामान्याभावरूपनिवेशे तात्पर्या
त्। तादृशभेदप्रतियोगितायां स्वावच्छिन्नवत्त्वसंबंधेनानवच्छेदकत्वस्य साध्यतावच्छेदकविशेषणे तथैव सामंजस्येपि पृथा
सन्निवेशनवैयर्थ्यं तथाविधसंबंधेन तादृशभेदप्रतियोगित्वानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरणं
व्याप्तिरिति पुनरन्योन्याभावघटितलक्षणनिष्कृष्टार्थो बोध्यः। संबंधसामान्येन हेतुमन्निवेशे व्याप्तेर्वैरूप्यापन्नत्वात्सं
बंधविशेषेण हेतुमत्त्वं प्रतियोगितायां संबंधविशेषावच्छिन्नत्वानिवेशे चासंभवस्य वाच्यतया तत्र तन्निवेशपतित्र
त्वेन्नियाह्यसामानाधिकरण्ये अनुमितिकारणीभूततज्ज्ञानविषयहेतुनिष्ठसाध्यसामानाधिकरण्यशरीरे साध्यस्यैवे
ति अव्याप्यात्वसामानाधिकरण्यप्रविष्टे इति चानुषज्यते तथा च तत्संबंधेन हेतुमति वर्तते योऽभावस्तदीयतत्संबंधाव
च्छिन्नप्रतियोगितानवच्छेदको यो धर्मः स तदवच्छिन्नस्य तेन साध्यतावच्छेदकसंबंधेनाधिकरणे तेन हेतुतावच्छेदकसंबंधे

नवर्त्तमानत्वंतादृशसाध्यतावच्छेदकसंबंधेनसाध्यानुमितिप्रयोजकमित्यर्थः व्यापकताघटकसाध्यीयसंबंधेन साध्याधिक
रणेतादृशसाधनीयसंबंधेनसाधनस्यावर्त्तमानत्वम्यहृदयापांश्चनुमितिवारणाय सामानाधिकरण्यशरीरेसंबंधविशेषनि
वेशानंवस्तुतस्तुविरुद्धवृत्तित्वेनज्ञायमानधर्मवत्ताज्ञानस्यानुमितावेवप्रतिबंधकतायावश्यमास्थात्तत्वयासामानाधिकरण्यशरी
रेसंबंधविशेषानिवेशेपिनक्षतिः सामानाधिकरण्यावगाहितम्यांप्रयोजकत्वंचविशिष्टपरामर्शेनिर्वाह्यापेपियत्तेपर्वतीय
धूमव्यापकोवह्निरितिव्यापकतापरामर्शेहेतुनापादूषितत्वोच्चनचस्वव्यापकसाध्यहेतुमानित्याकारकः सामानाधिकर
ण्यानवगाहिविशिष्टपरामर्शएवहेतुरस्त्वितिनवाच्यंवह्नीत्यर्थस्यसामानाधिकरण्यपर्यवसितत्वादित्यवधेयंप्रतियो
गिवैयधिकरण्यशरीरेप्रतियोगितावच्छेदकसंबंधस्यालेसाध्यतावच्छेदकसंबंधनिवेशानएवसाध्यतावच्छेदकसंबंधेनसा
ध्यवद्वृत्त्यधिकरणानिष्ठसंबंधांतरावच्छिन्नसाध्याभावमादायदूषणस्यापिनिराकरणासंभवेप्रतियोगितायांसाध्यतावच्छे
दकसंबंधावच्छिन्नत्वनिवेशनमफलमित्याशयेनाहयद्वेत्यादितादात्म्यसंबंधेनव्यापकतानिर्वाहायप्रतियोग्यनधिकरणा

राम० ४६

त्वमनुक्त्वाप्रतियोग्यसंबंधित्वमभिहितंतुप्रतियोगिवैयधिकरण्यसंबंधित्वनिवेशेपितादात्म्यसंबंधेनव्याप्तेर्निर्वाहइति
तादृशसाध्यतावच्छेदकसंबंधेनसाध्याधिकरणाप्रसिद्ध्यातत्घटितसाध्यसमानाधिकरण्याप्रसिद्धेरित्यतस्त्वाह एवंस्थि
तेतिप्रतियोगिवैयधिकरण्यशरीरेसंबंधित्वनिवेशोस्तीत्यर्थः संबंधित्वंनिवेशनीयमितितथाचसाध्यसामानाधिकरण्य
साध्यसंबंधिसंबंधित्वंस्वाभावस्यहेतुसामानाधिकरण्यमपिहेतुसंबंधिसंबंधित्वंस्वादिनास्यात्तथाधर्मितोः धूमवदादेर्वह्नि
मदादेस्तदेवदर्शयतितथाहीतितादात्म्यसंबंधावच्छिन्नेतिपूर्वकल्पाभिप्रायेणधूमवद्वह्निमतोर्व्याप्तिमुक्त्वाधर्मिणोःधू
मवदादेर्वह्न्यादिरूपधर्मव्याप्यत्वंवह्निमदादिरूपधर्मिणः धूमादिरूपधर्मव्यापकत्वंचाह एवमितिस्वत्वमेवतादात्म्यसंबं
धेनव्याप्तिव्यवस्थापनादेवतत्रतत्रोक्तंपृथिवीत्वेनेतरभेदसाधनापेक्षयादिः संगच्छतइतिस्वरूपयाजलादीनांसंयोगादिनापृ
थिव्यादिवृत्तितयातेनसंबंधेनव्याप्तिर्जलादिभेदसाधनानुपयोगितयातेनतत्संगतेरितिभावःपृथिवीत्वाभावस्यस्वरूपसं
बंधावच्छिन्नाभावेनपृथिवीत्वस्वरूपेणजलादिभेदःसिद्ध्यतिनतुतस्यकालिकसंबंधावच्छिन्नाभावेनेमत्र पृथिवीत्वेनव्याप्य

स्य जलादेरन्योन्याभावः प्रसिद्ध इति न त्वत्यंताभाव इत्यत्र वा किं नियामकमित्याशंकायां व्यतिरेकि विपक्षसंबंधघटितव्यापक
त्वेन गृह्यमानस्य तत्संबंधावछिन्नप्रतियोगिताकदेवाभावाद्धेतोर्येन संबंधेन यस्य व्याप्यता गृहीता तत्संबंधावछिन्न
प्रतियोगिताकस्यैव तदभावः सिद्ध्यतीति समाधानस्य तत्त्वं स्वरूपं पि नि व्याप्यताघटकसंबंधेन व्याप्यवत्ताज्ञानात् व्यापकता
घटकसंबंधेनैव व्यापकं सिद्ध्यतीति नियमं दृष्टांततया दर्शयति पर्याप्तेति ताद्रूप्येनैव पक्षविशिष्टज्ञाने पक्षधर्मिकवैशि
ष्ट्यज्ञाने विशिष्टानुमितिः वैशिष्ट्यविषयकानुमितिः व्याप्यताघटकसंबंधेनैव व्याप्यवत्ताज्ञानं हेतुरिति नियमस्य व्या
पकताघटकेनैव व्यापकैः सैवानुमितिनियमस्य च कैमेरा प्रयोजनमाह तेनेति स्वनवनीरोगावाधस्याभ्यांतस्येत्यर्थः
क्ष्मावपवेनवह्निधीरित्यनयः तस्य क्षमवायेन वह्नि व्याप्यक्षमवत्वेपि व्याप्यताघटकेन संयोगेन तद्धूमाभावादिति भा राम०
वः नवासमवायेनेति पर्वतवृत्तिहेतुप्रतिसमवायेन वह्नेर्व्यापकत्वादिति भावः प्रकृतोपयुक्तनियमद्वयमाहन्यथैवे ४७
नि संबंधेन संबंधेनैव एतन्नियमद्वयस्य प्रयोजनं तत्तरानुरोधेन व्याप्यावच्छेदकत्वमिति दर्शयति कथमन्यथेति एतादृशनि

पमानस्य पगमे इति कथमुपपद्यत इत्यन्वयः महानसधर्मिकसिद्धिविषयसंयोगसंबंधावछिन्ननिवृत्तिप्रतियोगीत्यस्य
र्थः निरुक्तं तद्वह्न्यत्वानुयत्वे प्रकृतमाह तथा चेति व्याप्यत्वग्रहात् स्वरूपसंबंधावछिन्नपृथिवीत्वाभावनिष्ठव्या
पकतानिरूपितव्याप्यताग्रहात् व्यापकनिवृत्त्या स्वरूपसंबंधावछिन्नप्रतियोगिताकेनैव पृथिवीत्वाभावाभावेन
तेषां जलादीनां न चैतावतापि व्यत्यंताभावसिद्धिः कथं विराकृतेत्यत आह स एव चेति स चान्योन्याभाव एवेति येज
नातादात्म्यसंबंधावछिन्नाभावस्यान्योन्याभाव एव नात्यंताभाव इत्यर्थः न्वतोनेतरात्यंताभावसिद्धिरिति भावः तादात्म्या
संबंधेन व्याप्यापांसंभतिमाह इत्यभेदचेति तादात्म्यसंबंधेन व्याप्तिस्वीकारे दोष इति ग्रंथः संगच्छत इत्यर्थः न्वपः
ननु तादात्म्यसंबंधेन व्याप्यस्य नेत्युपगमे का क्षतिः पृथिव्यां जलादिभेदसिद्धेर्जलादिभेदाभावव्यापकीभूततन्नाभावप्रति
योगित्वेन पृथिवीत्वज्ञानादेव संभवात् पृथिव्येकदेशे जलादिभेदप्रसिद्ध्या तादृशव्याप्तिग्रहसंभवस्य व्यतिरेकिणि
वह्न्याभावात्वात् तादात्म्यसंबंधेन धर्मितोऽनुमितेरप्यनुभवसिद्धत्वेन धर्मितादात्म्यनिष्ठव्यापकताज्ञानस्यैव तद्धेतुत्वा

पाःस्वीकरणीयत्वात् असति प्रतिबंधके तत्तादात्म्यादिविधेयकानुमितौ तादात्म्यसंबंधेन तस्यापि विधेयत्वोपगमे इति
विरहादित्यत आहात्र एवेति तादात्म्य नव्याप्तिस्वीकारादेव गोभिन्नत्वाग्रहदशायां गौः सिद्धान्तीत्यन्वयः अन्यथा तत्र गोत्व
त्वरूपसाध्यतावच्छेदकानुपस्थित्या गोत्वसाध्यकानुमितौ यद्यपि कथमपि दुर्ग्रहतया गोत्वसाध्यकानुमितेः तादात्म्यस्यापि
गोत्वरूपतया तन्निष्ठव्यापकतायाश्चापि गोत्वचोपस्थितिमंतरेन दुर्ग्रहतया तादात्म्यधर्मिकव्यापकताज्ञानाधीनतादा
त्म्यसंसर्गकगवानुमितेश्चासंभवेनापि गौरित्याकारकानुभवसिद्धायाश्चापलापप्रसंगादिति भावः यद्यपि गोत्वांशे गोत्व
धर्मितावच्छेदकीभूतव्यापकत्वावच्छेदकत्वावगाहीग्रह एव गोत्वेन गोसाध्यकानुमितावपि हेतुर्वाच्यः निर्द्धर्मितावच्छे
दकव्यापकतावच्छेदकत्वग्रहस्य व्यभिचारज्ञानाप्रतिबध्यतया अनुमित्यत्तत्वकत्वादिति तादात्म्येन गोत्वावच्छिन्नसाध्य राम०
कानुमितिरपि गोत्वत्वानुपस्थितिदशायां न संभवतीति तथापि वक्ष्यमाणप्रतियोगिताधर्मिकउभयाभावघटितल ४८
क्ष्याभिप्रायेणेदमभिहितं तन्मते स्वरूपतः साध्यतावच्छेदकप्रकारिकायामनुमितौ स्वरूपतः साध्यतावच्छेदकप्रका

रकस्य साध्यवन्निष्ठाभावप्रतियोगितावच्छेदके न साध्यतावच्छेदकरूपावच्छिन्नत्वसाध्यतावच्छेदकसंबंधावच्छिन्न
त्वोभयाभावावगाहिज्ञानस्य हेतुतया तत्र गोत्वत्वेनानपेक्षणेनानुपपत्त्यभावात् इदं च पुनः तादात्म्येन व्यापक
तासिद्धिवत् गोत्वत्वाघेयाग्रहदशायां यत्र गौस्तत्र सास्नादिरिति व्याप्तिग्रहाधीन गवादिहेतुकसास्नादिसिद्ध्यनुरोधात् तत्संब
वेन व्याप्यतासिद्धिरपि द्रष्टव्या केचित्तु तादात्म्यसंबंधेन व्यापकत्वानुपगमेऽपि गवान्यावृत्तित्वरूपव्याप्तिज्ञानात् गोत्वादिवि
धेयकानुमितिर्निष्प्रत्यूहैव तथा सति अयं गौरित्याकारतापि अनुमितेर्निर्वहति स्वरूपतो गोत्वावगाहित्वेन गवान्यावृत्तित्व
ज्ञानात् स्वरूपतस्य गोत्वविषयित्वस्य तत्संभवात् न चानवच्छिन्नविधेयतायास्त्वत्र क्लृप्त्वा तादात्म्यसंबंधेन गौरेव विधेयत्व
मुचितं अयं गौरित्यादिवाक्यजन्यबोधे तादात्म्यसंबंधावच्छिन्नगवादिविधेयतायाः क्लृप्तत्वादिति वाच्यं अयं गौरित्याकार
क इदंत्वावच्छिन्नविशेष्यकगोत्वादिप्रकारकप्रत्यक्षे यागोत्वादिप्रकारकताया एव विधेयतात्वोपगमे अनुमितौ तत्क
ल्पनेऽतिरिक्तविषयताकल्पनाभावात् अस्तु गवान्यावृत्तित्वरूपव्याप्तिज्ञानादेव तादात्म्येन गवानुमितिः किं तादात्म्येन

व्यापकत्वपेत्याशंक्य निराचिकीर्षयोक्तं गोत्वत्वावच्छेदस्यायामिति गवेतरावृत्तित्वस्य हेतुत्वे तत्साध्यतावच्छेदशायामित्या
हुः तन्न गवेतरावृत्तित्वमात्रस्य गोत्वत्वशरीरार्थता विरहेणाउदकरतापादुर्वारत्वात् गोत्वत्वपदं तद्वृत्तिधर्मपरमिति तु न सम्यक्
गोत्वत्वस्य विशिष्टगोवृत्तित्वरूपस्य स्वरूपतो भानासंभवेन तत्र भ्रान्तदशायां तद्वृत्तिधर्मभानस्यावश्यकत्वात् तत्र परे तु गोत्व
त्वावच्छेदशायामपि गोः सिद्ध्यतीत्यस्य यदा गोत्वत्वमनुमितौ न भासते तदापि तत्र गोर्भासत इत्यर्थः स्वरूपतोऽपि गोत्व
त्वादिप्रकारिकायां बाधानुमितिर्भवतीति यावत् तादात्म्येन व्यापकतानुपगमे गोत्वस्यैव वह्न्यादिलिंगकानुमितौ भानस्या
पत्तेर्व्याप्तयाविधेयता यां स्वावच्छिन्नत्वनियमेन स्वरूपतो गोत्वप्रकारिकानुभवसिद्धा या अनुपपत्तिरित्युपष्टंभसंगतिः
इतिमाहुः एतत्स्वानवच्छेदकांशे तादात्म्यसंबंधेन स्वरूपतः साध्यतावच्छेदकप्रकारकज्ञानादनवच्छेदकत्वांशे स्वाधेय
तासंबंधेन स्वरूपतस्तत्प्रकारकज्ञानाद्वा स्वरूपतस्तत्प्रकानुमितिरित्युपगमेन गोत्वत्वावच्छेदशायामपि तादात्म्येन व्या — राम० ४९
पकताज्ञानादनुमितिर्निर्वहतीति नोक्तानुपपत्तिरिति तदसत् स्वपगौरित्यादिज्ञानानुव्यवसायेन रूपतो गोत्वादिविशे

षितप्रकारिप्रकारेणाज्ञानभानात् समवायातिरिक्तेन निरूपितत्वसंबंधेन गोत्वादेः स्वरूपतः प्रकारकतायाः स्वावच्छ
कत्वेपि समवायातिरिक्तेनापरसंबंधेन स्वरूपतः प्रकारतायाः स्वप्रमासिकत्वात् स्वस्वरूपत्वाव्यापकताज्ञानहेतुतामतेस्वरू
पतो ज्ञानत्वादेर्विषयतावच्छेदकत्वानुपपत्त्या केवलान्वयिप्रमेयत्वज्ञानस्यानुमितिहेतुतासंभवं दीधितिकृतां धिरूढाउ
तत्कारणीभूतनिर्वाहात् गोत्वानवच्छिन्नत्वप्रकारकप्रतियोगिताज्ञाने स्वावच्छेदकतायां निरूपितत्वसंबंधेन स्वरूपतो गोत्व
प्रकारकत्वं देखिति कारस्याशयः तमेवं तथा सत्यपि स्वत्वभिन्नत्वांथविरोधादित्यवधेयं एवं चाधिकरणत्वस्याने संबंधित्वति
विशेषणगत्वादेवपीति तस्याधिकरणाप्रसिद्धावपि संयोगेन तत्संबंधिवृत्तित्वस्याभावे तत्र च साध्यवत्संबंधित्वस्य प्रसि
द्ध्याप्रयोक्तव्यांसिमत्वादिति भावः वृत्त्यनियामकसंयोगव्यावृत्तरूपेण संयोगस्याभावप्रतियोगितावच्छेदकसंबंधत्वेपा
ध्यतावच्छेदकसंबंधस्य गगनीयसंयोगस्याभावप्रतियोगितानवच्छेदकत्वपात्प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छि
न्नत्वनिवेशोकल्पेन ज्ञाविप्रतियोगित्वाप्रसिद्ध्या संयोगेन गगनस्य तेव्यापकत्वानिर्वहतीति स्वतंत्रं वृत्तिनियामकसं

योगमात्रस्यैतितादृशसंयोगत्वावच्छिन्नस्येत्यर्थः पदूतापुककल्पे वृत्तिनियामकसंयोगसाधारण्यरूपेणातादृशसंबंधत्वविर
हिपितकृतिस्तन्मते प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वानिवेशादित्याशयेन हि साध्यतावच्छेदकसंबंधेनेति पृ
थिवीत्वादिव्यापकत्वमप्यतीत्यत्र संयोगेन गगनत्वादिरित्यतुष्टयेतन्नु प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवे
शे पृथिव्यादिनिष्ठसमवायादिसंबंधावच्छिन्नाभावप्रतियोगितया गगनादेर्न पृथिवीत्वादिव्यापकतासंभवस्तत आह तत्
दभाववतोपीति समवायादिना गगनाद्यभाववतोपीत्यर्थः तत्संबंधित्वात् गगनादिसंबंधित्वात् तथा च तादृशगगनाद्यभा
वोसाध्यतावच्छेदकसंबंधेन प्रतियोग्यसंबंधिहेतुमन्निष्ठ इत्यभावान्तरमादाय लक्षणसमन्वयो निष्प्रत्यूहमेवेति भावः ननु सं
योगेन गगनव्यापकत्वे बाधानवतारदशायामत्र धूमस्य वृत्तिनियामकसंयोगेनैव कुतो गगनानुमितिरित्यत आह यदीति
रपीति तदर्थे वृत्त्यनियामकसंयोगेनैव तेनासंबंधित्वादिति तथा च तत्संबंधावगाहिन्या अनुमितेर्भ्रमतया तत्र भ्रमात्मक
परामर्शस्यापि हेतुत्वादिति भावः अव्यापकत्वाच्चेति वृत्त्यनियामकेन संबंधेनैव गगनाद्यभावस्य प्रतियोगिसमाना

राम० ५०

क्षिकरणतया वृत्तिनियामकसंयोगेन प्रतियोगिव्यधिकरणतापा गगनस्य चेन तत्संबंधस्य व्यापकत्वाघटकत्वादित्य
र्थः तथा च व्यापकत्वाघटकसंबंधस्यानुमितावभानात् न तेनानुमितिप्रसंग इति भावः ननु वृत्तिनियामकसंयोगेन गगनस्या
दिसंबंधितोऽप्रसिद्ध्या कथं तेन संबंधेन गगनाद्यभावस्य प्रतियोगिवैयधिकरण्यमित्यत आह अग्रे भविष्यतीति वक्ष्यमाणो
भयाभावघटितप्रतियोगिवैयधिकरण्यं तत्रापि सुलभमिति भावः॥ ॥कालिकविशेषणतया घटादिसाध्यके महाका
लत्वादिहेतौऽप्रांशद्विविधदृनामव्याप्तिमाशंकते नन्वित्यादिना खंडकालवृत्तेस्तत्कालत्वादिहेतुकस्थलेऽतीतानागतव्य
कीनां तत्तद्व्यक्तित्वावच्छिन्नतादृशसंबंधावच्छिन्नाभाव एव हेतुमति प्रतियोगिव्यधिकरणः प्रसिद्ध इति नाव्याप्तिरतोऽघटव्य
तिरिक्तद्रव्यात्मकेति जन्यमात्रस्य कालोपाधितामते द्रव्यात्मकस्य खंडकालस्य संभवात् महाकालपर्यन्तलाभ इत्यतोऽ
तिरिक्तं पंचविधगगनादिगात्ममनसां नित्यतया खंडकालत्वासंभवेन वस्तुतु द्रव्यातिरिक्तेषु भावपि महाकाललाभस्तत्रापि
पत्किंचिद्द्रव्यातिरिक्तत्वस्य पृथिव्यादावपि सत्त्वात् पृथिव्यादिचतुष्टयातिरिक्तत्वस्य विशिष्याभिधानस्य न तत्र लाभः

तान्त्रिकैर्महाकालस्यैवाष्टद्रव्यातिरिक्तद्रव्यपदेनाभिधानात्तत्तथाभिधाने विशिष्यानभिधानेपि नान्यपरत्वशंकेति तथैव का
मिहिं नखंडकालसाधारणमहाकालवृत्तेर्हि हेतुखंडकालरूपहेतुत्वविकरणा एवंलक्षणघटकोक्ताभावप्रसिद्धिरिति काल
भात्रे वृत्तीत्यत्र मात्रपदं समवायादिना कस्यचित्साध्यत्वे समवायादिना घटाद्यभावस्यैव महाकाले तेन संबंधेन प्रतियोगित्व
धिकरणाः प्रसिद्धत्वीत्यतो विशेषणताविशेषेणेति कालिकविशेषणतपेत्यर्थः व्याप्यवृत्तिसाध्यके प्रतियोगिवैयधिकरणा
नुपासेनेन केवलान्वयिनि त्वयाचत्वादिव्यापकतासंभवइत्यतोऽव्याप्यवृत्तीति कालिकसंबंधेनाव्याप्यवृत्तित्वं चव्यतिरेकि
मात्रस्य वृत्तिपक्षावपि नाप्यनित्यस्य विश्वविषयकज्ञान्यज्ञानीविषयत्वादिर्वा ध्वंसतत्संवैवस्त्व व्यासमिभापेणाभिहितंत्वन्य
वृत्तिहेतुकेऽन्यसंबंधेन साध्यतापांच हेतुमति सर्वत्र साध्यतावच्छेदकसंबंधेन वृत्तिमन्मात्रस्यैव तेन संबंधेन वृत्तिमन्नमदृश
यां अनुमितिजनकज्ञानानुपपत्तिरपि द्रष्टव्या एवं कालिकसंबंधेन व्याप्यवृत्तिसाध्यकेपि साध्यस्य तेन संबंधेनाव्याप्यवृत्तित्व राम०
भ्रमदशायां प्रतियोगिवैयधिकरणाघटितायाः प्रतियोगिवैयधिकरणघटितायाश्च दुर्ग्रहत्वात् महाकालत्वादिहेतुकानुमितत्व ५१

नुपपत्तिरपि स्वावच्छेदकसंबंधेन स्वावच्छेदकविशिष्टानधिकरणहेत्वधिकरणावृत्त्यभावीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्र
तियोगितानिवेशकल्पनाद्वाराप्रतियोगित्वाप्रसिद्धाभिधानेनाव्याप्तिस्फुटीकरीति स्वावच्छेदकेति संप्रतियोगिताकालेमहा
कालेतत्संबंधावच्छिन्नत्वस्य कालिकसंबंधावच्छिन्नत्वस्यासंभवादिति योजना कालिकसंबंधेन वृत्तिमन्मात्रस्यैव महाकाले
वृत्तेरहेतेवृत्तेनसंबंधिनोऽप्रसिद्ध्या कस्यापि कालिकसंबंधावच्छिन्नाभावस्य प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यसंबंधि
हेतुमद्वृत्तित्वासंभवेन समवायादिसंबंधावच्छिन्नघटाभावस्य तथात्वात् प्रतियोगितायाश्च समवायादिसंबंधेनैवावच्छिन्नत्वा
दिति भावः साध्यतावच्छेदकसंबंधेन प्रतियोग्यसंबंधिहेतुमद्वृत्त्यभावीयसंबंधावच्छिन्नत्वाविशेषितप्रतियोगितानिवेशकल्प
तादृशसंबंधेन प्रतियोग्यसंबंधिहेतुमत एवाप्रसिद्ध्याऽव्याप्तिरित्याह तेनेति तेन संबंधेन गगनाद्यभावप्रतियोगिनस्तेनसंबं
धेनसंबंधिरूपप्रतियोग्यप्रसिद्धा तेन संबंधेन प्रतियोग्यसंबंधित्वासिद्धिं स्फुटीकर्तुम
तियोग्यसंबंधित्वस्यानभिधायपत्प्रतियोगिसंबंधितदन्यत्वस्य तत्समासेनाभिधानं अथ कालिकसंबंधेन महाकालान्यवृ

त्तित्वविशिष्टस्य तत्संबंधावच्छिन्नाभाव एवं महाकाले प्रतियोगितावच्छेदकविशिष्टप्रतियोगिव्यधिकरणः प्रसिद्धस्तमा
दायैव लक्षणसमन्वयसंभवात् कथमव्याप्त्यभिधानं नहि महाकालान्यवृत्तित्वविशिष्टघटादिनिरूपितः कालिकोपि सं
बंधो महाकाले संभवति तद्धर्मिवृत्तित्वविशिष्टनिरूपितसंबंधानुयोगितायास्तद्धर्मिनिष्ठत्वात् अन्यथा सत्तादिमति गुणादेर्द्र
व्यादिवृत्तित्वविशिष्टसत्ताद्यभावस्याप्यनुपपत्तेः नचैवं ह्रदादिवृत्तित्वविशिष्टस्वरूपाभावादेर्विषयितयासंबंधित्वे ज्ञानेन स्यात्
ज्ञानस्य ह्रदादिवृत्तित्वानिरूपकत्वात् इति ह्रदो वह्निमानित्यादौ तादृशविशिष्टस्य बाधादिरूपहेत्वाभासत्वं न स्यात् ज्ञाननिष्ठं वि
षयितया तादृशविशिष्टत्वमनुमितिप्रतिबंधकतावच्छेदकं तादृशविशिष्टस्यैव तथात्वात् यदि च तत्संबंधेन तद्धर्मिसंबंधि
त्वविशिष्टनिरूपितस्तादृशसंबंधो विशेषणताकोटिप्रविष्टतद्धर्मिनिष्ठ इति संबंधांतरेण ह्रदादिवृत्तित्वविशिष्टनिरूपितवि
षयितासंबंधो ज्ञाने संभवत्येवेत्युच्यते तदापि इच्छादिविषयत्वविशिष्टघटादिनिरूपितविषयितासंबंधस्य ज्ञानेऽसंभवादि राप्र०
च्छाविषयत्वाभावादिसाध्यकघटादिपक्षकस्थले तादृशविशिष्टस्य बाधादिरूपस्य हेत्वाभासत्वानुपपत्तिर्दुर्वारैवेत्याचं वि ५२

शिष्टनिरूपितविषयितातिरिक्तसंबंधस्यैव विशेषणीभूततत्संबंधितानिरूपकाधिकरणत्वनियतत्वोपगमात् तद्धर्मविशिष्टत
न्निरूपितविषयतायां तदंशे तद्धर्मप्रकारकत्वमात्रस्यापेक्षितत्वादिच्छाविषयो घट इत्यादिज्ञाने इच्छाविषयत्वविशिष्टघटादि
निरूपितविषयितासत्त्वे बाधकाभावात् नच महाकाले महाकालान्यवृत्तित्वविशिष्टघटाद्यधिकरणत्वानुपगमे सर्वाधार
त्वव्याघात इति शंक्यं तादृशविशिष्टनिरूपिताधिकरणताविशेषस्य महाकालेऽसत्त्वेपि घटादेर्घटत्वाद्यवच्छिन्ननिरू
पिताधिकरणतासत्त्वेनैव सर्वाधारत्वोपपत्तेः अत्र केचित् कालिकसंबंधेनाधारता महाकालस्यैवेत्यनुरुध्य क्रियादेः इदानीं
पटः इदानीं घट इत्यादिप्रतीत्या क्रियादिरूपकालोपाधीनां महाकालनिष्ठाधारतावच्छेदकत्वस्यैवावगाहनात् अत एव ते
षां कालविशेषणतया कालोपाधित्वप्रवादः तादृशप्रतीत्या क्रियादावेव घटाद्याधारत्वावगाहित्वोपगमेन तादृशप्रतीतीनामम्बरा
ताधारतावगाहित्वानुभवविरोधात् कालत्वेनाखंडोपाधिना सर्वेक्रियादीनामनुगमेन तादृशानुभवोपपादने महाकालस्यै
वाप्रामाणिकत्वापत्तेरिति प्राचीनमताभिप्रायेण दूषणमव्याप्त्याशंका तथा च सति कालिकसंबंधेन महाकालान्यवृत्तित्वस्यैवा

प्रसिद्ध्या तद्विशिष्टघटाद्यभावमादाय लक्षणगमनासंभवात् नचक्रियादेः कालत्वानभ्युपगमेन तदभिप्रायेण चेदयं ग्रंथ
स्तदाखण्डद्रव्यातिरिक्तद्रव्यात्मक नायाश्च व्यावर्तकतयाऽभिधानेऽसंगतिरिति वाच्यं तादृशद्रव्यात्मक एव काल इति मते विशे
षसूचनार्थकतया तन्नसंगतेः तन्मात्रवृत्तित्वं च हेतोर्लक्ष्यतासंपादकत्वेनाभिहितं इतरवृत्तित्वे व्यभिचारित्वात् अथवा भवतु का
लोपाधिनापि कालिकसंबंधेनाधिकरणं तदधिकरणत्वसाधकश्चेदानीं घटः तदानीं पट इत्यादिः प्रत्ययो व्यवहारश्च तस्य
चाननुगतोपाधिमात्रविषयकत्वे अननुगताधारत्वावगाहित्वानुपपत्त्या क्रियादिरूपोपाधिविशिष्टमहाकालस्य घटाद्याधारता
वगाहित्वमावश्यकं विशिष्टे घटाद्याधारतावगाहित्वे विशिष्टांतर्भूतविशेष्येऽपि तदवगाहित्वमावश्यकमिति खण्डकाल
स्य कालिकसंबंधेनाधारतासिद्धिः एवं च इदानीं महाकालान्यत्वविशिष्टो घट इति प्रत्ययादिः खण्डकाले विशिष्टाधारता
याभानं न त्वस्य इति तत्र तत्साधकप्रत्ययादेव महाकालान्यवृत्तित्वनिरूपकस्यापि महाकालस्य विशिष्टाधारत्वसिद्धिर्दुर्वा राम० ५३
रैव तथा च महाकाले विशिष्टघटाभावोऽपि तादृशप्रतियोगिसमानाधिकरणः तादृशप्रतीत्यनभ्युपगमे खण्डकालेऽपि न विशि

ष्टप्रतियोग्यधिकरणत्वप्रसिद्धिरित्युक्तस्य विकल्पव्याप्तिवारणमशक्यमित्याहुः अन्ये तु कालिकः संबंधः स्वरूपादनतिरि
क्तः तथा च खण्डकालमहाकालानुयोगिकतादृशसंबंधानां तत्तत्स्वरूपाणां अनुगमकसंबंधत्वावच्छेदकाभावेन प्रत्येकमे
वसंबंधत्वं तथा च महाकालस्वरूपसंबंधेन च घटादेर्महाकालत्वादिव्यापकतावाच्येतिहुरुद्ध्वैवाव्याप्तिः तादृशसंबंधेन म
हाकालान्यवृत्तित्वस्याप्रसिद्धेरिति वदंति तदसत् स्वरूपाणां प्रातिस्विकरूपेण संबंधत्वेऽपि क्वचित् खण्डकालस्वरूपसंब
न्धेन तादृशखण्डकालमात्रवृत्तिहेतुकेऽपि प्रतियोग्यधिकरणाभावाप्रसिद्धिसंभवात् महाकालमात्रवृत्तिहेतुकानुधावनस्य
निर्वितत्वापातात् परे तु साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यविषयकानुमित्यौपयिकव्याप्तावेव प्रतियोगितावच्छेदक
विशिष्टवैयधिकरण्यनिवेशः न साध्यतावच्छेदकोपलक्षितसाध्यवैशिष्ट्यविषयकानुमित्यौपयिकव्याप्तौ अन्यथा महाका
लेस्थित्यादिवृत्तित्वोपलक्षितज्ञानानुमानानुपपत्तेः साध्यतावच्छेदके प्रतियोगितावच्छेदकविशिष्टप्रतियोगिव्यधिकरणा
विशिष्टाभावप्रतियोगितावच्छेदकत्वात् इत्थं च साध्यतावच्छेदकोपलक्षितस्य यत्र साध्यता तत्रैवाव्याप्तिशंकापरास्ता पंथचः

तत्रपर्याप्त्या तत्प्रतियोगित्वे पृथिवीकरणस्यैव निवेशेन महाकालान्यवृत्तित्वविशिष्टघटाभावस्यापि लक्षणाघटकत्वादित्याहुः तद
पित्साध्यसमविशिष्टपदोपादानतद्व्यावृत्तिप्रदर्शनादिविरोधात् तादृशसंबंधेन प्रतियोगितावच्छेदकसंबंधेन साध्यतावच्छे
दकसंबंधेनवावच्छिन्नत्वं अभावविशेषणतया तत्त्वाभावपूर्वप्रतीकेन विवक्षणीय्यगगनाद्यभावव्हारि कैश्चित्।। तत्प्रतियोगिकः का
लिकसंबंधेनाधिकरणाप्रसिद्ध्या तदनधिकरणत्वाप्रसिद्धावपि वृत्तिमत्त्वाप्रसिद्ध्यायाः कालिकसंबंधेन महाकालवृत्तिताया
भावस्य तत्रप्रसिद्धत्वादिति भावः ज्ञानत्वान्यत्वात्संयोगिसत्त्वादित्यादौ कर्मसंबंधविशेषनिवेशाय किंचित्पदोपादानपो
र्वापर्याप्तिमाह सत्ताद्यधिकरणे तिसंबंधविशेषानुपादाने कर्मादौ समवायेन ज्ञानाभावप्रतियोगिनो ऽवृत्तावपि विषयतासं
बंधेन वृत्तेस्तादृशाभावो न लक्षणाघटकः स्यात् कर्मादौ संयोगाभावप्रतियोगिनो सत्त्वेपि हेत्वधिकरणद्रव्यवृत्तित्वाहेत्व
धिकरणवृत्तित्वसामान्याभाववत्त्वासंभवात् तथापि न तथा स्यादित्यभावोत्तरमादायातिव्याप्तिप्रसक्तिरिति भावः पक्षपिय राम०
न किंचित्पदस्य व्यावृत्तिर्नसाध्यकेपि संभवति ज्ञानस्य सामवायेनाव्याप्यवृत्तितया तत्साध्यकेपि प्रतियोगिवैयधिक ५५

रणपनिवेशस्यावश्यकत्वात् तथापि प्रसिद्धाव्याप्यवृत्तिसाध्यके व्यभिचारिणि संयोगिसत्त्वादित्यादौ तदनुक्तौ तत्रव्या
वृत्तिर्न संभवतीति शंकास्यात् तन्निराकरणाय तत्र तत्प्रदर्शनं केचित्तु संयोगसाध्यके द्रव्यादिपदस्य द्रव्यगुणान्यत्वविशिष्टसत्ता
हेतुके साध्यतावच्छेदकसंबंधस्यैव व्यावृत्तिप्रदर्शनपरं संयोगसामान्यस्य चित्त्वपि विषयताया वृत्त्यनियामकत्वे प्रतियो
गिवैयधिकरणेन संबंधित्वाविशेषपदे पूर्वस्थलीपव्याकल्पसंगते रित्यस्वरसादिवत्तदनुधावलनं संयोगाभावस्य कालि
कसंबंधेनैव सर्वत्र कर्मणि प्रतियोगि सामानाधिकरण्यसत्त्वादिति व्याप्तिप्रसक्तिरितिवं दधिन्यन्तत्र उक्तास्वरसेन पूर्वमपि ज्ञा
नसाध्यकं परित्यज्य स्थलांतरानुसरणादत्र निर्विजिताहृश स्थलपरित्यागे संदर्भविरोधात् द्रव्यादिपदेन हेतोः साध्यस्य च वि
श्रिपक्षवृत्तेनोपादानस्यापुनरुक्तत्वाद्धाप्रतियोगितावच्छेदकविशिष्टत्वोपादानस्य पूर्वोक्तस्थले एव व्यावृत्तिस्यारपतिभूतत्वे
नियद्यपि पूर्वविशिष्टसाध्यकेऽतिव्याप्तिप्रदर्शनोत्तरं विशिष्टस्यातिरिक्ततायकृततत्संगतेरस्वरसादुभयसाध्यकालिकापि दृ
र्शितानथापिद्दं हेऽन्याकृतपूर्वनियातानिपमावउभयपत्वविशिष्टांतस्याग्रभिधानेऽत्र पूर्वस्थले द्विवावच्छिन्नप्रतियोगिभि

तायाव्यासज्यवृत्तित्वेयोगमेऽतिव्याप्तिर्नसंभवतीत्यस्वरसेनैवद्वितीयस्यजातिव्याप्त्यवतारणंपूर्वोक्तापविरोधादनुपादेयं
।।नमनोगुणादिवृत्तीति।।एकविशेषावच्छिन्नेतद्वृत्तित्वसंचिपितद्वृत्तितानवच्छेदकविशेषणान्तरावच्छिन्नेतत्तद्वृत्तित्वाभावेऽ
कृत्तएवएकरूपावच्छिन्नेएवतत्तदभावयोर्विरोधेनात्रैरित्यभिप्रायः नचैवंविशिष्टंतानुपादेनेपिसत्ताद्यौविशिष्टसत्तात्वा
दिनागुणाद्यवृत्तित्वसत्त्वेनविशिष्टसत्ताद्यभावस्यलक्षणघटकतयाऽत्रातिव्याप्त्यप्रसक्तेर्नविशिष्टोक्तव्याहृतिःसंभवद्वृत्तित्वा
चाप्रतियोगिनिकिंचिद्रूपावच्छिन्नेहेत्वधिकरणायांकिंचिद्वृत्तित्वेनाभावस्यलक्षणघटकत्वेसत्तावान्द्रव्यत्वादित्याद्व
पिसत्तात्वाद्यवच्छिन्नाभावस्यलक्षणघटकत्वापत्त्याऽव्याप्त्यापत्तेर्हेत्वधिकरणावृत्तित्वस्यतद्वृत्तिभिन्नत्वरूपस्यैवनि
वेशनीयतयाविशिष्टसत्तावान्जातेरित्यादौविशिष्टसत्ताद्यभावस्यलक्षणघटकत्वानिर्वाहेणातिव्याप्तिवारणासंभ राम०
वाद्यावृत्तिसंगतेः।।सामान्यादप्रयोजनमाह संयोगसामान्यंचेति संयोगिद्रव्यत्वादित्यादौसंयोगत्वावच्छिन्नाभाव ५५
प्रतियोगियत्किंचित्संयोगव्यक्तेर्हेत्वधिकरणायांकिंचिद्वृत्त्यादिसत्त्वाद्वृत्तित्वसत्वेपितत्प्रतियोगिसामान्यतदसत्वेनाना

वृत्त्याभावस्यलक्षणघटकतयानाव्याप्तिरित्यर्थः विशिष्यवृत्तेर्विशिष्टानुयोगिकाभावोऽप्रमाणिकइत्याशयेनदूषय
तिविशिष्टस्यानतिरिक्तत्वादितितथाचोभयत्वादिविशिष्टस्यमूर्त्तत्वादेःशुद्धमूर्त्तत्वानतिरिक्ततयामूर्त्तत्वादिवृत्तेर्मनोवृ
त्तित्वादेवभावस्यउभयत्वादिविशिष्टेपितस्मिन्नसंभवान्नतत्त्वमूर्त्तत्वोभयवान्मूर्त्तत्वादित्यादावतिव्याप्तिर्विशिष्टत्वोपाद
नेपिद्वयोर्वितिभावः नत्वमूर्त्तत्वमूर्त्तत्वोभयंनमनसिगुणान्यत्वविशिष्टसत्तावान्गुणादित्यादिसर्वानुभवसिद्धप्रतीतिबला
द्वित्वविशिष्टसत्तात्वाद्यवच्छिन्नेमनोगुणादिवृत्तित्वाभावसिद्धेरावश्यकत्वान्नातिव्याप्तिरितिवाच्यंतादृशप्रतीत्यामनोगुणा
यधिकरणकद्वित्वविशिष्टसत्तात्वावच्छिन्नाभावस्यैवावगाहनात्तज्ज्ञातेनकिंचित्समवेतीतिनिश्चयदशायांज्ञातेनभूतत्व
मूर्त्तत्वोभयंनवाविशिष्टसत्तादितिप्रतीतिवत्मनसिगुणेनकिंचित्समवैतीतिभ्रमदशायामपितादृशप्रतीतेरानुभविकत्वपा
मनोगुणादिसमवेतत्वाभावस्यतद्विषयकत्वासंभवेनमनोगुणाद्यधिकरणकाभावस्यतद्विषयतायाश्चावश्यकत्वात्तादृशभ्र
माभावकालीनतथाकारप्रतीतावपितस्यैवविषयत्वौचित्यात्अन्यथाकल्पनागौरवापातात्तावन्मात्रंचमूर्त्तत्वोभयंनमनोवृत्ति

गुणान्यत्वविशिष्टसत्तानाधारवृत्तित्वेत्यादिग्रन्थस्याप्युक्तादृशोभयत्वविशिष्टसत्तात्वादौ मनोगुणादिवृत्तितावच्छेदकत्वाभावेऽम
नोगुणादिवृत्तित्वेतादृशोभयत्वविशिष्टत्वावच्छेद्यत्वाभावं वाऽवगाहते तत्र तादृशाभावस्य व्युत्पन्नत्वात् न च यत्किंचिद्वृत्तित्वाधिक
रणवृत्तितानवच्छेदकस्वप्रतियोगितावच्छेदकत्वमेव विवक्षणीयं उभयत्वावच्छिन्नाभावप्रतियोगितावच्छेदकोभयत्वा
देश्च मनोगुणादिवृत्तितानवच्छेदकत्वात्तादृशाभावसंग्रहेणानतिव्याप्तिरिति वाच्यं गुणान्यत्वविशिष्टसत्ताद्यभावप्रतियो
गितावच्छेदकस्य वैशिष्ट्यसहितसत्तात्वस्य गुणादिवृत्तितावच्छेदकत्वं तद्वत्सत्तात्वाद्यनतिरिक्ततया तदनवच्छेदकत्वासंभ
वेनोक्तविवक्षणयापि तादृशाभावसंग्रहासंभवात् यदभावो यत्प्रतियोगितावच्छेदकत्वापि यत्किंचिद्वृत्तित्वाधिकरणवृत्तितावच्छे
दकत्वपर्याप्त्यवच्छेदकावच्छिन्नपर्याप्तसत्ताविरहस्तादृशाभावनिवेशो दर्शितातिव्याप्तिपरीहारः संभवतीत्याशंक्य दूषणांतर
माह समवायेनेत्यादिना जातिमन्निरूपितादृशाभावे निजातिमत्त्वविशिष्टो यो घटत्वाद्यभावस्तस्यैव पटादौ समवेतप्रतियोगिकत्वेन तादृ
शत्वात् तत्प्रतियोगितायां जातित्वस्यानवच्छेदकत्वादि जातिमद्वृत्तेर्जातिमद्वृत्त्यवच्छिन्नाभावस्य तादृशत्वं न संभवतीत्यस्तु रा०म० ५६

रूपतिजातिशून्येचेति तादृशासंबंधेन समवायेन अप्रसिद्धेरिति तथा च जातिमद्वृत्तित्वविशिष्टोऽभावस्तत्प्रतियोगिसामान्ये हे
तुमद्वृत्तिर्किंचित्पदेन जातिशून्यमेव उपादाय वृत्तित्वांतं घटनीयं तच्च न संभवति प्रतियोग्यप्रसिद्धात्तदप्रसिद्धेरिति ना
सोल्लेखनं घटक इति भावः जातिव्याप्यवृत्तितया तत्साध्यके प्रतियोगिवैयधिकरण्यविशेषणस्य प्रयोजनविरहेणानि
वेशेनोक्तदोषानवकाशात् व्याप्यवृत्तिसाध्यक एवातिव्याप्तिमाह संयोगादीति अतिव्याप्तिरिति संयोगत्वाद्यवच्छिन्नाभा
वस्य हेत्वधिकरणीयत्किंचिद्वृत्तित्वसमवेतप्रतियोगिसामान्याकत्वासंभवेन लक्षणाघटकत्वादिति भावः तदसंभवमे
वस्फुटयति अद्रव्य इति हेतुमतीति सामान्यादावित्यर्थः अप्रसिद्धेरिति तथा च यत्किंचित्पदाकांक्षितेनन्तसामान्याद्युपाद
नसंभव इति भावः द्रव्य इति तथा च द्रव्यमपि यत्किंचित्पदाकांक्षितेनोपादाय तादृशाभावस्य न तथात्वं न चोपपादनमिति भा
वः साध्यतावच्छेदकसंबंधसामान्ये अभयाभावस्याविवक्षितत्वादिति योजनात्तथा च स्वप्रतियोगितावच्छेदकविशिष्टप्रति
योगिक हेत्वधिकरणीयत्किंचिद्वृत्तित्वसमानुयोगिकत्वसामान्योभयाभावत्वं साध्यतावच्छेदकसंबंधसामान्यकत्वं च ना

वित्वप्रतियोगितावच्छेदके तत्र त्वावच्छेदकत्वं मङ्कृप्तत्वात्तादृशाभाववत् संबंधसामान्यकत्वं प्रतियोगितायां वा विशेषणं दे
यं इति भावः ज्ञलादिसंयोगे वह्न्यादिप्रतियोगिकत्वस्य मवदनुयोगिकत्वोभयाभावसत्त्वेपि साध्यतावच्छेदकसंबंधसा
मान्यांतर्गततद्धूमाधिकरणानुयोगिकवह्निसंयोगे वह्निप्रतियोगिकत्वतत्तदधिकरणानुयोगिकत्वोभयाभावसत्त्वा
त्तवद्भ्याभावस्य लक्षणाघटकत्वेति घटाद्यभावमादाय वह्न्यभाववद्धूमादित्यादौ लक्षणासमन्वयः ह्रदवान्महाकालत्वा
दित्यादौ पुनर्वह्निगगनादेरभावस्यैव लक्षणाघटकः कालिकसंबंधसामान्ये तत्प्रतियोगिकत्वाभावेनैवोभयाभावसं
त्वस्यात्त्वहेत्वधिकरणानुयोगिकसाध्यतावच्छेदकसंबंधसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वाभावविवेशो जाति
मान् मेयत्वादित्यादौ व्याप्तिविरहात्मशक्यं सामान्यानुयोगिकसमवायाप्रसिद्ध्या ज्ञात्यात्मकपानुयोगिकसमवा
येवज्ञात्यादिप्रतियोगिकत्वसत्त्वेन जातित्वाद्यवच्छिन्नाभावस्य प्रतियोग्यधिकरणत्वानुपपत्तेरित्युभयाभावानुसर राम॰
णं यत्किंचित्सद्द्रव्येष्वेव महत्त्वसंयोगादिस्त्रयोगोलकानुयोगिकत्वस्येति विरहाभावतिप्रसंग इत्यपेतत्तेन संबंधः ५७

साध्यतावच्छेदकसंबंधसामान्यांतर्गतद्धूमसंयोगे धूमप्रतियोगिकत्ववह्निमदनुयोगिकत्वयोरुभयोरेव सत्त्वेन तत्सामा
न्योभयाभावस्य दुर्घटकत्वात् यत्किंचित्स्यदनुपादाने धूमवान्वह्नेरित्यत्रातिव्याप्तिः स्यात् हेत्वधिकरणस्य हेत्वधिकर
णत्वेन न निवेशः किंतु तद्व्यक्तित्वेन यत्किंचिदेकहेतुमद्व्यक्तेर्निवेश इत्येतत्त्वाभार्थकतदुपादाने पुनर्हेत्वधिकरणायो
गोलकानुयोगिकत्वस्य धूमसंयोगेऽभावादन्यसंयोगे च धूमप्रतियोगिकत्वस्याभावात् संयोगसामान्यस्यैवोभयाभाववत्त्वा
त् धूमत्वावच्छिन्नाभावोपि लक्षणाघटक इति नातिप्रसंग इत्यर्थः प्रतियोगितावच्छेदकविशिष्टार्थकनिरुक्तपदप्रयोजनं चै
त्रान्यत्वविशिष्टे तत्र दंडत्वेन चैत्रनिष्ठदंडसाध्यक एतद्दंडहेतौ समवायेन विशिष्टसत्तासाध्यके जातिमद्धेतौ चातिव्याप्ति
वारणाह यदर्शयति चैत्रान्यत्वेति निरुक्तपदानुपादाने संयोगसामान्यांतर्गते चैत्रनिष्ठतद्दंडसंयोगे हेत्वधिकरणचैत्रानु
योगिकत्वविशिष्टतद्दंडाभावप्रतियोगितद्दंडप्रतियोगिकत्वयोः समवायसामान्यांतर्गतगुणाद्यनुयोगिकसत्तासमवाये च हे
त्वधिकरणानुयोगिकत्वविशिष्टसत्ताभावप्रतियोगिसत्ताप्रतियोगिकत्वयोर्द्वयोरेव सत्त्वेन तादृशाभावस्य लक्षणाघट

कत्वान स्यात् इतिप्रसक्तातिप्रसक्तेस्तदुपानात्वावकाशः चैत्रे गुणादौ च संयोगेन समवायेन च विशिष्टद्वंद्व विशिष्टसत्तावैशि
ष्ट्यप्रत्ययात् तदनुयोगिक संयोगसमवाययोर्विशिष्टद्वंद्व विशिष्टसत्त्वाद्यवच्छिन्नप्रतियोगिताकत्वानभ्युपगमेनान्यानुयो
गिकयोस्तत्पोष्ठे त्रगुणाद्यनुयोगिकत्वाभदितोभयाभावस्याकृतत्वाविशिष्टसाध्याभावस्यापि लक्षणाघटकत्वादित्यर्थः
अथात्र संयोगेन घटादौ साध्ये घटत्वादौ व्याप्तिः संयोगसामान्यांतर्गतघटादिसंयोगे घटाद्यनुयोगिकत्वघटादिप्रतियोगिक
त्वोभयसत्त्वेन घटादिनिष्ठघटाद्यभावस्य लक्षणाघटकत्वात्तत्र च स्वस्मिन् संयोगेन स्वविशिष्टबुद्ध्यनुदयात्तस्यान्यत्र घटविशि
ष्टधीमात्रनियामकसंयोगे च तदनुयोगिकत्वमात्रमिति घटानुयोगिकत्वस्य प्रतियोगिकत्वोभयं न कुत्रापि संयोगेऽस्ति
न हि समवायेन संयोगाधिकरणत्वमेव संयोगोऽस्ति येन घटसमवेतसंयोगमात्रस्यैव घटानुयोगिकत्वं स्यात् तथा सति तत्
संबंधानुयोगितायाः एवत द्विशिष्टबुद्धिविषयतासंयोजकत्वे न स्वस्मिन्नपि स्वविशिष्टबुद्ध्यापत्तेर्दुर्वारत्वात् किंतु संबंधांतर रत्न०
मेवेति वाच्यं येन घटेऽन्यविशिष्टधीस्तेनापि संबंधेनान्यत्र कदाचित् घटविशिष्टबुद्धिजननादेकत्रैव संयोगे घटानुयो ५८

गिकत्वघटप्रतियोगिकत्वयोर्वावश्यकत्वात् तदपरस्मिन् संबंधे यत्प्रतियोगिकत्वविशिष्टे यदनुयोगिकत्वं तत्र संबंधे न तत्
स्यैव तत्र विशिष्टप्रमितिः स्वप्रतियोगिकत्वविशिष्टं च संयोगस्वानुयोगिकत्वानुपगमेन स्वस्मिंस्तेन स्वविशिष्टप्रमापत्तेः
वकाश इति चेन्न संयोगसंबंधेनाधिकरणांशे आधेयस्येव विशिष्टबुद्धिर्जन्यते न त्वाधेयांशे आधारस्य आधाराधेयभावानाप
न्नयोर्हि तत्र नियामकसंयोगितोऽस्त्व संयोगे न विशिष्टबुद्धेरप्रामाणिकत्वात्त्वाधेयत्वानुपस्थितिकालीनेऽभूतले घट इत्यादि
प्रत्यये घटाद्यंशे भूतलादेः प्रकारत्वे विशिष्टाधेयतापारस्वसंसर्गेणोपगमात् न तु संयोगस्य एव संसर्गतत्वनियामकस्यगगनादिसंयो
गस्य संबंधानुपपत्तिर्विशिष्टबुद्धिनियामकस्यैव तत्त्वात् आदि इति चेत् काकुक्तिः एवं च येन संयोगेनान्यत्र घटविशिष्टबुद्धि
र्जन्यते घटस्य तत्संयोगाश्रयानाधारत्वेन घटेन तेनान्यविशिष्टबुद्धिर्जन्यत इति संयोगमात्रस्य वत्प्रतियोगिकावत दनुयोगि
कत्वोभयाभावस्याकृतत्वात् अथ यद्घटस्याधोवस्थितपटे येन संयोगेन घटविशिष्टबुद्धिर्जनिता तेनैव च संयोगेन पटे न स
मं परिवृत्तस्यापि ते घटे पटविशिष्टबुद्धिरपि जन्यते तत्र संयोगे घटानुयोगिकत्वघटप्रतियोगिकत्वोभयोनावश्यकतया संयो

गेन घटसाध्यके तद्घटतत्पटान्यतरत्वादावतिव्याप्तिर्हेत्वोरैवेति चेदिदं संतिसाध्यतावच्छेदकसंबंधानुयोगितासामान्ये निरू
पकप्रतियोगिप्रतियोगिकत्वविशिष्टनिरूपितत्वं हेत्वधिकरणीभूतयत्किंचिद्व्यक्तिनिष्ठत्वोभयाभावस्यैव विवक्षणीयः स्व
स्मिन्स्वविशिष्टत्वं च स्वानुयोगिकत्वप्रतियोगिकत्वविशिष्टसंयोगनिरूपितत्वस्य स्वनिष्ठानुयोगितायाः सत्त्वात्संयोगोपादानुयो
गितासामान्ये घटप्रतियोगिकत्वविशिष्टनिरूपितत्वतद्घटनिष्ठत्वोभयाभावोऽक्षतत्वेवेति एवं च पदे तत्कस्य समवायैक्य
मतेऽतिव्याप्तिसमुद्भवपि ष्यति तथाप्यक्षताभिप्रायेणातिवीपे अयद्द्रव्यत्वादिकं प्रति पर्याप्तिसंबंधेन द्वित्वादेर्व्यापकत्वा
पत्तिर्हेतुमत्स्यैकैकद्रव्यस्य पर्याप्तिसंबंधेन द्वित्वाधिकरणत्वेपि द्वित्वादिपर्याप्तौ हेत्वधिकरणतत्तद्व्यक्त्यनुयोगिकत्वा
भावात् सत्त्वादिति द्रव्यत्वादिनापि पर्याप्तिसंबंधेन गगनसत्तादौ द्वित्वाघटतुमानापत्तिरिति देत्त्र उद्देश्यतावच्छेदकानतिरिक्तवृ
त्तित्वाविशेषितपर्याप्तेः क्वचिदपि संबंधत्वानभ्युपगमेन तादृशपर्याप्तिसंसर्गकानुमितेनोपादकासंभवात्तगगनसत्ता
घतिरिक्तवृत्तित्वविशेषितपर्याप्तेर्द्वित्वादिप्रतियोगिकत्वाभावेन द्वित्वादिनिष्ठव्यापकत्वाघटकतया तादृशसंबंधेनापि राम०
५९

तदनुमानापत्तेरनवकाशात् यत्तु हेत्वधिकरणायत्किंचिद्व्यक्त्यनुयोगिकत्वस्य लेहेतुमत्त्वपर्याप्त्यवच्छेदकयत्किंचिद्धर्मा
वच्छिन्नानुयोगिकत्वे निवेशे द्वित्वादिपर्याप्तौ च द्रव्यत्वादिपर्याप्त्यवच्छेदकएकमात्रवृत्तिधर्मावच्छिन्नानुयोगिकत्वविर
हात्तेन संबंधेन द्वित्वादेर्द्रव्यत्वादिरूपप्रत्येकपर्याप्तिवृत्तिधर्मव्यापकतापत्तिः हेतुमद्वृत्तिपर्याप्ति किंचिद्धर्मावच्छिन्नानुयोगि
ताकत्वनिवेशे त्विमे वहवो द्वित्वादित्वादौ पर्याप्तिसंबंधेन हेतुसाध्यभावेऽव्याप्तिः हेतुमदेकमात्रवृत्तिधर्मावच्छिन्नानुयो
गिताकत्वस्य वहुत्वादिपर्याप्तावसत्त्वेन तादृशसाध्याभावे निरूपकप्रतियोगिवैयधिकरण्यस्य दुर्वारत्वात् अतो हेतुपर्या
प्त्यवच्छेदकयत्किंचिद्धर्मानिवेशादितितन्नमनोरमं एतादृशरीत्याऽऽक्तकल्पपरिष्कारेऽपि प्रतियोगिभेदे हेतुपर्याप्त्यवच्छेदका
वच्छिन्नानुयोगिकत्वस्याप्रिमक्रूल्यविवक्षणे आकाशः आकाशघटोभयत्वादित्यादौऽतिव्याप्तेर्दुर्वारत्वात् आकाशत्वा
घवच्छिन्नभेदस्य दर्शितहेतुपर्याप्त्यवच्छेदकतदुभयवृत्तिधर्मावच्छिन्नेऽसत्त्वात् प्रतियोगिवृत्तिधर्मस्य भेदाधिकरणतान
वच्छेदकत्वात् न च व्यासज्यवृत्तिधर्मसाध्यके ईदृशी रीतिरुपादेया नान्यत्रेति वाच्यं आकाशत्वादेराकाशघटादौ व्यासज्यवृ

त्तित्वभ्रमदशायां तदवच्छिन्नभेदस्याप्रसिद्धत्वे अधिकरणवृत्तित्वग्रहेऽपि आकाशघटोभयत्वादिहेतुना आकाशत्वाद्यनु
मित्युत्पत्त्या तन्निर्वाहाय तत्रापि साधनपर्याप्त्यवच्छेदकावच्छिन्नाधिकरणताकप्रतियोगिमद्भेदघटितव्याप्तिज्ञान
हेतुतायावाच्यतया तत्राप्यनुमित्यौपयिकव्याप्तिप्रसिद्ध्यापत्तेः तस्माद्द्वित्वादिसाध्यकद्रव्यत्वाकाशत्वादिकं सद्धेतुरेव
इत्येवं ह्रस्वत्वादित्यादावव्याप्तिवारणाय पर्याप्त्यतिरिक्तस्वरूपसंबंधेन प्रतियोग्यधिकरणत्वावच्छिन्नस्य भेद एव हे
तुमति निवेशनीयः ननु प्रतियोग्यवच्छिन्नभेदः प्रतियोगिमद्वृत्तिधर्मवत्त्वं वा तेन भेदस्य कवृत्तिबहुत्वाद्यवच्छिन्नभेदे
मादायतदभावस्य प्रतियोगिवैयधिकरण्यमित्यपवस्मार इदं तु बोध्यम् साध्यतावच्छेदकावच्छिन्नाभावनिरूपितत्ववि
शिष्टसाध्यवृत्तिश्चाधिकरणताभिन्नहेतुमन्निष्ठाधिकरणताकत्वमेव प्रतियोगिव्यधिकरणहेतुसमानाधिकरणी
तिप्रतीकार्यः महाकालो घटवान्महाकालत्वादित्यादौ च नैतादृशविशेषणोपादानाभावाप्रसिद्धिः कालिकसंबंधाव राम०
च्छिन्नपटाद्यभावस्यैव तत्र सत्त्वात् हेतुमन्निष्ठाधिकरणतायां साध्याभावाधिकरणताभिन्नत्वसत्त्वेन विशिष्टभेदस्य ६०

त्वात् हेतुमत्याभावघटितप्रतियोगिवैयधिकरण्यानुधावनं दीधितिकृतामफलमेव एवं च प्रतियोगिवैयधिकर
रणस्य यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत इत्यादिक्रमेण निर्वचने तु गगनाभावप्रतियोगिन
त्वावच्छिन्नाभावकूटनिवेशनेऽव्याप्तेर्दुरुद्धरत्वं तर्हि दूषणान्तरमनवकाशमिति दिक्। ननु गगनादेरपि कालिकसंबंधेन का
लवृत्तित्वमावश्यकं स्वन्नयायतेः पारमार्थिकत्वान्नयतेः तस्य कालवृत्तित्वरूपत्वात् एवं कारणत्वानुपपत्तिस्तस्य पूर्व
कालवृत्तित्वघटितत्वात् अत्र वृत्तित्वमवादस्वतंत्रकालिकातिरिक्तसंबंधेनावृत्तित्वम् इत्थं च कालिकसंबंधसामान्येन ग
गनादिप्रतियोगिकत्वम् महाकालानुयोगिकत्वोभयाभावोऽपि दुर्लभ इति तदभावेऽपि प्रतियोगिवैयधिकरण्यं दुर्घटं एवं
विषयितया घटादिसाध्यके नित्यज्ञानत्वादिहेतावपि प्रतियोगिव्यधिकरणाभावाप्रसिद्धाऽव्याप्तिर्दुर्वारैव हेतुमति
भगवज्ज्ञानादौ विषयितासंबंधेन वस्तुमात्रस्यैव संबंधित्वात् द्विषयितासंबंधसामान्येहेत्वधिकरणानुयोगिकत्वघटितो
भयाभावस्य दुर्घटत्वादित्यालोच्य कल्पांतरमाह स्वरूपसंबंधेनेत्यादिना स्वरूपसंबंधेन कालिकविशेषणतासंबंधेन वा

वछिन्नत्वसाध्यतावच्छेदकसंबंधावछिन्नत्वोभयाभाववत्तादृशप्रतियोगितासामान्यकोयो धर्मस्तदवछिन्नसामा
नाधिकरण्यं तद्धर्मावछिन्नविधेयकानुमित्योपयिकव्याप्तिरितिपर्यवसितं घटत्वान्महाकालत्वादित्यादौ समवाया
दिना घटाद्यभावीयप्रतियोगित्वे प्रतियोगितावछेदकसंबंधेन प्रतियोगिवैयधिकरण्यनिरूपकाप्रसिद्ध्या तादृशप्रतियो
गितासामान्ये कालिकसंबंधावछिन्नत्वाभावादेव निरुक्तोभयाभाववत्त्वमक्षतमिति तत्करणासमन्वयः धूमवान्व
ह्नेरित्यादौ संयोगादिना घटाभावप्रतियोगितायां समवायादिना धूमावभावप्रतियोगितायां च धूमत्वाद्यवछिन्नत्व
साध्यतावच्छेदकसंबंधावछिन्नत्वोभयाभावसत्त्वेपि साध्यतावछेदकसंबंधेन साध्यतावछेदकावछिन्नप्रतियोगिता
या अपि निरुक्तप्रतियोगितासामान्यांतर्गतत्वेन तत्रोभयाभावासत्त्वान्नातिव्याप्तिः धूमादिसमानाधिकरणस्य स
मवायादिना वह्न्याद्यभावस्य संयोगादिना घटाद्यभावस्य च प्रतियोगितायां साध्यतावछेदकधर्मावछिन्नत्वतादृश
संबंधावछिन्नत्वयोरेकैकसत्त्वेप्येकैकाभावेन तद्द्वित्वावछिन्नत्वाभावसत्त्वात्तत्करणासमन्वयः पर्यवसितादृशाभावीयप्र

ध्यतावछेदकधर्मावछिन्नप्रतियोगितासामान्ये साध्यतावछेदकसंबंधावछिन्नत्वमात्रस्याभावनिवेशेपि सामंजस्य
इदं वाच्यं प्रमेयत्वादित्यादौ वाच्यत्वत्वावछिन्नभेदप्रतियोगितायां साध्यतावछेदकसंबंधावछिन्नत्वस्य विरहमादा
य प्रमेयसामान्यसाध्यकसंयोगेन जन्यत्वविशिष्टघटादिहेतौ साध्यतावछेदकावछिन्नभेदस्य संयोगसमवायकालि
कविशेषणतासंबंधावछिन्नतदवछिन्नाभावस्य हेतुमत्यसंभवेपि विषयितासंबंधावछिन्नतदवछिन्नाभावस्य ज्ञा
नमात्रवृत्तिहेतौ च संयोगसंबंधावछिन्नतदवछिन्नाभावस्य तद्वृत्तिप्रसिद्ध्या तदीयसाध्यतावछेदकावछिन्नप्रति
योगितायामुक्तसंबंधावछिन्नत्वस्य विरहमादाय लक्षणसमन्वयसंभवान्न क्वापि हेतुमति सर्वैरेव संबंधैः साध्यावृत्ते
न्नतु कस्यामपि तादृशाभावप्रतियोगितायां साध्यतावछेदकावछिन्नत्वमिति भेदशायामप्यनुमितेरानुभविकत्वा
त्तदानीं च साध्यतावछेदकावछिन्नत्वेन तादृशाभावप्रतियोगित्वज्ञानासंभवान्न द्वितीयविशेषितप्रतियोगिताधर्मिक
संबंधविशेषावछिन्नत्वाभावज्ञानस्यानुमितिहेतुत्वासंभवे नीतुभयाभावानुसरणं। प्रमेयत्वावच्छिन्नसाध्यक

स्थले साध्यतावच्छेदकावच्छिन्नाभावाप्रसिद्ध्या तदवच्छिन्नत्वमप्यप्रसिद्धमिति शंकां परिहरति समवायेनेति यद्यपि विषयतादा
वपि तदवच्छिन्नत्वप्रसिद्धिसंभवस्तथापि विषयितादिनिष्ठतत्प्रकारकत्वादिरूपतदवच्छेदकतया प्रतियोगितानिष्ठायास्तन्न
नातिरिक्तवृत्त्यगुरुत्वधर्मनिरूपितविलक्षणावच्छेदकतायाः क्वाप्यज्ञातोपलम्भस्याप्रामाणिकत्वमित्याभिप्रायेण प्रतियो
गितायां यादृशसमवच्छिन्नत्वं तस्यैव लक्षणे निवेशः कार्य इत्यभिप्रायेण तादृशावच्छिन्नस्यैवप्रसिद्धिं दर्शितापूर्वकल्पे दो
षांतरमपि दर्शयति अत एवेति पूर्वकल्पे परित्यज्यैतत्कल्पावलंबनादेवेत्यर्थः समवायस्य उभयवत्त्वे हेतुरेकत्वेनेति
अयुतवृत्तेरपीत्यस्यैतेन द्रव्यत्वाभाववृत्त्यधिकरणगुणादौ अप्यभावघटितप्रतियोगिवैयधिकरण्यासंभवः सूचितः द्रव्यं
जातेरित्यादाविति नातिव्याप्तिरित्यग्रिमेणान्वयः यद्यपि प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वं प्रतियो
गिनिरूपितत्वादृशसंबंधानुयोगित्वं वाधिकरणतानिवेशनात्तादात्म्येन साध्यतायां व्यभिचारापत्तिर्व्याप्तेः तथा च राम०
समवायैकपक्षे गुणादेरपि द्रव्यत्वप्रतियोगिकसमवायानुयोगितानिष्ठत्वात् हेत्वेत्येतत्कल्पेऽपि समवायेन द्रव्यत्वा ६२

भावस्य लक्षणघटकत्वान्निर्वाहस्तथापि स्वप्रतियोगिकत्वविशिष्टतादृशसंबंधनिरूपितविलक्षणानुयोगितापाए
वनिवेशनीयतया गुणादिनिष्ठसमवायानुयोगितायाः स्वद्रव्यत्वीयत्वविशिष्टत्वानिरूपितत्वेन न दोषः वस्तुतः प्रतियोगि
तावच्छेदकसंबंधेन विशिष्टप्रतियोग्यवच्छिन्नभेदो हेतुमद्विशेषणं स्वं च प्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्ववि
शिष्टसंबंधानुयोगिन्येव भेदाभ्युपगमात् समवायैक्यमतेऽपि समवायेन द्रव्यत्वाद्यवच्छिन्नभेदस्य गुणादावक्षतत्वा
द्द्रव्यत्वाद्यभावस्य गुणादौ समवायेन प्रतियोगिवैयधिकरण्यमव्याहतमेवेति ॥ इदमत्र ध्येयम् समवायकालिकविशे
षणताद्युभयसंबंधेन एतद्द्रव्यत्वादेः साध्यताकेवलसमवायादिना द्रव्यत्वादेर्हेतुतायां तत्र साध्यतावच्छेदकसंबंधसा
मान्यांतर्गततया तनानुयोगिकसमवायादौ उक्तोभयाभावसत्त्वेनातिव्याप्तिर्दुर्वारा साध्यतावच्छेदकसंबंधतावच्छेदकरू
पविशिष्टनिरूपितानुयोगितासामान्येन निरुक्तप्रतियोगिप्रतियोगिकसंबंधनिरूपितत्वहेत्वधिकरणीभूतयत्किंचि
द्व्यक्तित्वमुक्तोभयाभावविवक्षणेन तादृशदोषवारणे च निरुक्तप्रतियोगिप्रतियोगिकसंबंधनिरूपितत्वस्याभावेतिरु

त्वप्रतियोगिप्रतियोगिकत्वविशिष्टसंबंधनिरूपितत्वनिवेशेन द्रव्यं जातेः इत्यादावप्यतिव्याप्तिः शङ्कते तां वारयितुमित्युक्त
मद्रव्यत्वघटितं स्वसमवायिसंयोगादिसंबंधेन यत्र लौहित्यादेः साध्यता तत्र सद्धेतावेतत्र स्फटिकत्वादावुभयाभावघटित
प्रतियोगिवैयधिकरण्यनिवेशपक्षे स्फटिकाद्यनुयोगिकजपादिसंयोगे लौहित्यादिनिरूपितपरंपरासंबंधघटकेसा
क्षाल्लौहित्यप्रतियोगिकत्वाभावेन हेतुमन्निष्ठसाध्याभावे प्रतियोगिवैयधिकरण्यं दुर्वारं साक्षात्परंपरासाधारणं तत्प्र
तियोगिकत्वं चाननुगतं दुर्वचं च तादृशस्य तस्य निवेशे संयोगत्वकार्यनुयोगिकवह्निसंयोगादेरपि धूमादेः परंपरासंबंध
घटकत्वसंभवेन धूमादिप्रतियोगिकत्वया तन्निष्ठधूमाद्यभावेऽपि प्रतियोगिवैयधिकरण्यानुपपत्तेः न च तादृशसंयो
गे संयोगत्वपुरस्कारेण साक्षाल्लौहित्यप्रतियोगिकत्वविरहेऽपि साध्यतावच्छेदकसंबंधतावच्छेदकस्वसमवायिसंयोग
त्वपुरस्कारेण तत्प्रतियोगिकत्वं स्वीक्रियत इति वाच्यं मानाभावात् समवायस्य तत्प्रतियोगिकत्वेऽपि तद्घटितपरंपरायाः राम०
संबंधतोपपत्तेः यादृशसंबंधे यत्प्रकारकप्रतियोगिकत्वयद्विशिष्टानुयोगिकत्वोभयाभावस्तादृशसंबंधेन तत्प्रकारक हरि

तद्विशेष्यकज्ञानान्यज्ञानस्यैव प्रमात्वात् स्वसमवायिसंयोगित्वोभयसत्त्वेनोभयाभावासत्त्वात् न च संबंधभेदेन व्याप
कताभेदात् स्वसमवायिसंयोगादिरूपपरंपरासंबंधेन यत्र साध्यता तत्र परंपराघटकविशेष्यांशे स्वप्रतियोगिप्रति
योगिकत्वमुपेक्ष्य स्वप्रतियोगिप्रतियोगिकपरंपराघटकविशेषणतासमवायादिमत्प्रतियोगिकत्वस्यैवाभावे निवे
शनीयः परंपराभिवृद्धावपि ईदृशरीत्योक्तमिति नानुपपत्तिरिति वाच्यं यत्र कालिकसंबंधघटितसामानाधिकरण्य
संबंधेन घटादिकं साध्यं महाकालवृत्तित्वादिकं हेतुस्तत्र कालिकसंबंधेन गगनादेरवृत्तित्वप्रयुक्ते प्रतियोगिवैयधिकर
ण्याप्रसिद्धेर्दुर्वारत्वात् गगनादिनिरूपितस्य तादृशसामानाधिकरण्यरूपपरंपरासंबंधघटकविशेषणांशस्य कालि
कसंबंधस्याप्रसिद्धेः विशेषणीभूतसंबंधविशिष्यत्वनिवेशे निरुक्तप्रतियोगिप्रतियोगिकसंबंधं निवेश्य तद्वत्प्र
तियोगिकत्वनिवेशे कालिकविशेषणतात्वस्य समवेतत्वरूपपरंपरासंबंधेन द्रव्यत्वादिसाध्यके द्रव्यवृत्तित्वादिहेतावति
व्याप्तिः तत्र साध्यतावच्छेदकपरंपरासंबंधघटकविशेष्यीभूतसमवेतत्वांशे व्यभिचारनिरूपकाधिकरणाशङ्कुना

घनुयोगिकात्वद्रव्यत्वप्रतियोगिकसंबंधत्वावच्छिन्नद्रव्यत्वसमवायवत्प्रतियोगिकत्वोभयसत्त्वेन द्रव्यत्वाभावासंग्रहात्
गगनादिनिरूपितस्पतांशस्यासामानाधिकरण्यपरंपरासंबंधघटकविशेषणांशस्य कालिकसंबंधस्याप्रसिद्धेः विशु
(षणीभूत) हेत्वधिकरणानुयोगिकविशेष्यीभूतसंबंधप्रतियोग्यनुयोगिकत्वनिरूक्तप्रतियोगिप्रतियोगिकत्वोभयाभावस्य
संबंधघटकविशेषणांशे निवेशे समवायेपि समवेतत्वसंबंधे न जातिसाध्यकभेयत्वादिहेतावतिव्याप्तिः तत्र हेत्वधिकरणा
नुयोगिकविशेष्यीभूतसंबंधाप्रसिद्धेः न च परंपरासंबंधघटकविशेष्यांशे हेत्वधिकरणानुयोगिकत्वपरंपराघटकवि
शेषणीभूतसंबंधवन्निरूपितत्वनिरूक्तप्रतियोगिप्रतियोगिकसंबंधवन्निरूपितत्वानां त्रयाणामभावविशेषणाद्दोषः
गगनादिनिरूपितकालिकसंबंधाप्रसिद्धावपि तन्निरूपितत्वादाया विषयतादिसंबंधवन्निरूपितत्वस्य प्रसिद्धत्वात्त्रित्वाव
च्छिन्नाभावस्य सुलभत्वादिति वाच्यम् कालिकसंबंधघटितसामानाधिकरण्यसंबंधेन जन्यज्ञानादेः साध्यत्वे व्यभिचा राम॰
रिणि कालत्वादिना हेतावतिव्याप्त्यापत्तेः व्यभिचारनिरूपकाधिकरणमन्यत्वादिविशिष्टापामुक्तसंबंधघटकाधेयतापंका ६४

लिकसंबंधवन्निरूपितत्वसाध्यीयविषयतासंबंधवन्निरूपितत्वयोः सत्वेनाधेयतासामान्ये दर्शितत्रित्वावच्छिन्नाभा
वासत्त्वेन साध्याभावप्रतियोगित्वेऽप्यधिकरणानिवेशात् प्रतियोगितावधर्मिकोभयाभावघटितत्वकरणेच नेयमनुप
पत्तिः हेत्वधिकरणस्फटिकादिनिष्ठस्य समवायादिनाप्रतियोगिव्यधिकरणस्याभावस्य समवायादिसंबंधावच्छिन्नप्र
तियोगितायां समवायिसंयोगादिरूपपरंपरांशाच्छेदकत्वाभावे न उभयाभावाकृतेः न च तत्समवायिसमवायादि
संबंधेन घटरूपादिसाध्यके समवायादिना घटादिहेतावव्याप्तिः तत्र किंचित्समवायिनिरूपितत्वविशिष्टसमवायादिसं
बंधावच्छिन्नायां हेतुमत्कपालादिनिष्ठसाध्याभावप्रतियोगितायां समवायिसमवायपरंपरासाध्यतावच्छेदकसंबंधावच्छिन्न
त्वसत्त्वात् न हि तत्र दर्शितप्रतियोगितावच्छेदकसंबंधसाध्यतावच्छेदकसंबंधयोः शरीरैक्यं क्रमांशे किमपि प्रकृते वक्तु
त्वांशस्य संबंधाप्रवेशादितरांशस्याविशेषात् इयांस्तु विशेषः दर्शितसाध्यतावच्छेदकसंबंधस्य संबंधतया भानेऽप्रथमे
समवायविषयताप्रकारतानिरूपिताद्वितीयसमवायविषयताविशेष्यतानिरूपितोक्तप्रतियोगितावच्छेदकसंबंधा

स्यसंबंधतयाभावे द्वितीयासमवायविषयतैवप्रकारताविशेष्यतोभयनिरूपितेति सत्त्वाच्चानुपयुक्तं सर्वे तिवाच्यं परंपरासंबं
धावच्छिन्नाभावस्य हि प्रतियोगितावच्छेदकसंबंधतापरंपरावटकयावद्वस्तुषु विशेष्यविशेषणभावापन्नेषु पर्याप्ता विशि
ष्टसामान्यसंबंधावच्छिन्नाभावस्य तु तादृशसंबंधताविशेष्यएवपर्याप्ता विशेषणांतु संबंधविधयास्त्वावच्छेदकतायां अ
वच्छेदकमेव न तु तत्तद्भावेन संबंधविधया प्रतियोगितावच्छेदकत्वस्याप्यपीति इदृशरीत्यैवाभावद्वैलक्षण्यनिर्वाहात्
तथाच परंपरासंबंधेन यत्र साध्यता तत्र परंपराघटकतावच्छेदकताकत्वरूपं साध्यतावच्छेदकसंबंधावच्छिन्नत्वं निवेशनी
यं उक्तस्थले चाधिकरणविशेषणीभूतसमवायस्य प्रतियोगितावच्छेदकतायामेवावच्छेदकतया प्रतियोगितायां त
द्भावेन पर्याप्तावच्छेदकत्वाभावात् इति दिक् संयोगस्य द्वित्वावच्छिन्नप्रतियोगिकत्वविरहेणावह्निधूमोभयवानवधू
मादित्यत्र संयोगसंबंधेनोभयत्वेन वह्निधूमोभयत्वावच्छिन्नप्रतियोगिकत्वहेत्वधिकरणानुयोगिकत्वोभयाभावसत्त्वात्ता राम॰
दृशोभयत्वावच्छिन्नाभावोपि संयोगेन प्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणतया लक्षणाघटकत्वादव्याप्तिः स्या ६५

द्रतः संयोगेनोभयसाध्यकस्थले प्रतियोगितावच्छेदकावच्छिन्नत्वपरित्यागे प्रतियोगितायाः प्रतियोगिकत्वमेव निवे
शनीयं तथाच वह्निधूमोभयवानव[illegible]पादावपि वह्निधूमोभयत्वावच्छिन्नाभावस्य लक्षणाघटकतया पूर्वोक्ताव्या
तिव्याप्तिः स्यादिति चेत् साध्यतावच्छेदकादिभेदेन व्याप्तिपदार्थभेदस्त्वेव प्रतियोगितावच्छेदकावच्छिन्नत्वपरित्यज्य
प्रतियोग्यप्रतियोगिकत्वमिह निवेशनीयं तथाच साधनभेदेनापि तुल्ययुक्त्या तन्नेदाहूमहे तु कवह्निधूमोभयात्म
कसाध्यघटितव्याप्तिपदार्थप्रसिद्धिनिर्वाहाय तच्छरीरे प्रतियोगिताश्रयवैयधिकरण्यनिवेशनस्यावश्यकत्वादुभ
यसाध्यकस्थले तूपपत्तिव्याप्तिसंज्ञकत्वमिति चेन्न यथा संयोगसामान्ये द्वित्वावच्छिन्नप्रतियोगिकत्वाभावनिरूढव
दशायामपि धूमेन वह्निधूमोभयानुमितिर्भवतीति प्रतियोगिताश्रयप्रतियोगिकत्वघटितोभयाभावविषयकज्ञानं हि अपि लिं
गकतादृशोभयानुमि[illegible]तानकमंगीकिंपतेन तथा तादृशानिश्चयदशायामसत्त्ववह्निमत्तामेवधूमवत्त्वमिति भ्रांतानांद्रे
हेतुकतदुभयानुमितिर[illegible]वसिद्धेरितत्रापि प्रतियोगिताश्रयप्रतियोगिकत्वघटितोभयाभावविषयकज्ञानमेवानुमि

तिजनकं वाच्यं तथा च तद्धेतुकतत्साध्यकानुमितिजनकज्ञानस्य प्रमात्वप्रसंग इत्यपि वातिव्याप्त्यर्थः स्वत्वं वह्निधूमोभयत्वेनो
भयं धूमव्यापकमिति वाक्यात् पृथगेवोक्तनिश्चयदशायां शाब्दबोधो जायते तथा वह्निधूमोभयत्वेनोभयं वह्निव्यापकमित्य
नाप्रोक्तवाक्यादपि योग्यताभ्रमाच्छाब्दबोधः सर्वज्ञानानुभवसिद्ध इति प्रतियोगिताश्रयप्रतियोगिकत्वमेव तत्र तत्र शाब्द
धीविषयः स्वीकरणीयः तथा च तद्विषयकधियः प्रमात्वेन तादृशवाक्यस्य प्रामाण्यापत्तिरित्यपीति दवक्केरित्येतदनंतरं धू
मादिति नातिव्याप्तिरित्यनंतरमयं पाठः केचित्तु कल्पे प्रतियोगितासंख्यान्वयस्य लाघवेऽतिव्याप्तिवारणायेत्यपि योजयंति दु
ष्टमत्रावधेयं घटद्वयवद्भूतलमित्यादौ द्वित्वोपलक्षितघटादिवैशिष्ट्यं तद्विशिष्टवैशिष्ट्यं वा भासते भ्रमापेक्षया एकघटेऽपि द्वि
त्वस्यापि तत्प्रसंगः न च द्वित्वोपलक्षितस्यापि व्यक्तिद्वयस्यैव वैशिष्ट्यमवगाह्यते तत्र भासत इति नातिप्रसंग इति वाच्यं एकस्मि
न्नपि घटे विशिष्टभेदभ्रमेण द्वित्वभ्रमात्तत्प्रकारकप्रतीतावुभयाभावोपमात्तादृशबुद्धेर्द्वित्वविशिष्टाभावज्ञानविरो रा०म०
धितानुपपत्तिश्च विशिष्टवैशिष्ट्यज्ञानस्य विशिष्टाभावज्ञानविरोधित्वात् द्वितीये संयोगसंसर्गकतादृशज्ञानमात्रस्यैव ६६

भ्रमत्वापत्तिः संयोगरूपवैशिष्ट्ये द्वित्वविशिष्टप्रतियोगिकत्वस्य बाधात् तस्माद्द्वित्वादिविशिष्टप्रतीतौ संयोगमात्रं न संबं
धः अपितु द्वित्वावच्छिन्ननिरूपिता संयोगावच्छिन्नाधिकरणतैव अधिकरणता च पदार्थांतरमधिकरणस्वरूपं वा उभयापे
व निरूपकभेदेपि निरूपकतावच्छेदकद्वित्वस्यैक्यात्तदैक्यमिति संयोगप्रतियोगितावच्छेदकत्ववत् तत्प्रतियोगितावच्छेद
कताया द्वित्वेऽनुपपत्तिरित्युपेक्ष्यं वह्निधूमोभयत्वावच्छिन्नसाध्यके संयोगावच्छिन्नाधिकरणतायाः स्वसाध्यतावच्छेदक
संबंधत्वात्तत्र चोभयत्वावच्छिन्नप्रतियोगिकत्वसंभवान्नाव्याप्तिः अन्यथा द्वितीयकल्पेपि प्रतियोगितावच्छेदकावच्छिन्न
निरूपितप्रतियोगितावच्छेदकसंबंधानानुयोगित्वनिवेशात् संयोगेनोभयत्वावच्छिन्नसाध्यकव्याप्तिचारिता तत्संबंधा
वच्छिन्नप्रतियोगितायाल्लक्षणघटकत्वमतिव्याप्तिर्दुर्लभापत्त्यात्र वस्तुतस्तु पर्वतो वह्निमानित्यादावपि संयोगावच्छिन्नाधि
करणतैव संबंधो न तु संयोगमात्रं ऽन्यथा पर्वते वह्निरित्यत्रापि संयोगमात्रस्यैव तथात्वापत्त्या विशेषणसंसर्गता तादृशप्रतीतौ
विशेषायप्राथम्यायां संयोगः द्वितीयायां तदवच्छिन्नाधेयता संसर्ग इत्युपपन्ने किंतु प्रथमायाः संयोगावच्छिन्नाधिकर

रात्वाद्द्वितीयायां संयोगस्तथैत्यत्र विनिगमकस्य दुर्लभत्वात् न च तादृशप्रतीत्योः संयोगांशेऽविलक्षणत्वेऽपि विशेष्यविशेष
णभावभेदेन वैलक्षण्योपपत्तिः संभवत्युभयत्रैव संयोगमात्रस्य संबंधत्वमिवाचोपर्वतो वह्निमान् वह्नौ पर्वत इत्यनयोः पर्व
तो वह्निः पर्ववान् वह्निरित्यनयोश्च प्रतीत्योर्विशेषणविवेहात् न चैवं रूपवानित्यादावपि समवायावच्छिन्नाधारतैव संबंधः स्या
त् तु समवायः उक्तयुक्तेरविशेषादिति वाच्यं समवायातिरिक्तसमवायातिरिक्तसमवायावच्छिन्नाधारतानभ्युपगमात् अत्र य
समवायावच्छिन्नाधानतायाः समवायरूपत्वे समवायावच्छिन्नाधेयतावत्समतिरिक्तास्वीकारेणापि अन्यथा रूपवान् घटः घ
टे रूपमिति प्रतीत्योः संसर्गवैलक्षण्यानुपपत्तेस्तथा च समवायावच्छिन्नाधारताधेयताव्यतिरिक्तेऽत्र विनिगमकं दुर्लभमिति
समवायातिरिक्ताधावतापि द्विनिष्ठत्वस्यैवेति चेत् न घटानुयोगिकरूपप्रतियोगिकसंबंधो रूपानुयोगिकघटप्रतियोगिक
संबंधश्च परस्परं विलक्षणावेतित्यन्यथा दर्शितस्थले संसर्गवैलक्षण्यानिर्वाहादिति सत्यं ज्ञात्र चाधारानुयोगिकः संबंध रा०म०
एव समवाय इति परिभाषितः तत्राधेयानुयोगिकः समवायः संतु त्वाधेयतेत्येव परिभाष्यते तत्र को विनिगमकानुयोगः ६७

न चैवं संयोगिन्यपि संयोग एवाधानतास्तु स एवानुयोगितासंबंधेनाधारपदप्रवृत्तिनिमित्तमिति संयोगस्य द्विनिष्ठत्वेऽपि ना
धेयेतद्व्यवहार इति वाच्यं संयोगीयसमवायातिरिक्तापाधेयव्यवहृतानुयोगितायाः स्वीकारेण स्पष्टमेव संयोगनिरूपिताधा
रतान्वोयगमेनातिरिक्ताधावतापानिष्प्रत्यूहत्वात् न च तत्र संयोगप्रतियोगिकत्वं कल्प्यतोपथितिगौरवं भवन्मतेपि संयोगे
तत्समवेतत्वातिरिक्ततत्प्रतियोगिकत्वस्य कल्पनीयतया साम्यात् अन्यथा अस्तादेः स्वसमवेतघटादिसंयोगानुयोगितया
स्वाधारतापत्तेः एतेन संयोगिन्याधेयतापि संयोग एव प्रतियोगितासंबंधेन तस्याधेयपदप्रवृत्तिनिमित्ततयानाधेयतद्व्य
वहार इत्यपि निरस्तं न्यायेपि च स्वाधारस्यावश्यं पदार्थान्तरकल्पनायां आधाराधेययोः संयोगानुयोगिकत्वप्रतियोगित्व
कल्पने विपरीतकल्पनायामपि बाधकाभावाच्चेति दिक् एकानुयोगिकसंयोगद्वयप्रतियोगितापामन्येकमुभयत्वा
वच्छिन्नत्वमिष्टेऽपि तदुभयत्वेनोभयत्वावच्छिन्नत्वोपगमात्रसंयोगेनोभयसाध्यकेऽव्याप्तिरित्यप्याहुः प्रतियोगित्वाव
च्छेदकत्वादेः स्वरूपसंबंधरूपतया संबंधत्वेन तत्तद्विशेषसंबंधत्वस्यानिषमघटितत्वया अनवस्थितस्याशंकानिरस्यति प्रपो

गित्वादिस्त्वेति संबंधविशेषोपि न संबंधत्वेनवल्लकाराघटकः अपि तु प्रतियोगितात्वादिना कुत्रचित् संबंधविधयास्वरूपतए
वेत्यर्थः ननु सामानाधिकरण्यं तत्संबंधिसंबंधित्वं तत्र च संबंधत्वेनैव संबंधनिवेशा इत्याशंक्याह सामानाधिकरण्येपीति सं
योगत्वादिनैवेति साधनतावच्छेदकादिभेदेनैव संबंधतावच्छेदकभेदेनापि व्याप्तिभेदस्येष्टत्वादिति भावः साध्यसमानाधि
करणपदशरीरे साध्यवत्संयुक्तत्वादिरूपस्य हेतोः संबंधस्य प्रकारतया तस्य च संयोगत्वादिना निवेशः साध्यसंबंधस्य च स
संसर्गतया संसर्गविधया वल्लाघवेन निवेशो तस्य स्वरूपतए व निवेशः संभवति ज्ञात्पतिरिक्तस्यापि संसर्गत्वाभावे
स्वरूपतोपि तद्वयगमादित्येवधेयं संबंधत्वनिवेशेपि च न क्षतिरित्याह दर्शितंचेतिनियमाघटितमिति तत्प्रतियोगि
कत्वविशेषणएव तदीयसंबंधत्वं न तु तद्विशिष्टबुद्धिनियामकत्वं अतीन्द्रियसंबंधे जनकत्वरूपनियामकत्वासंभवात् वि
षयत्वरूपनियामकत्वनिवेशो व्याप्तिरेवानंतर्भावात् प्रमेयमात्रे ऽतिप्रसंगात् न च विशेष्यतान्यप्रकारतानिरूपितविष दी०
यतायाविवक्षणीयत्वपानातिप्रसंग इतिवाच्यं एवमपि संयोगादिना द्रव्यत्वादिभ्रमविषयतामादायतस्यापि तत्सं ६८

बंधत्वापत्तेः न च विषयतायोप्रमाप्रतियोगित्वनिवेशात्राप्यतिप्रसंगः प्रमात्वस्य तत्संबंधानुयोगिविशेष्यकत्वावच्छिन्न
तत्प्रकारकत्वरूपतया संबंधत्वघटितत्वात् एवं तदनुयोगिकत्वविशेषणएव तत्र संबंधत्वमितिभावः इत्थं च सामान्यतः सं
बंधघटितं साध्यवत्तित्वं संबंधत्वरूपं साध्यसामानाधिकरण्यं साध्यवदनुयोगिकप्रतियोगित्वं प्रतियोगितासंबंधेन साध्यव
दनुयोगित्वं वा तच्च संयोगत्वादिना तद्घटितात् साध्यवदनुयोगिकसंयोगप्रतियोगित्वादिरूपात् न च परीवमितितदेवव्या
प्तिघटकं वाच्यं अतिप्रसंगस्य व्यापकतायां विशिष्टसंबंधनिवेशेनैव वारणासंभवात् हेतोः साध्यवत्संयुक्तत्वादिनिष्ठ
यदशायां संयोगादिना पक्षे हेतुमत्तानिश्चयस्य साक्षादनुमितिप्रतिबंधकतायाः स्वीकृतत्वात् ततो ऽनुमित्यापत्ते
र्वकाशादितिस्त्वितं अभावत्वं चेदत्र भावभिन्नत्वं तदप्रतियोगितायां साध्यतावच्छेदकधर्मावच्छिन्नत्वान्नाद्दशसं
बंधावच्छिन्नत्वाभयाभावनिवेशाय केदैशिकविशेषणतया घटत्वाभावादिसाध्यके व्यभिचारितापत्तिप्रसंगः ताद्दश
संबंधावच्छिन्नतदभावस्य घटत्वादिरूपतया भावभिन्ननिरूपितप्रतियोगितायां तत्संबंधावच्छिन्नत्वघटत्वाभावच्छि

त्वावच्छिन्नत्वोभयाभावस्याकृतत्वादित्याशंक्यानिनस्येति स्वभाववत्वं चेत्यादिनाइदमिह नास्तिइदमिदं न भवतीति द्विवि
धप्रतीतिकथनेनाभावत्वस्य संसर्गाभावान्योन्याभावोभयसाधारणरूपं प्रमाणमुपदर्शितं तस्यान्योन्याभावसाधारणरूप
विरहेस्य भावांतरप्रतियोगितामात्रान्यूनतादात्म्यसंबंधावच्छिन्नत्वविरहे हेयाभेनसंबंधेन साध्यतापां व्यभिचारापत्तिप्र
गात् भावाभावसाधारणाइत्यभावे नापि घटे घटत्वाभावो नास्ति घटो न घटभिन्न इति प्रतीतिजननादिति भावः तदव
च्छिन्ने चाभावपदस्य हरिशक्तिः परिभाषैव वाच्यतेन भावो भावइत्यवयवव्युत्पत्त्यानद्धर्म्मप्रत्ययोपि न क्षतिः स्वरूपसंबं
धविशेषइतिस्वभावेनतत्स्वरूपप्रतियोगिनिरूपितानुयोगित्वनामासंबंधविशेषइत्यर्थः नचाभावत्वस्य स्वरूपसंब
धरूपत्वेऽननुगमादनुगतप्रत्ययानुपपत्तिः तदनुगमकरूपांतराभ्युपगमात् पदार्थांतरत्वेपि निरूपकभेदेन संबंधानं
स्वभेदस्यावश्यतयाऽननुगमकरूपांतरापेक्षणात् प्रतियोगिनिरूपितसंबंधानामननुगमेपि प्रतियोगिधर्मि राम०
तावच्छेदकस्य तत्तत्पदप्रवृत्तिनिमित्तास्वंरुधर्म्मांतरस्य सत्त्वाद्घटो नास्ति पटो नास्तीत्याद्यनुगतप्रतीतिनिर्वाह इति तत्र ६९

साधीय घटादौ घटाभावादेः कालिकादिसंबंधस्यापि स्वरूपत्वतयातत्संसर्गकप्रतीतितो घटाभावो नास्तीत्याद्यनुयोगिता
संसर्गकप्रतीतेर्वैलक्षण्यापत्तिसंबंधतावैलक्षण्यस्यावश्यकत्तया संसर्गतावच्छेदकधर्म्मविशेषस्वीकारस्य तन्निर्वाह
कस्यावश्यकत्वात्तेनानुगतीकृतानुयोगितायाएव संसर्गतावच्छेदकतायाअपि संभवेनाभावनिष्ठाखंडे
धर्म्मांतरस्याभावत्वेनप्रवृत्तिनिमित्ततायाअपि तस्याभिवोपगमात् अथ घटो नास्तीत्यादावनुयोगितारूपसंबं
धविशेषप्रकारेणाभावभानोपगमेतदंशएव निरूपितत्वसंबंधेनप्रतियोगिनः प्रकारत्वसंभवाद् भावांशेतत्संबंधेन
प्रतियोगिनोभानेमानाभावादनुयोगितायाः संबंधत्वमेवनसिद्ध्येदिति चेन्न भारत्याघटाभावस्यदाहादिहेतुत्वापत्तेरन्या
दिरूपप्रतियोग्यवच्छिन्नानुयोगिताविशेषस्यावच्छेदकत्वापेक्षया अननुयोगितासंबंधेनभरापादेस्तथात्वे लाघवेनत
त्संबंधत्वासिद्धेः नचोभयाभावादिवारणाय प्रमत्वाघटवच्छिन्ननिरूपितानुयोगितामभिलापादेः संबंधो वाच्यस्तथा च ता
दृशानुयोगितायाआश्रयतासंबंधेनावच्छेदकत्वेपि नगौरवमिति वाच्यं उभयत्वाघटवच्छिन्ननिरूपितानुयोगिताया

मारिशात्वादिविशिष्टसंबंधताविरहात्तत्र द्रातुयोगितासंबंधेनैव मारिशात्वादिविशिष्टस्य उभयत्वावच्छिन्नाभावव्यावर्त्तकता
संभवेन तादृशानुयोगितात्वेन संबंधतानुपगमात् न चैतावतापि तादृशस्य विशिष्टमशित्वावच्छिन्नाभावव्यावर्त्तकतान
संभवति विशिष्टमनित्वावच्छिन्ननिरूपितानुयोगितायामप्यधिकं स्यात्वादित्यायेन मशित्वादिविशिष्टनिरूपितत्वस्य
त्वेन स्वाश्रयपितत्वसंबंधत्वादिति वाच्यं कारणतावच्छेदकतापर्याप्त्यधिकरणाकारणपरिसमाप्तप्रतियोगितासंबंधि
नएव कारणतयाम निर्नोस्तीत्याद्याकारकशुद्धमनित्वावच्छिन्नप्रकारकप्रतीत्यविषयविशेषणांतरसहितमनि
त्वावच्छिन्नाभावनिष्ठतादृशमनित्वावच्छिन्ननिरूपितसंबंधेच शुद्धमनित्वादिविशिष्टपरिसमाप्तप्रतियोगिताक
त्वविरहेणतादृशाभावव्यावर्त्तनसंभवात् एतेन विशिष्टमनित्वावच्छिन्नाभाववारणाय शुद्धमनित्वावच्छिन्न
प्रतियोगिताकत्वेन हेतुतावाच्या शुद्धमनित्वावच्छिन्नत्वं च तदन्यधर्मानवच्छिन्नत्वं तदपि यदि तादृशधर्मावच्छेद राम०
त्वावच्छिन्नाभावस्तदा किंचिद्विशिष्टतादृशावच्छेदकत्वावच्छिन्नाभावमादायातिप्रसंग इति शुद्धतादृशावच्छेदकत्वे ७०

वच्छिन्नाभावएव निवेशनीयः शुद्धतादृशावच्छेदकत्वावच्छिन्नत्वमपि तदतिरिक्तानवच्छिन्नत्वमिति विशेषणानव
स्थाप्रसंगइत्यपि निरस्तमिति सत्तनमप्रसक्तताधिकजल्पनेन तद्भिन्नातादृशाभावत्वमपि नोपादेयं हेतुसमानाधिकरणां
शेषमात्रपादाननिवेशनीयं प्रयोजनाभावादिति स्वावच्छेदकविशिष्टानधिकरणहेतुमन्निष्ठत्वमात्रपुरस्कारेणाभावनि
वेशपतदीयत्वेन प्रतियोगितानिवेशादिवशर्वस्याकंजस्यादिति भावः प्रसंगात् प्रतियोगित्वादीनां पदार्थांतरत्वं व्यवस्थापय
ति विषयतेति तत्त्वं विषयतात्वं प्राचीनैकदेशिभिः विषयताया अतिरिक्तपदार्थत्वोपगमादुक्तं तत्त्वेन तु पन्यासः पद्यावि
षयताया विषयरूपत्वे द्रव्यत्वावच्छिन्नघटविषयकज्ञाने घटत्वावच्छिन्नतद्विषयकज्ञानस्य वैलक्षण्यविरहाद्वै
लक्षण्यापत्तिः न च द्रव्यत्वघटत्वयोर्भेदेन तत्रविषयतया तद्वैलक्षण्यं देववैलक्षण्यमिति तावतापि द्रव्यत्वेन घटवि
षयकात् घटत्वेन च पटविषयकाज्ञानाद् घटत्वेन घटं द्रव्यत्वेन पटमवगाहमानस्य ज्ञानस्य वैलक्षण्यापादनस्यावश
क्यत्वात् ज्ञानस्वरूपत्वे घटपटयोर्विभ्रादिसत्त्वं हालं ब्रतीप घटपटादिनिष्ठविषयतानामभिन्नतायत्वात् तादृशज्ञानस्य घट

त्वाद्यवच्छिन्नघटादिनिष्ठविषयतारालिङ्गिततयात्मत्वाप्यत्तेः ज्ञानविषययोर्मयरूपत्वे च ज्ञातिमानघटद्वित्वादिज्ञानीयघटत्वादिविषयतायाद्वैविध्यानुपपत्तिः ज्ञानविषययोरतथात्वादितिज्ञातिमानित्याद्याकारकैकविषयघटत्वादिविषयताश्रालिङ्गितानात्वादृशबुद्धेर्विलक्षणाकारतानस्याद्रित्यादियुक्ता विषयताया विषयादिभेदभिन्नविषयतानामननुगमकतयाच विषयतात्वात्प्यतिरिक्ततासिद्धिस्तथाप्रतियोगितायाः प्रतियोगिस्वरूपत्वे घटादिनिष्ठाना घटत्वद्रव्यत्वादिरूपतद्धर्मावच्छिन्नानां संयोगसमवायादिरूपविभिन्नसंबंधावच्छिन्नप्रतियोगितानामवैलक्षण्ये नाभाववैलक्षण्यानुपपत्तिः न्याभावरूपत्वेश राद्यभावीयघटत्वाद्यवच्छिन्नप्रतियोगित्वकिंचिद्विशिष्टघटाभावाभावत्वाद्यवच्छिन्नप्रतियोगितानामभवैलक्षण्यापत्तेः घटत्वादेः प्रतियोगित्वन्यूनवृत्तितया तदवच्छेदकत्वानुपपत्तिः घटाद्यभावस्य घटादिस्वाधारशेषनपदार्थेष्वपि तत्प्रतियोगित्वापत्तेश्चेत्यादियुक्त्या प्रतियोगित्वमप्यतिरिक्तं सिद्ध्यति एवमधिकरणत्वं न धिकरणस्व रा०
रूपमाधेयस्वरूपं वा भूतले घटसंयोगदशायामिव परस्परासियुक्तघटेभूतलसत्त्वदशायामपि इदानीं भूतले घटवदि ७१

तिप्रत्ययप्रसंगात् संयोगरूपत्वेन्याधेयत्वस्यापि तुल्ययुक्त्यातद्रूपतयाध्याधारत्वाधेयत्वयोरभेदप्रसंगे तवैपरीत्येनाधाराधेयभावप्रत्ययप्रसंगादिति तदप्यतिरिक्तपदार्थः संबंधत्वमपि न्वरूपयदार्थातभवेन तद्वैच मितिपदार्थोन्तरमेवेति भाव ः आदिपदाद्भावत्वादिपरिग्रहः इदं तु बोध्यम् अभावत्वं प्रतियोगित्वाभातिरिक्ते तदभावस्य तत्प्रतियोगित्वनिययात् न चैवं पदादेर्घटादिभेदाभावत्वापत्त्या घटादिमति भूतले घटभेदो नास्तीत्यादीप्रतीत्यापत्तिरिति वाच्यं संसर्गावच्छिन्नप्रतियोगिताया एवाभावत्वरूपत्वोपगमात् घटादिभेदस्य घटत्वाद्यपंताभावसमानियतत्वेन तदभिन्नतया घटत्वावैन्न तादात्म्यसंसर्गावच्छिन्नप्रतियोगितासत्त्वात् नैवं तदभावप्रत्ययात् न चैवमपि घटभेदादेर्घटाद्यभावानुपपत्तिः तदप्रतियोगित्वादिति वाच्यं अत्यंताभावत्वात्मकानुयोगितो विशेषस्यैव प्रतियोगितानतिरिक्तत्वोपगमादिति॥ ॥ ॥
॥ ॥ ॥ प्रतियोगितानवच्छेदकेत्यत्र पारिभाषिकावच्छेदकत्वं निवेशयितुं स्ववच्छेदकपदस्य स्वरूपसंबंधरूपावच्छेदकपदार्थपरता माक्षिपति नन्वित्यादिना उह एतत्कृत्यं घटकत्वं संसर्गम्पर्थः तथाच घटत्वेन घटाभावप्रतियो

गीत्वादिमतीति साक्षित्कोयोघटादिनिष्ठप्रतियोगितायाः सह घटत्वादेरवच्छेदकाभावरूपः स्वरूपानतिरिक्तः पदार्था
न्तरात्मको वा संबंधविशेषः स इह लक्षणे न शक्यनिवेशनं इत्यर्थः स्वरूपसंबंधविशेषात्मकावच्छेदकत्वाभावघटितनि
रुक्तरूपं न व्याप्तिस्वरूपमिति यावत् तेन रूपेण साध्यतायां व्यभिचारिण्यपि व्याप्तेरित्यपि मन्त्रत्रैव हेतुः प्रमेयधूमत्वाव
च्छिन्नव्यभिचारिसाधारण्यादिति तदर्थः प्रमेयधूमत्वेत्यादिकं मतत्रयात्वे नेत्यं तं तत्र हेतुः स्वसमानाधिकरणाभाव
प्रतियोगितानिरूपितताहृशावच्छेदकत्वाभाववत्ताहशसाध्यतावच्छेदककत्वे नेति तदर्थः संभवताहृशप्रतियोगिता
वच्छेदकताकताहृशधर्मापेक्षया गुरुत्वं प्रमेयधूमत्वादेस्तादृशप्रतियोगितावच्छेदकत्वाभावसाधकं न स्यात् तत्साधाक
त्वोपष्टंभकयाप्रमाहृशं भवतीति तस्मिन्निति पूरणीयं तथा च लघुधर्मेताहृशावच्छेदकत्वस्य संभवे इत्यर्थः गुरौ तद
भावात् ताहृशावच्छेदकत्वाभावनियमात् तथा च संभवत्तदवच्छेदकताकधर्मापेक्षया यो गुरुः स न तदवच्छेदक इति यो रामं०
स इति पर्यवसितार्थः संभवत्तदवच्छेदकताकत्वं च तदवच्छेदकत्वे बाधकसत्त्वे वा धर्कं वावच्छेद्यप्रतियोगित्वासमभिय ७२

त्वं तथा च प्रतियोगितासमनैयत्यमेव संभवत्तदवच्छेदकताकत्वं पर्यवसितं समनैयत्यघटकदलद्वयनिवेशात्तु घ
टपटभूतलत्वमहानसीयवह्नित्वाद्यवच्छिन्नाभावप्रतियोगितायां न्यूनवृत्तिघटत्वादेरतिरिक्तवृत्तिशुद्धवह्नित्वादेरव
च्छेदकत्वासंभवे नेताहृशगुरुधर्मस्यतावच्छेदकत्वानुपपत्तिः प्रतियोगितायाः समनैयत्यं च प्रतियोगितायाश्च न्यून
वृत्तित्वे सति तन्निरूपकाभावविरोधितावच्छेदकत्वरूपमवच्छेदकतानिर्वाहिकं न्यूनतः सत्ताद्यादेर्विशिष्टसत्ताद्यभावीय
प्रतियोगितान्यूनानतिरिक्तवृत्तित्वेऽपि तदभावविरोधितानवच्छेदकत्वात्तत्प्रतितावच्छेदकत्वसंभवः पर्त्तुत्वावच्छिन्नस
मव्यापकतावच्छेदकधर्मापेक्षया गुरुत्वमेवावच्छेदकत्वाभावसाधकं तथाभिमतस्यैकसमनियतसत्तात्वाद्यपेक्षया गुरो
र्विशिष्टसत्तात्वादेः प्रतियोगितावच्छेदकत्वनिर्वाहाय स्वसमनियमत्वमुपेक्ष्य स्वावच्छिन्नसमव्यापकतावच्छेदकत्व
निवेश इति तत्र घटप्रागभावत्वावच्छिन्नसमव्यापकत्वावच्छेदकघटत्वापेक्षया गुरोर्घटप्रागभावत्वादेरत्यंता
भावप्रतियोगितानवच्छेदकत्तापत्तिरिति त्वाद्यवच्छिन्नसमव्यापकतावच्छेदकतद्घटकसमनैयत्याद्यपेक्षया गुरोरभावत्वादेर्भेद

प्रतियोगितावच्छेदकतया च व्यभिचारात् ननु प्रमेयधूमत्वं स्वावच्छिन्नधर्म्मिविशेषणतापन्नप्रमेयत्वसहितं धूमत्वं-
सामानाधिकरण्यसंबंधेन प्रमेयत्वविशिष्टधूमत्वं वा उभयपर्य्याप्तं तदवच्छिन्नसाध्यकातिव्याप्तिप्रसक्तिः शुद्धधूमत्व-
स्यावच्छेदकत्वे तादृशाऽनवच्छेदकतया विशिष्टधूमत्वेपि गुरुधर्म्मत्वेन कदेशापर्य्याप्तत्वे व्यासज्यवृत्तिधर्म्मावच्छिन्नानु-
योगिताकाभावस्य चापि विशेषपर्य्याप्तत्वे विशेषणान्तरवैशिष्ट्यावच्छिन्नानुयोगिकाभावस्य चानभ्युपगमात् शुद्धव-
ह्नित्वादौ धूमादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वापर्य्याप्तेः प्रमेयवह्नित्वादौ तदनवच्छेदकत्वसौलभ्येन
प्रमेयवह्निमान् धूमादित्यादावव्याप्तिविरहादित्यस्य चैकं वृत्तौ वारिमत्वानुसारेण न चैवं प्रमेयधूमवान्वह्नेरित्यादावति-
व्याप्त्यभिधानमसंगतमिति वाच्यं व्यासज्यवृत्तिधर्म्मावच्छिन्नानुयोगिताकाभावाभ्युपगमेन नानाव्यक्तिद्वयघ- रा०ब०
वच्छिन्नस्य व्यापकत्वानिर्वाहप्रतियोगितावच्छेदकपर्य्याप्तविषयतावच्छेदकतापर्य्याप्तविकरणात्मनवच्छेदकं- ७३
नाथैकस्य नायेन वा तदभिधानात् कंबुग्रीवादीमत्वं च घटत्वमंजकसंस्थानविशेषस्य च घटत्वापेक्षया गौरवेण

स्थानस्य विजातीयावयवसंयोगरूपस्यानंत्यात् अखंडजातिविशेषस्यापेक्षया घटत्वस्य चैकस्य जातिरूपस्यापि
विशेषणाकस्यावच्छेदकत्वे लाघवादिति न च घटसामान्याभावप्रतियोगितायां संस्थानविशेषस्यानवच्छेदकत्वेपि तत्तत्
संस्थानवदभावकूटप्रतियोगितास्वप्रत्येकं तेषामनवच्छेदकत्वमावश्यकं तत्र जातिप्रसक्तघटत्वस्यावच्छेदकत्वासंभवा-
दित्यनुगतरूपावच्छिन्नेष्वपि तेष्वनवच्छेदकत्वं दुर्घटमिति तदवच्छिन्नसाध्यकेनाति व्याप्यत्वकाशइति वाच्यं तत्तत्सं-
स्थानवत्त्वकूटाभावप्रतियोगितायामपि घटानिष्ठतत्तद्व्यक्तित्वस्येव साक्षात् संबंधेनावच्छेदकत्वसंभवात् परंपरासंबंध-
न्तस्यसमवायिसमवेतत्वात्मकेन तत्तत्संयोगानां गौरवेणानवच्छेदकतया तादृशसंबंधेन संस्थानविशेषावच्छिन्नघ-
टादिसाध्यके व्यभिचारिहेतावतिव्याप्तेर्दुर्वारत्वात् ननु मृत्त्वपाषाणादिघटसाधारणघटत्वेनैकं मृद्द्वयपाषाणत्वादिनासं-
करप्रसंगादिति तन्न जातिव्याप्यत्वेनानैवतथाचतथाविधसकलघटानुगमकसंस्थानविशेषावच्छिन्नप्रतियोगिताघ्नांन
स्वरूपेणो घटत्वस्यावच्छेदकत्वसंभवः न्यूनवृत्तित्वान्नाप्यनुगमकरूपान्तरावच्छिन्नस्य तादृशरूपान्तरप्रवेशेन गौरवा

तद्रूपस्य चेद्घ्राणग्राह्यगुणत्वानुधावनं घ्राणग्राह्यत्वं घ्राणग्रहणयोग्यता गुणत्वन्यूनवृत्तिघ्राणग्राह्यजातिरूपा सा चातिप्र
द्रियेपि गंधे इति न गंधत्वस्य पदार्थे न रूपत्व तुल्यसामान्याभावप्रतियोगितासम्भवेपन्यानुपपत्तिः तादृशयोग्यतामात्रस्योपाद
ने गंधत्वसौरभत्वरूपाणां स्वरूपतो हेतुसामानाधिकरण्याभावप्रतियोगितावच्छेदकतया तादृशजातित्वावच्छि
न्नापा अप्यनवच्छेदकत्वं दुर्लभमिति तद्विशेष्यतया गुणत्वनिवेशनं द्रव्यत्वादिहेतुकस्थले च गुणत्वस्य गन्धस्यापि हे
तुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वासंभवाद्विशिष्टगुणत्वस्य गंधत्वेन समनियतस्य तादृशप्रतियोगितानव
च्छेदकत्वमक्षतमेवेत्याप्तेर्व्याप्तिसंगतिः अथ वा घ्राणग्राह्यगुणत्वं स्वक्षपगुणत्वव्याप्यजातिमत्त्वसंबंधेन घ्राणजन्यसा
क्षात्कारविषयतावत्त्वमेव गुणत्वव्याप्यजातिघटितसंबंधस्याभाव गुणपदं न तु गुणत्वस्यापि विशेष्यतया विवक्षि
तमेतेन गुणत्वस्य निरुक्तजातित्वावच्छिन्नगंधत्वादिविशेष्यतया विवक्षितत्वे स्वरूपतो गंधत्वादेर्गुणत्वविशेषणात
यासव्याप्तिव्याप्तिप्रसंगोस्तादृशजातित्वावच्छिन्नस्य विशेषणत्वानुसरणं निर्बीजमिति दूषणमनवकाशं घ्राणग्राह्य राम० ७५

गुणत्वं पर्याप्तमेव घ्राणग्राह्यगंधत्वरूपलघुधर्मसमनियततया न प्रतियोगितावच्छेदकमित्यपि वदंति यत्तु अनवच्छेद
कत्वं स्ववच्छेदकाविषयकप्रतीतिविषयत्वं तथा चावच्छेदकताघटकसंबंधेन विशेष्यांशेऽवच्छेदकप्रकारकप्रतीतिभि
न्नसाध्यतावच्छेदकताघटकसंबंधेन यादृशधर्मप्रकारिका प्रतीतिस्तादृशधर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरि
ति पर्यवसितं एवं च प्रमेयधूमत्वादिप्रकारकप्रतीतेर्धूमत्वादिप्रकारकत्वानियमात् प्रमेयधूमत्वाद्यवच्छिन्नसाध्यकेऽ
तिव्याप्तिपरिहारः संभवति तत्तु घ्राणग्राह्यगुणत्वाद्यवच्छिन्नसाध्यके गंधत्वादिकमविषयीकृत्यापि सुरभिर्वसुमित्यादि
कमविषयीकृत्यापि च गंधत्वादिकं विषयीकृत्य तादृशसाध्यतावच्छेदकप्रकारकप्रतीतिसंभवादिति नन्वत्र तथासस्तु तर्ही
त्वादिर्दिमाद्द्रव्यत्वादित्यादावतिव्याप्तेः प्रत्येकं सकलदंडमविषयीकृत्यैव दंडत्वावच्छिन्नदंडात्मकसाध्यतावच्छेदकप्रका
रकप्रतीतिसंभवात् अथ प्रतियोगितावच्छेदकीभूतापेये धर्मस्तत्तत्प्रकारकप्रतीतिभेदकूटस्य साध्यतावच्छेदकताघट
कसंबंधावच्छिन्नसाध्यतावच्छेदकप्रकारकप्रतीतित्वसत्त्वान्नैवं चलत्कृतो विवक्षितत्वान्नैवमपि व्याप्तिरिति चेन्न हि तादृ

शरीरत्वानिरुक्तघटिताद्यगुणत्वावच्छिन्नसाध्यकेऽपि नातिव्याप्तिरकारादित्यत आह तथात्वेन प्रतियोगितानवच्छेदकत्वेन
स्वानतिरिक्तवृत्तित्वमिति स्वव्यापकतत्कत्वमित्यर्थः तद्घटत्वावृत्तित्वविवक्षणे तु प्रमेयत्वेन प्रमेयसाध्यकेऽव्यभिचारिण्यतिप्रसं
गात् प्रमेयसामान्याभावप्रतियोगिताया अप्रसिद्ध्या प्रमेयत्वादेस्तादृशावच्छेदकत्वानिर्वाहात् महानसीयत्वादिविशि
ष्टवह्नित्वाद्यवच्छिन्नसाध्यके धूमादौ वह्नित्वादेर्महानसीयवह्न्याद्यभावप्रतियोगिताश्रयत्वेऽपि तद्वृत्तित्वपा विशिष्टेऽपि
तत्र तद्घटत्वावृत्तित्वस्य दुर्घटतयाऽतिप्रसंगात् स्वव्यापकतत्कत्वनिवेशे च विशिष्टस्याविशिष्टस्य वा यादृशस्यावच्छेद
कत्वमभिहितं तादृशस्यैव स्वपदेनोपादेयतया विशिष्टवह्नित्वादिकं प्रति च विशिष्टवह्न्याद्यभावप्रतियोगिताया व्याप
कत्वस्याक्षतत्वेन तादृशस्यावच्छेदकत्वोपपत्तेः। ईदृशपक्षे तु तत्तदभावकूटस्य साध्यतावच्छेदकविशेषणतावोध्याश्र
तः स्वत्वाननुगमेनैकसामान्याभावनिवेशासंभवात् किंचिदेकावच्छेदकनिष्ठावच्छेदकत्वाभावप्रमादापातिप्रसंगस्य
नावकाशः। न च स्वपदस्य तद्व्यक्तिपरतया अवच्छेदकनिष्ठतत्तद्व्यक्तित्वमेव पर्यवसितं अवच्छेदकत्वं तथा च विशे राम० ७५

षणावच्छिन्ननिष्ठतद्व्यक्तित्वस्यापि विशेष्यपर्याप्ततया विशिष्टवह्नित्वादेरवच्छेदकत्वाक्षुण्णस्यानवच्छेदकत्वं दुर्निरू
पमिति वाच्यं शुद्धस्य विशेषणान्तरसहितस्य वा यादृशस्याधिकरणताप्रतियोगितानिरूपकत्वा शरीरे निविष्टा तादृश
रूपपर्याप्तत्वावच्छेदकतापर्याप्त्यनधिकरणत्वस्य साध्यतावच्छेदके विशेषणत्वोपगमात् सेय धूमत्वादिपर्याप्ताया
अभावप्रतियोगितावच्छेदकताया अप्रसिद्धावपि तथाविधपारिभाषिकतावच्छेदकतायाः प्रसिद्ध्याऽतिव्याप्त्यनवका
शात् महानसीयत्वादिसहितवह्नित्वादिपर्याप्तावच्छेदकतायाः शुद्धवह्नित्वादावपर्याप्तत्वात् विशिष्टवह्न्याद्यभावप्र
दायदोषानवकाशात् अत्रपदिहेतुसमानाधिकरणाभावप्रतियोगितासामान्यानतिरिक्तवृत्तित्वं निवेश्यते तदा नि
रुक्तवह्न्यादेरेव धूमादिसमानाधिकरणविशेषाभावप्रतियोगितया वह्नित्वादेरपि स्वव्यापकतादृशप्रतियोगित्वक
त्वरूपतादृशप्रतियोगितासामान्यानतिरिक्तवृत्तित्वेन तथाविधप्रतियोगितानवच्छेदकत्वानुपपत्तिरिति तादृशयत्किं
चिद्धेतुकप्रतियोगितानतिरिक्तवृत्तित्वं स्वसमानाधिकरणाभेदप्रतियोगितानवच्छेदकतादृशप्रतियोगिताकत्वरूपं विवक्षणी

पंतयासतिधूमवान्वह्नेरित्यादौ धूमत्वादेरपि तादृशावच्छेदकत्वेन स्यात् धूमादि सामान्याभावप्रतियोगितापत्त्यापि धूमा
दिस्वरूपतयाप्रति धूमादिकं भिन्नत्वेन प्रत्येकं धूमत्वादिसमानाधिकरणाभेदप्रतियोगितावच्छेदकत्वादिति तत्तद्धूमत्वादेरे
वतत्पात्त्वादिति व्याप्तिरित्याह प्रतियोगितायाइतिस्वरूपसंबंधात्मिकायाइतिप्रतिव्यक्तिभेद प्रयोजकहेतुगर्भविशेषणांश्च
तिरिक्तपदार्थरूपप्रतियोगितायाः सिद्धांतविवृद्धत्वादितिभावः प्रतियोगितासामान्यानतिरिक्तवृत्तित्वनिवेशेतुसमानाधि
करणाभावत्वेन तादृशाभावनिवेशनएवपूर्वोक्तदोषः ननुतादृशाभावस्यप्रातिस्विकरूपेणानिवेशनेतत्तत् विशेषाभा
वप्रतियोगितात्वस्यवह्नित्वादिव्यापकतानवच्छेदकत्वादित्याशयेनाशंकतेतेनचेतितथाविधेतिप्रतियोग्यनधिकरणः हे
तुमद्वृत्तीत्यर्थः यत्किंचित्पदं तत्तद्व्यक्तित्वेनाभावविशेषणताभावप्रत्येकं निविष्टस्यापितयाविधाभावस्यसकलस्य
नैकत्रावच्छेदकत्वघटकतापिंतुएकस्यैवेति स्फोरणाय एकपदं तादृशप्रतियोगितासामान्यस्यन्यातवृत्तित्वस्यव्यापक राम०
तावच्छेदकतादृशप्रतियोगितात्वकत्वमतो न पूर्वोक्तदोषः अत एव इदृशावच्छेदकत्वस्य मूलाभिप्रेतत्वादेवमतिरिक्ते ७६

तिसामान्याभावस्यविशेषाभावकूटातिरिक्तत्वानभ्युपगमेइत्यर्थः धूमत्वादेरपीति विशिष्य विशेषाभावकूटांतर्गतैकैकाभा
वमुपादाय धूमत्वादौ निरुक्तावच्छेदकत्वोपपादनासंभवादितिभावः तत्साधनमितिसामान्याभावस्यातिरिक्तत्वंतावस्याप
नमित्यर्थः संगच्छत इतिस्वरूपसंबंधरूपावच्छेदकत्वनिवेशेविशेषाभावकूटातिरिक्तसामान्याभावानभ्युपगंतृमतेपिवि
शेषाभावप्रतियोगिताकूटस्यैवसामान्यधर्मावच्छिन्नतयाधूमत्वादावपिवह्न्यादिसमानाधिकरणधूमादिविशेषाभावप्र
तियोगिताकूटस्यैवसामान्यधर्मावच्छिन्नतयाधूमत्वादावपिवह्न्यादिसमानाधिकरणधूमादिविशेषाभावप्रतियोगि
तावच्छेदकत्वेनातिव्याप्त्यसंभवात् तथासामान्याभावपार्थक्यवादस्यापनस्यएतद्ग्रंथकृताभ्युपगमेपिउपपत्तिनापत्तेरितिभावः न
वातिरिक्तसामान्याभावाभावेउक्तरीत्यातिव्याप्तिविरहेपिएवंवह्न्यभावाद्यादावेवह्निनीलोतिवृत्तिमत्यप्रत्येकं धूमसामा
नाधिकरणानां तेषां प्रतियोगितावच्छेदकतावह्नित्वव्यक्तीनामव्याप्तिदुर्वारैवेतितत्साधनसंगच्छतेउपष्टंभात्संगतिरितिवाच्यंहेत्व
धिकरणावृत्तित्वावच्छेदेनयादृशधर्मावच्छिन्नत्वविशिष्टप्रतियोगिताकत्वंस्वतादृशत्वस्यसाध्यतावच्छेदकविशेषणतांस्वीके

स्पतादृशव्याप्तेर्वारणासंभवात् नहि धूमाधिकरणावृत्तित्वावच्छिन्नविशेषाभावे वह्नित्वावच्छिन्नप्रतियोगिताकत्वं धूम
वति वह्निर्नास्तीत्यप्रत्ययात् अपि तु यावद्विशेषाभावाधिकरणाद्धृ दवृत्तित्वावच्छिन्न एषोतिदृढमायातनुः तथाविधाभावी
यत्वं किंचिदेकधर्मावच्छिन्नप्रतियोगितासामान्यानतिरिक्तवृत्तित्वेन निवेशे पानतिरिक्तवृत्तितारूपावच्छेदकता विवक्षा
पक्षेऽपि धूमत्वादेरवच्छेदकत्वस्य सामान्याभावानतिरिक्तत्वमतेऽशक्योपपादनत्वात् हेत्वधिकरणवृत्तित्वावच्छिन्नपदधर्मा
वच्छिन्नत्वविशिष्टप्रतियोगिताकत्वं तद्धर्मावच्छिन्नप्रतियोगितासामान्यानतिरिक्तत्वविवक्षणाद्व्याप्तेरपि सुवचवारणत्वा
त् वह्नित्वस्य वह्निघटोभयत्वावच्छिन्नप्रतियोगितानतिरिक्तवृत्तित्वेऽपि तन्न्यूनवृत्तितयाऽन्यूनानतिरिक्तवृत्तित्वविवक्षा
पात् तादृशप्रतियोगितामादाय दूषणस्योद्धारः संभवतीति तार्णदहनातार्णदहनोभयत्वावच्छिन्नाभावप्रतियोगित्वानु
सरणाच्चातिप्रसंगात् धूमादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वप्रसंगात् तार्णातार्णदहनोभयत्वावच्छिन्ना तम०
भावानुसरणाप्रयोजनं स्वयमेव स्फुटपति एतेनेति तार्णातार्णदहनोभयाभावप्रतियोगितामादायातिप्रसंगतादवस्थ्य ७८

नन्वन्यूनवृत्तित्वविशेषितमनतिरिक्तवृत्तित्वमपि स्यात् एवं दर्शितोभयाभावमादाय वह्नित्वादावतिप्रसंगादेवनाना
प्रतियोगिवृत्त्येकप्रतियोगिताकारेणेति न्यासतिपत्त् किंचिदेकाभावप्रतियोगितासामान्यपर्य्याप्तेतानिवेशेऽपि धूम
त्वादेर्धूमादिसामान्याभावप्रतियोगितावच्छेदकत्वोपपादनासंभवादिति भावः उभयत्वादिरूपव्यासज्यवृत्तिधर्माव
च्छिन्नप्रतियोगितायाः प्रत्येकमपि प्रतीतेरव्यासज्यवृत्तितया स्वपर्य्याप्त्यधिकरणपर्य्याप्तत्वं प्रतियोगितायां निवेश्या
पि वह्नित्वादावतिप्रसंगवारणासंभव इति ध्येयं प्रतियोगिताधर्मिकोभयाभावघटितव्याप्तिपक्षेऽपि धूमवान् वह्नेरित्यादा
वतिव्याप्तिर्नसंभवति साध्यतावच्छेदकमेव धूमत्वादिरूपगुरुधर्मावच्छिन्नत्वस्य कुत्रापि प्रसिद्धिविरहेणातद्दूष्टितोभयाभा
वाप्रसिद्धेरिति तन्मतेमेयं वह्निमान् धूमादित्यादावव्याप्तिमाहलपुरुषेति तादृशानवच्छिन्नत्वाप्रसिद्धेरिति तादृशसाध्यता
वच्छेदकावच्छिन्नत्वाप्रसिद्धेरित्यर्थः विषयितायाश्च स्वपरत्वनियामकत्वेनाभावप्रतियोगितानवच्छेदकतया तादृशसंबं
धावच्छिन्नाभावप्रतियोगितायां तत्प्रसिद्धिरित्यस्य च कुमशाकपत्वात् स्वन्ययामेयधूमवान् वह्नेरित्यादावतिव्याप्तेरखनाद

वस्त्वादितिभावः प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्येतितथाच धूमादिसामान्याभावप्रतियोगितायाः प्रतिधू
मादिकं भिन्नभिन्नत्वेपि प्रतियोगितावच्छेदकधूमत्वादेरैक्येन स्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदक
तत्कत्वाघटक स्वव्यापकतत्कत्वरूपतदनतिरिक्तवृत्तित्वं धूमत्वादावक्षतमेवेतिभावः नच प्रतियोगितायाः प्रति
योगिस्वरूपतामतेसामान्याभावप्रतियोगितायाविशेषाभावप्रतियोगित्वात्तेनभेदः प्रतियोगिनामभेदात्तत्तथाचव
ह्निमान्धूमादित्यादावव्याप्तिर्दुर्वारा धूमसामानाधिकरणविशेषाभावप्रतियोगितायाः वह्नित्वादेरवच्छेदकत्वात्तस्य
चतदनतिरिक्तवृत्तित्वादितिवाच्यंसामान्याभावविशेषाभावयोः प्रतियोगित्वाभेदेपिसामान्याभावीयप्रतियोगितात्वे
नैवसामान्यधर्म्मावच्छेद्यत्वाद्धेतुसमानाधिकरणाभावप्रतियोगितात्वावच्छिन्नावच्छेदकानतिरिक्तवृत्तित्वविवक्षणेना
व्याप्तिनिरासात्स्वव्यापकतत्कत्वमित्यत्र स्वस्यव्याप्यतासाध्यतावच्छेदकताघटकसंबंधेन प्रतियोगितात्वेन स्व रा॰म॰
व्यापकताप्रतियोगितावच्छेदकताघटकसंबंधेनवोध्यातेनसंबंधसामान्येन धूमत्वादिकं प्रतिसमवायादिनाधूमत्वा ७८

देरव्यापकत्वेपिसमवायादिनावह्नित्वादिकं प्रतिकालिकादिसंबंधेनघटत्वादेर्व्यापकत्वेपिचनक्षतिः दंडिमान्द्रव्यत्वादित्या
दौहेतुसामानाधिकरणाभावप्रतियोगितावच्छेदकैकदंडत्वादेर्दंडान्तरसमानाधिकरणभेदप्रतियोगितावच्छेदकत्व
त्वसत्वेपितत्तद्दंडादिव्यक्तौ नतत्तद्दंडादिसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्याक्षततयासर्वत्रैवदंडादिव्यक्तौ
प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमव्याहतमेवेतिनातिव्याप्तिः दंडाद्यवच्छिन्नसाध्यकसद्धेतावीदृशरीत्याव्याप्ति
रितितुनानाशङ्कनीयं दंडादेः साध्यपरंपरासंबंधेनदंडत्वादेरेवसाध्यतावच्छेदकतायाः स्वीकृतत्वात् नन्वेवमपि हेतुसा
मानाधिकरणाभावप्रतियोगितावच्छेदकवह्निघटोभयत्वाद्यनतिरिक्तवृत्तितयावह्नित्वादेरवच्छेदकत्वं दुर्वारमेवनचोभ
यत्वादेरुभयादिपर्याप्ततयाप्रत्येकं नतदर्पंताभावः तदवच्छिन्नभेदस्यवर्तेतेस्वयमेकोनद्वाविति सर्वजनसाधारणानुभवस्य
दुरपह्नवत्वात् तादृशप्रतीतेरेकत्वादौद्वित्वाद्यवच्छेदकत्वाभावावगाहित्वोपगमेमूलावच्छिन्नेवृक्षेनकपिसंयोगीत्यादि
प्रतीतेरपिमूलादौकपिसंयोगादेरवच्छेदकत्वाभावावगाहितास्वीकारापत्तेः यदि चतत्रबाधकाभावात्स्वरूपाद्यधिकरणा

ऽऽकपिसंयोगाभावेऽपि भयस्तदा प्रसक्तौ तेपि एकत्वाद्यवच्छिन्नाधिकरणताकद्वित्वाभाववादिविषयकत्वं तु बोध्यमेव ए
कत्वावच्छिन्ने द्वित्वादिमत्ताप्रत्ययानुदयेन बाधकविरहस्य तु ... त्वात् प्रत्येकमुभयादौ द्वित्वाभाववादिसत्वेपि द्वित्वादिर्द्वि
त्वाभाववान् प्रतियोगितानवच्छेदकत्वं न द्वौ न द्वाविति प्रतीतेन नापाद्यत्वाद्द्वित्वादिसामानाधिकरण्यमात्रेण तदभावप्रत्य
यस्य चेष्टत्वात् न च भ्रमदेनान्वयितावच्छेदकावच्छेदेनाभावबोधनात् द्वित्वादिसामानाधिकरण्यमात्रावगाहित्वात्प्रत्यभाव
प्रतीतेर्द्वौ न द्वावित्याकारकताविरहात् एतदाकारकप्रतीतेरेव चानुभवविरुद्धत्वात् तथा च द्वित्वाद्यनतिरिक्तवृत्तिताक
त्वं द्वित्वादेरिति वाच्यं एवं सति द्वित्वरोऽभयवान् धूमादित्यादौ साध्यतावच्छेदकद्वित्वादेरकेतायामनुरूपपात् न त्र प्रति
योगितावच्छेदकरूपभेदेन तादृशद्वित्वादिकमुभयादावपि वर्तते तस्यावच्छेदकानतिरिक्तवृत्तित्वस्य संभावितत्वात् तस्य चोक्तरीत्या सं
भवादिति स्वव्यापकत्वनिरूपकतावच्छेदकरूपतदनतिरिक्तवृत्तित्वघटकव्यापकतायां प्रतियोगितावदधिकरणाभेदस्यानिवेशनी रा॰मे॰ ७८
यतया उभयत्वादावपि द्वित्वनिरूपिततादृशव्यापकतायां प्रतियोगितावदधिकरणाभेदस्यानिवेशे व्यक्तत्वेन तदवच्छे

दकताप्रसंगस्य दुर्वारत्वात् न हि प्रत्येकवृत्तिरुभयत्वाद्यवच्छिन्नभेदः प्रत्येकमुभयत्वाद्यनधिकरणतावत्तदवच्छिन्नभे
दप्रतियोगितावदधिकरणावृत्त्यसंभवात् तादृशकथाप्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वघटकाभवच्छेदके स्वसमा
नवृत्तिकत्वविशेषणनिवेशेति न चावद्विशेषरोभयत्वादेर्वे द्वित्वादिसमानवृत्तिकताविरहादद्वित्वादेस्तदनतिरिक्तवृत्ति
त्वविशेषणपरिभाषिकावच्छेदकतापरिष्कारेऽपि भावः व्यापकताशरीरे स्वसमानाधिकरणत्वस्य स्वाधिकरणतावच्छेदकावच्छि
न्नाधिकरणताकत्वरूपस्याभावविशेषणत्वोपगमे तु द्वित्वाद्यधिकरणस्य प्रत्येकं द्वित्वाद्यवच्छिन्नभेदाद्यधिकरणत्वेपि द्वि
त्वादेर्द्वित्वादिव्यापकत्वं भेदे प्रतियोगितावैयधिकरण्यमनिवेश्यैवोपपादयितुं शक्यमिति स्वसमानवृत्तिकत्वनिवेशन
मपुक्तेन न च व्याप्यवृत्तित्वधर्मावच्छिन्नप्रतियोगिताकभेदस्याव्याप्यवृत्तिताप्रसंगः संयोगो न द्रव्यत्वादेरित्यत्र साध्यतावच्छेदकता
यां व्यभिचारिहेतुके हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकद्रव्यत्वादिकमादाय द्रव्यत्वादिरूपसाध्यतावच्छेदके पारिभा
षिकावच्छेदकत्वे व्यापकताशरीरे प्रतियोगितावैयधिकरणस्यानिवेशे तस्यादिति वाच्यं व्याप्यवृत्तिद्रव्यत्वादिकमादाय द्रव्यत्वादेः

पारि[illegible]षिकावच्छेदकत्वासंभवेऽप्यव्यभिचारनिरूपकाधिकरणापत्तेः किंचिद्व्यक्त्यवृत्तित्वरूपहेतुसमानाधिकरणाभा
वप्रतियोगितावच्छेदकमादाय पर्वतादेः साध्यतावच्छेदकरूपतयात्वोपपादनसंभवात्तदवृत्तेः साध्येन तद्वृत्तित्वावच्छिन्नाभे
दस्यकथमप्यसंभवादिति चिन्त्यम् नन्वत्र किंभेदसमानवृत्तिकत्वं यद्धर्मन्यूनानतिरिक्तवृत्तित्वं तद्धर्मन्यूनानतिरिक्तवृत्तित्वनिवे
शनेनैव फलं [illegible] स्यान्न्यूनवृत्तिपदनातिरिक्तवृत्तित्वस्य स्वस्वाश्रितत्वात्तत्ताशोगोलाशोदहनोभयत्वादिकमादाय दहन
त्वादेरवच्छेदकतापत्तेश्च दुर्वारत्वात् एकजातीयवृत्तिकत्वमेव तत्र तच्च स्वनिष्ठव्याप्यवृत्तित्वाव्याप्यवृत्तित्वान्य
तररूपवत्त्वं वह्नित्वादौ च वह्नित्वादेर्नोक्तरूपसमानवृत्तिकत्वं वह्नित्वादेरव्याप्यवृत्तित्वादित्युच्यते तदापि वह्निधूमो
भयवान् धूमादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकवह्निधूमघटत्वाद्यन्यूनानतिरिक्तवृत्तित्वयोग्या
प्यतावच्छेदकद्वित्वादेः योरिभाषिकावच्छेदकतापत्तिर्दुर्वारैव द्वित्वत्रित्वादौ चोक्तोभयोरेव व्यासज्यवृत्तितया निरूक्तस राम० ८०
मानवृत्तिकत्वाप्यनुरूपद्वित्वादित्यतश्चाह तत्त्रित्वसमानवृत्तिकत्वं चेत्यर्थः वह्निनिष्ठयावत्त्वनाशोत्तराश्रितत्वभयत्वादि

कमादाय वह्नित्वादावतिप्रसंगाभावं स्फुटयति यावत्त्वादिकमित्यादिना दर्शितद्वित्वादिपरिग्रहः नन्वयावत्त्वपर्याप्त्यधिक
रणपर्याप्तस्वरूपवह्नित्वादिनिरूपितसमानवृत्तिकत्वस्य वह्नित्वादेः प्रत्येकवह्न्यादौ पर्याप्तत्वात्स्य चान्यथात्वादित्याशे
षः तथा च यावत्त्वादेर्धूमादिसामानाधिकरण्याभावप्रतियोगितावच्छेदकत्वेऽपि वह्नित्वाद्यन्यूनानतिरिक्तवृत्तित्वेऽपि च न क्ष
तिभावः ननु पर्याप्तिरित्याश्रयत्वमेव तथा च वह्नित्वादिसमानाधिकरणयावत्त्वादेर्वह्नित्वादिपर्याप्त्यधिकरणपर्याप्तत्वमक्षतमे
व त्वतस्त्वाह पर्याप्तिरित्येतिश्रयमेको घट इत्यनेनाव्यासज्यवृत्तिघटत्वव्यक्तित्वादीनां प्रत्येकमेव पर्याप्तिरिति दर्शितं दशमे द्वावि
तिप्रतीतिकथनेन व्यासज्यवृत्तिद्वित्वादीनां न प्रत्येकं पर्याप्तिस्तथासति अयमेको द्वावित्यादिप्रतीत्यापत्तिरिति दर्शितम् यद्यपि
समुदायपर्याप्तत्वे तदेकदेशप्रत्येकपर्याप्तत्वमनपेक्षादसमुदायस्यैकदेशानतिरिक्तत्वादिति यावत्त्वादेर्वह्नित्वादिपर्याप्त्य
धिकरणप्रत्येकवह्निपर्याप्तत्वं दुर्वारं तथापि स्वपर्याप्त्यवच्छेदकावच्छिन्नपर्याप्त्यधिकरणत्वमत्र विवक्षितमिति न दोषः व्यासज्यवृ
त्यव्यासज्यवृत्त्योः समानजातीयवृत्तिकधर्मावच्छिन्नपर्याप्त्याश्रयोरेकधर्मिणि पर्याप्त्यसत्त्वेऽप्येकधर्मावच्छिन्नेऽपर्याप्तेः अ

न्यथान्यत्रपक्षे कोवह्निरितिवदपमेकोपावानितिप्रतीत्यापत्तेर्दुर्वारत्वात् न्यथघटादित्यादौ पदिघटत्वादिसामानाधिकर
रण्यमात्रेणद्वित्वादिपर्य्याप्तिर्भासतेतदा ऽकाशावित्याद्याकारकप्रतीतेरपिप्रमात्वापत्तिवाकाशत्वादिसामानाधिकरण्य
मात्रेणान्यत्राकाशोभयत्वादिपर्य्याप्तिसत्वात् अतस्तत्रधर्म्मितावच्छेदकघटत्वाद्यवच्छिन्नपर्य्याप्तेरेवविषयत्वमं
गीकार्य्यंतथाचाव्यासज्यवृत्तेरपिद्वित्वादिपर्य्याप्त्यवच्छेदकत्वमायातमितिव्यासज्यवृत्तेरव्यासज्यवृत्तिसमानवृत्तिकत्वं
दुर्वारमेवनचानेकवृत्त्यव्यासज्यवृत्तेरपिव्यासज्यवृत्तिधर्म्मपर्य्याप्त्यवच्छेदकत्वमास्तांतादृशधर्म्मस्यचनाव्यासज्यवृत्ति प
र्य्याप्त्यवच्छेदकत्वंकिंत्वेकैकमात्रवृत्तेरेवेतिनव्यासज्याव्यासज्यवृत्त्योरेकधर्म्मावच्छिन्नपर्य्याप्तत्वप्रसंगइतिवाच्यंघटयोर्द्व
वामित्यादिप्रतीत्यातथाविधघटत्वावच्छेदेनद्वित्वादिपर्य्याप्त्यवगाहनादेकमात्रवृत्तेरेवाव्यासज्यवृत्तिपर्य्याप्त्यव
च्छेदकत्वमित्युत्पसंभवात्तत्रघटत्वादिसामानाधिकरण्यमात्रेणद्वित्वादिपर्य्याप्तिर्भासतेनतुतदवच्छेदेनेत्युक्तौ राम०
अयमेकोघटइत्यादावपिद्वित्वादौघटत्वादिपर्य्याप्त्यवच्छेदकताभानेविवादसंभवेनाव्यासज्यवृत्तिधर्म्मपर्य्याप्तेरवच्छि ८१

न्नत्वस्यैवासिद्धिप्रसंगात्सूक्ष्मत्वादिपर्य्याप्त्यवच्छेदकोऽप्रसिद्ध्यात्तत्रावच्छेदकत्वलक्षणाव्याप्तिप्रसंगात् नचस्वपर्य्याप्त्यव
च्छेदकताव्यापकपर्य्याप्त्यवच्छेदकताकत्वमेवविवक्षणीयमव्यासज्यवृत्तिपर्य्याप्त्यवच्छेदकएकमात्रवृत्तिधर्म्मव्यासज्यवृ
त्तिपर्य्याप्त्यवच्छेदकताविरहात्ततन्नतस्याव्यासज्यवृत्तिपर्य्याप्त्यवच्छेदकताव्यापकत्वमितिव्यासज्याव्यासज्यवृत्त्योर्नसमा
नवृत्तिकत्वप्रसंगइतिवाच्यंएवंसत्यनतिरिक्तवृत्तित्वानिवेशवैफल्यापत्तेः न्यूनवृत्तिमहानसीयवह्नित्वादिपर्य्याप्त्यवच्छेद
कतापावह्नित्वादिपर्य्याप्त्यवच्छेदकताव्यापकताविरहेणैवतादृशधर्म्मेषुपाकपवह्नित्वादेरवच्छेदकतापत्त्यसंभवादितिचे
न्नअनेकवृत्तिघटत्वादेर्हितत्रघटत्वादिरूपैकैकमात्रवृत्तिधर्म्मावच्छिन्नपर्य्याप्तिकूटावच्छेदकानेकवृत्तिधर्म्मावच्छिन्नपर्य्या
प्तिमाद्यव्यासज्यवृत्तेर्नोव्यासज्यवृत्तिसमानवृत्तिकतापत्तिः नचकालाकाशावित्यादिप्रतीत्याएकमात्रवृत्तिकालत्वाका
शत्वादेरपिद्वित्वादिपर्य्याप्तेरवच्छेदकत्वावगाहनादेकमात्रवृत्तिधर्म्माणामपिव्यासज्यवृत्तिधर्म्मपर्य्याप्त्यवच्छेदकतया तस्या
व्यासज्यवृत्तिधर्म्मसमानवृत्तिकत्वदुर्वारमेवेतिवाच्यंतादृशप्रतीत्यातथाविधधर्म्मद्वयाद्यव्यासज्यवृत्तेरेवद्वित्वादिपर्य्याप्ति

वच्छेदकतायाश्चावगाहनात् प्रकृते च व्यासज्यवृत्त्यवच्छेदकतायाः स्वनिवेशात् अतिप्रसंगाविरहात् अत्राहुः अव्यासज्यवृ
त्तिघटत्वादीनां पर्याप्त्याख्यसंबंधांतरे मानाभावः समवायादिसंबंधेनैवोपपत्तेः न च समवायस्यैकत्वेन पटादावपि घटत्वादि
विशिष्टबुद्धिप्रसंग इति प्रतिनियतप्रतियोगिकपर्याप्तिसंबंधस्वीकार इति वाच्यं प्रतिनियतप्रतियोगिकैकविषयसंबंधेनैवोप
पत्तेः द्वित्वसंबंधसिद्धेः कथमप्यसंभवात् एवं द्वित्वादेरपि पर्याप्तिः समवायादिरूपसंबंध एव पर्यवस्यतु न पुनः अनेकवृत्तित्व
स्यावच्छिन्नस्यैकविषयसंबंधेनैव निर्वाहात् नवा पर्याप्तिर्द्वित्वसंबंधी तिरस्ता तेरेकमात्रवृत्तित्वस्यैव छेदे नापि द्वित्वादेः संबं
धांतरस्वीकारस्यावश्यकत्वमिति वाच्यं तादृशपर्याप्तित्वं वैशिष्ट्य एकत्वसामानाधिकरण्येनानेकवृत्तित्वस्यावच्छिन्नसंबंधस्यै
वभानोपगमात् द्वित्वादिप्रकारकतत्संबंधस्य संगीकर्तुर्द्वावेतौ तत्संबंधांशे व्यक्तिनावच्छेदकावच्छिन्नत्वभाननियमात् सं राम०
बंधप्रकारकउक्तबुद्धौ धर्मितावच्छेदकसामानाधिकरण्यमात्रावगाहितासंभवादिति यथा च समवायातिरिक्तव्यासज ८२
गेकोटावंतर्भावेप्यतिप्रसंगवारणासंभवः स्वाधिकरणाभावच्छेदकावच्छिन्नाधिकरणत्वरूपस्य स्वसमानवृत्तित्वस्य लक्ष

शोनिवेशात् व्यासज्याव्यासज्यवृत्तित्वान्यतररूपेणासज्जातीयत्वरूपसमानवृत्तिकत्वस्य पेयस्य स्वपर्याप्त्यधिकरणपर्याप्त्य
त्वनिवेशनस्य प्रयोजनवत्त्वात् स्वपतित्रित्वादिकमयोरिति द्वित्वादिसमानवृत्तिके द्वित्वादिपर्याप्त्यधिकरणपर्याप्तिकत्वरूपः द्वि
त्वादिमत्त्वपविरहादिति भावः द्वित्वादिना वह्निधूमोभयत्वादिना साध्यतायां न धूमादावव्याप्तिः द्रव्यद्रव्यानीत्यादिप्रतीत्या
द्रव्यत्वाद्येकैकधर्मस्यापि द्वित्वत्रित्वादिसमानाधिकरणवृत्तित्वस्य पर्याप्त्यवच्छेदकत्वेपि तादृशधर्मस्य प्रत्येकं तत्पर्याप्त्यतिप्र
सक्तत्वेनानुगमके पदार्थं किंचिद्रूपावच्छिन्नपर्याप्तिकूटस्यैवावच्छेदकतया पूर्वविवक्षया सामंजस्यमिति ध्येयं स्वात्मकाश्रूपा
पेकोनिरस्यातिघस्कं चेति स्वरूपसंबंधविशेषवृत्तितादृशावच्छेदकतास्त्रयस्य मनियतलघुधर्मस्य नातिरिक्तवृत्तित्वमात्रायै
वकवृगीवादिमत्त्वादावच्छेदकतोपपादनसंभवादिति भावः प्रतियोगितावामिकोभयाभावघटितपक्षे गुरुधर्मावच्छि
न्नसाध्यकसद्धेतौ साध्यतावच्छेदकावच्छिन्नत्वाप्रसिद्धिनिबंधनाव्याप्तिं परिहरति एवमितियद्धर्मा न्यूनवृत्तीति दन्यनघ
त्रित्वं तत्समानाधिकरणाभेदप्रतियोगितानवच्छेदकत्वं तत्र च पूर्वोक्तास्तु तत्राभेदप्रतियोगितावैयधिकरण्यनिवेशाद्वि

घटोभयत्वादेर्वह्नित्वाद्यन्यूनवृत्तित्वमकृत्वैवेतिपदद्वयोपर्याप्त्यधिकरणपर्याप्तत्वमपिनिवेश्यम् अतो धूमादिसमानाधिक
रणाभावप्रतियोगितायांतादृशोभयत्वाद्यवच्छिन्नत्वसत्त्वेपिनक्षतिः प्रतियोगितायाःप्रतियोगिभेदेन भेदेधूमादिसामान्या
भावप्रतियोगितायांप्रत्येकेधूमत्वाद्यन्यूनवृत्तिनानिरूढादितिवाच्यम् तत्तत्प्रतियोगिवृत्तिप्रतियोगितायाएकत्वेपिवह्निघटोभ
यत्वाद्यवच्छिन्नप्रतियोगिताप्रत्येकपर्याप्त्यपांवह्नित्वादिपर्याप्त्यधिकरणपर्याप्तत्वसहितवह्नित्वाद्यन्यूनवृत्तित्वस्याभा
ह्वाप्तिरितितदन्यूनवृत्तित्वमात्रमुपेक्ष्यान्यूनवृत्तिधर्मावच्छिन्नत्वपर्यन्तस्य उभयाभावप्रतियोगितायांनिवेशः अथयत्र
दंडादिनाव्याप्तिसाध्यतावच्छेदककेव्यभिचारिविशेष्यतिव्याप्तिः निखिलानामेवदंडादिव्यक्तीनांदंडादिरूपसाध्यतावच्छे
दकसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वपाहुतुसमानाधिकरणादंडाद्यवच्छिन्नाभावप्रतियोगितायांतादृशभे
दप्रतियोगितानवच्छेदकावच्छिन्नाभावसत्त्वात्तादृशभेदप्रतियोगितावच्छेदकानवच्छेदकंयद्रूपंतद्रूपविशिष्टावच्छेदकत्वा राम०
भावनिवेशेदंडादित्रिष्वभेदप्रतियोगितावच्छेदकतानवच्छेदकदंडत्वादिविशिष्टावच्छेदकत्वस्यदंडादिसमानाधिकरणा ८३

भावप्रतियोगितायांसत्त्वेनतत्रातिव्याप्तिपरिहारेपिधूमवान्वह्नेरित्यादावतिव्याप्तिः धूमाद्यभावप्रतियोगितायांतद्यवे
नवस्थतत्स्वधूमत्वादेरवच्छेदकतयाविशेषणांतरविशिष्टधूमत्वाद्यवच्छेदकत्वाभावसत्त्वात् नचविशेषणांतरविशिष्टधू
मत्वाद्यवच्छेदकत्वाप्रसिद्धानातिव्याप्तिरितिवाच्यं घटवृत्तिजातिमत्त्वसामान्याभावप्रतियोगितायामेव प्रसिद्धेरितिचे
न्न दंडाद्यात्मकसाध्यतावच्छेदकस्यसाध्यनिष्ठभेदप्रतियोगितानवच्छेदकत्वासंभवेप्यव्यभिचारनिरूपकाधिकरणापत्तेदंम
त्वस्यावच्छेदकतथात्वाद्वच्छेदकत्वाभावस्यहेतुसमानाधिकरणाभावप्रतियोगितासामान्येसत्त्वेनदंडादिसाध्यकेऽत
तिप्रसंगात् अथवा [illegible] साध्यतावच्छेदकवनिष्ठभेदप्रतियोगितायांयादृशयादृशरूपावच्छिन्नत्वंनास्तितादृशरूपावच्छिन्नत्वा
भावस्यविवक्षितत्वात् दंडादिसाध्यकेव्यभिचारिणिदंडादिनिष्ठभेदप्रतियोगितायांतत्तद्विशिष्टदंडाद्यवच्छिन्नत्वापादं
डत्वादिविशिष्टावच्छेदकत्वाभावसत्त्वेदंडादिसामान्याभावप्रतियोगितायांतादृशाभावासत्त्वेनातिव्याप्त्यनवकाशः अव
च्छेदकतयोरेकसंबंधावच्छिन्नत्वनिवेशप्रयोजनमेदनिबंधनदोषनिवारणाय ॥ सत्तावान्जातेरित्यादौसत्तात्वादेर्हेतुसमाना

धिकरणाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वाद्यनतिरिक्तवृत्तित्वपाऽव्याप्तिरितिप्रतियोगितावच्छेदकाव्यभिचारि
त्वरूपस्य स्वव्यापकतत्त्वकत्वरूपस्य वाऽऽदनतिरिक्तवृत्तित्वस्य निवेशो न संभवतीति पक्षधर्मो विशिष्टस्य प्रतियोगितावच्छेदक
पदं किंचिद्धर्मावच्छिन्नाव्यभिचारिताप्रतियोगितावच्छेदकपदं किंचिद्धर्मावच्छिन्नस्यवायद्रूपविशिष्टव्यापकतातद्रूपवत्त्वं
प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव निवेशनीयं तावतैव च वह्निघटोभयत्वादिरूपप्रतियोगितावच्छेदकमादाय वह्नि
त्वादेः पारिभाषिकावच्छेदकत्वनिरासः संभवतीति वह्नित्वादिविशिष्टस्य तादृशोभयत्वाद्यवच्छिन्नव्यभिचारित्वात् तादृशो
भयत्वादेर्वह्नित्वादिविशिष्टव्यापकतानवच्छेदकत्वाच्चेति प्रतियोगितावच्छेदके स्वसमानवृत्तिकत्वविशेषणं विनैव वृत्तिवि
रहः एवं पक्षधर्मान्यूनवृत्तिधर्मावच्छिन्नत्वाभावस्य प्रतियोगिताधर्मिकव्याप्तिघटकतापक्षेऽपि तदन्यूनवृत्तित्वं यदि
तद्व्यापकत्वं तदा सत्ताव्यापकविशिष्टसत्तात्वावच्छिन्नत्वस्य हेतुसमानाधिकरणाभावप्रतियोगितायां सत्त्वादुक्तस्थले राम०
एवाव्याप्तिरिति तद्विशिष्टव्यापकतावच्छेदकत्वरूपं तदन्यूनवृत्तित्वमेव निवेशनीयं तावतैव च वह्निघटोभयत्वादेर्वह्नित्वादिवि ८४

शिष्टव्यापकतानवच्छेदकतया हेतुमादिसमानाधिकरणाभावप्रतियोगितायां तादृशोभयत्वाद्यवच्छिन्नत्वसत्त्वेऽप्यव्याप्त्यन
वकाशे पक्षधर्मान्यूनवृत्तिधर्मे पक्षधर्मसमानवृत्तिकत्वविशेषणाप्रक्षेपमतेऽरोचकसामंजस्यमित्याशयेनाह वस्तुतस्त्वित्या
दि तदवच्छिन्नेति तत्पदमनतिरिक्तवृत्तित्वप्रतियोगिभूतहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वा
द्यनतिरिक्तवृत्तित्वपाऽव्याप्तिरितिप्रतियोगितावच्छेदकाव्यभिचारित्वरूपस्य स्वव्यापकतत्त्वकत्वरूपस्य वाऽऽदनतिरिक्तवृ
त्तित्वस्य निवेशो न संभवतीति पक्षधर्मो विशिष्टस्य प्रतियोगितावच्छेदकपदं किंचिद्धर्मावच्छिन्नाव्यभिचारिताप्रतियोगिता
वच्छेदकपदं किंचिद्धर्मावच्छिन्नस्यवायद्रूपविशिष्टव्यापकतातद्रूपवत्त्वं प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव नि
वेशनीयं तावतैव च वह्निघटोभयत्वादिरूपप्रतियोगितावच्छेदकमादाय वह्नित्वादेः पारिभाषिकावच्छेदकत्वनिरासः सं
भवतीति वह्नित्वादिविशिष्टस्य तादृशोभयत्वाद्यवच्छिन्नव्यभिचारित्वात् तादृशोभयत्वादेर्वह्नित्वादिविशिष्टव्यापकतान
वच्छेदकत्वाच्चेति प्रतियोगितावच्छेदके स्वसमानवृत्तिकत्वविशेषणं विनैव वृत्तिविरहः एवं पक्षधर्मान्यूनवृत्तिधर्मावच्छि

न्नत्वाभावस्यप्रतियोगितावच्छिन्नकव्याप्तिघटकतापन्नेऽपितदन्यूनवृत्तित्वंपदितद्व्यापकत्वंतदासत्तात्वव्यापकविशिष्ट
सत्तात्वावच्छिन्नत्वस्यहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वादुक्तस्थलेसत्त्वाव्याप्तिरितितद्विशिष्टव्यापकतावच्छेद
कत्वरूपतदन्यूनवृत्तित्वमेवनिवेश्यंतावतैवचवह्निमान्धूमवत्त्वादेर्वह्नित्वादिविशिष्टव्यापकतानवच्छेदकतयाधूमादिस
मानाधिकरणाभावप्रतियोगितायांत्वदृष्टाभावमत्वाद्यवच्छिन्नत्वसत्त्वेऽप्यव्याप्त्यनवकाशेयद्धर्मान्यूनवृत्तिधर्म्मेयद्धर्म
समानवृत्तिकत्वविशेषणप्रकृतेयमंतरेणैवसामंजस्यमित्याप्येनाहवस्तुतस्तुत्वादितदवच्छिन्नेतिततयदमनति
रिक्तवृत्तित्वप्रतियोगिभूतहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतापर्य्याप्त्यधिकरणपरंस्वपदमनतिरिक्त
वृत्तित्वेनाभिमतपरधूमत्वाद्यवच्छिन्नाभाववत्तिनिपधूमत्वादिविशिष्टस्यासंबंधितयानेपधूमत्वादेरवच्छेदकतानिर्वा
हःधूमत्वाद्यात्मकमहानसीयधूमाद्यभाववतिधूमत्वादिविशिष्टस्यसंबंधितयाधूमत्वादेरवच्छेदकत्वानुपपत्त्यातद्धूम
त्वादिरूपावच्छेदकभेदसाध्यातिव्याप्तिरितितदात्मकप्रतियोगिताकत्वंपरित्यज्यतदवच्छिन्नप्रतियोगिताकत्वमेवे राम० ८५

विशेषणंउपत्तिर्द्रव्यत्वसमानाधिकरणाभावप्रतियोगितायां यस्येनसंबंधेनावच्छेदकतातेनसंबंधेनतदवच्छिन्नत्वंनि
वेशनीयंतेननविशेषितयाधूमत्वाद्यवच्छिन्नस्यज्ञानादेरभाववतिधूमत्वादिविशिष्टधूमादेःसंबंधित्वेनधूमत्वादेरव
च्छेदकत्वानुपपत्तिःउत्पत्तिकालावच्छेदेनधूमत्वाद्यवच्छिन्नाभाववतिधूमत्वादिविशिष्टस्यसंयोगरूपसाध्यतावच्छे
दकसंबंधेनसंबंधितयातादृशंस्वेनधूमत्वादिकमितिसंयोगेनधूमादिसाध्यकेव्यभिमादिसाधकेव्यभिचारिणापत्तिप्रसं
गस्यवारणायप्रतियोगिवैयधिकरण्यमभावेविशेषणंदेयंधूमाद्यभावस्यापिद्रव्यादौप्रतियोगिव्यधिकरणतयाप्रतियो
गिवैयधिकरण्यविशिष्टाभावाधिकरणासंबंधित्वंविवक्षणीयंद्रव्यंगुणादित्यादौहेतुसमानाधिकरणाभावप्रतियो
गितावच्छेदकपृथिवीत्वविशिष्टद्रव्यत्वत्वावच्छिन्नाभावप्रतियोग्यनधिकरणगुणादौद्रव्यत्वत्वादिविशिष्टस्यासंबंधित
याद्रव्यत्वत्वादेरवच्छेदकत्वापत्तिरितिप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यमेवप्रवेश्यंतद्धर्म्मस्यतद्धर्म्मावच्छि
न्नाभावप्रतियोगितावच्छेदकत्वेनोपादानंशिरोवेष्टनेननासिकास्पर्शमनुकरोतिइतितद्धर्म्मावच्छिन्नवैयधिकरण्यदि

शिष्टत्वमेव निवेशनीयं तद्धर्म्मावच्छिन्नानधिकरणसंबंधित्वविशिष्टसामान्यकत्वं फलितार्थः तद्धर्म्मावच्छिन्नानधिक
रणत्वं साध्यतावच्छेदकसंबंधेन तत्संबंधित्वं तेन गुणवान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणसमवायसंबंधावच्छिन्ना
भावप्रतियोगितावच्छेदकगुणविषयकज्ञानत्वावच्छिन्नस्यापि विषयतया द्रव्यादिसंबद्धस्य संबंधसामान्येनानधिकरणे
नित्यगुणादौ गुणत्वादिविशिष्टस्यासमवेतत्वेपि न गुणत्वादेरवच्छेदकत्वप्रसंगः एवं च महाकालो घटवान् कालप
रिमाणादित्यादौ उभयाभावघटितप्रतियोगिवैयधिकरण्यव्याप्तिहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकगगनत्वादि
विशिष्टस्य साध्यतावच्छेदकसंबंधेन संबंधिनोऽप्रसिद्ध्याऽव्याप्तिर्वारणाय साध्यतावच्छेदकसंबंधसामान्येन तदवच्छिन्न
प्रतियोगिकत्वपदं विकरणानुयोगिकत्वोभयाभावस्तन्नदधिकरणसंबंधत्वविशिष्टसामान्यकत्वं विवक्षणीयं तादृ
शं च स्वं तत्र गगनत्वादिकमेव प्रसिद्धमिति नाव्याप्तिः तदसंबंधित्वं च तदनुयोगिकसाध्यतावच्छेदकसंबंधप्रतियो राम०
गित्वं तेन संयोगादिसंबंधेन घटत्वावच्छिन्नाभाववति ज्ञाने कपालादौ विषयितया समवायादिना घटत्वादिविशिष्टस्य ८६

संबंधित्वेपि वह्निमान् धूमादित्यादौ नावच्छेदकाप्रसिद्धिः तादात्म्येन साध्यतायां साध्यतावच्छेदकसंबंधेन वृत्तेरप्रसिद्ध्याऽ
व्याप्तिः स्यादित्यवह्नित्वमुपेक्ष्य असंबद्धत्वानुधावनं विशिष्टसत्तावान् जातेरित्यादौ हेतुसमानाधिकरणाभावप्रति
योगितावच्छेदकावच्छिन्नाभाववति गुणादौ विशिष्टसत्तात्वाघटकपसत्तादेः संबंधितया विशिष्टसत्तात्वादेरवच्छेदकत्वा
नुपपत्तिरिति स्वाश्रयेऽसंबंधित्वमनिवेश्य स्वविशिष्टतन्निवेशनं यद्यपि विशेष्यस्य तत्संबंधित्वे विशिष्टेतदसंबंधित्वं
दुर्घटं तथापि स्वविशिष्टप्रतियोगिकत्वाभाववत्तदवच्छिन्नाभाववदनुयोगिकसाध्यतावच्छेदकसंबंधसामान्यकत्वस्य
तदवच्छिन्नाभाववदनुयोगिकसाध्यतावच्छेदकसंबंधप्रतियोगितावच्छेदकताया व्याप्याधिकरणावच्छेप्रविषयतापर्य्या
प्ताधिकरणत्वस्य वा विवक्षणीयतया न दोषः स्वविशिष्टप्रतियोगिकत्वान्निचविशिष्यणादापतदभावकूटं निवेशनी
यं तेन मपधूमत्वादिविशिष्टप्रतियोगिकत्वत्वावच्छिन्नाभावस्य गुरुधर्म्मस्याभावप्रतियोगितानवच्छेदकतामतेऽ
प्रसिद्धावपि न क्षतिः वस्तुतो मपधूमत्वादिविशिष्टप्रतियोगिकत्वाभावस्य शुद्धधूमत्वादिप्रकारकज्ञानेनिष्ठवि

षयितासंबंधसाधारणत्वाद्धूमत्वादिविशिष्टप्रतियोगित्वावरूपलघुधर्म्मस्य तत्प्रतियोगितावच्छेदकत्वसंभवइति
नमेयधूमत्वविशिष्टप्रतियोगिकत्वत्वावच्छिन्नाभावाप्रसिद्धिरिति सामान्यतएकाभावनिवेशेपि संभवतीतिध्येयं
येनरूपेणायस्ययद्वह्निसंबंधितातद्रूपावच्छिन्नतत्तत्संबंधिताभाववत्त्वमप्युपेत्यवा एतद्दूषणं द्वितीयपल
क्षांचतदन्यपुरुषेणधूमादिसमानाधिकरणाभावप्रतियोगितावच्छेदकमहानसीयवह्नित्वाद्यवच्छिन्नाभाववतिव
ह्नित्वादिविशिष्टमहानसीयवह्न्यादेरसंबंधितयावह्नित्वादावतिप्रसंगवारणायसामान्यपदंन्यथसाध्यतावच्छेदक
संयोगादिसंबंधेनघटत्वाद्यवच्छिन्नघटाभाववतिकालिकादिसंबंधेनघटत्वादिविशिष्टस्यपरादेःसंयोगादिसंबंधे
नसंबंधत्वादवच्छेदकाप्रसिद्धिः साध्यतावच्छेदकताघटकसंबंधेनस्ववैशिष्ट्यनिवेशेपिकालिकादिसंबंधेनघटत्वा
दिविशिष्टस्यकालिकसंबंधेनसाध्यतायांमहाकालपरिमाणादिहेतुकेऽवच्छेदकाप्रसिद्धिर्दुर्वारैवगगनत्वा राम० ८७
द्यवच्छिन्नाभाववतिकालिकादिसंबंधेनगगनत्वादिविशिष्टस्यस्पंदादेःकालिकसंबंधेनसंबंधित्वात्प्रतियोगि

तावच्छेदकताघटकसंबंधेनवैशिष्ट्यनिवेशोघटत्वादिप्रमानियतासमवेतगुरुधर्म्मस्य [illegible] स्वरूपसंबंधेनसाध्यताव
च्छेदकतानंगत्वात्तद्धर्म्मस्यघटत्वादिकमादायावच्छेदकत्वानुपपत्तिर्घटत्वादेः [illegible] प्रतियोगि
तावच्छेदकतासंबंधेनघटत्वधर्मविशिष्टाप्रसिद्धेरितिनेयमपि किंचित्संबंधेनवैशिष्ट्यस्याभावेऽसंबंधितानिवे
शेनसाध्यतुल्यसात्मकवैशिष्ट्यवह्निमान्धूमादित्यादौहेतुसामानाधिकरणाभावप्रतियोगितावच्छेदकघटत्वाद्यवच्छिन्ना
भावेवृत्तिमद्विषयितासंबंधेनवह्निविशिष्टस्यसाध्यतावच्छेदकसंयोगेनासंबंधितयावह्नित्वादिगुरुत्वानन्तुद्व्यत्वा
दिस्यादौचहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकस्वविषयकत्वाद्यवच्छिन्नाभाववतिघटादौविषयितया
गुरुत्वादिविशिष्टस्यसमवायेनासंयुक्तत्वाद्यवच्छिन्नाभाववतिघटादौ) त्वापत्त्याऽव्या
प्तिरितिवाच्यंसाध्यतावच्छेदकेनाटशपारिभाषिकावच्छेदकतामूलत्वमनिवेश्यसाध्यतावच्छेदकताघटकसंबंधेनसा
ध्यतावच्छेदकावच्छिन्नोनिरूपिताधिकरणतावृत्तिसाध्यसामानाधिकरण्यघटकेपारिभाषिकावच्छेदकताघटकसंबंधे

नताहृशावच्छेदकावच्छिन्नानिरूपितत्वस्यनिवेशनीयतया विषयितया वह्नित्वादेरवच्छेदकत्वेपिसमवायरूपसाध्य
तावच्छेदकताघटकसंबंधेनवह्नित्वावच्छिन्ननिरूपितताया अधिकरणतायाविषयितासंबंधेनवह्नित्वावच्छिन्नवि
रूपितत्वाभावसत्वेनलक्षणासमन्वयात् गुरुधर्म्मस्यापिधर्म्मीतिवत्तिनाधिकरणतानिरूपकतावच्छेदकत्वोपगमात्
गुरुधर्म्मावच्छिन्नसाध्यकस्थलेसाध्यतावच्छेदकावच्छिन्नाधिकरणत्वाप्रसिद्धिः अत्र यत्राऽवच्छेदकताघटकसंबंधे
नावच्छेदकविशिष्टाहृत्तिविषयतावत्त्वंसाध्यतावच्छेदकतावच्छेदकसंबंधेनसाध्यतावच्छेदकविशिष्टविशेषणताभंगी
कार्य्येसमवायेनवह्नित्वादिविशिष्टनिष्ठापाविषयतात्वस्याःसंबंधात्तरेणवह्नित्वादिविशिष्टनिष्ठविषयतान्यतया
आश्रयकाशःस्वरूपसंबंधरूपावच्छेदकताप्रवेशमतेपिदूषणीरितिरारदर्शयावह्नित्वादिधर्म्मिकानवच्छेदकत्व
ग्रहस्यवह्नित्वाद्यवच्छिन्नविधेयकानुमितिहेतुत्वेसाध्यतावच्छेदकतयावह्नित्वादिविषयताया हेतुतावच्छेदककौ राम० ८८
रोनिवेशात्गौरवस्यवह्नित्वाद्यनुपस्थितिदशायामवह्नित्वानिष्ठाधाकारकानुमित्यनुपपत्तेस्फुटत्वात् अत्र

चपत्वकिंचिद्धर्म्मावच्छिन्नाधिकरणतासंबंधित्वविशिष्टसामान्यकत्वस्यलघोरवच्छेदकतायांतत्संभवेहेतुसमानाधिकरणाभावप्रति
योगितावच्छेदकपत्वकिंचिद्धर्म्मावच्छिन्नाभाववदसंबंधित्वविशिष्टसामान्यकत्वस्यगुरुतरस्यनिवेशनंमूलोपात्तप्रतियो
गितांतस्यपर्याप्तत्वेकात्वावबोधेनअन्यथाऽवच्छेदकतासमुदायस्यपरिभाषिकेकपदत्वापत्तेः पर्याप्तिरूक्तावच्छेद
कतानिवेशन्यवच्छेदकपदस्यैवावच्छेदकावच्छिन्नाभाववदसंबंधत्वविशिष्टसामान्यकत्वपारिभाषिकत्वात् अत्र च जा
तिमानमेयत्वादित्यादौजातित्वादेरवच्छेदकत्वानुपपत्तिः हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकीभूतयद्धर्म्मा
वच्छिन्नाभाववत्तिसाध्यतावच्छेदकसमवायसंबंधेनसंबंधित्वप्रसिद्धिस्तद्धर्म्मावच्छिन्नाभाववत्तिजातित्वादिविशिष्टस्या
पिसमवेतत्वात् जातित्वाद्यवच्छिन्नाभाववत्तिचसमवेतत्वस्यैवाप्रसिद्ध्यातदभाववदसमवेतत्वस्यजातित्वविशिष्टादौहुरु
पपादत्वात् सर्वपर्याप्तत्वविशिष्टसत्तावान् जातेरित्यादौविशिष्टसत्तात्वादेरप्यवच्छेदकत्वानुपपत्तिः विवक्षितंतुसत्ता
वान्जातेरित्यादौसत्तात्वादेरप्यनवच्छेदकत्वानुपपत्तिः अतोऽन्यथाऽत्र नातिरिक्तवृत्तित्वंनिविष्टंकिंस्वविशिष्टेतिहेतुसा

मानाधिकरणाभावप्रतियोगितावच्छेदकमुद्धूमत्वादेर्मेयधूमत्वादिविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत
याक्षेपधूमत्वादेरवच्छेदकत्वोपपत्तिः जातिमान् मेयत्वादित्यादौ मेयत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकतातित्वादे
र्जातित्वादिविशिष्टसमवायिनिष्ठाभावप्रतियोगितानवच्छेदकतयातस्यतयात्वोमयत्वेर्नविशिष्टसत्तावान् जातिरित्यादौ द्रव्यत्व
जातित्वादिविशिष्टसंबंधिद्दिनिष्ठाभावप्रतियोगितावच्छेदकत्वेपि विशिष्टसत्तात्वादिविशिष्टसंबंधिद्दिनिष्ठाभाव
त्वविशिष्टसत्तात्वाश्रयसंबंधिगुणादिनिष्ठाभावप्रतियोगितावच्छेदकत्वेपि विशिष्टसत्तात्वादेरवच्छेदकतानिर्वाहः संबंधित्वं साध्यतावच्छेदकसंबंधेन बोध्यं तेन घटत्वादेर्वि
प्रतियोगितानवच्छेदकत्वाद्विशिष्टसत्तात्वादेरवच्छेदकतानिर्वाहः संबंधित्वं साध्यतावच्छेदकसंबंधेन बोध्यं तेन घटत्वादेर्वि
षयितादिसंबंधेन घटत्वादिविशिष्टसंबंधिज्ञानादिनिष्ठाभावप्रतियोगितावच्छेदकत्वेपि नावच्छेदकाप्रसिद्धिः न्यूनत्वे च महा
कालोघटवान् कालपरिमाणादित्यादाववच्छेदकाप्रसिद्धिः साध्यतावच्छेदकसंबंधेन गगनत्वादिविशिष्टसंबंधिनोऽप्रसि राम०
द्ध्या स्वपदेन गगनत्वाद्युपादानासंभवात् न च संबंधसामान्येन स्वविशिष्टसंबंधिनिष्ठः संबंधसामान्येन प्रतियोगिव्यधिकर ८९
णाभावो निवेश्यः विषयितया गगनत्वविशिष्टसंबंधिनि तद्विषयकज्ञानादौ संबंधसामान्येन प्रतियोगिव्यधिकरणस्य ताह

शज्ञानासमानकालिकत्वघटघटाभावादेः प्रतियोगितायां गगनत्वादेरनवच्छेदकत्वात् उक्तस्थले गगनत्वादिकमेवावच्छेद
कं प्रसिद्धमिति तादृशज्ञानादौ कालिकसंबंधेन गगनादेरभावसत्त्वेपि तस्य विषयितासंबंधेनैव प्रतियोगिसमानाधिकरणा
तया संबंधसामान्येन प्रतियोगिव्यधिकरणत्वाभावादिति वाच्यं वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणाभावप्रतियो
गितावच्छेदकज्ञानत्वादेर्वह्नित्वादिविशिष्टसंबंधिनिष्ठस्य संबंधसामान्येन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगिताव
च्छेदकत्वापत्तेः वह्नित्वादेरवच्छेदकत्वापातात् ज्ञानत्वावच्छिन्नाभावस्य विषयितासंबंधेन प्रतियोगिसमानाधिकरणतया
ल्लक्षणघटकत्वात् न च तादात्म्यसंबंधेन स्वविशिष्टसंबंधिनिष्ठभेदप्रतियोगितानवच्छेदकत्वं विवक्षणीयं कालो घटवान् का
लपरिमाणादित्यादौ गगनत्वादेर्गगनत्वादिविशिष्टाभिन्ननिष्ठभेदप्रतियोगितानवच्छेदकत्वादेव गगनत्वादिकमवच्छे
दकमिति वाच्यं सत्तावान् जातेरित्यादौ तादात्म्येन सत्तात्वविशिष्टसंबंधिनि सत्तादौ वर्तते यो भेदस्तत्प्रतियोगितानवच्छेदकत्व
स्य विशिष्टसत्तात्वादौ सत्त्वेन सत्तादेरवच्छेदकत्वापातात् तादात्म्यसाध्यतावच्छेदकान्यतरसंबंधेन स्वविशिष्टसंबंधिनिष्ठस्य भे

नसंबंधेनप्रतियोगिव्यधिकरणाभावस्यनिवेशेविघटत्वाभाववान्घटत्वात्वादित्यादौहेतुसमानाधिकरणाभावप्रतियो
गितावच्छेदकघटत्वाभावान्यवृत्तित्वविशिष्टघटत्वाभावत्वादेर्घटत्वाभावत्वादिविशिष्टसंबंधिनिष्ठस्यान्यतरसंबंधेनप्रतियो
गिव्यधिकरणाभावस्यप्रतियोगितानवच्छेदकत्वादव्याप्त्यापत्तेः घटत्वाभावत्वादिविशिष्टसंबंधिनिघटादौघटत्वाभावान्य
वृत्तित्वविशिष्टघटत्वाभावत्वाद्यवच्छिन्नस्यसाध्यतावच्छेदकसंबंधेनसत्वात्घटत्वाभावेचतदवच्छिन्नस्यतादात्म्यसंबंधेनस
त्वात्तन्निष्ठतदभावस्यान्यतरसंबंधेनप्रतियोगिसमानाधिकरणत्वात्एतेनपरत्किंचित्संबंधेनस्वविशिष्टसंबंधिनिष्ठ
पस्तेनसंबंधेनप्रतियोगिव्यधिकरणाभावस्तत्प्रतियोगितानवच्छेदकत्वविवक्षापिनिरस्तातादात्म्यसंबंधेनसत्त्वाद्य
वच्छिन्नंप्रतितत्संबंधेनविशिष्टसत्तात्वाद्यवच्छिन्नस्यव्यापकतयोक्तस्थलेसत्तात्वादेरवच्छेदकतापत्तेर्गुरुत्वात्कालिकसं
बंधेनवह्नित्वाद्यवच्छिन्नंप्रतितेनसंबंधेनघटत्वाद्यवच्छिन्नस्यव्यापकतयावह्निमान्धूमादित्यादौवह्नित्वादेरवच्छेदकत्वा रा०म० ९०
पाताच्चनचयेनयेनसंबंधेनयोपःस्वविशिष्टसंबंधितेनतेनसंबंधेनप्रतियोगिव्यधिकरणोपस्तन्निष्ठाभावस्तत्प्रतियो

गितानवच्छेदकत्वंविवक्षणीयंसंयोगसमवायादिनावह्नित्वसत्तात्वाद्यवच्छिन्नंप्रतितेनतेनसंबंधेनघटत्वविशिष्टसत्तात्वाद्य
वच्छिन्नस्याव्यापकतयाचनोक्तदोषइतिवाच्यंएवंसतिविषयितासंबंधेनकंबुग्रीवादिमत्त्वादिविशिष्टसंबंधिनितेनरूपेणघ
टाद्यवगाहिनिघटत्वाद्यप्रकारकज्ञानादौतेनसंबंधेनप्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणस्यघटत्वादिविशिष्टाभा
वस्यसत्त्वेनघटत्वादिकमादायकंबुग्रीवादिमत्त्वादेरवच्छेदकत्वनिर्वाहासंभवात्नचहेतुसमानाधिकरणाभावोपपत्
संबंधावच्छिन्नप्रतियोगितायांपदवच्छेदकंतेनसंबंधेनस्वविशिष्टसंबंधिनिष्ठत्वसंबंधावच्छिन्नप्रतियोगिताकस्यसाध्य
तावच्छेदकसंबंधेनप्रतियोगिव्यधिकरणाभावस्यप्रतियोगितानवच्छेदकत्वंतस्यवाच्यंघटवान्कालपरिमाणादित्यादौ
तादात्म्यविषयितान्यतारूपसंबंधमादायगगनत्वादेरवच्छेदकत्वसंगमनीयंविशिष्टसत्तात्वादेर्गुणादिनिष्ठाभेदप्रतियो
गितायांगौरवेणनावच्छेदकत्वमपितुसत्तात्वादेरेवेतिहेतुसमानाधिकरणतादृशभेदस्यसाध्यतावच्छेदकसंबंधेनप्रतियो
गिसमानाधिकरणत्वात्तदुपादानासंभवात्सत्तावान्ज्ञातेरित्यादौपरसंबंधेनसनेवतादात्म्यसंबंधमुपादायसत्तात्वादेनी

वच्छेदकत्वाप्रसंगः वह्निमान् धूमादित्यादौ साध्यतावच्छेदकसंबंधावच्छिन्नकोभयाभावघटितप्रतियोगिवैयधिकरण्यघटा
लिन्यत्वघटितकालावच्छेदेन धूमाधिकरणवृत्तिसमवायसंबंधावच्छिन्नकोभयाभाव) वच्छिन्नाभावस्यप्रतियोगितावच्छेदकरूप
त्वादिकं वह्नित्वादिविशिष्टसमवायिनिष्ठस्य समवायेन प्रतियोग्यधिकरणाभावस्य प्रतियोगितानवच्छेदकमतो वह्नि
त्वादेरवच्छेदकत्वापत्तिरिति प्रतियोगितावच्छेदकसंबंधं परित्यज्य साध्यतावच्छेदकसंबंधः प्रतियोगिवैयधिकरण्यप्रवेशे
विवेशितः तथाच संयोगसंबंधावच्छिन्नकोभयाभावघटितप्रतियोगिवैयधिकरण्यघटकालीनोरूपत्वाद्यवच्छिन्नाभावस्य वह्नि
त्वादिविशिष्टसंबंधिनि सत्तान्नदोषः इति वाच्यं वह्न्यधिकरणत्वादेर्यत्र संयोगेन साध्यतावच्छेदकतात्तत्र तदवच्छिन्नसम
वायिनितेनतः धूमसायोगे समवायसंबंधावच्छिन्नरूपत्वाद्यवच्छिन्नाभावासत्त्वेन तत्संबंधावच्छिन्नाभावप्रतियोगितानवच्छेद
कत्वस्य कालविशेषावच्छेदेन हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकरूपत्वादौ सत्त्वेन साध्यतावच्छेदकस्यावच्छेदके राम०
ताप्रसंगात् यत्तु स्वविशिष्टप्रतियोगिकत्वेन तदवच्छिन्नाभाववदनुयोगिकत्वोभयाभाववत्साध्यतावच्छेदकसंबंधसामान्यके ९१

त्वस्य विवक्षणीयत्वान्न कश्चिद्दोषः जातिमान् प्रमेयत्वादित्यादौ जातित्वाद्यवच्छिन्नाभाववत्समवेतत्वाप्रसिद्धावपि जातित्वा
दिविशिष्टप्रतियोगिकत्वतादृशाभाववदनुयोगिकत्वोभयाभावस्य समवायसंबंधसामान्ये सत्त्वेन जातित्वादेरवच्छेदकत्वो
पपत्तिः कालो घटवान् कालपरिमाणादित्यादौ कालिकसंबंधेन गगनत्वविशिष्टसंबंध्यप्रसिद्धावपि तादृशसंबंधसामा
न्ये गगनत्वादिविशिष्टप्रतियोगिकत्वतदवच्छिन्नाभाववदनुयोगिकत्वोभयाभावसत्त्वे गगनत्वादेरवच्छेदकत्वानिर्वाह
इति तन्मतावलंबप्रथमलक्षणस्यैव परिष्कारेण द्वितीयलक्षणानुसरणाय्यत्नेः साध्यवदिति साध्यतावच्छेदकसंबंधेनय
दवच्छेदकविशिष्टसंबंधिनोऽप्रसिद्धिः यत्र तदवच्छिन्नाभाववत्संबंधस्वविशिष्टसामान्यकत्वेव तत्र तदवच्छेदकत्वे तेन घ
टवान् कालपरिमाणादित्यादौ गगनत्वादेरवच्छेदकत्वाप्रसिद्धिः यदवच्छेदकविशिष्टतदवच्छिन्नाभाववति साध्यतावच्छेदकसं
बंधेन संबंधित्वाप्रसिद्धा तदभावो दुर्निरूपस्तन्नावच्छेदकत्वं स्वविशिष्टत्वादिरूपं तेन जातिमान् प्रमेयत्वादित्यादौ जातित्वादे
रवच्छेदकत्वोपपत्तिः सर्वत्रैव साध्यतावच्छेदकविधावच्छेदकत्वस्य हेतुवृत्तित्वेपि न क्षतिः वारश्चव्यवच्छित्तविकल्पायेकदनित्तत्रेदं

विंशविद्दहस्यावच्छेदकत्वयोरभावद्वयविषयकज्ञानमनुमितिहेतुः प्रत्येकाभावज्ञानस्य वा वैकल्पिकीकारणता त्वव्याधिका
लोघटवान् कालत्वपरिमाणादित्यादौ तन्मते विनाऽनुमित्यनुपपत्तिः द्वितीयस्यावच्छेदकत्वस्याप्रसिद्धेः द्वितीयेजातिमात्रभे
यत्वादित्यादौ प्रथमनिरूपकावच्छेदकत्वाभावस्य ज्ञातित्वेऽबाधितत्वात्तज्ज्ञानाद्भमेविनैवानुमित्यापत्तिः न च साध्यसाधन
भेदेन कार्यकारणभावभेदस्यावश्यकत्वात् कालिकसंबंधेन घटादिसाध्यककालपरिमाणादिहेतुकानुमितौ प्रथमनिरू
कावच्छेदकत्वाभावज्ञानस्यैवमन्यत्वादिलिंगकज्ञात्याद्यनुमितौ चरमनिरूपकावच्छेदकत्वाभावज्ञानस्यैव हेतुतास्वीकार
त्तौ कहस्यापि द्वयावकाशप्रदानाच्च साध्यसाधनभेदेनानुमितिव्याप्तिज्ञानयोः कार्यकारणभावभेदेपि एकसाध्यसाधनक
स्थलेपादृशज्ञानादनुमितिस्तादृशज्ञानमत्वेऽन्यत्रानुमित्यनुत्पादस्यानानुभाविकत्वात्प्रथमनिरूपकावच्छेदकत्वाभाव राम०
ज्ञानात्कालोघटवान्कालपरिमाणादित्यत्रानुमितिस्वीकारे तादृशज्ञानान्मेयत्वादिलिंगकज्ञात्याद्यनुमितेरप्यवश्यं ९२
स्वीकरणीयतापातात् अन्यथाऽसंग्रहात्तदनुमितावतिव्याप्तिवारणार्थीयो न प्रतियोगितावच्छेदकावच्छिन्नत्वाघटितविषयक

तज्ज्ञानस्यैवलाघवेन हेतुतापत्तिः मेयत्वादिलिंगकज्ञात्याद्यनुमितौ चरमनिरूपकावच्छेदकत्वाभावज्ञानादेरेव हेतुत्वे सम
वेतमात्रेभवत्सकलहेतुमति समवेतमितिभ्रमदशायामनुमित्युपपादनासंभवाच्च तदानीं समवेतवृत्तितयाग्रहीतघटत्वा
दिविशिष्टव्यापकतावच्छेदकहेतुव्यापकतावच्छेदकत्वग्रहादसमवेतवृत्तितयाग्रहीतगगनत्वादिविशिष्टस्यच समवायेन सं
बंधितायाअग्रहात्स्वविशिष्टेत्यादिरूपावच्छेदकत्वस्य कस्यचिदपिग्रहीतुमशक्यत्वात् वृत्तिमन्मात्रं भवन्महाकालेकालिकं
संबंधेनवर्तते इतिनिश्चयदशायां महाकालत्वादिहेतुकघटाद्यनुमितेरिव तदानीं मेयत्वादिलिंगकज्ञात्याद्यनुमितेर्दुरुपपा
दत्वात् इदमत्रतत्त्वं यद्रूपावच्छिन्नस्य येन संबंधेन संबंधिनिवर्तमानस्य तेन संबंधेन प्रतियोगिव्यधिकरणाभावस्य प्र
तियोगितानवच्छेदकं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेन संबंधेन तद्रूपावच्छिन्नविशिष्टत्वं तद्विषयता
वान्यः साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकावच्छिन्नविशिष्टः तद्वृत्तित्वं व्याप्तिः धूमवान् वह्नेरित्यादौ हेतुसामानाधि
करणाभावप्रतियोगितावच्छेदकं धूमत्वादिकं संयोगादिसंबंधेन धूमत्वावच्छिन्नसंबंधिनि वृत्तित्ते वा तेन प्रतियोगि

व्यधिकरणाभावस्यप्रतियोगितानवच्छेदकंसाध्यतावच्छेदकीभूततादृशसंबंधेनधूमत्वाद्यवच्छिन्नविशिष्टनिष्ठवि
षयताचनतेनसंबंधेनधूमत्वाद्यात्मकतद्रूपावच्छिन्नविशिष्टावृत्तिरितिनातिप्रसंगः महाकालोघटवान्कालपरिमा
णादित्यादौसाध्यतावच्छेदकसंबंधेनप्रतियोगिव्यधिकरणाहेतुसमानाधिकरणाभावस्यप्रतियोगितावच्छेदकंगगन
त्वादिकमेवतादात्म्यादिनातेनविशिष्टसंबंधिनिवर्तमानस्यतेनसंबंधेनप्रतियोगिव्यधिकरणाभावस्यप्रतियोगितान
वच्छेदकंतेनसंबंधेनतदवच्छिन्नविशिष्टावृत्तित्वंचकालिकादिसंबंधेनघटत्वाद्यवच्छिन्नविशिष्टनिष्ठविषयतायाइति
लक्षणसमन्वयः धूमादिसमानाधिकरणस्यसाध्यतावच्छेदकसंयोगादिसंबंधेनप्रतियोगिव्यधिकरणाभावस्यप्रति
योगितावच्छेदकंज्ञानत्वादिकंवह्नित्वादिविशिष्टसंबंधिनिष्ठस्यसंबंधसामान्येनप्रतियोगिव्यधिकरणाभावस्यप्रति
योगितानवच्छेदकंज्ञानाद्यभावस्यविषयत्वादिसंबंधेनप्रतियोगिसमानाधिकरणत्वादितिवह्न्यादेरवच्छेदकत्वप्रसं दाम०
गइत्यतस्तेनसंबंधेनप्रतियोगिवैयधिकरण्यविवक्षणं संयोगादिनावह्न्यादिमन्निष्ठज्ञानाद्यभावस्यसंयोगादिसंबंध ९३

धर्मिकोभयाभावघटितप्रतियोगिवैयधिकरण्याप्रवृत्तिनदोषः साध्यतावच्छेदकसंबंधेनप्रतियोगिवैयधिकरण्यनि
वेशेकालः सर्ववान्मेयत्वादित्यादौसर्वत्वस्यावच्छेदकत्वापत्तेरुभयाभावघटितस्यैवप्रतियोगिवैयधिकरण्यस्यनि
वेशनीयतयातादात्म्यादिनागगनादिसंबंधिगगनादिनिष्ठगगनाद्यभावस्यकालिकसंबंधधर्मिकोभयाभावघटि
तप्रतियोगिवैयधिकरण्यशालितयाकालोघटवान्महाकालत्वादित्यादौग्रवच्छेदकाप्रतियोगितावच्छेदकविशिष्ट
सत्त्वादेः सत्ताविशिष्टसंबंधिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकतयासत्तात्वादेरवच्छेदकत्वा
परिहारतः प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यमेवनिवेशनीयं नचसर्वत्वावच्छिन्नस्यपक्षविषयि
तासंबंधेनसाध्यताज्ञानत्वादिकंहेतुस्तत्रसर्वत्वस्यपारिभाषिकावच्छेदकत्वानुपपत्तिः सर्वत्वविशिष्टस्यविषयिता
संबंधेनसंबंधिनिसर्वविषयकज्ञानेतेनसंबंधेनप्रतियोगिव्यधिकरणाभावाप्रसिद्धेरितिवाच्यंघटत्वाद्यवच्छिन्नवि
षयकेसर्वत्वावच्छिन्नविषयकेचपदादिज्ञानेघटत्वावच्छिन्नाभावस्यैवप्रतियोगितावच्छेदकघटत्वावच्छिन्न

व्यधिकरणतया सर्वत्वस्य तादृशाभावप्रतियोगितानवच्छेदकत्वेन सर्वत्वस्यावच्छेदकत्वानुपपत्तेः न चैवमपि पक्षनिष्ठत्वे
सति सर्वत्वं साध्यतावच्छेदकं तत्र जन्यज्ञानस्य साध्यतावच्छेदकीभूतविशिष्टसंबंधित्वान्निष्ठज्ञाने चन्द्राभावस्य प्रतियो
गितावच्छेदकावच्छिन्नवैयधिकरण्यस्यापि संभवात् तादृशसाध्यतावच्छेदकस्य पारिभाषिकावच्छेदकत्वानुपपत्तिरिति
वाच्यं नित्यत्वानधिकरणेऽपि नित्यत्वविशिष्टसर्वमिति ज्ञाने विषयितापानित्यत्वविशिष्टसर्वत्वविशिष्टसंबंधितापाञ्च न
यायात् तत्र तदसत्त्वे तुल्ययुक्त्या जन्यत्वविशिष्टस्य घटादेरपि ईश्वरज्ञानासंबंधितया तादृशविशिष्टाभावस्यैवेश्वरज्ञा
ने विशिष्टप्रतियोगिव्यधिकरणस्यास्य सुलभत्वसंभवात् अन्यत्र संनेपूर्वं वह्नौ धूमं पद्रूपावच्छिन्नस्यापेनसंबंधेन संबंधि
निवर्तमानस्यापि तेन संबंधेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं हेतुमन्निष्ठाभावप्रतियोगितावच्छेद
कं तत्संबंधनिष्ठतद्रूपावच्छिन्नप्रतियोगिकत्वभिन्नं पक्षसाध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वं तद्व्याप्यतावच्छेदकसं राम०
बंधिसंबंधो वा व्याप्तिः प्रतियोगित्वाघटं तभावेनासहिष्णुतामपि तु पद्रूपावच्छिन्नस्य यादृशसंबंधेन संबंधित्वं हेतुमतस्ता ९४

दृशसंबंधनिष्ठतद्रूपावच्छिन्नप्रतियोगिकत्वभिन्नत्वमेव साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वनिवेशनीयमिति दिक्
यथाश्रुतानतिरिक्तवृत्तित्वपदार्थपरित्यागप्रयोजनं स्वयमेव स्फुटयति अत एवेति तादृशानतिरिक्तवृत्तित्वनिवेशादेव
शादेवेत्यर्थः विशिष्टसत्तात्वतुल्यवृत्तिकत्वमितिव्यापकस्य पर्याप्तिशब्धिकरणपर्याप्ताविशिष्टसत्तात्वकत्वेऽपीत्यर्थः
नक्षतिः न सत्त्वाद्यादेवच्छेदकतापत्तिः प्रतियोगिताधर्मिकाभयाभावघटितव्याप्तिपक्षे विशिष्टसत्तात्वादेः सत्ता
त्वाद्यन्यूनवृत्तित्वनिवेशमाहात्म्यादव्यभिचारणाय व्यापकत्वं परित्यज्याप्यादृशमन्यूनवृत्तित्वं निवेशयति स्वाभितिस्व
विशिष्टेतिस्वपदं साध्यतावच्छेदकपरं तथाच प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिव्यधिकरणहेतुसमानाधि
करणाभावप्रतियोगितासामान्यवृत्तितत्संबंधावच्छिन्नघटत्वस्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद
त्वोभयाभावकत्वं तेन संबंधेन व्यापकतावच्छेदकत्वं बोध्यमित्यर्थः विशिष्टसत्तात्वादेर्विशिष्टसत्तात्वाश्रयसंबंधिगु
णादिनिष्ठाभावप्रतियोगितावच्छेदकतया तदनवच्छेदकसत्तात्वाद्यवच्छिन्नत्वाभावस्य जात्यादिसमानाधिकरणाभा

वप्रतियोगितायांसत्त्वेनविशिष्टसत्त्वाभावात् जातेरित्यादावतिव्याप्तिरतः स्वविशिष्टेतिस्ववैशिष्ट्यंचसाध्यतावच्छेदकता
घटकसंबंधेनबोध्यंस्वव्याप्यधूमवान्वह्नेरित्यादौकालिकसंबंधेनधूमत्वविशिष्टवह्न्यादिसंयोगिनिष्ठाभावप्रतियोगिता
यांधूमत्वादेरवच्छेदकतयातदनवच्छेदकद्रव्यत्वाद्यवच्छिन्नाभावस्यचहेतुसामानाधिकरण्याभावप्रतियोगितासामा
न्यसत्त्वेनातिव्याप्त्यापत्तेः संबंधित्वंसाध्यतावच्छेदकसंबंधेनापेक्षितविवक्षणीयं अन्यथाकालिकादिसंबंधेनधूमवदिमतिसं
योगादिसंबंधेनधूमत्वावच्छिन्नाभावसत्त्वात्संबंधसामान्येनधूमादिमन्निष्ठाभावीयसंयोगादिसंबंधावच्छिन्नप्रतियोगि
तानवच्छेदकंताहृशसंबंधावच्छिन्नप्रतियोगितासामान्यानवच्छेदकंघटाभावत्वादिकमेवअभावत्वादेकेवसंयोगादिसं
बंधावच्छिन्नाभावप्रतियोगितावच्छेदकत्वेनताहृशगुरुधर्मस्यातथात्वात्भेदप्रतियोगितायांप्रसिद्धस्यतदवच्छेदकता
निरूपकत्वस्योभयाभावमादायोक्तस्यलक्षणस्यातिव्याप्तिः संयोगेनधूमत्वावच्छिन्नाभावस्य तत्पतिकरणावच्छेदेनधूम राम०
त्वादिविशिष्टसंबंधिनिष्ठतयाताहृशाभावप्रतियोगितानवच्छेदकघटाभावत्वावच्छिन्नाभावमादायतत्रैवातिव्याप्ते ८५

वीरणायप्रतियोगिव्यधिकरणत्वेनाप्यभावोविशेषणीयः तत्रचप्रतियोगिपदंप्रतियोगितावच्छेदकावच्छिन्नपरं अन्यथा
सात्त्वावान् ज्ञातेरित्यादौसत्तात्वविशिष्टसंबंधिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकविशिष्टसत्तात्वा
घत्वस्यहेतुसामानाधिकरण्याभावप्रतियोगितायांसत्त्वेनाव्याप्त्यापत्तेः वह्न्यादिमतिधूमस्यघटाद्यभावस्यकालिकादिसं
बंधेनप्रतियोगिसमानाधिकरणतयासंबंधसामान्येनप्रतियोगिव्यधिकरणत्वनिष्ठाभावप्रतियोगितावच्छेदकंतदसमान्य
कालीनघटादिव्यक्तिनिष्ठतत्तद्व्यक्तित्वादिकमेवेतितदनवच्छेदकघटत्वावच्छिन्नत्वस्यहेतुसामानाधिकरण्याभावप्रति
योगितायांसत्त्वादव्याप्तिरतः प्रतियोगितावच्छेदकसंबंधेनप्रतियोगिवैयधिकरण्यंनिवेश्यं तत्तुसाध्यतावच्छेदकसंबंधेन
कालोघटवान्महाकालपरिमाणादित्यादौकालिकसंबंधेनसाध्यतावच्छेदकविशिष्टसंबंधिनिरुक्तकालेतेनसंबंधेनप्रति
योगिव्यधिकरणस्याभावस्यसुलभत्वेपिसंबंधानुमहाकालपरिमाणादित्यादौमहाकालस्यैवकालिकसंबंधेनसंबं
त्वविशिष्टसंबंधिनपातत्रताहृशसंबंधेनप्रतियोगिव्यधिकरणाभावाप्रसिद्ध्याऽव्याप्त्यापत्तेः कालिकसंबंधेनगगनादि

तिमत्त्वप्रकृते प्रतियोगितावच्छेदको भयाभावघटितलक्षणाकरणात् तन्मतेनोभयाभावघटनमपि गगनाद्यभावे कालि-
कसंबंधेन प्रतियोगिवैयधिकरण्यस्य निर्वाहयितुमशक्यत्वात् न च साध्यतावच्छेदकसंबंधावच्छिन्नत्वमभावप्रति-
योगितायां निवेश्यमिष्यत एवं च प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यनिवेशेपि सर्वत्वावच्छिन्नसाध्यके
तद्वैशिष्ट्यसंबंधिमहाकालनिष्ठस्य प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यधिकरणाभावस्य साध्यतावच्छेदकसंबं-
धावच्छिन्नप्रतियोगित्वाप्रसिद्धिः कालिकातिरिक्तसंबंधावच्छिन्नाभावस्यैव प्रतियोगितावच्छेदकसंबंधेन प्रतियो-
गिव्यधिकरणत्वात्तत्प्रतियोगितायां च कालिकसंबंधावच्छिन्नत्वविरहादित्यव्याप्तितादवस्थ्यमिति वाच्यं प्रतियोगिता-
वच्छेदकसंबंधेन प्रतियोगिव्यधिकरणो यः स्वविशिष्टसंबंधिनिष्ठोऽभावस्तत्प्रतियोगितासामान्ये यत्संबंधावच्छिन्न-
त्वपदेनावच्छिन्नोभयाभावस्तत्संबंधावच्छिन्नत्वतद्धर्मावच्छिन्नत्वोभयाभाववत्तादृशहेतुसमानाधिकरणाभावप्रतियो-
गितासामान्यकं पक्षत्वं तद्धर्मवत्त्वं तेन संबंधेन व्यापकत्वं इति विवक्षणात् सर्वेषामप्रसिद्धिः संबंधत्वविशिष्टसंबंधिनिम- राम० ९६

हाकालेसत्तायादिना प्रतियोगिव्यधिकरणतत्संबंधावच्छिन्नघटाद्यभावस्य प्रतियोगितायां कालिकसंबंधावच्छि-
न्नत्वसत्त्वे तादृशावच्छिन्नत्वोभयाभावस्य सत्त्वात् साधनसमानाधिकरणात्तथाविधघटाद्यभावप्रतियोगितायामपि तथा-
विधोभयाभावस्य सत्त्वेन कालिकसंबंधेन सर्वत्वावच्छिन्नस्य कालपरिमाणादिव्यापकत्वोपपत्तेः न चैवं साध्यतावच्छे-
दकसंबंधावच्छिन्नत्वस्य प्रतियोगिताविशेषणत्वे प्रतियोगित्वं साध्यतावच्छेदकसंबंधेन वाच्यमिति यन्मते ग्रंथविरो-
धइति वाच्यं तादृशग्रंथस्य प्रयुक्तोभयाभावस्य विशेषणतायामेव तात्पर्यात् एवं च तत्तत्साध्यतावच्छेदकसंबंधा-
वच्छिन्नप्रतियोगितासामान्ये प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यधिकरणस्वविशिष्टसंबंधिनिष्ठाभावीयत्वप-
दधर्मावच्छिन्नत्वोभयाभावः तादृशधर्मस्य तत्तदवच्छेदकान्तर्य इति नातिप्रसंगो ग्रंथविरोधो न वा महाकालः सर्वत्वाव-
कालपरिमाणादित्वादावप्रसिद्धिः प्रसिद्धायां कालि[illegible]कसंबंधावच्छिन्नघटाद्यभावीयप्रतियोगितायां सर्वत्वविशि-
ष्टसंबंधिमहाकालनिष्ठोपः प्रतियोगितावच्छेदकसमवायादिसंबंधेन प्रतियोगिव्यधिकरणस्तत्संबंधावच्छिन्न

घटाद्यभावत्वादीपत्वसर्वत्वावच्छिन्नत्वोभयावस्थस्तुल्यत्वात् ननु स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदक
त्वं ताद्दृशावच्छेदकत्वावच्छिन्नभेदः ताद्दृशावच्छेदकप्रतियोगिकभेदस्य ताद्दृशावच्छेदकरूपं किंचिद्भिन्नताद्दृशावच्छेदक
साधारणत्वात् तथा च लघुरूपसमनियतं यत् गुरुरूपं तद्विशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वस्य ताद्दृशलघुरू
पविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वात्मकस्वसमनियतधर्मापेक्षया गुरुत्वेन प्रतियोगितानवच्छेदकत
या ताद्दृशावच्छेदकत्वावच्छिन्नभेदाप्रसिद्ध्या द्वितीयावच्छेदकत्वं कुत्रास्य मेयधूमत्वादौ प्रतियोगिताधर्मिकोभयाभाव
घटितत्वाच्छिन्नरूपस्य प्रमेयवह्निमान् धूमादित्यादावव्याप्तिरित्याशयात् प्रतियोगिताश्चेति स्वविशिष्टसंबंधिनिष्ठा
भावप्रतियोगितास्तित्वस्यार्थः विशिष्यतद्व्याप्तिविवेचने तु ताद्दृशप्रतियोगितात्वेनेत्यर्थः तथा च वस्तुत्वापायात् स्वविशि
ष्टसंबंधिनिष्ठाभावनिरूपितप्रतियोगितास्तु तदवच्छेदकत्वावच्छिन्नभेदकूटवत्त्वमेव तत्तदवच्छेदकताश्रयैर्निरुक्तधर्मैर्वि रा०
शिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वस्य गुरुत्वात् प्रतियोगितानवच्छेदकत्वेपि न क्षतिः एवमपि घटत्वाद्यवच्छिन्ना ८७

भावीयप्रतियोगितात्तदवच्छेदकत्वं घटत्वादिनिष्ठं तत्तद्व्यक्तित्वादिसमनियतमिलितद्वयेकरूपागुरुत्वेन न प्रतियोगिताव
च्छेदकं किंतु तद्व्यक्तित्वमिति ताद्दृशप्रतियोगितानां विशिष्योपादानेपि स्वावच्छेदकत्वादिकं दुर्वचं तथापि तत्प्रतियोगिता
यां समशरीरनानाधर्मसमनैयत्यं तत्र नानाधर्माणामेकप्रतियोगितायामवच्छेदकपर्याप्त्यवच्छेदकनिष्ठतत्तद्व्यक्तित्वा
नां लघुत्वेपि तत्प्रतियोगितावच्छेदकत्वं न्यूनवृत्तितया तत्प्रतियोगितावच्छेदकत्वस्य भेदप्रतियोगितावच्छेदकत्वमथवा
हृत्तमैवेति ताद्दृशप्रतियोगितानां विशिष्यनिवेशाभिप्रायकोयं ग्रंथः अन्यताद्दृशप्रतियोगितावच्छेदकानां च तत्तद्व्यक्ति
त्वेनैव भेदानिवेशणः नचावच्छेदकभेदेन प्रतियोगिताभेदान्नानाधर्मावच्छिन्नैकप्रतियोगितासंभव इति वाच्यं स्वावच्छे
दकासमनैयत्यस्यैव प्रतियोगितावच्छेदकत्वात् समनियतनानाधर्मावच्छिन्नप्रतियोगितैकत्वे बाधकविरहात् एवं प्रकृत्वे तु
गतैकरूपावच्छिन्ननानाव्यक्तीनामेकप्रतियोगितायामवच्छेदकत्वे तत्राप्यवच्छेदकनिष्ठतत्तद्व्यक्तित्वानां न्यूनवृत्तितया
तत्प्रतियोगितावच्छेदकत्वस्य भेदप्रतियोगितावच्छेदकत्वमकृतं न च तत्रापि तत्प्रतियोगितानिरूपितावच्छेदकताया

स्तत्तद्व्यक्तित्वेन भेदप्रतियोगितावच्छेदकतासंभवात्तत्प्रतियोगितावच्छेदकतात्वविशिष्टावच्छिन्नभेदाप्रसिद्ध्यानिवेशापि
तुमशक्यएवेतिवाच्यं तादृशभेदनिवेशासंभवेपिस्वावच्छेदकतासंबंधेनतत्प्रतियोगितावच्छिन्नभेदनिवेशेऽविरो
धेतत्प्रतियोगितानाविशिष्टानिवेशनेक्षतिसंभवतेः नहिस्वाश्रयतासंबंधेनतत्तद्व्यक्तित्वावच्छिन्नावच्छेदकतायास्वाव
च्छेदकत्वापेक्षयास्वावच्छेदकतासंबंधेनतत्तद्व्यक्तित्वावच्छिन्नप्रतियोगितायास्वावच्छेदकत्वेगौरवं येनोक्तभेदस्याप्रसि
द्धिः स्यात् एवंधूमत्वादेरपिधूमत्वादिविशिष्टसंबंधिनिष्ठाभावप्रतियोगितायांमहानसीयत्वसहितस्यावच्छेदकत
याधर्मेतरसहितरूपावच्छिन्नप्रतियोगितावच्छेदकानांतत्तद्व्यक्तित्वेनभेदनिवेशोनसंभवति धूमत्वादेर्धूमत्वादिवि
शिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वानुपपत्तेर्विशेषणतावच्छिन्नधूमत्वादिनिष्ठतद्व्यक्तित्वस्यापिवि
शेष्यीभूतधूमत्वादिपर्याप्ततयातदवच्छिन्नभेदस्यविशेष्यीभूतधूमत्वादावसंभवादितितत्प्रतियोगितावच्छेदे राम०
कस्यतादृशावच्छेदकत्वावच्छिन्नभेदस्यनिवेश्यः तथासतितादृशप्रतियोगितायावच्छेदकतायाव्यासज्यवृत्तितयाधू ९८

मत्वादेःप्रत्येकंतदवच्छिन्नभेदसत्वेनउक्तानुपपत्त्यनवकाशात् नचतत्रावच्छेदकतात्वकेतत्तद्व्यक्तित्वेनैवभेदप्रति
योगितावच्छेदकत्वंसंभवतीतिदर्शितरूपावच्छिन्नभेदाप्रसिद्धिरितिशंकास्पदमपिमहानसीयत्वधूमत्वादिनिष्ठा
वच्छेदकतानांस्वावच्छेदकसंबंधादिभेदेनभिन्नतयातत्तद्व्यक्तित्वेनतासांव्यासज्यवृत्तितयाधूमत्वादिनिष्ठभेदप्रति
योगितावच्छेदकत्वासंभवात् तत्तत्प्रतियोगितावच्छेदकतात्वेनचव्यासज्यवृत्तितयातेनैवरूपेणतादृशभेदप्रतियो
गितावच्छेदकत्वात् नचैवमितियापरिभाषिकावच्छेद्यावच्छेदकभावस्यातिप्रसंगः प्रतियोगिताधर्मिकोभयाभावघटि
तलक्षणस्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितायांपदियसंबंधविशेषावच्छिन्नत्वंननिवेश्यतेतदाप्रतियोगितावच्छे
दकमात्रस्यैववह्नित्वादिविशिष्टसंबंधिनिष्ठयत्किंचित्संबंधावच्छिन्नाभावप्रतियोगितावच्छेदकत्वात् तादृशप्रतियोगि
तानवच्छेदकावच्छिन्नत्वाप्रसिद्ध्याऽसंभवः महानसादिनिष्ठसमवायसंबंधावच्छिन्नवह्न्याद्यभावस्यसाध्यतावच्छेदकसंयोग
संबंधेनप्रतियोगिसमानाधिकरणत्वादपि तल्लक्षणेप्रतियोगितावच्छेदकसंबंधेनप्रतियोगिवैयधिकरण्यस्यैवनिवेशेन

तादृशाभावाव्यावर्त्तनात् न चाकाशाभावत्वादिकमेव तादृशाभावप्रतियोगितानवच्छेदकं संयोगसमवायादिसंबंधावच्छि
न्नाकाशाभावाभावादिप्रतियोगितायां लाघवेन मुद्गस्याऽभावत्वादेवावच्छेदकत्वात् तादृशधर्म्मावच्छेद्यत्वं च स्वरूपसं
बंधावच्छिन्नाकाशाभावाभावाद्यात्मकाकाशादिनिरूपितप्रतियोगितायां प्रसिद्धमिति वाच्यं आकाशाभावत्वादेरपि साध्य
वन्निष्ठभेदप्रतियोगितावच्छेदकत्वात् आकाशाभाववद्भिन्नदन्यतरत्वादेर्वह्न्यादिमन्निष्ठभेदप्रतियोगितानवच्छेदकत्वे
पि विषयितासंबंधावच्छिन्नतन्निष्ठाभावप्रतियोगितावच्छेदकत्वं तु र्घटस्येव तदुभयैकतरमात्रविषयकज्ञानादेर्विषयिता
संबंधेनान्यतरत्वावच्छिन्नाभावसत्त्वात् अभावत्वव द्विपञ्चाद्यवच्छिन्नाभावस्य च सत्त्वादभावत्ववह्निमत्त्वादेस्तादृशसंबंधा
वच्छिन्नान्यतराभावप्रतियोगितावच्छेदकत्वासंभवात् विषयितादेर्वृत्त्यनियामकतयाऽभावप्रतियोगितावच्छेदकसंबं
धत्वानुपगमेतु धूमवान्वह्नेरित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितायामाकाशाभाववद्धूमवदन्यतरत्वादिरूपधू राम०
मादिमन्निष्ठाभावप्रतियोगितानवच्छेदकावच्छिन्नत्वस्योभयाभावमादायातिव्याप्तिरित्यत एतल्लक्षणोद्दितोपावच्छेद ९९

कत्वलक्षणोपदर्शितप्रयोजनानुरोधेन प्रतियोगितानां साध्यतावच्छेदकसंबंधावच्छिन्नत्वसाध्यतावच्छेदकसंबंधात्म
कस्वविशिष्टसंबंधित्वं च निवेशनीयमिति प्रतियोगित्वमित्यादिना कालेनोघटवान् कालपरिमाणादिप्रादौ घटत्वादिविशिष्ट
संबंधिनि महाकाले प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिव्यधिकरणोऽभावस्तदीयसाध्यतावच्छेदकसंबंधाव
च्छिन्नप्रतियोगित्वाप्रसिद्धावपि पर्याप्त्या तत्प्रतियोगितापर्मिकोभयाभावघटितलक्षणस्य न तत्राव्याप्तिप्रसक्ति
रित्युवाच लक्ष्यापि तद्विशिष्टसंबंधितया तत्र निष्ठातीतानागतघटकानामेव तादृशाभावस्य तथाविधप्रतियोगिताप्रसि
द्धेरित्याह कालेनेति कल्पान्तरपर्याभावे प्रतियोगिवैयधिकरण्यनिवेशायेति अभावस्येति बोध्यम् इति अन्यथा व्याप्यवृत्तिसा
ध्यकव्यभिचारिण्यतिव्याप्तेरिति शेषः अव्याप्यवृत्तिसंयोगादिसाध्यके व्यभिचारिण्यतिव्याप्तेरवच्छेदकत्वलक्षणघटकाभा
वप्रतियोगिवैयधिकरण्यविशेषणमपेक्षणीयमन्तरेणापि उद्धरेत्तु तादृशविशेषणस्य तदसत्त्वे हेतुसमानाधिकरणाभावे
तादृशविशेषणस्याप्रदर्शितव्यावृत्त्यसंगतिस्तस्य चानुपादेयत्वमाशंकते णाच्म्पादिनाभेलक्षणस्थे हेतुसमानाधि

कारणाभावेन तद्विशेषणांशोक्तस्य तस्यानुपादेयत्वे हेतुमत्ताव्याप्त्यनवकाशे हेतुमाह संयोगत्वावच्छिन्नाभाववृत्तीति द्रव्यत्वाद
विति शेषः संयोगत्वादिविशिष्टस्य वृत्तेरिति तथा च तदनुपादाने पि संयोगि द्रव्यत्वादित्यादौ संयोगत्वादिरूपसाध्यतावच्छेद
के स्वरूपसंबंधरूपोक्तप्रतियोगितावच्छेदकत्वसत्वे पि निरुक्तपारिभाषिकावच्छेदकत्वस्यासत्वान्न उक्तप्रतियोगितायां त
द्विशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छिन्नत्वाभावस्य वसत्वान्नाव्याप्तिरिति भावः इदमीयस्य तद्विशेषणस्या
नुपादेयत्वे हेतुमत्तातिव्याप्त्यनवकाशे हेतुमाह गुणादौ तिद्रव्येतरासंभवे तत्त्वमात्रस्य वद्द्रव्यत्वात्यन्ताभावविरोधित्वाव
च्छेदकतया तन्निरूपितप्रतियोगितावच्छेदकत्वसंभवात् सकलद्रव्यसमवेतत्वरूपाधिकांशघटितं द्रव्यत्वत्वं नात्यन्ताभावप्रतियो
गितावच्छेदकमिति परिशेषात् द्रव्यमात्रसमवेतत्वेनेत्यस्य वृत्तेरिति संयोगत्वादिविशिष्टस्य त्वनुपादेयत्वे तथा च तदनुपादाने
पि संयोगि सत्वादित्यादौ नातिव्याप्तिः अवच्छेदकत्वघटकतया तत्पदेन संयोगत्वाद्युपादानासंभवे पि द्रव्यत्वत्वादिकमादायैव रा०म०
वसंयोगत्वादौ पारिभाषिकावच्छेदकत्वस्यानपवादत्वात् संयोगत्वादिविशिष्टस्य त्वनुपादेयत्वे तथा च तदनुपादाने पि संयोगिद्र १००

त्वादित्यादौ नातिव्याप्तिः अवच्छेदकत्वघटकतया तत्पदेन संयोगत्वाद्युपादानासंभवे पि द्रव्यत्वत्वादिकमादायैव संयोगत्वादौ पा
रिभाषिकावच्छेदकत्वस्यानपवादत्वात् संयोगत्वादौ संयोगत्वादिविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वविरहे पि
तादृशप्रतियोगितानवच्छेदकद्रव्यत्वत्वाद्यवच्छिन्नत्वस्य हेतुमन्निष्ठाभावप्रतियोगितायां सत्वेन तत्र निरुक्ताभावाभावसत्वा
दिति भावः समवायादिना अव्याप्यवृत्तिसाध्यके तेन संबंधेन साध्यतावच्छेदकविशिष्टव्यापकतावच्छेदकस्य व्याप्यवृत्तिताव
च्छेदकधर्मान्तरस्य साधननिष्ठव्यभिचारनिरूपकतावच्छेदकस्यासंभवेन नातिव्याप्तिरित्याशयेनाह संयोगेनाव्याप्यवृत्तेः साध्यता
यामतिव्याप्तिर्द्वेरिव संयोगेन किंचिद्रूपावच्छिन्नस्य व्याप्यवृत्तित्वविरहात्तस्य साधनवन्निष्ठसंयोगसंबंधावच्छिन्नाभावप्रति
योगितावच्छेदकस्य साध्यवन्निष्ठतत्संबंधावच्छिन्नाभावप्रतियोगितावच्छेदकत्वनियमेन तत्संबंधावच्छिन्नत्वावच्छि
न्नाभाववदसंबद्धत्वविशिष्टसामान्यकत्वस्यासंयुक्तमात्रवृत्तिगुणत्वादावेव प्रसिद्धेरिति इदमीयप्रतियोगिवैयधिकरण्य
विशेषणोपादानस्यावश्यकत्वे च हेतुसामानाधिकरण्याभावेन तद्विशेषणस्याव्यापकत्वान्न तथा संयोगि द्रव्यत्वादि

न्यादावव्याप्तिरिति समाधत्ते धूमवानिति ननु धूमादिमत्यपि पर्वतादौ शिखराद्यवच्छेदेन धूमत्वाद्यवच्छिन्नाभावसत्त्वात्तेन
रूपेण धूमादेर्व्याप्यवृत्तित्वाविरहेऽपि स्वप्रयोगोलकावृत्तिद्रव्यत्वादिना तत्तथात्वमव्याहतमेव शिखराद्यवच्छेदेनापि तद
वच्छिन्नस्यान्तरसत्त्वात् इति साध्यव्यापकतावच्छेदकताहृद्धर्म्मावच्छिन्नाभाववत्त्वमयोगोलकादावेव धूमत्वादिविशिष्टस्य
च तदसंबंधित्वान्नातिव्याप्तिरित्याशंकां निराकरोति न हीति उत्पत्तिकाले तिष्ठा च धूमवति किंचिद्देशावच्छेदेनायोगोल
कावृत्तिद्रव्यत्वाद्यवच्छिन्नाभावात् तत्रापि कालविशेषावच्छेदेन तदवच्छिन्नाभावस्य तत्र सत्त्वात् धूमत्वादेरवच्छेदकत्वं दुर्घटमे
वेति भावः द्वितीयकल्पेऽप्यवच्छेदकाप्रसिद्ध्याऽतिव्याप्तिविरहेऽपि प्रथमकल्पे प्रतियोगितावच्छेदकोभयाभावघटितत्व
कृतोऽपि धूमत्वविशिष्टसंबंधिनिष्ठसंयोगसंबंधावच्छिन्नाभावप्रतियोगितानवच्छेदकघटाभावत्वाद्यवच्छिन्नत्वसंयोग
संबंधावच्छिन्नत्वोभयाभावमादायातिव्याप्तिरबोध्या अन्यथैवमपि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यपर्यन्तविशेष राम०
णमकिंचित्करमेव हेतुसमानाधिकरणाभावप्रथमकृतप्रतियोगिवैयधिकरण्यनिवेशेऽपि गुणान्यत्वविशिष्टसत्तावान् १०१

ज्जातिरित्यादौ हेतुसमानाधिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगितावच्छेदकगुणसमवेतत्वाद्यनतिरिक्तवृत्तित्व
स्य साध्यतावच्छेदके सत्त्वेनातिव्याप्त्यनवकाशात् हेतुसमानाधिकरणाभावविशेषणप्रतियोगिवैयधिकरण्यशरीरे
प्रतियोगितावच्छेदकावच्छिन्नत्वानिवेशनेऽदृष्टं गुणादिसत्त्वादौ विशिष्टद्रव्यत्वाद्यभावमादायाव्याप्त्यनवकाशेन इदम
पि प्रतियोगिवैयधिकरण्यशरीरे तद्विशेषणव्यावृत्त्यसंभवात् यत्तु प्रतियोगितावच्छेदकावच्छिन्नत्वानिवेशे यत्प्रतियो
गिताश्रयानधिकरणत्वं हेतुमत्त्वादिक्रमेणाव्याप्तिर्निवाच्य तथा च प्रतियोगितायाः प्रतियोगिस्वरूपत्वेन वह्न्यादिव्य
क्तिभेदेन प्रतियोगितानां भेदात् वह्नित्वावच्छिन्नमहानसीयवह्न्यादिनिष्ठप्रतियोगिताश्रयानधिकरणत्वस्य हेतुमति पर्व
तादौ सत्त्वाद्वह्निमान् धूमादित्यादावव्याप्तिरिति तदसत् प्रतियोगितायाः प्रतियोगिस्वरूपत्वेन वह्निमहानसीयवह्नित्वाद्य
वच्छिन्नप्रतियोगितया वह्नित्वाद्यवच्छिन्नमहानसीयवह्न्यादिनिष्ठप्रतियोगिताभिन्नतया प्रतियोगितावच्छेदकावच्छि
न्नानधिकरणत्वनिवेशेऽपि वह्नित्वाद्यवच्छिन्नप्रतियोगितावच्छेदकमहानसीयवह्नित्वाद्यवच्छिन्नानधिकरणत्वमादा

पतद्दोषतादवस्थ्यात् द्रव्यत्वादेरपि धूमादिस्वरूपधूमत्वाद्यवच्छिन्नप्रतियोगितावच्छेदकत्वेन प्रतियोगितावच्छेदकसामान्या
वच्छिन्नानधिकरणत्वनिवेशेऽप्रतियोगित्वकादावपि धूमत्वाद्यवच्छिन्नप्रतियोगितावच्छेदकसामान्यावच्छिन्नानधिकरणत्व
स्य तुल्यत्वे मत्यात् तथाविवक्षणासंभवात् यदि च पाद्रूप्यादेरूपावच्छिन्नप्रतियोगितायाश्चावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत
स्तद्रूपावच्छिन्नानवच्छेदकत्वं विवक्षणीयं तदा सोपपदत्वादेर्वह्नित्वाद्यवच्छेदकावच्छेदकवह्नित्वप्रतियोगितावच्छिन्ना
नवच्छेदकत्वान्न दोष इत्युच्यते तदा यद्रूपावच्छिन्नप्रतियोगितावच्छेदकाश्रयानधिकरणत्वं हेतुमतस्तद्रूपावच्छि
न्नानवच्छेदकत्वं विवक्षणीयं प्रतियोगितावच्छेदकावच्छिन्नत्वानिवेशेऽपि सामञ्जस्यात् एवं प्रतियोगितावच्छेदकावच्छिन्नात्व
नुपादाने एतद्रूपान्यत्वविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तेर्दुर्वारत्वात् तन्मते हेतुसमानाधिकरणाभावप्रतियोगिताव
च्छेदकस्य एतद्रूपीसमवेतत्वादेरेतद्रूपाद्यविशेषणरूपानिरसाधारणोऽपि एतद्रूपान्यत्वविशिष्टसत्तात्वावच्छिन्नं प्रति समवायेन रम्प०
व्यापकतानवच्छेदकत्वात् संबंधभेदेन निवेशनदोषवारणाय हेतुसमानाधिकरणाभावप्रतियोगित्वतदवच्छेदकानतिरिक्त १०२

वृत्तित्वघटकप्रतियोगित्वयोर्यदि साध्यतावच्छेदकसंबंधावच्छिन्नत्वं निवेश्यते तदैव प्रतियोगिवैयधिकरण्यपदद्वयानुपादाने सं १०४ २
योगेन साध्यतायां व्यभिचारिनिदर्शितरीत्या अतिव्याप्तिरापाद्येतेति यदि च तद्दोषवारणाय हेतुमन्निष्ठाभावीयप्रत्ययसंबंधावच्छि
न्नप्रतियोगितायां पदवच्छेदकं तत्संबंधावच्छिन्नत्वदवच्छिन्नाभाववत्संबंधे स्वविशिष्टसामान्यकालत्वस्वविशिष्टसंबंधित्वनिष्ठा
भावीयत्वसंबंधावच्छिन्नप्रतियोगितानवच्छेदकतत्कालत्वं वा निवेश्यते उभयत्र विशिष्यविशेषणतासंबंधेन एववानदाधूम
वान् वह्नेरित्यादौ संबंधान्तरेण विशेषणतादिना प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकतायामवच्छेदकस्य तत्सं
बंधघटितहेतुव्यापकतानवच्छेदकाप्रयोगित्वकभेदत्वादेः प्रसिद्ध्या धूमत्वादेरवच्छेदकत्वापर्यन्तेऽतिव्याप्तेरवकाशः तस्या
लोकस्य साध्यतावच्छेदकसंबंधानिवेशपक्षे प्रतियोगिवैयधिकरण्यपदद्वयस्यानुपादेयतात्माह प्रतियोगितायोऽवश्यमपि सं
योगादिसंबंधावच्छिन्नवह्निधूमादिनिरूपितव्यापकताविशिष्टसमवायादिसंबंधावच्छिन्नप्रतियोगिताद्रूपघटितावच्छेद
कत्वमेतेषां व्याप्तिलिङ्गेषु कुशकाशावलम्बनतया तत्प्रतिप्रसंगात् तत्राह यथाहेतुसमानाधिकरणाभावीयसमवायसंबंधावच्छिन्नप्रति

योगितावच्छेदकस्य यद्विशिष्टसंयोगिनिष्ठत्वसंबंधावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वात्तदन्यत्वस्य तद्धेतुव्यापकतान
वच्छेदकसाधारण्याभावात्पूर्वाधिकरणीयदवच्छिन्नस्य व्यभिचारस्तादवस्थ्यमेव तत्त्वस्य हेतुमन्निष्ठसमवायसंबंधावच्छिन्नप्रति
योगितावच्छेदकस्य संयोगेन तद्द्रव्यविशिष्टं प्रति समवायेन व्यापकताया अवच्छेदकतया व्यापकतानवच्छेदकमात्रस्य एव यादि
भाविकावच्छेदकत्वानुपपत्तेः तथापि विशेषणताविशेषादिघटितव्यापकतायां न समवायादिसंबंधावच्छिन्नप्रतियोगिताभा
वनिवेशसंभवः हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकस्य कस्यापि विशेषणताविशेषणतामहानसान्यत्वादिकं प्रतिसम
वायेन व्यापकतायामवच्छेदकत्वासंभवे न हेतुव्यापकतानवच्छेदकमहानसान्यत्वत्वावच्छिन्नसाधारण्यादिति तत्र विशे
षणताविशेषसंबंधावच्छिन्नप्रतियोगितयोरेवावच्छेदकताशरीरे निवेशः कल्पनीय इति सर्वत्रैव विशेषणताविशेषावच्छि
न्नव्यापकताघटितावच्छेदकत्वाभावज्ञानस्यैवानुमितिविरोधित्वमुचितं एकजातीयावच्छेदकत्वाभावज्ञानकारणत्वात्तु ए राम०
वादित्याशयेनाह विशेषणताविशेषेति तुपादेयमेवेति तत्पावसाध्यतावच्छेदकसंबंधनिवेशाभिप्रायेण मूलकृता प्रतियोगिवै १०३

यधिकरणपयुपात्तमिति भावः अतिव्याप्तिवारणप्रकारं दर्शयति यत्राधिकरण इति साध्यव्यापकतावच्छेदकस्यापि कालिका
दिसंबंधेन साध्यवद्वृत्तेरभावस्य प्रतियोगितावच्छेदकतया येन संबंधेन हेतुमद्वृत्तित्वमभावस्य तेन संबंधेन स्वविशिष्टसं
बंधिनिष्ठत्वस्य वाच्यं उभयत्र विशेषणताविशेषस्यैवाभावस्य लक्षणे एकतरस्य च घटितत्वं मेयत्वादितो दोघटादि
भेदाभावस्य घटत्वादिरूपस्य तद्व्यक्तिभेदाभावस्य तदीयासाधारणधर्मरूपाभावात्मकतद्व्यक्तित्वस्य च विशेषणता
विशेषेण वृत्तेर्घटभेदत्वादिनैव लक्षणाघटकत्वसंभवः एतद्घटएतत्त्वे घटे तदन्यतरत्वावच्छिन्नभेदाभावस्य तादृशा
न्यतरत्वस्य भेदविशेषात्मकतया तादृशसंबंधेन वृत्तावपि तादृशभेदत्वानुसारेण प्रयासगौरवं गगनभिन्नमेयत्वादि
दौ गगनभेदाभावस्य शब्दात्मकस्य गगनत्वनिष्ठान्यविशेषणरूपस्य वा सत्त्वेपि नैव गगनवृत्तित्वं भेदत्वस्यालक्षणघटक
त्वासंभवात् व्यभिचारनिरूपकाधिकरणोपन्यासदत्तव्यमादायातिव्याप्तिनिराकरणायोगश्चेति तदन्यत्वप्रकारकप्रमाविषय
त्वानुसरणे यत्तु अयं घटत्वघटतद्भेदान्यतरत्वादितादृशव्यभिचारनिरूपकाधिकरणघटादिभेदस्यापि भेदत्तस्य भेदधारान

वृत्त्याभये नाधिकरणस्वरूपस्य साध्यवन्निष्ठदोन शिविशेषणात्तथा वृत्तिर्द्रव्यादिरूपाभावस्य विशेषणतानभ्युपगमा
दिति तद्रूपवत्त्वं न तत्संबंधेन व्यापकतायामवच्छेदकमिति प्रमाविषयत्वत्वात्तु भासतामिति तदसत्त्वघटादिरूपस्य भेदस्य घटा
दौवृत्तिनियामकसंबंधांतराभावेन भेदत्वरूपेणावृत्तित्वियामस्य स्वरूपसंबंधस्यावश्यापत्वात् अयोगोलकान्यत्वप्रका
रकप्रमाविषयत्वत्वापेक्षया धूमादिप्रकारकप्रमाविषयत्वत्वे धूमादिव्यापकतावच्छेदकत्वं त्वयैव धूमान्यत्वमित्यस्याशयेन तदेवा
नुसरति साध्यवत्त्वप्रकारकेति साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकावच्छिन्नप्रकारकेत्यर्थः अभावप्रतियोगितेति
अभावीयविशेषणतासंबंधावच्छिन्नप्रतियोगितेत्यर्थः अति व्याप्तिनिरासादिति स्वावच्छेदकताघटकाभावे प्रतियोगिवैयधि
करणानिवेशेपि धूमवान्वह्नेरित्यादावित्यादिः हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकरूपस्वविशिष्टसंबंधि
निष्ठाभावप्रतियोगितानवच्छेदकत्वोक्तावपेतः स्वविशिष्टसामान्ये तदवच्छिन्नाभाववत्संबंधित्वं लभ्यत इति कल्पद्वयमेवा राम०
व्याप्तिनिरासोत्थापितेस्त्वत्रानवच्छेदकत्वघटितव्याप्तिलक्षणोपपादकत्वप्रथमनिरुक्तावच्छेदकतायां निवेशो जातिमान्नभेप १०४

त्वादिस्यादेसाधारणत्वादिसमवेतत्वाप्रसिद्ध्या जातित्वादेरवच्छेदकतापादुरूपपादते नातिव्याप्तिः अवच्छेदकत्वकुरौ स्ववि
शिष्टप्रतियोगिकसाध्यतावच्छेदकसंबंधेन तदवच्छिन्नाभाववदनुयोगिकत्वनिवेशे कालो घटवान् कालपरिमाणादित्या
दावच्छेदकाप्रसिद्धिः गगनत्वादिविशिष्टप्रतियोगिककालिकसंबंधाप्रसिद्धेः एवं चरमनिरुक्तावच्छेदकतानिवेशेप
क्षेपि तत्रावच्छेदकाप्रसिद्धिः साध्यतावच्छेदकासंबंधेन गगनत्वविशिष्टसंबंधिनोऽप्रसिद्धेः दर्शितरीत्यनुसरणे च गगने स्वमि
तिकालिकसंबंधेन गगनादेरवृत्तित्वपक्षेपि प्रतियोगितानधिकरणपारिभाषिकावच्छेदावच्छेदकत्वाभावघटितव्याप्तिरेवा
नुसरणीयेत्याशयेन तत्पक्षमनुवैवनिरुक्तार्थमाहतत्पथेति साध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशपक्षेत्वन्स्यावच्छि
घत्वाभावानुयोगिविशेषणतानसंभवतिस्वावच्छेदकसंबंधेन प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावीयसाध्यतावच्छेदक
संबंधावच्छिन्नप्रतियोगितायादर्शितस्थलेऽप्रसिद्धेरिति तत्पक्षे प्रतियोगिदिशितन्निक्लिष्टवदभयाभावो निवेशितः विशे
षणतानिविशेषसंबंधनिवेशने च हेतुसमानाधिकरणकालभेदाभावस्यैव तत्संबंधावच्छिन्नप्रतियोगित्वप्रसिद्ध्यातत्सं

वंधावच्छिन्नप्रतियोगिताधर्म्मिकत्वादश्यावच्छेद्यत्वमात्राभावनिवेशोपि संभवतीति भ्रमाभावापेक्षापघपि हेतुसामाना
धिकरणाभावप्रतियोगितासामान्ये साध्यतावच्छेदकावच्छिन्नसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छेद्यत्वनिवे
शेनैवोपपत्तौस्वाभाववद्वृत्तिनिवेशनमसंगतमिति चेन्मैवं तुकेनापि तदनिवेशे प्रतियोगितायां पारिभाषिकस्यापि साध्यताव
च्छेदकावच्छेद्यत्वाभावस्य लक्षणाघटकतयालक्षणान्तरमेवेदं स्यादेतेनु मूललोकलक्षणाय इति तिपादकं न यास निवेशे वा
वैयर्थ्यमन्यथा साधनसमानाधिकरणाभावप्रतियोगितासामान्ये साधनसमानाधिकरणासामान्ये वा यद्धर्मावच्छिन्नसंबं
धिनिष्ठाभावीयत्वं पद्धर्मो विशिष्टसंबंधिनिष्ठत्वं वा तद्धर्मविशिष्टसामानाधिकरण्यस्यैव व्याप्तित्वसंभवेन भागान्तरस्य
व्यर्थत्वापादनायत्तैः वक्तव्यत्वेन … मन्तव्यमित्यर्थः हि तु समानाधिकरणाः सर्वे यद्धर्मावच्छिन्नसमानाधिकरणास्तथमाव
ली … सामानाधिकरण्यं व्याप्तिरिति व्याप्तिग्रहोपाय शेषदोषिति कृते वकेचित्तु सामान्यपदस्य व्यापकत्वार्थकतया हेतुसमा राम०
नाधिकरणाभावप्रतियोगितानिष्ठाभावप्रतियोगितानवच्छेदकं यद्विशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकाव १०५

च्छिन्नत्वाभावत्वं तादृशप्रतियोगितानिष्ठाभेदप्रतियोगितानवच्छेदको वा यद्विशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेद
कावच्छि…त्वाभावत्वे वफलितार्थस्तत्र धाभाववद्वृत्त्यानुपादाने तादृशप्रतियोगितानिष्ठाभावप्रतियोगितानवच्छेदकं यद्वि
शिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकावच्छेद्यत्वाभावमिथ्यैवपर्यवसानेनैव पर्वतवान्वह्नेरित्यादावतिव्याप्तिः मेयधूमत्व
विशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकावच्छिन्नत्वतस्य गुरुतया स्वयोगोलकभेदाद्यभावप्रतियोगितानिष्ठ
तादृशावच्छेदकावच्छेद्यत्वाभावप्रतियोगितानिष्ठतानिष्ठतादृशावच्छेदकावच्छेद्यत्वाभावप्रतियोगितायामप्यनवच्छेद
कत्वात्विशिष्टधूमत्वप्रतियोगितावच्छेदकावच्छेद्यत्वत्वरूपेणाव्यापकत्वमथ एवकृतनिवेशनं वह्न्यादिसमानाधिकरणा
तादृशत्वाभावीयापप्रतियोगितानां तद्वच्छेदकावच्छेद्यत्वत्वरूपेणाधूमादिसमानाधिकरणाभावान्तरप्रतियोगितासाधार
णानिरुक्तप्रतियोगितात्वव्यापकत्वाभावादसंभवापत्तेस्वाभाववद्वृत्त्यापादानेन च तत्प्रतियोगितावच्छेदकभेदकूटवत्तोप
पेतत्वमेदत्वाद्यपि धर्मो स्तत्तद्वच्छेद्यत्वाभावनां प्रत्येकतयाविधसकलाभावप्रतियोगितासाधारणतयातादृशानवच्छे

घत्वाभावकूटस्य प्रातिस्विकरूपेण व्यापकतानिवेशादिति व्याप्त्यनवकाश इत्याहुः । अन्येतु स्वाभावद्वयानुपादाने प्रति
योगितायोगितापाप्रतियोगिरूपतामते धूमवान्वह्नेरित्यादावतिव्याप्तिः वह्निसमानाधिकरणायोगोलकभेदाद्यभाव
प्रतियोगितायां स्वयोगोलकभेदादिरूपायां धूमवत्त्वादिविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकमहानसवृत्तित्व
विशिष्टायोगोलकभेदा[illegible]घघत्वस्य सत्वात् विशिष्टभेदत्वाद्यवच्छिन्नविशिष्टभेदरूपप्रतियोगितातः शुद्धायोगोलकभेदा
दिरूपप्रतियोगितायाः स्वानतिरेकात् स्वाभावद्वयोपादाने च स्वयोगोलभेदत्वाद्यवच्छिन्नप्रतियोगितायां धूमवत्त्वादिविशि
ष्टसंबंधिनिष्ठायोऽभावस्तन्निरूपितप्रतियोगितात्वावच्छिन्नानवच्छेदकशुद्धायोगोलकभेदत्वाद्यवच्छिन्नत्वासत्वान्नातिव्या
प्तिः तच्चैवं वह्निमान्धूमादित्यादौ धूमादिसमानाधिकरणापर्वतादिवृत्तित्वविशिष्टह्रदभेदाद्यभावीयविशिष्टह्रदभेदा
द्यात्मकप्रतियोगितायां वृक्षादिसमानाधिकरणाभावप्रतियोगितानवच्छेदकशुद्धह्रदत्वाद्यवच्छिन्नत्वमप्यक्षतं शुद्धह्र राम०
दभेदादिरूपतदभावप्रतियोगितातो विशिष्टह्रदभेदादिरूपप्रतियोगितायाः स्वानतिरेकात् इत्यव्याप्तिरसंभवो वेति वाच्यं ह्रद १०६

भेदाद्यात्मकप्रतियोगितायां शुद्धह्रदभेदत्वादावाच्छेद्यत्वसत्वेपि यदवच्छिन्नायामपि प्रति किंचिद्विशेषणावैशिष्ट्यावच्छेदेन
तदवच्छिन्नत्वाभावोपगमादित्तिदसत्त्वविशेषणावैशिष्ट्यावच्छेदेनाप्यवच्छेद्यत्वाभावोपगमे धूमवान्वह्नेरित्यादवति
व्याप्तिवारणस्याप्यशक्यत्वात् स्वयोगोलकभेदादिरूपायां शुद्धायोगोलकभेदत्वाद्यवच्छिन्नायामपि प्रतियोगितायां
किंचिद्विशेषणावैशिष्ट्यावच्छेदेन तदवच्छिन्नत्वाभावसंभवात् कं च यादृशयादृशप्रतियोगिताकं हेतुसमानाधिकरणा
भावीयत्वं तादृशतादृशरूपावच्छेदेन तत्त्वविशावच्छेद्यत्वाभावविवक्षणान्नायं दोष इति वाच्यं एवं सत्यभावद्वयानुपादा
नेपि साध्यं तु स्यात् शुद्धे विशिष्टायोगोलकभेदत्वाद्यवच्छेद्यत्वासत्त्वात् विशिष्टे तत्सत्त्वेनैव शुद्धे तत्सत्त्वविशिष्टे स्वयो
गोलकभेदत्वाद्यवच्छेद्यत्वाभावसत्त्वात् शुद्धेप्ययोगोलकभेदादिरूपप्रतियोगिनि तादृशाभावसत्तायां दुर्वारत्वात् स्वभा
वद्वयोपादानेप्यतिव्याप्तिप्रसंगादवस्थापात प्रतियोगिताघटकीकावच्छेद्यत्वाभावघटितव्याप्तिघटके समवायेन वह्निमान् धूमा
दित्यादौ साध्यतावच्छेदकनिरूपितस्वरूपसंबंधरूपावच्छेद्यत्वाप्रसिद्धा तत्र तदभावघटितलक्षणासंभवापत्तिरतःपरि

भाषिकावच्छेदकत्वाभावघटितलक्षणस्यादरणीयत्वेपिवह्निमान्धूमादित्यादौलाघवात्स्वरूपसंबंधरूपावच्छेदकत्वाभा
वघटितव्याप्तेरेवोचितासाध्यतावच्छेदकभेदेनव्याप्तिभेदात् नचैवमवच्छेदकत्वघटितव्याप्तिपक्षेपिधूमवतिकचिद्व
भावसत्वेपिसमेघवह्नित्वंगौरवाद्धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकमितिभ्रमदशायांस्वरूपेणानुमितिवारणायगुरु
धर्मावच्छिन्नसाध्यकव्याप्तिशरीरेपारिभाषिकावच्छेदकत्वाभावस्यैवनिवेशोपिवह्नित्वावच्छिन्नसाध्यकव्याप्तिशरीरेस्वरू
पसंबंधरूपावच्छेदकत्वाभावस्यलाघवान्निवेशापितुमुचितइतिवाच्यंधूमादिसमानाधिकरणाभावप्रतियोगि[illegible]त्वोघस्वरूप
संबंधरूपावच्छेदकत्वाभावस्यधूमादिव्यापकतानवच्छेदकत्वंधूमीत्वादिमत्वादिसाधारणतया[illegible]पकतावच्छेदकता
नात्मकत्वेनवह्नित्वादिधर्मिकत्वेनवच्छेदकत्वज्ञानस्याप्यहेतुत्वादितिकेपांचिन्मतमाहपरेत्वितिपदूयावच्छिन्नसाध्यकइ
त्यर्थःप्रमेयवह्नित्वादौगौरवप्रयुक्तन[illegible]दकत्वग्रहदशायांभ्रांतानांद्रव्यत्वादिव्यभिचारिलिंगेनतद्रूपावच्छिन्नसाध्यका राम०
नुमितेरनुरोधादसल्लिंगकलघुरूपसमनियतगुरुधर्मावच्छिन्नसाध्यकानुमितावप्यवच्छेदकत्वाभावघटितव्याप्तिपक्षेपा १०७

रिभाषिकावच्छेदकत्वाभावज्ञानमेवयद्यपिहेतुः तथापिवास्तविकीव्याप्तिःसद्धेतावेवेत्यभिप्रायेणसद्धेतावित्युक्तं॥वदंतीत्य
स्यस्यःमद्वचितःनहीत्यंतपदिगुरुधर्मावच्छिन्नसाध्यकस्थलेपारिभाषिकावच्छेदकत्वाभावज्ञानादनुमितिस्तदावह्नित्वाव
च्छिन्नसाध्यकस्थलेतत्ज्ञानात्कथमनुमितिरित्युक्तेरनुभवविरोधेनासंभवात्एकत्रानौपपरामर्शसत्वेविषयस्वभावात्एक
विदेवानुमितिःकचिदेत्यत्रानुभवात्संभवात्परत्वतिरेकिशिकेवलान्वयित्वभ्रमेसद्दशायांनानुमितिस्तादृशव्यतिरेकि
साध्यकेसाध्यदन्यावृत्तित्वमेवव्याप्तिर्नतुव्यापकसामानाधिकरण्यलाघवादित्युक्तिसंभवेनमूलकृतोव्यापकसामाना
धिकरण्यमात्रस्यसिद्धांतप्रयापन्नविरोधापातात्एवंसमवायेनभेदप्रतियोगितावच्छेदकजातित्वावच्छिन्नसाध्य
कानुमितौस्वरूपसंबंधरूपावच्छेदकत्वाभावज्ञानस्यहेतुसमानाधिकरणात्यंताभावप्रतियोगितापानित्यत्वादेर्वैयर्थ्येन
समवेतत्वादिकमेवावच्छेदकंनतुतादृघटितजातित्वादिकमितिज्ञानदशायांहेतोर्वृत्यभावसामानाधिकरण्यग्रहेपिजा
तित्वाद्यवच्छिन्नसाध्यकानुमित्यापत्तिःस्वत्वाभावप्रतियोगितावच्छेदकमहानसीयवह्नित्वादेर्वह्नित्वादिसमनियत्वभ्र

भेरागौरवप्रयुक्तानवच्छेदकत्वभ्रमदशायांस्वरूपसंबंधरूपतदवच्छेदकत्वस्य गुरुत्वेऽप्यनपायमहानसीयवह्नित्वावच्छिन्नसा
ध्यकानुमितिप्रसंग इति तद्रूपावच्छिन्नसाध्यकानुमितावपि स्वरूपसंबंधरूपावच्छेदकत्वाभावज्ञानहेतुत्वासंभवः वस्तुतो
भेदप्रतियोगितायांप्रसिद्धस्य स्वरूपसंबंधरूपमहानसीयवृत्तिद्रव्यत्वावच्छिन्नत्वस्य संयोगसंबंधावच्छिन्नत्वस्य च द्वयोर्व्य
तिरेको धूमत्वादिसामानाधिकरण्याभावप्रतियोगितासामान्ये वर्त्तते संयोगादिसंबंधावच्छिन्नप्रतियोगिताया द्रव्यत्वाद्य
वच्छिन्नप्रयुक्तमहानसीयवृत्तित्वादिनैवावच्छेदादिति स्वावच्छेद्यघटिताघटितोभयाभाववत्त्वधूमादिसामानाधिकरण्याभावप्रतियो
गितासामान्ये कत्वं व्यापकतानवच्छेदकसाधारणात्पाव्यापकतावच्छेदकतास्वरूपमिति वह्नित्वाद्यपि तज्ज्ञानं नानुमि
तिजनकं स्वावच्छेदकत्वाभावघटितव्याप्तिपक्षेऽपि वह्नित्वावच्छिन्नसाध्यकस्थले स्वरूपसंबंधरूपावच्छेदकत्वाभावग्रहहेतु राम०
तायाएतादृशप्रयुक्तेरवानवकाशादित्यादिकं बोध्यं केचित्तु पारिभाषिकावच्छेद्यावच्छेदकत्वघटितव्याप्तावुक्तरीत्या प्रतियो १०८
गिवैयधिकरण्यानिवेशेन लाघवात् सर्वत्रैवेतदघटितव्याप्तपदस्य चिद्भ्रमिरसवीत्समाचक्रुः तेषु हृषवर्मस्यापि स्वरूप

संबंधरूपप्रतियोगितावच्छेदकत्वं व्यवस्थाप्य तद्घटितैव व्याप्तिः परिष्कर्त्तव्येत्यत आह गौरवप्रतिसंधानदशायामिति घटत्वा
पेक्षया कंबुग्रीवादिमत्त्वादौ गुरुत्वज्ञानदशायामित्यर्थः इतिप्रतीतेर्बलादिति कस्याः कारिकायाः कंबुग्रीवादिमत्त्वाद्यात्मक
प्रतियोगिविशेषणांशे प्रतियोगितावच्छेदकत्वावगाहिन्याः प्रतीतेर्बलादित्यर्थः भवति चेति शेषः गौरवस्यावच्छेदकत्वा
व्यावर्त्तकत्वे गौरवज्ञानस्यावच्छेदकताग्रहविरोधितायसंगेन तद्दशायां तादृशप्रतीत्यनुपपत्तेरित्यर्थः उक्तप्रतीतेः स्वावच्छेद
कांशे प्रमात्वस्याविवादतया तादृशप्रतीतेरवच्छेदकत्वसाधकत्वमुपेक्ष्य गौरवज्ञानकालीनतादृशप्रतीत्यनुपपत्तिः सा
धकतयोपन्यस्तेति ध्येयं नच कंबुग्रीवादिमान्नास्तीति प्रतीतावच्छेदकत्वेन प्रकारः अपितु संबंधविशेषितदेशे तादृशसं
बंधविशेषावगाहित्वेऽपि तत्प्रकारकत्वघटितं भ्रमत्वमप्रामाण्यमिति वाच्यं भ्रमत्ववत्प्रमात्वस्यापि प्रकारकत्वादिघटि
ततया प्रमात्वे विवादानयातात् वस्तुतस्तु कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकत्वमभावे प्रतियोगिसंबंधः कंबु
ग्रीवादिमत्त्वावच्छिन्नत्वाप्रसिद्धिपक्षेऽपि विशेष्यविशेषणभावापन्नानां प्रतियोगित्वावच्छिन्नत्वकंबुग्रीवादिमत्त्वादीनां

संबंधघटकता एवं च तेषां परस्परसंबध्यमानमप्यावश्यकं तेन विना विशेष्यविशेषणभावानिर्वाहात् न संबंधसंबंधो न वि
शिष्टधीविषयः इति प्रवादस्य संबंधघटकवस्त्वंतराविशेषणत्वेन यस्य संसर्गता तत्त्वं संसर्गेण भासत इत्यर्थः तथाचोक्त
प्रतीतेरवच्छिन्नत्वे कंबुग्रीवादिमत्त्वभ्रमत्वं गुरुधर्मस्यानवच्छेदकत्वादिनां निष्कृष्टमेव संसर्गतो विशेषणाधार
तासंसर्गविशेषावच्छिन्नविषयतात्वरूपेणैव प्रकारतापाश्चमत्वघटकतोपगमात् प्रकारतात्वं पुनरखंडधर्मोत्तरसंसर्गो
तायावृत्तेम वा तेन संसर्गविशेषणताभानेन ज्ञानमपि कृत्वा तादृशधर्मपुरस्कारेणैव विषयता विशेष्यस्य विशेषणत्वान्नञ
न्यतावच्छेदकत्वात् इत्थं च नोक्तप्रतीतेः प्रतियोगितायां गुरुधर्मावच्छिन्नत्वसाधकतेत्यपवचेयं गौरवप्रतिसंधानकालीना
यां कंबुग्रीवादिमान्नास्तीति प्रतीतौ कंबुग्रीवादिमत्त्वादेः प्रतियोगितावच्छेदकत्वं न भासते अपि तु तत्सामानाधिकरताप राम०
मात्रमित्याशंक्याह तेनेत्यादि तत्प्रतियोगिकेति कंबुग्रीवादिमत्त्वाभावप्रतियोगिकत्वर्थः अवलंबनत्वे न विषयः तथाविधेति १०९
कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिकत्वर्थः तादृशप्रतीतेरनुदतितस्यास्तत्प्रतियोगिकाभावमात्रालंबनत्वेपि किंचिद

घटादिमत्त्वपिततथाविधस्य घटात्यंताभावस्य बाधेन तादृशप्रतीतिः स्यादेवेति भावः अत एवेति यत एव कंबुग्रीवादिमान्नास्ती
ति प्रतीतौ कंबुग्रीवादिमत्त्वादेः प्रतियोगितावच्छेदकत्वं नियमतो भासते गुरुरपि च धर्मः प्रतियोगितावच्छेदको अत एवेत्य
र्थः एकघटवन्नीति प्रतिपादकत्वं शब्दाद्वृपितत्यासत्यमर्थः अत्र तल्ल इति ज्ञानाकारांतर्गत एकघटवति अत्र तत्ते इत्यनयोर्मध्ये
न्वपेत उत्तरमत्रेति ज्ञानाकारांतःपूरणीयं भ्रमप्रमासाधारणं तादृशप्रतीतेरनवच्छेदकत्वावगाहित्वानियमे एतादृशस्यैतादृशप्र
तीतेः प्रमात्वस्यापि संभवेन प्रमाणाभाविस्यादित्युपहासंगतिः प्रमाणां चेति गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेवा
धितावच्छेदकत्वग्राहकत्वयाशशतौ कंबुग्रीवादिमत्त्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकरूपावच्छिन्नप्रति
योगिताकत्वमेव संसर्गतया भासत इत्युपेयं पंचयाचयुरेविनवच्छेदकत्वेपि वोक्तदोषावसर इति वाच्यं तत्प्रतियोगिताव
च्छेदकभेदेना मनेता नां संबंधघटकत्वेमामाभावात् गौरवाच्च गुरुधर्मस्यानवच्छेदकत्वे स्वगुणात् तद्गुणाकर्मान्यत्वविशिष्टसत्त्वा
दिग्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वस्य दूरानिष्ठाभावप्रतियोगितावच्छेदकत्वेत्यादिरूपसमनि

पत्तधर्म्मापेक्षया गुरोः प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावाप्रसिद्ध्या व्याप्तिरपीत्यादिना चेदिति एवं गुरोरवच्छेदक
त्वे लघुरूपेणैव विशिष्टस्याभावच्छिन्नद्रव्यत्वादौ ताद्रूप्यार्थः अत इति गौरवप्रदर्शनाय विशिष्टसत्तारूपहेत्वनुसरणं लाघवे तु गुरु
त्वाघवच्छिन्नप्रकारेणाहेतुमन्निवेशायेत्यपि विशेषणाद्रव्यत्वादिपुरस्कारेणानिवेशो लाघवादित्यर्थः ननु हेतुसमा
नाधिकरणाभावप्रतियोगितावच्छेदकताया नीताद्रूप्यावच्छेदकत्वेनाभावो व्याप्तौ निवेशनीयः किन्तु तत्तद्व्यक्तित्वेन स
र्वासामभावकूटस्यैवेति ताद्रूप्यावच्छेदकतात्वस्य गुरुतया प्रतियोगितानवच्छेदकत्वेन वा भावो व्याप्तौ निवेशनीयः
किन्तु तत्तद्व्यक्तित्वेन सर्वासामभावकूटस्यैवेति ताद्रूप्यावच्छेदकतात्वस्य गुरुतया प्रतियोगितानवच्छेदकत्वेपि न क्षतिरित्य
त आह तत्तदवच्छेदकत्वेपि प्रातिस्विकेति तत्तद्व्यक्तित्वेनेत्यर्थः ज्ञानत्वमस्त्रकृपत्वादिति अनन्तानां ताद्रूप्यावच्छेदकत्वरूप
प्रतियोगितो प्रतियोगितावच्छेदकत्वतद्व्यक्तित्वेन ज्ञानासंभवादिति भावः निर्विशेषणकस्वघटितधर्म्मापेक्षया विशिष्टस्व राम०
घटितस्यौ सत्वानवच्छेदकत्वनिर्वचनाय व्याप्तिमाह एवमिति तिरीत्येति शेषः अव्याप्यत्वाप्रसंगोऽनुसंधेयः इत्यग्रे गुरो ११०

वच्छेदकत्वमावश्यकमेवेति शेषः अत्रैव हेत्वंतरमप्याह उपदर्शितप्रकारस्यापीति व्याप्यत्वेपत्वादित्यनंतरं योज्या उप
दर्शितप्रकारस्यासंपदूभवानवाह्विरित्याहारतिव्याभिचारणायानुसृतस्य पारिभाषिकहेतुसमानाधिकरणाभावप्रति
योगितावच्छेदकत्वस्य स्वत्वादित्यादीनां प्रातिस्विकरूपावच्छिन्नतत्तत्प्रतियोगितापरिमहः उक्तैपत्वादिति तथा च गुरुध
र्म्मस्य प्रतियोगितानवच्छेदकत्वे गुरुधर्म्मावच्छिन्नसाध्यकव्यभिचारिव्याद्वन्नेशकाज्ञानव्याप्तिनिर्वचनमप्यशक्यस्या
दिति भावः उक्तस्यत्वे हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्य गुरुतया स्वरूपसंबंधरूपप्रतियोगिता
वच्छेदकत्वासंभवेपि उक्तरीत्या पारिभाषिकतदीयप्रतियोगितावच्छेदकत्वस्यैव व्याप्तौ निवेशनीयतया न तदवच्छि
न्नाभावाप्रसिद्ध्या निर्वचनाव्याप्तिरित्याशंकया उपदर्शितेत्यादि अवधारणं तु न संभवति ताद्रूप्यावच्छेदकत्वेति
घुतघावि धावच्छेदकतायां स्वपदेन तन्मात्रस्योपादानात् ताद्रूप्यावच्छेदकत्वविशिष्टव्यापकतावच्छेदकावच्छिन्नाभाव
तिवेशस्य पर्य्यवसितत्वादिति व्यभिचारित्वमपि संगच्छत इति व्यभिचारस्य सध्यतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वात्

कत्वान्गुरुत्वधर्मस्यानवच्छेदकत्वेघ्राणग्राह्यगुणत्वत्वाद्यवच्छिन्नप्रतियोगित्वाप्रसिद्ध्यातदनुपपत्तिरितिभावः नचसाध्य
तावच्छेदकविशिष्टव्यापकतावच्छेदकधर्मावच्छिन्नाभावसामानाधिकरण्यमेवव्यभिचारइत्युक्तस्यत्वेगंधवत्त्वाद्यवच्छिन्ना
भावमादायैवव्यभिचारउपपादनीयइतिवाच्यंव्यापकतावच्छेदकताशरीरेसाध्यतावच्छेदकविशिष्टसंबंधेनिष्ठाभावप्र
तियोगितानांविशेष्योपादेयत्वपातंत्र्यप्रतियोगितावच्छेदकभेदकूटस्यैवतन्मतेनीपत्वेनव्यभिचारस्यावश्यकतयाव्यनुमि
तिविरोधित्वासंभवेनव्यभिचारस्यदूषणत्वाभावप्रसक्त्यानुपपत्तिः एतेनव्यभिचारज्ञानाभावमहत्त्वतत्सामानाधिकरण्यज्ञान
स्यसाक्षादनुमितिहेतुताव्यवच्छेदकत्वासंभवेपिदर्शितः इदमुपलक्षणं ज्ञानंघ्राणग्राह्यगुणवत् उत्पत्तिकालावच्छिन्नावच्छि
न्नोघटोघ्राणग्राह्यगुणवान् इत्यादौबाधानुपपत्तिरपिद्रष्टव्या॥ ॥१॥ ॥व्याप्तिलक्षणघटकस्येसामान्याभावपार्थक्यव्य
वस्थापनमनुकूललक्षणाव्याप्तिप्रयुक्तिव्याप्तिशंकानिराकरणपरतयासंगमयितुंनत्विति अनुगतधर्मस्यवह्नित्वादेस्तद्भा राम०
वप्रतियोगितावच्छेदकतापत्त्यावश्यकत्वमदर्शनापत्तावृशभावानांवह्निर्नास्तीतिधीविषयत्वकथनंतादृशप्रतीत्याप्रति १११

योगिविशेषणतावह्नित्वेनतत्प्रतियोगितावच्छेदकत्वावगाहनात्तन्नन्यथाप्रतियोगितापाद्यावच्छिन्नत्वस्यैवाप्रसिद्धेरि
तिभावः विशेषाभावेनानातादृशबुद्धिविषयत्वस्यकृत्विशेषवत्त्वापिमहानसादौविशेषांतराभावानादायतादृशधीप्रस
गइत्याशंकावारणायच मिलितानांइतिसंमुदितानामित्यर्थकंतथाचमहानसादौवह्निप्रतियोगिकयावदभाववत्त्वविरहान्न
तिप्रसंगइतिभावः ननुतथाविधयावदभावत्वेनाभावानांनोक्तप्रतीतिविषयतासंभवः यावत्त्वस्यबुद्धिविशेषविषय
त्वरूपस्यानुपस्थितावपितादृशप्रतीत्युदयात् नापिवह्न्यभावत्वमात्रेणयावतांवह्न्यभावानांप्रकारत्वेलक्षणेपिनप
र्वतेपिवह्निर्नास्तीतिप्रत्ययापत्तेर्लक्षणानुपपत्तेः वह्न्यभावानवगाहिनस्तत्त्वेनाभावांतरमपसर्पवह्निर्नास्तीत्याकार
कतानुपपत्तेश्चेतिचेन्न वह्नित्वावच्छिन्नप्रतियोगिताकत्वेनतादृशसंबंधेनवह्निप्रकारेणाभावानांतादृशप्रतीतिविष
यत्वोपगमात् महानसेवह्निर्नास्तीत्याकारिकाप्रतीतिर्यतःकिंचिद्विशेषाभाववत्त्वेनमानाप्रमाप्यादितितुल्यवा
च्यं इदृशातिप्रसंगस्यअथकृतैवाग्रेसमाधास्यमानत्वात् धूमवतिमहानसादावितियथाश्रुतंमूलंलभ्यमभावेहेतु

सामानाधिकरण्यमुपपादयितुमुक्तं ननु सामान्यधर्म्मस्य विशेषाभावप्रतियोगितावच्छेदकत्वे हेतुमतस्तु दवच्छिन्नेऽधिकरण
त्वनियमेन स्वावच्छेदकावच्छिन्नानधिकरणवृत्त्यभावीयत्वविशेषणं कान्तत्वं न विशेषाभावप्रतियोगितानामिति कृत्यं त
मुपादयव्याप्तिप्रसक्तिरित्याशंकायामाह तत्र चेति तत्र हि भवति महानसादौ वैयधिकरण्यान्वयिघटितत्वं समम्पथेः तेषां
स्वभावानां एतत्प्रतियोगिताइत्यत्र संबध्यते स्वावच्छेदकात तद्वह्नित्वावच्छिन्नवैयधिकरण्यपतिरूपिक स्वस्वावच्छेदकत
तद्वह्नित्वावच्छिन्नानधिकरणधूमवद्वृत्तितदभावीयाइति यावत स्वंप्रतियोगितासामान्याभावेनतिरिक्तातामते तत्र
द्वह्नित्वावच्छिन्नवद्भेदातिरिक्तस्य वह्नित्वादिसाधारण्यतत्तत्प्रतियोगितावच्छेदकत्वविशिष्टावच्छिन्नवद्भेदस्याभावा
त्प्रतियोगिवैयधिकरण्यप्रवेशेरनाहस्यादिति भावः एतन्न सामान्याभावस्य विशेषाभावकूटानतिरिक्तत्ववत्सामान्य
धर्म्मावच्छिन्नप्रतियोगितायाम्यपि विशेषधर्म्मावच्छिन्नप्रतियोगिताकूटानतिरिक्तत्वमित्यभिप्रायेनाभिहितं यदि त्वभा रा०म०
वस्य नातिरिच्यते प्रतियोगितात्वविरच्यतत्सम्बन्धस्य यासामान्यधर्म्मावच्छिन्नप्रतियोगिताकत्वस्य व्यासज्यवृत्तितामुप ११२

गम्याप्यतिप्रसंगवारणासंभवादिति मतं तदापि तद्वह्निमद्भेदातिरिक्तवह्नित्वावच्छिन्नवद्भेदानभ्युपगमेन हेतुमन्नि
ष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकावच्छिन्नत्वरूपप्रतियोगिवैयधिकरण्यनिरूपकत्वं सामान्यधर्म्मावच्छिन्नप्रति
योगितायामक्षतमेवेतिन्न्याप्तिर्दुष्टव्या ॥ एतद्रूपवानेतद्रूपसादित्यादावेकवृत्तिसाध्यकेलक्षणासमनन्वयासंभवः
उक्तः नानाधिकरणवृत्तिएकव्यक्तिसत्तादिसाध्यकेपिसत्तात्वावच्छिन्नाभावस्य तत्तदधिकरणवृत्तित्वविशिष्टतदभा
वकूटानतिरिक्ततयाऽव्याप्तिर्दुष्टव्यान्वयस्वावच्छेदकविशिष्टवत्भेदसमुदायवत्त्वं स्वावच्छेदकविशिष्टावच्छिन्नप्रति
योगिताकत्वविशिष्टभेदवत्त्वं वानधिकरणतार्थः प्रतियोगिवैयधिकरण्यनिरूपकधूमवति महानसादौ चस्वसमुदायां
तर्गतमहानसादिभेदस्यासत्वात्तत्र वह्न्याद्यभावस्य प्रतियोगिवैयधिकरण्यमित्याशंकते नचैवमिति एवंमिति एवं
वह्नित्वादिविशेषाभावप्रतियोगितावच्छेदकत्वे तद्वह्नित्वात्महानसादिवृत्तित्वात्तत्तथात्वं न विशेषाभावप्रतियोगितानां
सहानसादौ प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकत्वं तथा च न कश्चित्याप्तिरिति भावं न तथा सतीति तदधि

करणोस्यावच्छेदकपर्याप्तिं चिद्धर्मावच्छिन्नसत्त्व एव प्रतियोगितायास्तद्व्यधिकरणोस्यावच्छेदकावच्छिन्नवैयधिकरण्यनिरूप
कत्व इत्यर्थः ह्रदत्वनीति धूमाभाववान्व्यपितदुक्तिस्वह्रदे ह्रदावृत्तिर्नास्तीति धीविषयह्रदनिष्ठह्रदत्ववृत्तितत्तत्पदार्थविशेषा
भावकूटस्य धूमाभावघटितत्वलाभाय तावता ह्रदावृत्तित्वस्य तत्प्रतियोगितावच्छेदकत्वे कथं नानिवृत्तिः स्वेतिवासाय
न्नैरिति धूमवान्वह्नेरित्यादावित्यादिः इदमपि विशेषधर्मावच्छिन्नप्रतियोगिताकूटस्यैव सामान्यधर्मावच्छिन्नत्वमित्यभिप्रा
येणान्यथा ह्रदावृत्तित्वादेर्धूमत्वाद्यवच्छिन्नप्रतियोगितानवच्छेदकतया धूमत्वाद्यवच्छिन्नप्रतियोगितायाः स्वावच्छेद
कावच्छिन्नवैयधिकरण्यनिरूपकत्वोपपत्तेः नच धूमाभाववत्येव घटे जलाद्यभावस्यापि वर्त्तमानत्वादिनिष्ठह्रदत्ववत्तावद्घट
त्वं प्रतियोगितावच्छेदकमित्ययोगोलके प्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणाभावाप्रसिद्ध्याऽतिव्याप्त्यसंगति
रिति वाच्यं संयोगेन गोत्वाभावादेरुभयाभावघटितस्य साध्यतावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यस्याप्रसिद्धेः रा०म०
नच यथा वह्न्यादेरपि ह्रदावृत्तितया ह्रदावृत्तित्वरूपतत्प्रतियोगितावच्छेदकावच्छिन्नस्य वह्न्यादेः संयोगेनायोगोलकवृत्तित्वान्न ३३२

संयोगेन प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यमिति वाच्यं संयोगसंबंधावच्छिन्नप्रतियोगिताकस्य गोत्वाद्यभावस्य के
वलान्वयितयाऽव्यावर्त्तकत्वेन तस्य ह्रदावृत्तिसामान्याभावप्रतीतिविषयतापत्तेरयुक्तिकत्वात् धूमाद्यभावस्यैव महानसादौ
तादृशसामान्याभावप्रतीतेः प्रमात्ववारणाय संयोगेन वृत्तिमतां धूमादीनामेव तादृशसंबंधावच्छिन्नाभावानां तादृशसंबंधाव
च्छिन्नह्रदावृत्तिसामान्याभावपरकत्वोपगमात् केचित्तु वह्निमान् धूमादित्यादावप्युक्तक्रमेण प्रतियोगिव्यधिकरणाभा
वाप्रसिद्धिभयेन प्रतियोगितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणाभावप्रतियोगिताधर्मिकसाध्य
तावच्छेदकसंबंधावच्छिन्नत्वसाध्यतावच्छेदकधर्मावच्छिन्नत्वोभयाभावघटितव्याप्तिरेवादरणीया तथाच येन संबंधेन हे
त्वधिकरणे पर्वतादौ किमपि वस्तु न वर्त्तते तादृशेन विषयितासंबंधेन तन्मात्रस्य कालोपाधित्वानभ्युपगमे कालिकसं
बंधेन च घटाद्यभावस्य प्रतियोगितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणाप्रसिद्धावपि तत्प्रतियो
गितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वाभावेन वह्निमान् धूमादित्यादौ इव धूमवान् वह्नेरित्यादावपि लक्षणासंगम

नंसंभवति तथापि तेन तदभिधानं नचैवमनुगतरूपस्य विशेषाभावप्रतियोगितानवच्छेदकत्वे तस्याभावप्रतियोगि
तामात्रेएवानवच्छेदकतया तद्रूपावच्छिन्नसाध्यकव्यभिचारिण्यतिव्याप्त्यभिधानविरोधः तद्रूपस्य प्रतियोगितासामा
न्यानवच्छेदकत्वे तद्रूपावच्छिन्नत्वस्याप्रसिध्या प्रतियोगितावच्छिन्नकोभयाभावघटितव्याप्तिलक्षणासंभवादिति
वाच्यं अननुगतधर्मस्याभावप्रतियोगितानवच्छेदकत्वे तद्रूपावच्छिन्नत्वस्याप्रसिध्या तदवच्छिन्नसाध्यकेऽव्याप्तिरिति
तन्मते साध्यतावच्छेदकसंबंधेन प्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वघटितमेव लक्षणमादरणीयं त
न्मते च ध्वाद्देः कथंचिदपि घटाद्यभावप्रतियोगितावच्छेदकावच्छिन्नत्वासंभवेन घटाद्यभावस्यैव तदवच्छिन्नव्यधिक
रणस्याप्रसिद्ध्याऽव्याप्त्यन्यकाशादित्याशेपि नाद्यतादृशातिव्याप्त्यभिधानादितिवदंति अथ वह्नित्वादेरनुगतधर्मस्यप्र
त्येकं तत्तद्वह्न्यभावप्रतियोगिताकूटातिप्रसक्ततया तदवच्छेदकत्वं न संभवतीति नोक्तक्रमेण वह्निमान् धूमादित्यादावव्या राम०
प्तिरित्याशंक्यते अथेति अभावप्रतियोगिता याः अभावप्रतियोगितासामान्यस्य अभावांतरे विशेषाभावातिरिक्तं भावेभा ११४

नाभावादितिवह्निर्नास्तीति बुद्धेर्वह्निप्रतियोगिकयावदभावत्वेन तत्तद्वह्न्यभावसमुदायस्य विषयत्वमिमात्तः तद्रू
पावच्छिन्नसाध्यकेऽननुगतरूपावच्छिन्नसाध्यके उक्तसाध्ये प्रमाणाभावमुपन्यस्य तर्कमात्रमदर्शनेन्यूनतास्यादिति के
थमन्यथेत्यादिग्रंथस्य सामान्याभावो यदि विशेषाभावेभ्यो नातिरिच्येत तदा विशेषाभावनिश्चयदशायां सामान्य
संशयानस्यादितिविषयपरिशोधकतर्कपरस्यापि प्रमाणसूचकतामाह संशयान्यथानुपपत्तिमिति यद्वा सामान्याभा
वस्य विशेषाभावानतिरिक्तत्वे विशेषाभावकूटनिश्चयकाले न सामान्यधर्मावच्छिन्नकोटिकसंशयानुपपत्तिमित्यर्थः
अत्र च सामान्याभावबुद्धेः विशेषाभावकूटविषयत्ववादिना पूर्वपक्षिणा विशेषाभावेष्वेव सामान्यधर्मावच्छिन्नप्रति
योगिताकत्वस्य स्वीकरणीयतया सामान्यधर्मावच्छिन्नाभावविषयकनिश्चयत्वरूपस्य तादृशयावद्भावनिश्चयत्वरूप
स्य वा सामान्यधर्मावच्छिन्नबुद्धिप्रतिबंधकतावच्छेदकस्य वायो रूपं नास्तीति बुद्धाविव वायौ पार्थिवादिरूपं नास्तीति बु
द्धावपि तन्मते सत्त्वेन तादृशबुद्धेरिव तादृशबुद्धेरपि वायो रूपं न वेत्यादिसंशयविरोधितापादकत्वे स्यात्तादृशबुद्धिदशायां

तथाविधसंशयानुपपत्तिरिष्टत्वान्न तथानुपपत्तेर्न्यायमतेनेष्टत्वं च कूपत्त्वाभावतामविरहेऽपि व्यतिरेकव्याप्तिरूपतद्भावस्य
त्वनुमानुयित्वयापत्तावततापरोयंग्रंथः अनुमानेच रूपत्वावच्छिन्नाभावो रूपत्वादिन्यूनवृत्तिधर्मावच्छिन्नाभावे भ्ये
भिन्नत्वात्तादृशयावदभावनिश्चयपक्षभ्यांसामान्यतो विशेषतस्ववा न व्यापककोटित्वात् घटाभाववद्दिते तादृशं बोध्यं व्याप्ति
कालीनतत्सामानधर्मितावच्छेदकसमानाधिकरणसंशयकोटित्वात् घटाभाववद्दिते तादृशं बोध्यं व्याप्तिनिश्चयपक्षभ्यां
सामान्यतो विशेषत एव वा तथा सत्यपि घटाभावादि दृष्टान्तसोलभ्यात्तत्र त्रच सामान्याभावो विशेषाभावानतिरिक्तत्वे
पित्तन्निश्चयकालीनसंशयकोटिः स्यादित्यप्रयोजकत्वशंकापाना वाकाशः सामान्याभावबुद्धेर्विशेषाभावकूटवि
षयकत्ववादिनापूर्वपक्षिणा विशेषाभावे एवसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्य स्वीकरणीयतया सामान्यध
र्मावच्छिन्नाभावविषयकनिश्चयत्वस्वरूपस्य सामान्यधर्मावच्छिन्नविशिष्टबुद्धिप्रतिबंधकतावच्छेदकस्य वायौरूपं ना — राम०
स्तीति बुद्धाविव वायौ पार्थिवादिरूपं नास्तीति बुद्धावपि सत्त्वमते सत्त्वेन तादृशबुद्धेरिव दृशबुद्धेरपि वायौ रूपं न वत्यादि — ११५

विशेषविरोधितापर्य्यवसानात् वायौ पार्थिवरूपं नास्तीति निश्चयकालीनसंशयकोटिनीलरूपाद्यभावे व्यभिचारस्वार
सायं हि तावभावे यावत्तविशेषणं सामान्याभावस्य पार्थक्येपि विशेषाभावकूटनिश्चयदशायां घटाभावत्वरूपसामा
न्याभावत्वादिना रूपविशेषाभावकोटिकसंशयोत्पत्त्या व्यभिचारस्तु निव्यधिकरणधर्मानवच्छिन्नत्वेन कोटित्वं विशेषणी
यं न च एवं तावता निश्चयकालीनसंशयः स्वप्रतियोगितावच्छेदकावच्छिन्नकोटिकत्वेन विशेषणीयः विशेषाभावनिश्चय
कालीनस्य सामान्याभावत्वेन तद्विशेषाभावसंशयस्य सामान्यधर्मपुरस्कारेणोत्पप्रतियोगिकोटिकतया सामान्य
धर्मस्य विशेषाभावप्रतियोगितानवच्छेदकतया विशेषाभावस्य स्वपदेनोपादानासंभवान्न व्यभिचारः एतेन विशे
षाभावाधिकरणस्य कसामान्याभावस्याधिकरणस्वरूपत्वे सामान्याभावत्वेन विशेषाभावनिष्ठकोटितापाद्यविकरणा
धर्मानवच्छिन्नतया तादृशकोटिताभावादपव्यभिचारस्य पूर्वकल्पे दुर्वारत्वेपि न क्षतिः द्वितीयकल्पे स्वप्रतियोगितावच्छेद
केन तेन पदूपावच्छिन्नप्रतियोगिताकत्वेन स्वस्य स्वभिन्नवृत्तितात्तद्रूपस्य विवक्षितत्वाद्रूपत्वस्य विशेषाभावात्मकतन्नि

पसामान्याभावप्रतियोगितावच्छेदकत्वेपि निरुक्तरूपत्वाभावेन तत्कल्पे उक्तदोषाभावात् नचाभावे स्वभिन्नाभावानुप
पगमे सामान्याभावाधिकरणविशेषाभावानामपि प्रकृतावच्छेदकाक्रांततत्पंऽशतोबाध इति वाच्यम् रूपसामान्याभाव
त्वेन स्वभिन्नवृत्तेरभावस्य प्रकृततया सामान्याभावपार्थक्यमते विशेषाभावानां सामान्याभावत्वेन स्वास्मिन्नेव वृत्तेरप्रकृतत्वा
त् सामान्याधिकरणपक्षांशे साध्यसिद्धेरुद्देश्यपत्तेरंशतोबाधस्यादोषत्वाच्च । नचैवमपि सामान्याभावाधिकरणाकवि
शेषाभावस्य तदात्मकतया सामान्याभावे विशेषाभावभेदो बाधित इति वाच्यं रूपवद्वृत्तिविशेषाभावानां भेदस्य साधनी
यत्वात् सामान्याभावात्मविशेषाभावस्यापि रूपवद्वृत्तित्वात् रूपवद्वृत्तित्वं रूपविशिष्टवृत्तित्वं अतो रूपसामान्याभावस्य
समयभेदावच्छेदेन रूपोपलक्षिततया न वृत्तित्वेपि न क्षतिः नचतत्तदधिकरणवृत्तित्वविशिष्टद्रव्यत्वाद्यभावकूटातिरि
क्तः शुद्धद्रव्यत्वाभाव एव घटादिरभ्युपगम्यतां तस्य च स्वत्ति घटरूपसामान्याभावात्मकतया प्रकृतावच्छेदकाक्रांततया रूपवद्भि राम०
न्नाभाव भिन्नतया वांशतो पीतरभिति वाच्यं स्वावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् वायुवृत्तित्वस्य रूपोपलक्षितधर्मि ११६

वृत्तित्वस्य वायकत्तावच्छेदकेतिविशेषो नापि तद्वारणासंभवात् घटाभावत्वादिना रूपविशेषाभावकूटनिश्चयकालीनसंशय
कोटित्वमादायविशेषाभावे व्यभिचारवारणाय भ्रमभिन्नत्वं हेतुघटकनिश्चये विशेषणीयः वस्तुतो ऽभावेऽनुयोगितासंबं
धेन प्रतियोगिभ्रमेऽप्रामाण्यशंकया वेत्याद्येपि नेदमनुमानं अन्यथा घटाभावत्वादिना रूपाभावनिश्चयदशायां रूपसंशयो
त्पादकरोचेत् पार्थिवरूपत्वादिना रूपाभावकूटनिश्चयदशायामपि रूपसामान्याभावसंशयोपपत्तेः प्रयोजकोयं हेतुः
स्यात् नच भ्रमत्वेन प्रतिबंधकत्वमाहृत्यप्रमात्वघटितहेतोरप्रयोजकत्वं निरसनीयमिति वाच्यं तथासति रूपाभावत्वेन
घटाभावादिभ्रमस्य रूपसंशयाविरोधित्वप्रसंगात् तथाच निश्चये भ्रमभिन्नत्वविशेषणमनुपादेयमेव परं तु शुद्धाभाव
त्वादिना ऽभावकूटनिश्चयकालीनसंशयकोटितामादाय व्यभिचारवारणाय प्रतियोगिवसितावच्छेदकतापन्नाभावत्वप्र
कारकोनिश्चयो निवेश्यः स्वप्ने वंसिद्धांतिमते पार्थिवं जलीयं तैजसं रूपं वायौ नास्तीत्याकारकोऽनुयोगितासंबंधेनाभावांश
प्रतियोगिप्रकारकोनिश्चयो न रूपत्वव्याप्यधर्मावच्छिन्नप्रतियोगिताकयावदभावविषयकः तद्विषयस्य पार्थिवरूपत्वादि

सामान्यधर्मावच्छिन्नाभावस्य तत्तन्मन्दरूपत्वाद्यवच्छिन्नाभावानात्मकत्वात्प्रतियोगिविशेषिततत्तद्व्यक्तित्वाद्यनन्तधर्मा
वच्छिन्नाभावकदम्बविषयकश्च प्रत्ययो नासर्वज्ञस्य संभवति· तावद्रूपेण प्रतियोगिनामनुपस्थितेः सर्वज्ञस्य च न संशयप्र
तिबन्धकत्वे हेतुरसिद्धः नन्वेकैकशस्तद्धर्मावच्छिन्नाभावनिश्चयकालीनसंशयकोटित्वेन तद्धर्मावच्छिन्नाभावभेदः
सामान्यधर्मावच्छिन्नाभावे साधनीयः स्ववच्छेदेन साध्यस्य साधनीयतया पूर्वपक्षिणामेकविशेषाभावात्मकसामान्या
भावे परविशेषाभावभेदसत्त्वेन नोशतः सिद्धसाधनं दोषायेति वाच्यं· सिद्धान्तिमते सकलविशेषाभावनिश्चयकाले सा
मान्यसंशयस्याप्रामाणिकतया पाद्दशविशेषाभावव्यक्तिनिश्चयकालेन सामान्यसंशयस्तम्भेदसाधकहेतोरप्रसिद्ध्यात
द्भेदस्य सामान्याभावे साधनासंभवात्· पूर्वपक्षिणा सामान्यसंशये रूपादिप्रतियोगिकयावदभावनिश्चयत्वेनैव प्रति
बन्धकता स्वीकर्तव्या न तु रूपत्वादिसामान्यधर्मावच्छिन्नाभावनिश्चयत्वेनैव· तथा च सामान्याभावस्य यावदेकैक   राम०
विशेषाभावनिश्चयकाले सामान्यसंशयोत्पत्त्या एकैकाभावनिश्चयकालीनसंशयकोटित्वहेतोरप्रयोजकतया दुष्टो   ११८

रत्वाच्च· एतेन विशेषाभावं पक्षीकृत्य सामान्यसंशयाव्यवहितपूर्ववर्तितत्सामान्यधर्मितावच्छेदकसमानाधिकरण
निश्चयप्रकारत्वेन हेतुना सामान्याभावभेदः साधनीयः संशयानुपपत्तिरिति नेनापि विशेषाभावस्य तादृशनिश्चय
प्रकारत्वानुपपत्तिरेव विवक्षितत्वापि परास्तु कम्· उक्तयुक्त्या सामान्याभावभेदस्य विशेषाभावे सत्त्वेप्येकैकाभाव
प्रकारकनिश्चयमादाय तत्रोक्तहेतोरुपपत्तेरप्रयोजकत्वस्य दुर्वारत्वात्· यत्तु रूपत्वावच्छिन्नाभावं पक्षीकृत्य यावि
वजलीयत्वेजसरूपत्वावच्छिन्नप्रतियोगिविशेषितनाभावनिश्चयकालीनतत्सामान्यधर्मितावच्छेदकसमानाधिक
रणसंशयकोटित्वेन हेतुना रूपत्वतुभयावृत्तिधर्मावच्छिन्नाभावभेदः साधनीयः वायुः पार्थिवजलीयत्वेजसरूपा
भाववानिति निश्चयकालीननीलरूपवान्नवा वायुरित्यादिसंशयमादाय नीलत्वावच्छिन्नाभावे व्यभिचारवारणायो
भयावृत्तित्वमेव धर्मविशेषितं न तु रूपत्वव्याप्यत्वमिति· तदपि न· उक्तनिश्चयकालीनतत्तद्रूपवान्नवा वायुरित्यादिसंशयप्र
मादाय तद्रूपत्वावच्छिन्नाभावे व्यभिचारस्य दुर्वारत्वात्· उच्यते· रूपत्वावच्छिन्नकोटिकसंशयाव्यवहितप्राक्कालीनतत्स

मात्रधर्मितावच्छेदककसमानाधिकरणतानिश्चयप्रत्वावच्छेदेन धर्मितावच्छेदकविशिष्टप्रतियोगिविशेषितद्रूपत्वावच्छि-
न्नाभावाविषयकत्वं साधनीयं । हेतुश्च तद्रूपत्वावच्छिन्नकोटिकसंशयाविरोधिनिश्चयत्वं तत्समानधर्मितावच्छेदकत्वं च
न तु धर्मितावच्छेदकताव्याप्यधर्मितावच्छेदकत्वं तेन तद्रूपवान्नवेत्यादिसंशयपूर्वकालीन नवापो पार्थिवद्रूपं नास्ति गगने
रूपं च नास्तीति समूहालम्बननिश्चयेन बाधास्तिद्वी । अपि च यत्र धर्मी सामान्यतो विशेषतश्च वस्तुगृहीता सामान्याभावप्र-
के का मन्तरेणोक्तप्रकृतावच्छेदकाक्रान्त वा पार्थिवादिरूपं नास्तीत्यादिनिश्चये तद्रूपं नास्तीति निश्चये च तद्रूपत्वावच्छि-
न्नाभावाविषयकत्वानिर्वाहात् अतिरिक्तसामान्याभावपक्षे वा न स । संशयानुपपत्तिमित्यस्य विशेषाभावकूट-
निश्चयस्य सामान्यसंशयाविरोधित्वानुपपत्तिमित्यर्थः । अभावेऽप्यतिरिक्ताभावः स्वीक्रियते तद्रूपाभिप्रायकोऽयं ग्रन्थः
इति विशेषाभावस्य स्वनिष्ठसामान्याभावरूपतया बाधस्थानकांशः अन्यथा सामान्यधर्मावच्छिन्नप्रतियोगिताक- राम०
तावगाहितायाः सामान्यप्रतिबन्धकतानवच्छेदकत्वे सामान्याभावस्य पार्थक्येऽपि विशेषाभावस्यापि स्ववृत्तिसामा- ११८

न्याभावात्मकतया तन्निश्चये सामान्यसंशयानुपपत्तेर्दुर्वारत्वात् । तदवगाहितायाः सामान्यसंशयप्रतिबन्धकताव-
च्छेदकत्वे च सामान्याभावापार्थक्येऽपि संशयोपपत्तेर्वैरूप्याभावात् न च सामान्याभावात्मकविशेषाभावनिश्चय-
पार्थक्ये तदवगाहित्वमनिवेश्यापि रूपवद्वृत्तिरूपाभावनिश्चयत्वेन प्रतिबन्धकत्वोपगमे स्वनिष्ठसामान्याभावात्म-
कविशेषाभावनिश्चयस्य सामान्यसंशयाविरोधित्वमुपपद्यत इति वाच्यं । तादृशरूपेण प्रतिबन्धकत्वे विशेषाभावध-
र्मिणि सामान्याभावत्वेन तन्निश्चयस्य सामान्यसंशयाविरोधित्वप्रसङ्गात् । अत एव विशेषाभावस्य स्वनिष्ठसामा-
न्याभावरूपतात्पर्यापि रूपसामान्याभावत्वेन वा पुनः क्षिप्ये तद्विषयत्वस्य साध्यतायां बाधव्यावर्तकतासंभवतीति । वस्तुतः
पार्थिवादिरूपाभाववान्वा परिस्पाकारकनिश्चयव्यक्तिविशिष्टोपादेयं न तदन्तरक्षणोत्पन्नसंशयकोटित्वेन तन्निश्च-
यविषयाभावभेदः । सामान्याभावे साधनीयः भावकोटिरिव दृष्टान्तो सुलभः । यन्निश्चयव्यक्त्युत्तरक्षणोत्पन्नसंशये विशे-
षाभावस्य न विषयता सैव व्यक्तिरूपादेया अतो न बाधो न वा व्यभिचारः सामान्यधर्मावच्छिन्नकोटिकसंशयेऽपावद्विशेषा

भावनिश्चयपत्या दिना प्रतिबंधकत्वे सामान्याभावस्य तन्निश्चयाविषयत्वमंतरेणा रूपत्वावच्छिन्नकोटिकतदवच्छिन्ना
भावकोटिकसंशयानिवृत्तिप्रसंगात्ता प्रयोजकत्वशंकावकाशइतिदिक् अत्र पक्षसंशयः वायौ रूपं नवेत्याकारकः प्रथमोक्तसंश
यः वायुविशेष्यकइति रूपतदभावात्मकविरोधिप्रकारद्वयावच्छिन्नवायुविशेष्यताकइत्यर्थः तस्य वायोः विशेषणत्वे
नोल्लेखादिति रूपाद्यंशे परंपरयास्वविशेषणतावोधकत्वेनैव शब्देनाभिलापादित्यर्थः सप्तम्यंतवायुपदेन रूपान्वितसप्त
म्यर्थवायोविशेषणतया प्रतिपादनादिति भावः रूपविशेष्यकइति वायुवृत्तित्वतदभावरूपप्रकारद्वयावच्छिन्नरूपवि
शेष्यताकइत्यर्थः अत्र कोटितायामिति कोटितायाप्रकारताविशेषरूपत्वादित्याशयः प्रकृतानुपयोगः अतिरिक्तसामा
न्याभावसाधकत्वेनतत्साधकोक्तहेतौ रूपाभावनिश्चयप्रतिबध्यस्य रूपकोटिकसंशयस्यैव प्रविष्टत्वादिति भावः मूलोक्त
संशयद्वयस्यैव वायुविशेष्यकत्वेनाभेदभ्रमशंकानिराकुरुते ऽत्यंतोक्त्वेति रूपवत्त्वं दन्योन्याभावेति तादात्म्यविशेषणतात्ता रा॰म॰
भ्यामित्यादिः अतएव प्रसिद्धरूपवद्भेदनिश्चयोपदर्शनमपिसंगच्छतइतिभावः पर्याप्तं तत्परित्यागेनास्वरसः संप्रदा ११९

यविद इत्यनेन दर्शितः वायौ रूपं रूपाभावो वेति धर्मिविशेषणककोटिद्वयविशेष्यकसंशयस्यैवापं विधेयताया इव को
टितायाश्चपि प्रकारत्वानिपतत्वात् नचैवमप्यरूपविशिष्टबुद्ध्यानात्मकत्वादस्य रूपाभावनिश्चयाप्रतिबध्यत्वेन पूर्ववत्
प्रकृतानुपयोगप्रसंग इतिवाच्यं धर्मिंशा रूपविशिष्टबुद्धेः स्वरूपांशे धर्मिविशिष्टबुद्धेरपि रूपाभावनिश्चयप्रतिबध्यत्वात् ध
र्मधर्मिसंबंधावगाहितायाश्च विपरीतज्ञानप्रतिबध्यतायां वीजत्वया विशेष्यविशेषणभावविपर्यासेपि तादृशबुद्धेरेकस्याः
प्रतिबध्यतानान्यस्याइत्यत्र विनिगमकाभावात् नचवायू रूपवानित्यत्र समवायो रूपसंबंधः तदपेक्षया च गुरुः शरीरेऽस
मवायप्रतियोगितारूपं संबंधेन तत्त्वं वायौ रूपमित्यत्र वायुसंबंध इतिविनिगमकासंभवतीतिवाच्यं स्वाधिकविषयकत
याऽप्रतिबध्यत्वे तदभावनिश्चयापेक्षयाऽधिकविषयकस्य तदभावव्याप्यवत्तानिश्चयादेस्तद्बुद्धौ प्रतिबंधकत्वापात्ता
त् अभयत्रैव संसर्गो वायुसंबंधतोपगमाच्च एकत्रानुयोगितासंबंधतावच्छेदकसंबंधोऽन्यत्र च प्रतियोगितेत्यभ्युपगमे
न वायू रूपवान् वायौ रूपमिति प्रतीत्योर्विशेषात् नच विशेषणे प्रकारतावच्छेदकसंबंधप्रतियोगिताया विशेष्ये चतादृ

श्रा संबंधानुयोगितापावास्तव सत्त्वं प्रतीतिः प्रमात्वप्रयोजकं तथा च घटे रूपमित्यादौ समवायस्य संबंधत्वे प्रमात्वानुप
पत्तेः रूपे घटप्रतियोगिकसमवायानुयोगितापात्वादिति वाच्यं पत्रानुयोगिता संबंधतावच्छेदकसंबंधस्तत्रैवोक्तस्य प्र
मात्वनियामकतायापत्र च प्रतियोगितातादृश संबंधस्तत्र विपरीतस्य तन्नियामकतायाः स्वीकरणीयत्वात् नचैवं सं
बंधस्यैवं योन विशिष्टधीविषयइति सिद्धांतभंगप्रसंगः अनुयोगिताप्रतियोगितयोरविषयत्वेपि संबंधतावच्छेदक
त्वसंभवात् वस्तुतो धर्मिणि धर्मस्येव धर्मेपि धर्मिणः संबंधांतरमेव न तु धर्म्यनुयोगिको यः संबंधस्तत्प्रतियोगि
त्वमेव विपरीतस्यापि वक्तुं शक्यत्वात् तथा चोभयत्र समशरीरस्य संबंधः एवं सति विशिष्य संबंधभेदनिवेशस्यावश्य
कतया उपदर्शितोभयविधबुद्धेरेकरूपेण प्रतिबध्यत्वासंभवेपित्तकृतिः प्रतिबध्यप्रतिबंधकभावद्वयस्यैवोपगंतव्य
त्वात् एवं धर्मिणि तदभाववत्प्रकारकस्येव तद्धर्मिप्रकारकस्यापि निश्चयस्य तज्ज्ञानविरोधित्वाबोधात् एवं चद्दर्शितकोटि राम०
द्वयविशेष्यकत्वानवच्छिन्नैककोटिविषयितापर्याप्त धर्म्यावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदककोटि १२०

प्रविष्टापरकोटिविषयितावत्त्वरूपसंशयत्वस्यापि निश्चयासहत्वमिति नवीनमतमादाय विरुद्धपरिस्थितिविरुद्धोभयांशे एक
धर्मिनिरूपितधर्मतावगाहित्वस्य एकस्मिंस्तादृशोभयनिरूपितधर्मतावगाहित्वस्य च द्वयोरेकत्र सत्त्वमेव संशयत्व
प्रयोजकमित्यर्थः तदुभयेति विरुद्धोभयेत्यर्थः नियता संशयत्वव्यापिकास्तीति सोभयमोक्षसंशयः नच कोटिद्वयविशेष्य
कसंशये मानाभावः प्रत्येककोटिविशेष्यकधर्मिविशेषणकज्ञानसामग्रीद्वयसमाजात् तादृशज्ञानोत्पत्तेर्बाधकाभा
वात् विरोधिद्वयनिश्चयस्य चैकदानभ्युपगमेन तस्य संशयतापत्तिप्रसंगसहत्वात् नचैकसामग्र्यास्त्वपरकार्यप्रतिरो
धकत्वात् तादृशज्ञानमिति वाच्यं तुल्यबलसामग्र्यास्तथात्वात् तस्माच्चैककोटौ धर्मिविशेषणको धर्मिणि चापरको
टिप्रकारको वा योरुपं रूपाभाववान् वायुरित्याद्याकारकोपि संशयः स्यादिति चेत् स्यादेव न चैवं आधेयतासंबंधेन र
कधर्मिसाधककोटिद्वयप्रकारकलिंगपरामर्शसंवलनदशायां कोटिद्वयविशेष्यकधर्मिविशेषणकानुमितेर्यायाभा
वव्याप्यवत्तानिश्चयप्रतिबंधकतावारणासंभवेनानुमितिरपि संशयापाकारा स्यादिति वाच्यं आधेयतासंसर्गका

ग०दी० नुमित्यनभ्युपगमसंभवेन तादृशपरामर्शघटितानुमितिसामग्र्या एवासिद्धेः धर्मिणि विपरीतकोटिसंबंधनिश्चयकत्वा
१२१ विशेषेण धर्मिणि विपरीतकोटिव्याप्यवत्तानिश्चयस्य च विपरीतकोटेः धर्मिव्याप्यवत्तानिश्चयस्यापि धर्मधर्मिभावा
वगाहित्वस्य च विशेषादिविरोधित्वात् सत्प्रतिबंधकतयैव तादृशानुमितेर्वारणासंभवाच्च धर्मधर्मिभावसंसर्गकस्यै
व धर्मधर्मिभावप्रकारकस्यापि ज्ञानस्यानुभवबलेन धर्मिणि धर्माभावनिश्चयप्रतिबध्यतावस्थाप्यरूपधर्मिक
वायुवृत्तित्वकोटिकसंशयस्य प्रकृतोपयोगित्वमुपपादयन्नामपरेषां मतमाह वायुवृत्तित्वेति। तत्तदभावान्यतरेति
तद्धर्मतद्धर्माभावान्यतरेत्यर्थः तत्राधिकरणावृत्तित्वविशिष्टबुद्ध्यावधिकोरणोतदभावनिश्चयस्य विरोधित्वे तत्राधि
करणावृत्तित्वाभाववत्त्वस्याधिकरणेतद्वत्तानिश्चयस्य प्रतिबंधकस्यादित्तिराकरणाय तत्र तत्प्रतिबंधकताया
भिप्रायं निदर्शयितुमधिकरणे तद्वत्तानिश्चयस्य तत्राधिकरणावृत्तित्वसंशयविरोधित्वाभिधानमिति न स्वप्रकृता राम०
नुपयोगिता अपिकारोऽधिकरणावृत्तित्वादिनिश्चयस्य समुच्चयपरः तत्प्रतिबंधकतायाः प्रकृतानुपयोगित्वेप्यवधा १२१

रणापरत्वशंकानिराकरणाय तत्र घटीयादानं विरोधित्वात् प्रतिबंधकत्वात् अन्यथा तत्र तदविरोधित्वेन्यपरइत्यस्वरसस्सूच
नाय तत्र द्वितीयं च तत्संबंधसंबंधादिप्रकारकत्वं तत्संबंधादिप्रकारकज्ञानेपि तदभावनिश्चयस्य -तो विरोधित्वे माना भा
वः विरोधिज्ञानांतरसंपादनद्वारैव तद्विरोधित्वोपगमादिति एतावंत्येव रूपाणीति सर्वोर्णोत्पत्तौ तैजसपार्थिवानतिरि
क्तानीत्यर्थः इत्यवधारणांसंशयस्थलेऽतिरिक्तसंभवनाविरोधित्वस्य सन्यशः निश्चयस्य सत्त्वात् यावद्रूपाभावनिर्णय
वृत्तिपावत्त्वेन रूपविषयकेतदभावविषयकै वा रूपाभावनिश्चयेऽसतीत्यर्थः रूपेतत्तद्रूपातिरिक्तत्वसंभावेनपावायु
निष्ठाभावप्रतियोगितायां रूपत्वव्यापकतायां रूपाभावेतत्तन्निरूपाभावातिरिक्तसंभावेन यावावायुनिष्ठाभावप्रतियो
गितायां रूपत्वव्यापकताया रूपाभावेतत्तन्निरूपाभावातिरिक्तसंभावनपाचवायुवृत्तित्वे रूपाभाववत्त्वव्यापकतायां
निश्चयत्वादितिभावः संशयो न विरुध्यतेदति सामान्यवमीवधिन्नवर्तौ ज्ञाने प्रतियोगिन्याभावे वा पावत्वावगाहिन
एव विरोधाभावनिश्चयस्य प्रतिबंधकत्वादितिभावः पावत्तद्रूपाभाववानिश्चियेइत्यत्र पावत्वस्य उपलक्षणतायाः शं

किंतु रूपभिन्नत्वेपि तस्योपलक्षणाविशेषणाभावभेदेनापि यावंतोऽर्थाः संभवंति तावत एव विकल्पदूषणमितियावदितिश्र
भावप्रतियोगिनिश्चयावत्पदार्थान्वयसंभवात् प्रत्येकमुभयत्रैव उपलक्षणत्वस्य विशेषणत्वस्य संभवात् विकल्पचतुष्ट
यं तेषां वा मध्ये केनापि रूपेणानिरोप इत्येकः पक्षः यावत्त्वेन तेषां वा यावन्निरोप इति द्वितीयः रूपाभाववत्त्वावच्छेदेन यावत्पुरुषत्वा
निश्चयस्तदर्थः यावंति रूपाणि तेषां केनापि रूपेण गाविशेषितानां तेषां यावन्निश्चय इति तृतीयः यावद्रूपत्वेन विशेषितानां
तेषां वा यावन्निश्चय इति चतुर्थः रूपत्वावच्छेदेन वायुवृत्त्यभावप्रतियोगित्वानिश्चयस्तदर्थः तथा निरुक्तित्वादेवेति पार्थि
वरूपत्वावच्छिन्नाभावत्वादिना केनापि रूपेण संबंधरूपाभावानां पार्थिवरूपत्वादिना केन विरूपेणाभासमानस्य सकलरूप
स्याभावानां वा निश्चितत्वादित्यर्थः प्रतियोगितिप्रतियोगिनि घटेतद्भावे च यावत्त्वाभावे पीत्यर्थः घटत्वावच्छेदेना
भावप्रतियोगिताया घटाभावत्वावच्छेदेन भूतलवृत्तितायाश्चानवगाहनेपि यावत्यावद्विशेषाभावलिंगकसामा रान०
न्याभावानुमितिस्थले यावत्त्वावगाहिविशेषाभावकूटनिश्चयस्यावश्यकत्वात्तयोरप्यानुपलब्धेरिति तस्य पार्थिवादि १२२

रूपाभाववत्त्वावच्छेदापुरितिनिश्चयेऽभावांशे यावत्त्वानवगाहनस्याकिंचित्करत्वात् रूपसामान्यसंशयस्यानुपपादकत्वा
त्यावद्विशेषाभावकूटनिश्चयस्य सामान्यसंशयप्रतिबंधकतायामतिरिक्तसंभावनाया उक्तेस्तत्कतया संशयोपपत्तिम
शंकेतेन चेति सहकृतत्वं सामानाधिकरण्यसंबंधेन मद्विशिष्टत्वं तद्दोषः यावद्रूपाभावनिश्चयः तथा रूपत्वावच्छिन्न
कोटिकसंशयविरोधीनत्वतिरिक्तरूपाप्रसिद्धात द्विषयकसंभावनानसंभवतीति कथमतिरिक्तसंभावनया संशयो
यपादनमत आह संभावना चेति संशयोपपादिकेति शेषः रूपमिति तथा च पार्थिवादिभिन्नरूपाप्रसिद्धावपि प्र
सिद्धरूपे रूपत्वेन रूपेणादौ प्रसिद्धस्य पार्थिवादिभिन्नत्वस्य संभावना संभवत्येवेति भावः ननु प्रसिद्धरूपे पार्थिवाद्यन
तिरिक्तत्वनिश्चयेन तद्धर्मिकातिरिक्तत्वसंशयो न युज्यत इत्यत आह निवर्तत इति रूपं रूपत्वसामानाधिकरण्येनातिरि
क्तत्वावगाहीनासंभावनानिश्चयादेवेत्येवकारेण रूपत्वसामानाधिकरण्यमात्रावगाहितन्निश्चयव्यवच्छेदः तथा च रू
पत्वसामानाधिकरण्येन सकलप्रसिद्धरूपेष्वनतिरिक्तत्वनिश्चयेपि तत्सामानाधिकरण्यमात्रावगाहिन्यातिरिक्त

त्वसंभावनायाः संभवात्प्रकृतसंशयोपपत्तिरिति अतिरिक्तसामान्याभाववादिमते तन्निश्चयस्य सामान्यसंशयप्रतिबं
धकतायामतिरिक्तसंभावनाविरहान्निवेशात्तदनभ्युपगमे च विशेषाभावकूटनिश्चयस्य तत्प्रतिबंधकतायां तादृशाभावनिवे
शाधिक्यादिति भावः अतिरिक्तसंभावनायामुक्तैककत्वापादितसंशयानिर्वाह इत्याह विनापीति सामान्यसंशयदर्शनात्सा
मान्यसंशयस्यानुभविकत्वात् इदमुपलक्षणं रूपसामान्यसंशयं प्रति तदभावनिश्चयप्रतिबंधकतायां रूपे पार्थिवादिति
तयभिन्नत्वसंभावनायामुक्तैककत्वे वायो रूपं नास्तीत्याकारकनिश्चयदशायामपि तादृशसंभावनया वायो रूपं न वेति सं
शयापत्तेश्चेत्यपिद्रष्टव्यं प्रकारान्तरेण संशयमुपपाद्य सामान्याभावपार्थक्यमाक्षिपति अथेत्यादिना अभावस्य सामान्या
वच्छिन्नप्रतियोगिताकत्वनिश्चयस्यैवेति रूपं नास्तीत्याद्याकारके धर्मिणि सामान्यावच्छिन्नप्रतियोगिताकत्वसंबंधेन प्रति राम०
योगिविशेषिताभावावगाहिनिश्चय एवेत्यर्थः एवकारेण विशेषधर्मावच्छिन्नप्रतियोगिताकत्वविषयकनिश्चयव्य १२३
वच्छेदः तादृशसंशयविरोधीति सामान्यधर्मावच्छिन्नकोटिकसंशयप्रतिबंधक इत्यर्थः तादृशनिश्चयत्वस्यैव तत्प्रतिब

कतावच्छेदकत्वादिति भावः अन्यथा सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वीयविषयताविशेषस्य प्रतिबंधकतावच्छेदक
कुत्रापि निवेशे तवापि अतिरिक्तसामान्याभाववादिनोपि अतिप्रसंगात् तद्रूपाभाववत्त्वादिना रूपसामान्याभावावगाहिनो
भ्रमाद्यात्मकनिश्चयस्य रूपसामान्यसंशयविरोधितापसंगात् तस्यापि वास्तवरूपत्वावच्छिन्नाभावविषयत्वात् सत्वतादृश
निश्चयः प्रकृतसंशयाव्यवहितपूर्वकाले तादृशस्य रूपं नास्तीत्याकारस्य निश्चयस्य सत्वे रूपं न वेति संशयस्य केनाप्यनभ्यु
पगमात् तथा च यावद्विशेषाभावानां तादृशनिश्चयविषयत्वमतेपि नोक्तसंशयानुपपत्तिरिति किमतिरिक्तसामान्याभावे
नेति भावः ननु विशेषाभावानामेव सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वे पृथिव्यादावपि रूपविशेषाभावसत्वाद्रूपं नास्ती
तिमतीतिप्रसंगः तादृशप्रतीतेरभावेपावत्त्वावगाहितया निराकृतत्वात् पृथिव्यादौपावच्छिन्नप्रतियोगिताकत्वमित्यपि
मेणान्वितं तथा च तादृशविशेषणान्तर्भावे तादृशप्रतियोगिताकत्वस्याप्रसिद्धिरित्यर्थः एवं च वायो रूपं नास्तीत्यादिप्रत्ययो
वाय्वादिवृत्तित्वविशिष्टाभावरूपत्वावच्छिन्नप्रतियोगिताकत्वमपीत्यपि मवगाहते पृथिव्यादिवृत्तित्वविशिष्टं च तत्पर्या

प्रवेशात्तन पृथिव्यां रूपं नास्तीति प्रत्ययः ननु विशेषणांशे भावरूपे सामान्यावच्छिन्नप्रतियोगिताकत्वासंभवात् तदंतर्भा
वेन तत्पर्याप्तिर्न संभवति तु चेवं दंडो नास्तीत्याद्यभावप्रतियोगिताधिकरणदंडत्वादेस्तदवच्छेदकत्वासंभवात्तादृ
शविशेषणविशिष्टेऽवच्छेदकत्वपर्याप्तिर्न स्यादिति वाच्यं दृष्टमत्वात् तत्र दंडत्वादिरूपविशेषणस्यावच्छेदकताया
मेवावच्छेदकत्वोपगमात् एवमन्यत्रापि कुत्रचिद्विशिष्टे पर्याप्तिर्न स्येवेत्याशयेनाह तदवच्छेदेनेति ताहशाधिकरणादृ
त्तित्वावच्छेदेनेत्यर्थः एवं च वायो रूपं नास्तीत्यादौ प्रत्यये वाधादिवृत्तित्वावच्छिन्नं रूपत्वाद्यवच्छिन्नप्रतियोगिताकत्वं भास
त इति पृथिव्यादिवृत्तित्वस्य तदनवच्छेदकत्वात् न पृथिव्यां रूपं नास्तीत्यादिमतीतिरिति भावः विशेषधर्मावच्छिन्नप्रति
योगिताकूटातिरिक्तसामान्यधर्मावच्छिन्नप्रतियोगितानभ्युपगमे विशेषधर्मावच्छिन्नप्रतियोगिताकत्वावच्छेदकपृथि
व्यादिवृत्तित्वस्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वानवच्छेदकत्वन्न संभवतीत्याशयेन सामान्यधर्मावच्छिन्नप्र
तियोगितायास्तत्र प्रतियोगिताकूटातिरिक्तत्वमभ्युपेत्यैतदुपपादयतीति संभवतीति इदं एकविशेषाभाववद्वृत्तित्वस्य रा॰म॰ १२४

सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वानवच्छेदकत्वं अतिरिक्तत्वात् विशेषरूपावच्छिन्नप्रतियोगिताभ्यो भिन्नत्वोपग
मात् सामान्याभावस्यातिरिक्तत्वेपि तथात्वस्यावश्यकत्वात् अन्यथा सामान्याभावत्वस्य विशेषाभावसाधारण्ये नाति
प्रसंगस्य दुर्वारत्वादिति भावः एकविशेषवतः पृथिव्यादेः सामान्याभाववत्त्वस्य प्रसंगः वस्तुगत्या रूपत्वाद्यवच्छिन्न
प्रतियोगिताकस्याभावस्याप्रसक्तेपि न रूपत्वाद्यवच्छिन्नप्रतियोगिताकत्वविशिष्टाभाववत्ताप्रसंगः अतो न पृथि
व्यां रूपं नास्तीत्यादिप्रत्ययप्रसंग इति भावः इदं च समाधिसौकर्येणाभिहितं सामान्यधर्मावच्छिन्नप्रतियोगितायाः
विशेषधर्मावच्छिन्नप्रतियोगितात्वस्वीकारेपि सामान्यधर्मावच्छिन्नत्वविशिष्टताहशप्रतियोगितानिरूपकत्वपृथि
व्यादिवृत्तित्वस्यानवच्छेदकत्वसंभवेनातिप्रसंगवारणसंभवात् सामान्याभावविशेषाभावप्रतियोगितावच्छेदकसा
मान्यधर्मविशेषधर्मयोर्भेदात् ताहशाभावयोर्भेद इति भिन्नयुक्तिमाशंकते नचेति विशेषधर्मावच्छिन्नप्रतियोगिताकू
टस्य सामान्यधर्मावच्छिन्नत्वोपगमे प्रतियोगिताभेदस्याभावभेदस्याभावभेदनियामकत्वेपि न समीहितसिद्धिरित्याश

पेनप्रतियोगितावच्छेदकभेदपर्य्यन्तानुधावनं नचैवं दंडत्वाद्यननुगतरूपावच्छिन्ननानादंडाद्यवच्छिन्नप्रतियोगिताकाभाव
स्यैक्यानुपपत्तिरितिवाच्यं अवच्छेदकताभेदस्यैवाविवक्षितत्वात्तत्रानुगतरूपावच्छिन्नताव्यक्तिषु तावदवच्छेदकतायाएक
स्यास्वोपगमात् अत एव महानसीयवह्नित्वपर्वतीयवह्नित्वाद्याधारभेदेपि न तदवच्छिन्नाभावभेदावभेदाप्रसिद्धिप्रसंगः अथवा
अवच्छेदकभेदः अवच्छेदकतायाः पर्य्याप्त्यधिकरणवैलक्षण्यं तथाच यादृशधर्मेयदभावीयप्रतियोगितावच्छेदकतान
पर्य्याप्ता सोऽभावस्तादृशधर्मेपर्य्याप्तप्रतियोगितावच्छेदकताकाभावभिन्न इति पर्य्यवसितं संसर्गप्रतियोगिविशेषणताया
धारताभ्यवच्छेदकत्वमेकमेवेति तेनैकाभावस्य तदुभयावच्छिन्नप्रतियोगिताकत्वानुपपत्तिरित्यभिमानः ननु प्रतियोगि
तावच्छेदकभेदेनाभावभेदकः अपितु प्रतियोगिभेद एव विशेषाभावप्रतियोगिनामेव च सामान्याभावप्रतियोगित्वान्न
नयोर्भेदः नच प्रतियोगिभेदस्य तथात्वेपि तथाच उभयप्रतियोगिकएवनैकाभावः संभवति किन्तु निखिलरूपादिप्र राम० १२५
तियोगिकएवैको रूपादिसामान्याभावः प्रतियोगिभेदस्याभावभेदकत्वे तद्व्यक्त्यन्यप्रतियोगिकत्वस्य तद्व्यक्तिप्रतियो

गिकाभावभेदव्याप्यत्वात् नच तद्व्यक्तिभिन्नप्रतियोगिकत्वस्य तद्व्यक्तित्वावच्छिन्नाभावभेदव्याप्यत्वमेव स्वीकरणीयं तथा
च एतद्रूपभिन्नरूपप्रतियोगिकतया विशेषान्तराभावस्येव सामान्याभावस्यापि एतद्रूपत्वावच्छिन्नाभावभेदसिद्धिर्दुर्वारैवे
तिवाच्यं रूपान्तरविशेषाभावस्यापि सामान्याभावतया सिद्धसाधनात् रूपत्वावच्छिन्नाभावत्वावच्छेदेन च नैतद्रूपत्वावच्छिन्ना
भावभेदसिद्धिसंभवः एतद्रूपत्वावच्छिन्नाभावस्यापि सामान्याभावत्वोपगमेन बाधात् सिद्धिसंदेहादित्यत आह प्रतियोगीति
अभेदप्रसंगादिति भेदकविरहेणाभेदानुपपत्तेरित्यर्थः तत्र भेदकान्तरानुसरणे वरं तदपेक्षया सदेवावच्छेदकस्यैव भेदकत्व
मुचितमितिभावः प्रागभावादिचतुष्कस्य प्रतियोगितावच्छेदकभेदं व्यवस्थापयन्स्वमतेन भेदमुपपादयति अवच्छेदकं
त्विति तन्त्रे त्वनवच्छेदः क्वचिदन्योन्याभावप्रतियोगितायां क्वचित् अत्यन्ताभावादिप्रतियोगितायां संसर्गस्य संयोगादेः क्व
चित् ध्वंसप्रागभावप्रतियोगितयोः पूर्वपरेति स्वपूर्वकालीनतद्घटत्वस्वोत्तरकालीनतद्घटत्वादेरित्यर्थः यथासं
ख्यमन्वयः पूर्वापरकालीनघटादिसामान्यं न कस्यापि ध्वंसादेः प्रतियोगि तत्तद्घटत्वानुधावनं प्रतियोगिताभेदस्यनि

यापकत्वं तु न निराकृतं अवच्छेदकभेदेन प्रतियोगिताभेदे च तावतापि सामान्याभावपार्थक्यसिद्धेः अवच्छेदकभेदे न तद
भेदेपि ध्वंसप्रागभावादिप्रतियोगितायाः अप्यभेदसंभवेन प्रतियोगिभेदपक्षोक्तदूषणस्यासावदुर्वचत्वादिति संयोगेन
घटो नास्तीत्यादौ संयोगी घटो नास्तीत्यादिविलक्षणप्रत्ययस्य संयोगादिनिष्ठविलक्षणावच्छेदकत्वयोरेव मानत्वात्तु भविक
त्वादित्यर्थः एवं च प्रकृतनिर्णये एकविधावच्छेदकत्वांतर्भावेऽन्यविधावच्छेदकभेदाभेदानुपपत्तिः कथंचिदवच्छेदकताद
यानुयगमे एकाभावस्यापि संसर्गप्रतियोगिविशेषणतारूपावच्छेदकयोर्भेदाभेदापत्तिरिति भावः अवच्छेदकतायां सजातीया
वच्छेदकताभेदस्याभावभेदकत्वे नोक्तदोषावसर इत्यतो दोषांतरमाह पूर्वेति प्रागभावादिति अव्यावर्तकत्वादिति भावः
ननु ध्वंसप्रागभावयोर्भेदकमन्यदेवोभयसिद्धं सदातनाभावभेदकः प्रतियोगितावच्छेदकभेदस्योपगंतव्यः प्रतियोगिभेदस्य
न तत्त्वस्य न तत्त्वसंभवः एकप्रतियोगिकान्योन्याभावात्यंताभावयोः संयोगसमवायनानासंबंधावच्छिन्नैकप्रतियोगिताकात्यं राम०
ताभावानां वा भेदापत्तेरित्यत आह किंचेति तज्जनकत्वं अभावभेदजनकत्वं अत्यंताभावादौ त्यादिना प्रागभावान्योन्याभा १२६

वयोः परिग्रहः तस्याऽत्यंताभावादीनां परस्परभेदस्य अजन्यत्वादिति तथा च तज्जनकत्वमप्रसिद्धमिति भावः वैयधिकर
रण्यादिति अवच्छेदकनिष्ठपरस्परभेदस्य व्यापकत्वाभिमताभावपरस्परभेदवैयधिकरण्यादित्यर्थः यद्यपि अभावप्र
तियोगितावच्छेदकयोरपि मिथो भिन्नतया प्रतियोगितावच्छेदकनिष्ठप्रतियोगितावच्छेदकभेदेनाभावभेदवैयधिक
रण्यं तथापि अभावांतरप्रतियोगितावच्छेदकनिष्ठस्वप्रतियोगितावच्छेदकभेदस्य स्वभेदानधिकरणे स्वस्मिन्नपि सत्त्वेन
व्यभिचारात्तत्कथ्यानधिकरणवृत्तित्वादेवेति यावत् व्यापकतापक्षे दोषांतरमाह अभेदेपीति सामान्याभावस्य विशेषाभाव
भेदेपि अविरोधात् प्रतियोगितावच्छेदकभेदाविरोधात् व्यापकव्यभिचारस्यादोषत्वादिति भावः तथा च तस्य व्यापकत्वा
नुरोधात् न सामान्याभावपार्थक्यमिति भावः व्याप्यतावच्छेदकताकत्वं तद्धर्मावच्छिन्नप्रतियोगिताकान्यत्वं च तदवच्छे
दकतानिरूपकप्रतियोगिताकान्यत्वं सामान्याभावत्वावच्छेदे न च उक्तहेतुना विशेषाभावभेदः साधनीयः अत एव विशेषाभा
वांतरे सामान्यात्यंताभावत्वेनाभ्युपगमे विशेषाभावभेदसत्त्वेपि न दोषः मानाभावात् विपक्षबाधकतर्काभावात् अत एवेति

प्रतियोगितावच्छेदकभेदस्याभावभेदाव्याप्यत्वादेवेत्यर्थः संख्यादेः सामान्यस्याभावप्रतियोगितावच्छेदकत्वं न संभवतीति न र
समनियतस्पर्शयोर्द्रव्यत्वस्येव न यावत्त्वादिति तत्र संख्येत्युक्तं आत्मत्वजातेरीश्वरसाधारण्येऽपि न न सुखादिसमनैयत्यमिति
सुखादिसामान्यस्य प्रतियोगितावच्छेदकत्वसंभवः वस्तुतोऽनवच्छेदकतासंबंधेन सुखत्वावच्छिन्नाभावो ऽत्र विवक्षितः शरी
रनिष्ठस्य च सुखादिसमनियतलघुधर्मान्तरस्यासंभवात्सामान्यस्य तथात्वकृतमिति सुखादिसामान्यमेवोपात्तं अभिन्न एवा
भावः स्वीक्रियत इति शेषः अतः प्रतियोगितावच्छेदकभेदस्याभावभेदासाधकत्वे घटत्वपटत्वावच्छिन्नाभावानामपि भेदो
न सिद्ध्येदित्यत आह भेदसिद्धिस्त्विति भाववदिति भावस्य घटपटादेर्यथा घटत्वपटत्वादिरूपविरुद्धधर्मसंबंधाद्भेदसि
द्धिस्तथा घटपटाद्यभावानामपि एकदेशकालावच्छिन्नघटपटाद्यधिकरणावृत्तित्वतदभावत्वादिरूपधर्मसंबंधाद्भि
योभेदसिद्धिरित्यर्थः पटाद्यभाववद्देः पटाद्यधिकरणावृत्तित्वं पटवति घटो नास्तीति वत् पटो वास्तीत्यादिप्रतीतिविरहात् राम०
सिध्यतीति भावः सामान्यधर्मावच्छिन्नाभावस्य विशेषधर्माश्रयपयत्किंचिदधिकरणावृत्तित्वेऽपि तत्र तादृशाभावत्व १२७

प्रकारकप्रतीतिविरहद्वद्घटादिप्रतीतिपटाद्यभाववृत्तावपि पटाद्यभावत्वप्रकारकप्रतीतिविरहस्तुल्य एवायं न शंक्यो
पपादनमिति प्रतिबंदिस्तु सिद्धांतग्रंथे स्वयमेव दर्शयिष्यतीति प्रतियोगितावच्छेदकभेदवत्वाद्विरोधोप्यभावभेदाप्रयोज
कइति दर्शयति अत एवेति गगनादीनां गगनत्वात्मत्वाद्यवच्छिन्नानां समनियतानां परस्पराभावासमानाधिकरणानां
संख्यात्वपरिमाणत्वाद्यवच्छिन्नानां एकस्यैवेति समनियतानामभावानामभेदे बाधकविरहादिति भावः प्रतियोगिनामह
त्तित्वे समनैयत्येवानान्योन्याभावस्य समनैयत्यसंभवइत्यतोऽयं तेतिअन्नइवात्राप्यसतिबाधकइति बोध्यं अत एव न भे
दवात्रयोत्पंतेनैतद्रूपरसाद्यभावानामिंद्रियग्राह्यतारामभेदएतद्रूपं नास्तीत्यादिवदेतद्रसो नास्तीत्यादिचाक्षुषाद्या
पत्तेर्बाधकतयातेषांभेद एवेति लभ्यते न चाभावानामभेदेपि रूपत्वरसत्वावच्छिन्नप्रतियोगिताकत्वानां प्रतिनिय
तेंद्रियग्रहणयोग्यतोपगमात्रोक्तातिप्रसंगः समनियतरूपरसादीनामभेदस्तु नैवमापादयितुं शक्यते सुखत्वमसु
खत्वादिजातीनां संकरापत्तेः नापि रसगुरुत्वादीनां समनैयत्यप्रसंगेन रसत्वगुरुत्वादिजातीनां भेदानुपपत्तेरिति वाच्यं

रसाद्यभावस्य चक्षुरादिग्रहणायोग्यत्वेन तद्धर्मानुयोगिताविशेषादीनामपि तद्योग्यतापादुर्वारत्वात् स्वाश्रययोग्यतायाएव
तद्योग्यताप्रयोजकत्वात् चाक्षुषादिविषयविशेषणतापाइंद्रियप्रत्यासत्तिघटकीभूतायाः सत्वे चाक्षुषादिसामग्र्यां सत्वे
न च चक्षुरादियोग्यतापादुर्वारत्वाच्च एतेनाभावानामिव तन्निष्ठानुयोगिताविशेषाणामपि प्रतियोगितावच्छेदकयोग्यताधी
नं योग्यत्वमिति निरस्तमिति केचित् वस्तुतस्तत्तदभावानामभेदेपि नञ्कृतिः भेदेपि रसाभावादिस्वत्वः संयुक्तविशेषणता
वलाच्चाक्षुषादिवारणाय भाव चाक्षुषप्रत्यक्षं प्रति चाक्षुषविषयवृत्तिधर्मावच्छिन्नप्रतियोगितापानिरूपकत्वसंबंधेन
हेतुताया आवश्यकत्वात् तदनुयोगिताभत्यक्षेपि तद्धेतुतास्वीकारे वरसत्वाद्यवच्छिन्ननिरूपितानुयोगितानामपि चाक्षुषा
दिविषयकत्ववारणासंभवात् रसादिसामान्याभावानां च चक्षुरादियोग्याभावांतरासमनियतत्वेन उभयमते चक्षुराद्ययोग्यत्वम् राम०
भावचाक्षुषादावुक्तहेतुताया उभयानुमतत्वेपि नानुयोगितानां चाक्षुषादौ कारणांतरकल्पनाविकल्पस्यभावत्तदोषानुयोगित्व १२८
योःप्रतियोगितानिरूपकत्वेनानुगमसंभवेनाभावप्रत्यक्षस्यलौपकारणानयेव निवोहात् युगपदिति। युगपद्विनष्टानां स

मानदेशानामेको ध्वंसः युगपदुत्पन्नानां समानदेशानां एक एव प्रागभाव इति येन नाप्यधिकरणानामेकनाशाभ्युपग
मेतदनधिकरणादिशांतरेपि तद्ध्वंसादिमत्वापत्तिप्रसंग इत्यतः समानदेशत्वानुसरणं समानदेशत्वं च देशतः समनैयत्यं रूप
द्वित्वादीनां समानाधिकरणानामपि एकनाशाभ्युपगमे तद्रूपाद्यनधिकरणे तद्द्वित्वाद्यधिकरणकालांतरे तद्रूपनाशादि
प्रत्ययप्रसंगात् विभिन्नावच्छेदकावच्छिन्नत्वमपि समानदेशत्वघटकं बोध्यं तेन युगपद्विनष्टानामुत्पन्नानां च स्थूलाग्रावच्छि
न्नशरीरमहीरुहादिसमवेतविभिन्नसंयोगविभागानां व्युदासः तद्ध्वंसप्रागभावानामभेदे स्थानवच्छेदकावच्छेदेनापि स्वध्वं
सादिप्रतीतिप्रसंगात् तुल्यप्रागभावेतरसकलकारणानां यावत्कार्यरूपरसादीनां प्रागभावैक्ये सामग्र्यभेदेन कार्यभेदा
नुपपत्तिरतस्तत्प्रागभावभेदस्यावश्यकत्वात् तद्व्यावर्त्तनाय समानेति वाच्यमिति दर्शितबाधकाभावपरं ननु बाधकसामा
न्याभावपरं क्रमविनष्टक्रमोत्पन्नासमानदेशानामपि ध्वंसादेरैक्यापत्त्यापत्तिप्रसंगः एवं बाधकसत्वेन युगपद्विनष्टत्वादिरू
पविशेषणवैयर्थ्यप्रसंगात् एवं सति स्वरूपरसाद्यात्मककारणभेदेनैव विभिन्नसामग्रीकारणमयाकार्यरूपरसादी

नांयुगपदुत्पन्नानांप्रागभावेकथमितिध्येयम् अभावसमनेपत्यप्रतियोगितावच्छेदकभेदादेः भेदाप्रयोजकत्वेव्यधिकरणध
र्मावच्छिन्नप्रतियोगिताकपटत्वघटत्वाद्यवच्छिन्नघटपटाभावादीनामपिनभेदः स्वीक्रियतइत्याहव्यधिकरणेतिप्रतियो
गिविशेषणतानापन्नस्यप्रतियोगितावच्छेदकत्वेनाभावबुद्धौभासतइतिनियमानभ्युपगमस्यव्यधिकरणधर्मावच्छिन्ना
भावस्यप्रामाणिकत्वेतिमनसिकृत्यचेत्प्रामाणिकइत्युक्तंप्रतियोगिनिष्ठाविभिन्नप्रतियोगिताः व्यधिकरणैः घटत्वपटत्वा
दिधर्मैरवच्छिद्यंतामित्यत्रैतेनानान्वयः धर्मैरितितुपर्यवसंबंधेनयस्यप्रतियोगिवृत्तित्वंतेनतस्यप्रतियोगितावच्छेदकत्वलाभा
पनतुधर्मत्वंविवक्षितंगगनादीनामप्यवच्छेदकत्वोपगमात्प्रतियोगितावच्छेदकसंबंधभेदेनापिनव्यधिकरणधर्मावच्छि
न्नाभावभेदइत्याहसर्वैरेवेतिसमासमानाधिकरणैःप्रतियोगिनिरूपितैस्तदनिरूपितैःसंबंधैर्व्यधिकरणधर्मावच्छिन्नाएका
भावप्रतियोगितास्त्ववच्छिद्यंतांतथाचसंयोगसमवायादिसंबंधावच्छिन्नघटत्वाद्यवच्छिन्नपरगुणाद्यभावोऽभिन्नएवेतिफलि रम०
तं व्यधिकरणसंबंधावच्छिन्नसमानाधिकरणधर्मावच्छिन्नाभावव्यधिकरणधर्मावच्छिन्नाभावयोरपिनभेदइत्याहअन्योका १२९

शाभावइतिसमवायादिनाआकाशत्वाद्यवच्छिन्नाकाशाद्यभावइत्यर्थः तथाव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकःएवं
चव्यधिकरणधर्मावच्छिन्नाभाववादितांनाभावकल्पनाधिक्यंत्वपितुप्रतियोगिताकल्पनाधिक्यमेवेतिध्येयं॥ पूर्वेपक्षिमु
खेनैवसमाधानंप्रकाशयितुंप्रथमतःप्रतिबंदिमाहएवंहीति एवंसामान्याभावस्यविशेषाभावाभेदेपिएकविशेषभाव
वत्त्यपरविशेषाधिकरणेसामान्याभावत्वविशिष्टवत्ताप्रत्ययस्यकथंचिद्रीत्यावारणसंभवेतत्तदितिपत्राधिकरणोपदेश
कालावच्छेदेननघटपटादिसत्त्वंतद्दशकालावच्छिन्नपत्तदधिकरणवृत्तित्वंतद्विशिष्टतदवच्छेदेनवाएकस्मिन्नेवाभावेदे
शतः कालतश्चाव्याप्यवृत्तिघटपटादिप्रतियोगिकत्वस्यकल्पनयापत्राधिकरणेनगोत्वाश्वत्वादिकंत्ववच्छेदकविशेषान
वच्छिन्नतदनित्वविशिष्टेतदवच्छेदवच्छेदेनवाएकस्मिन्नेवाभावेदेशतःकालतश्चाव्याप्यवृत्तिगोत्वादिप्रतियोगिकत्वस्य
कल्पनाघटादिमतितदवच्छेदकदेशकालावच्छिन्नेपटोनास्तीत्यादिवत्घटोनास्तीत्यादिप्रतीतेर्गवादावश्वत्वेनास्तीतिवद्गो
त्वेनास्तीत्यादिप्रतीतेश्चवारणसंभवेनाभावमात्रभेदएवोच्छिद्येतइत्यर्थः अवच्छिन्नानवच्छिन्नवृत्तिकत्वरूपाव्याप्यवृत्तित्व

व्याप्यवृत्तित्वयोरेकस्मिन्नप्यभावे विभिन्नप्रतियोगिकत्वावच्छेदकविधयास्वीकारे विरोधविरहादिति भावः घटपटाद्यभा
वभेदव्यवस्थापकयुक्तेः प्रकृतेतुल्यतामाह तदिति तत्प्रतियोगिकत्वमिति अभावनिष्ठघटादिप्रतियोगिकत्वमित्य
र्थः तत्स्वभावः तत्तदभावस्वरूपं अविकरणविशेषवृत्तित्वस्य तत्तद्देशकालावच्छिन्नानवच्छिन्नतत्तद्देशवृत्तित्वस्या
तर्भावः स्वाश्रयेविशेषणतया प्रवेशः अवच्छेदकत्ववासंभवतीति शेषः अभावस्य विशेषणादिकमनेनतर्भावेवस्वस्मि
न्नुयर्थ्यपि व्याप्यवृत्तित्वाद्वेतिभावः प्रकृतेयोति सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वेपीत्यर्थः समानमिति तस्याप्यभावस्व
रूपानतिरिक्तत्वादिति भावः धर्मविशेषावच्छिन्नप्रतियोगिताकत्वस्याभावस्वरूपानतिरिक्तत्वे सामान्याभावस्यानतिरि
क्तत्वे विशेषधर्मावच्छिन्नप्रतियोगिताकत्वेप्यः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्यातिरिक्ततायाम्प्यनिर्वाहेणा
एकविशेषवतिविशेषांतराभाववत्त्वेनेव सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वेनाप्यभाववत्तामत्यपप्रसंगोवोध्यः राम०
यदि चस्वभावविशेषस्यापि सामान्यावच्छिन्नप्रतियोगिताकत्वस्य तत्वेनाधिकरणावच्छिन्नत्वं स्वीकृत्यातिप्रसंगोवारपि १२०

तुंशक्यते तदा घटपटादिप्रतियोगिकत्वस्यापि तत्वेन तथात्वमुपगम्यातिप्रसंगवारणसंभवाद्घटपटाद्यभावानामपि
भेदोनसिद्ध्येत् तस्माद्घटपटाद्यभावभेदवादिनां सामान्याभावविशेषाभावभेदस्यावश्यकत्वमेवेति सामान्यधर्मावच्छिन्न
प्रतियोगिताकत्वस्याव्याप्यवृत्तित्वमुपगम्य सामान्याभावयाथर्थ्यनिराकरणे उक्तप्रतिवंदेर्दुर्वारतामालोच्य सामान्य
धर्मावच्छिन्नप्रतियोगिताकत्वं यावद्विशेषाभावेषु व्यासज्यवृत्तिषु पेमन्यंते तन्मतमपि निराकरोति अत एवेति सामा
न्याभावत्वस्य धर्मिस्वरूपानतिरिक्तत्वादेवेत्यर्थः व्यासज्यवृत्ती ति तथा च यत्किंचिद्विशेषवतियावदाश्रयसंभिक
र्षविरहेणानुपपत्तेः व्यासज्यवृत्तित्वस्वीकारानुयोगात्तन्नु सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वमतिरिक्तमेव स्वीक
र्तव्यमतोनतद्व्यासज्यवृत्ति सामान्याभावत्वयाहकाभावान्नतेनरूपेणाभावग्रहप्रसंग इति भावः अव्यासज्यवृत्तेश्र
त्येकसत्वेपत्यप्रत्येकविश्रांतत्वेनासंभवद्व्यासज्यवृत्तिताकत्वस्य तथानुपपत्तेः व्यासज्यवृत्तित्वस्वीकारानुयोगात्तन्नु सा
मान्यधर्मावच्छिन्नप्रतियोगिताकत्वमनतिरिक्तमेव स्वीकर्तव्यमतो न तद्व्यासज्यवृत्तित्वानुपपत्तिरित्यत आह तिरिक्ते

ति अतिरिक्ताभावेनेति अभावस्यातिरिक्तत्वे सामान्यावच्छिन्नप्रतियोगिताकत्वं तत्स्वरूपमेव न त्वतिरिक्तमिति हृदय
म् ननु तद्युक्तासामान्यावच्छिन्नप्रतियोगिताकत्वमतिरिक्तसामान्याभाववादिनाप्यतिरिक्तमेवोपेयम् तथा चालमति
रिक्ताभावेनेत्यत आह प्रविशेषाभावकूटेनातादृशधर्मस्य व्यासज्यवृत्तित्वेवोपत्तेः अभावविशेषस्यापि गुणादिनिष्ठबुद्धिविशे
षविषयतात्मकद्वित्वादिवत्कथंचिद्व्यासज्यवृत्तितासंभवश्चेत्यत आह किंचेति व्यासज्यवृत्तिधर्मग्रहे एकाधिकरणा
घटितत्वावदाश्रयसन्निकर्षादिहेतुरूपपत्तितदोच्यमानातिप्रसंगानवकाशात् तन्निरूपकरणापव्यधिकरणयोरित्या
दिदृष्टान्तप्रदर्शनं व्यधिकरणयोः एकाश्रयघटितसंनिकर्षरहितयोः व्यधिकरणयोः पृथिवीजलत्वादिरूपनानाविशे
षाधिकरणसन्निकृष्टानां सामान्यावच्छिन्नेति रूपत्वावच्छिन्नेत्यर्थः अयस्त्वावच्छिन्नप्रतियोगिताकत्वविशिष्टा
भाववत्तानवगाहितत्तत्प्रकृतमलीकं पृथिव्यादौ च तद्विशिष्टवत्त्वविरहेण तद्वगाहिप्रत्यक्षापादनासंभवात् निविन्नष्ट रा०म०
थिव्यादिघटितसंनिकर्षदशायां सामग्रीवत्तादृशरूपत्वाद्यवच्छिन्नप्रतियोगिताकत्वेविषयतयाप्रत्यक्षसामान्यस्यान्य १३१

त्प्रसिद्धस्यापत्तेर्दुर्वारत्वात् यावद्विशेषाभावानां सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वविशिष्टानां विशेषाधिकरणव्याह
तविलक्षणाधिकरणतोपगमेऽतिरिक्ताभाववादिमतेऽप्यगौरवात् नन्वभाववृत्तिधर्मग्रहे प्रत्यासत्त्यन्तरमिंद्रियसंयुक्तवि
शेषणविशेषणतारूपं वाच्यं तत्रेंद्रियसंयुक्तवृत्तित्वावच्छेदकत्वमेव प्रत्यासत्तिरूपेऽपि तद्रूपत्वावच्छिन्ननिरूपितानुयोगिपं
नपृथिव्यादिवृत्तित्वावच्छेदकत्वमिति यावद्विशेषाभावानामेकाश्रयघटितसन्निकर्षाव्यासज्यवृत्तितादृशाभावत्वग्रहेऽप्येतद्रूप
तेऽत्यत आह अपि चेति रूपान्तरेणामयत्वादिसामान्यप्रत्यासत्त्यासंबंधविषयावेति असन्निकृष्टस्यापि संयोगादिः संसर्ग
तयाभानोपगमादिति भावः भावाभावादीति संबंधसामान्यस्य प्रत्यासत्त्यासाधुपनीततयाहृतविलक्षणौ च विषयतयावद
श्रयसन्निकर्षजन्यतावच्छेदिकेति शेषः सामान्याभावबुद्धिप्रसंगः सामान्यावच्छिन्नप्रतियोगिताकत्वसंसर्गकाभावसाक्षा
त्कारप्रसंगः नन्वनुयोगितावच्छेदकविशेषसंसर्गकाभावलौकिकत्वस्य तादृशासंसर्गांशेऽक्तसन्निकर्षविशेषजन्यतावच्छेदक
लौकिकत्वनिरूपकविषयताविशेषशालित्वनियतत्वोपगमात् तादृशसन्निकर्षं विनाऽक्तापत्तिरित्यत आह यादृशेति

तस्य व्यासज्यवृत्तिधर्मस्यैतेषां यावदाश्रयाणां यद्यपि तेषां परस्परभेदज्ञानापेक्षैव तज्ज्ञानापेक्षायां लाभस्तथापि व्यासज्य
पाणां लौकिकप्रत्यक्षापेक्षालाभायस्त्वात् अग्राह्याश्रयज्ञानापेक्षो किं ज्ञानमप्यपेक्षातद्रूपानुषंगणात्वपः तदपेक्षा
यां प्रमाणाभ्यतावन्वयव्यतिरेकाबाह्नतदज्ञानदूष्यादिना । तद्ज्ञाने यावदाश्रयसन्निकर्षसत्त्वेपि दोषादिवशात्तृक्षा
रविरहदशायां । तदभेदज्ञाने द्वित्वादिविशिष्टाश्रयाणामभेदभ्रमतद्ग्रहात्वद्धित्वाद्याग्रहात् व्याश्रयभेदभ्रमेण एकस्मिन्ने
वमध्यपि हित्वदीधितं ड्रादौ भेदभ्रमेणरतावतापकृतेकिभापात्तसिस्यतस्याहेन चान्नेतिविशिष्यतत्तद्रूपत्वादिरूपप्रति
योगिज्ञानवच्छेदकधर्मपुरस्कारेणाश्रयानुपस्थितेरितिपावद्रूपादौ नं युगपद्सन्निकर्षादिति भावः । प्रतियोगितावच्छेदका
वच्छिन्नानुपरागेणाभावप्राकाशाकारानुपपत्तेरिति शेषः पद्मप्यनेनेदं त्वादिनाप्याभावप्रत्यक्षं संगिकरिष्यतेतथाप्यनु
भवानुरोधेनतमसस्वतत्थाभानभावीतरस्य व्यक्त वाद्वंत्वेनयावद्रूपाद्यभावज्ञानं तथापि प्रतियोगितावच्छेदकपुरस्का राम०
रेणानुपस्थितानामभावानांनभेदग्रहः । अनुभवविरोधादितितद्ध्यभासज्यवृत्तिधर्मावच्छेदप्रकारस्यैतिभावः । अत्र वच्छि १३२

त्वादिप्रत्यक्षे अनुभवानुरोधाद्यावदाश्रयप्रत्यक्षत्वेऽपि हेतुत्वेपि प्रकृते तद्धेतुत्वमप्रामाणिकं एकधर्मावच्छिन्नप्रत्यक्षादिति
न्यस्याग्रहात् त्वाश्रयप्रत्यक्षादिहेतुत्वेऽनुगतकार्य्यकारणभावासंभवात् संभवेप्यनेकसमवेतसंख्याप्रत्यक्षे वस्येवतत्र उ
न्यतावच्छेदकत्वोपगमात्स्वमतेद्विपसामान्याभावस्यविशेषाभावभेदोनिर्युक्तिक एव तत्रोपदर्शितानामभेदे बाधकानवका
शादित्यालोच्यदिगितितत्त्वं दिगर्थस्तु सामान्याभावस्यातिरिक्तस्यानभ्युपगमे रूपं नास्तीत्यादिप्रतीतिविषयतयासामान्या
वच्छिन्नप्रतियोगिताकत्वेन यावद्विशेषाभावनिरूपितातिरिक्तैकाधिकरणतास्वरूपं कल्पनीयात्र न्यथारूपादिमतिताद्द
शप्रतीतेः प्रमात्वापत्तेरिति किं लाघवं नच रूपवति तत्तद्रूपाभावरूपविषयबाधेनैव ताद्दशप्रतीतेः प्रमात्वमितिवाच्यं घटत्व
व्यक्तलमित्यादौ घटत्वादिना यावद्रूपादिमानानियमवैरुक्तप्रत्ययेपि रूपाभावत्वादिना यावद्रूपाभावादिमानानियमाव
योपत्तादिवशात्तस्माद्दितन्यताद्दशज्ञानेर्बाधिताभावमात्रभानसंभवात् नच शब्दविशेषादेर्यावदभावावगाहित्वंका
र्य्यतावच्छेदकं कल्पयितुं शक्यते येन नियमः स्यात् तथा सतितौरवात् सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वे व्यासज्यवृत्ति

त्वकल्पनवैयर्थ्याच्चातिरिक्ताधिकरणतानभ्युपगमेप्रतिबंधकसमवहितेपिप्रतिबंधकतावच्छेदकधर्मावच्छिन्नाभावत्व
रूपकारणतावच्छेदकावच्छिन्नविशेषाभावसंबंधस्यकार्योत्पत्तिप्रयोजकस्याक्षतत्वात्तदापत्तिरितिकेचित् तन्नसामान्य
भावपार्थक्येपियावद्रूपाभावाद्यवच्छिन्ननिरूपिताधिकरणताविशेषकल्पनआवश्यकंरूपवतियावत्तादृशाभावप्रती
तिःप्रमात्वात्सैववाधिकरणतासामान्यावच्छिन्नप्रतियोगिताकत्वविशिष्टनिरूपितानन्त्वतिरिक्ताइतिसामान्याभावपा
र्थक्यवादिभिरभ्युपगमात्घटपटाद्यभावानामभेदेघटाभावत्वपटाभावत्वावच्छिन्नाधिकरणतानामतिरिक्तानांकल्प
नावश्यकत्वेनताधिकरणत्वानामभावेवनिर्वाहासंभवादितिदर्शितप्रतिबंधानवकाशात् वस्तुतःकारणतावच्छेदकोपल
क्षितकारणत्वंसर्वत्रकार्योत्पत्तौतंत्रंनतुविशिष्टसत्वंगौरवादितिपरामर्शेव्यक्तंवक्ष्यतेएवंचसामान्यधर्मावच्छिन्नप्रतियोगि
कात्वस्यविशेषाभावेऽप्युपगमेतद्विशिष्टाधिकरणतायाविलक्षणत्वेपिप्रतिबंधकविशेषाभावात्कार्योत्पत्तिप्रसंगोदुर्वारस्य राम०
वेतियुक्तिरेवंदिशास्येनेनदर्शिता सार्वभौममतमाह केचित्तितिननुसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वविशिष्टाभा १३२

वस्यातिरिक्तस्यकल्पनापक्षेप्यतिरिक्तयोर्विशेष्यविशेषणयोःकल्पनीयत्तयाकल्पनीयांशसाम्यमित्याशंक्याहकल्प
नीयेतिशरीरस्यांशस्यएतदपेक्षयातिरिक्तसामान्याभाववादिमतापेक्षया·तस्यतदनतिरिक्ताभाववादिमतस्यगुरुत्व
दितिसामान्याभावत्वकल्पनायांधर्मिणामानंत्यादितिभावःअभ्युपेत्याहविनिगमकेतिन्यस्तूहेवेति सिद्धिविरोधि
नोगौरवस्यानवकाशादितिभावःननुधर्मकल्पनातोधर्मिकल्पनागरीयसीतिप्रवादादतिरिक्ताभावरूपधर्मिकल्पनं
गौरवपराहतमित्यतआहधर्मेति कल्पनीयानेकत्वेति धर्मकल्पनापक्षेकश्चित्तन्मात्रकल्पनाधर्मिपक्षेतुधर्मस्यापि
कल्पनीयत्वात्तदुभयकल्पनेतिकल्पनाधिक्यमयुक्तमेवननुधर्मिकल्पनामात्रमयुक्तमित्यर्थःतथाचप्रकृतेकल्प
नीयाधिक्यविरहादतिरिक्तसामान्याभावपक्षेनगौरवमितिभावःगौरवांतरमाशंक्यकृतेनचेतिलघीयसीतिनचसामा
न्यधर्मावच्छिन्नप्रतियोगिताकत्वस्यानंताभाववृत्तित्वकल्पनासाम्यमितिवाच्यंविशेषाभावानामपिसामान्याभावाधि
करणतयासामान्यधर्मावच्छिन्नप्रतियोगिताकत्वेयावद्धर्मिवृत्तित्वंकल्पनीयंतदपेक्षयातिरिक्तसामान्याभावेएकवृत्ति

त्वकल्पनं तेषां भूयस्त्वेन साम्यानवकाशात् एवं सतीति एवं कल्पनीये ऽभावे तत्रानंताधिकरणवृत्तित्वकल्पनागौरवस्य
दीयावत्तारविषयस्यातिरिक्ताभावसिद्धिविरोधित्वमभावमात्रेति अधिकरणादेरभावत्वकल्पनादेवोपपत्तेर्भावाति
रिक्तः कोप्यभावो न सिद्ध्येदित्यर्थः अतिरिक्ताभावस्य तत्रानंताधिकरणवृत्तित्वस्य च कल्पनापेक्षया भावत्वेनानंताधि
करणादिवृत्तित्वादिकल्पनाया लघुत्वादिति भावः ॥ ॥ व्यधिकरणावह्निधूमयोर्व्याप्यनभ्युपगमेन वह्निमान् धूमा
दित्यादौ तत्तद्धूमाद्यभावमादाय दोषासंस्पर्शी द्विशेषलक्षणेऽन्यत्राव्याप्तिमाशंकते अथात्रेति नानाव्यक्तिकेति पदा
प्यवच्छेदकघटितमक्तलक्षणे यथा पावत हेतुव्यधिकरणवृत्तिसाध्यैकविरहेण सकलसाध्यव्यक्तीनामेव हेतुसमानाधि
करणतत्तद्व्यक्तित्वाद्यवच्छिन्नाभावप्रतियोगितया हेतुसमानाधिकरणाभावाप्रतियोगिसाध्यं दुर्भिक्षं तथा साध्यैकेपि
प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणहेतुमन्निष्ठत्वाद्यवच्छिन्नाभावप्रतियोगितायाः साध्येऽक्षततथा राम०
ट्व्याप्तिर्दुर्वारैव उभयाभावघटितप्रतियोगितावच्छेदकावच्छिन्नत्वे व्यधिकरणपनिवेशपक्षे च एतद्दूपत्वात् एतदुसादि १३४

त्पादावपि एतद्रूपतद्रूपयोऽभयत्वाद्यवच्छिन्नाभावेपि तस्य सत्त्वेन लक्षणागमनाभावादसंभव एव तथापि यथाश्रुतप्र
तियोगिवैयधिकरण्यपनिवेशेपीत्यस्यादौ पूरणीय तथा चासंगतिः तन्निवेशाभिप्रायेणोक्तपाध्यायस्यैतद्दोषस्योद्धरणा
प्रकारमाशंकते नन्विति तत्र पृथिवीत्वादिहेतुके साध्यं व्यापकं तयाच रूपव्याप्तेस्तत्रानभ्युपगमात्राव्याप्तिरिति भावः
ननु रूपवत्त्वं रूपसमवायः तस्य च समवायैक्यमते साध्यतानिर्वाहेपि तन्मते द्रव्यत्वादिनापि शक्यसाधनस्य वाय्वादिसा
धारणस्य तस्य सिद्धावपि रूपस्यासिद्धानतत्सिद्ध्युपरोधेन पृथिवीत्वादौ रूपव्याप्तेरावश्यकत्वे च इत्यत आह तच्चेति
तच्चाप्रकृतसाध्यं रूपवत्त्वादिकं च परंपरासंबंधेन साध्यमानमिति शेषः परंपरासंबंधेन स्वसमवायिरूपायात्मके नरू
पत्वादेः पक्षे सिद्धावेव रूपादेस्तत्र सिद्धिनिर्वाह इति भावः ननु रूपत्वादेरपि समवायादिना हेतुमन्निष्ठाभावप्रतियो
गित्वात् कथं व्यापकत्वनिर्वाह इत्यत आह तेनेति तेन स्वसमवायिरूपाद्यात्मकेन तदभाव इति तथा च साध्यता
वच्छेदकसंबंधावच्छिन्नप्रतियोगितायास्तादृशसंबंधेन प्रतियोगिवैयधिकरण्यस्यानिवेशान्नानुपपत्तिरिति भावः

न्नसाध्यतापत्तेरिति पृथिवीत्वादिलिंगकपरामर्शजन्यानुमितौ समवायादिना विषयतानुपपत्तेरित्यर्थः तथा चानुम
विकत्वदुपपत्तेरूपादिव्याप्तेरावश्यकत्वाद्व्याप्तिर्ध्रुवैवेति भावः नन्ववच्छेदकत्वघटितलक्षणापक्षेपि नाव्याप्तिः दण्डा
द्यवच्छिन्नसाध्यकव्याप्तेर्निर्वाहेण प्रातिस्विकरूपाद्यवच्छिन्नसकलदण्डाद्यवच्छिन्नव्यभिचारितो तु कानुमितौ दण्डादिवि
शेषणावच्छेदकत्वं यथोपलप्यते न यथैतल्लक्षणापक्षे पृथिवीत्वादिलिंगकानुमितौ रूपादेर्विक्षेपताप्युपपत्त्यपनोपाइत्य
न्तः प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यापनिवेशावश्यकत्वाभिप्रायेण दोषान्तरमाह द्रव्यान्यत्वादीति सत्तादीना
दिना गुणान्यत्वादिविशिष्टसत्तादिसाध्यकपरिग्रहः विशिष्टप्रतियोगिवैयधिकरण्यप्रवेशनप्रयोजनं प्रकाशयति न्न
न्यथेति विशिष्टतया द्रव्यान्यत्वादिविशिष्टतया सत्त्वादेः साध्यत्वे व्यभिचारिणि भ्रमविषयत्वेपैव साधकेऽतिप्रसंगादक्ष
मं विनापि गुणत्वादावविवविशिष्टवैशिष्ट्यसाधकताप्रसंगात् न च द्रव्यादौ द्रव्यान्यत्वादिविशिष्टसत्तासिद्धिवैधर्म्यादेव बाधकथा राम०
पादेन बाधानवतारदशायामापत्तेर्दुर्वारत्वात् अन्यथा सामानाधिकरण्यमात्रस्य व्याप्तित्वापत्तेः बाधादेव बाधादौ १३५

द्रव्यत्वादिना रूपाद्यनुमानोपपत्तेः ननु विशिष्यवति विशिष्टाभावप्रतीतिर्विशेषणाभावं सर्वत्र विशेष्यविशेषणोभ
यसंबंधाभावं वान्यत्रावगाहते न तु विशेष्यप्रतियोगिकाभावं प्रतियोगिमति विरोधेनाभावासत्त्वात् तत्कथं विशिष्टाभा
वमादाय सत्तादिसाध्यकेऽव्याप्तिः न चैवं विशिष्टसत्तादिसाध्यके ज्ञानत्वादिहेतौ तावति व्याप्तिज्ञानीतिमन्निष्ठाभावप्रतियो
गितायाः सत्तात्मकसाध्येऽसत्त्वादिति वाच्यं गुणान्यत्वविशिष्टत्वादिनापि सत्तादेः साध्यत्वे ज्ञानत्वादिहेतौ व्याप्यत्वोपगमात्
विशेषणविशेष्यसंबंधस्य साध्यतायामेव तादृशहेतौ रत्नकृतोपगमादित्यत आह सुखादाविष्यते चेति विशिष्टाभावोऽन्यति
रिक्तो विशेषणाभावो वा भवतु तस्य विशेषणावच्छिन्नविशेष्यप्रतियोगिकत्वमावश्यकं विशेषणावच्छिन्नविशेष्यज्ञानं
विनाऽसंभवेत्वात्तत्प्रतीतेः तादृशविशेष्यप्रतियोगितार्हितायाइरपन्नत्वादिति भावः विशिष्टस्यातिरिक्तत्वमते वि
शिष्टाभावमादायेन दूषणावसर इति एकव्यक्तिसाध्येपि द्वित्वाद्यवच्छिन्नसाध्याभावमादाय दूषणमाह द्वित्वेति तत्र हे
तुमति न च विशिष्टस्यातिरिक्तत्वे प्रतियोगितावच्छेदकावच्छिन्नत्वाविशेषितप्रतियोग्यप्रसिद्धानाधिकरणपदमनिवेशनी

प्रमितिनोभयाभावादिकमादायातिव्याप्तिप्रसक्तिरितिवाच्यं॰ सत्तागुणत्वोभयवान्द्रव्यत्वादित्यादावतिव्याप्तिवारणाय विशि
ष्टस्यातिरिक्ततामतेपिप्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशनस्यावश्यकत्वात् नचद्रव्यत्वादौसत्तादिव्याप्तिरिहैव
गुणत्वादेश्चतत्समानाधिकरणप्रतियोगिव्यधिकरणाभावान्तरप्रतियोगित्वान्नतद्व्यापकतापत्तिरिति किन्तद्विवक्षये
तिवाच्यं॰ गुणत्वस्यतादृशाभावप्रतियोगित्वेपिसत्तागुणत्वोभयत्वसामानाधिकरण्येनतादृशप्रतियोगित्वाभावसत्वा
च्छ्रंभंवितैवद्रव्यत्वंहेतुकापादृश्यंसत्तागुणत्वोभयवदित्यनुमितेर्वारणायाभावप्रतियोगितावच्छेदकावच्छिन्नवैयधिक
रणस्यावश्यंनिवेशनीयत्वात्॰ वह्नित्वाद्यवच्छिन्नेनकिंचिद्धूमादिव्यक्तिसमानाधिकरणाभावप्रतियोगित्वासत्वेन
विधेयतावच्छेदकसामानाधिकरण्येनतादृशाभावप्रतियोगिज्ञानस्यैवानुमितिहेतुतया॰ प्रतियोगित्वाभावघटितज्ञ
न्यतावादिनास्वीकरणीयत्वात् अत्रप्रतियोगितावच्छेदकदेशकालावच्छिन्नयत्किंचित्स्थलेपिसमुद्वसमवायादिनाव्यापकता राम०
श्चयहान्नतद्विशिष्टानुयोगिकवैशिष्ट्यानुमितिरप्यापत्तिरंगीक्रियतेतेनयाविशेषणतावैशिष्ट्यावच्छिन्नसत्वादिसा १३६

ध्यकेपिविशिष्टप्रतियोगिकसमवायादिनाव्यापकतापत्रह्मत्तरेणानविशिष्टवैशिष्ट्यानुमितिस्तैरुपगन्तव्येतिसाध्यता
वच्छेदकसंबंधेनप्रतियोगितावच्छेदकाविशेषितप्रतियोगिवैयधिकरण्यनिवेशेपिनातिप्रसंगइतिनविशिष्टाभावमा
दायवह्नित्वाद्यवच्छिन्नाभावमादायवासद्धेतावव्याप्तिः साध्यतावच्छेदकविशिष्टनिरूपितसमवायादिनाप्रतियोग्यनधि
करणस्यहेत्वधिकरणस्यासद्धेतावप्रसिद्ध्यापिनक्षतिः उभयाभावघटितप्रतियोगिवैयधिकरण्यस्यप्रवेशनीयत्वा
द्विशिष्टसाध्यकस्थलएववाविशिष्टवैशिष्ट्यानुमितेरुपपत्तेः नचविशिष्टप्रतियोग्यसामानाधिकरण्यानिवेशेद्र
व्यंसत्तागुणत्वोभयवत् द्रव्यत्वादित्यादौकथितान्यातिप्रसंगोदुर्वारइतिवाच्यं॰ तत्रोभयत्वोपलक्षितवत्तानुमितेःप्रमा
रूपतयादृष्टत्वात् विशिष्टवैशिष्ट्यानुमितेश्चाङ्गीकृत्यावारणासंभवादितिपथाश्रुतलक्षणपरिष्कारप्रकारेहेयः॰ त
थापिधूमादिनापर्वतादौस्वपूर्वदृष्टाद्यनुमानानुपपत्तेर्दुर्वारत्वात्क्वचिदपिवह्नौधूमसमानाधिकरणाभा
वप्रतियोगित्वासत्वात् पर्वतीयधूमसमानाधिकरणाभावप्रतियोगित्वस्यान्यवह्नावसत्वात् पर्वतीयवह्नेरसन्निकर्षेण

तत्र दुर्गेहत्वात् महानसीयधूमसमानाधिकरणाभावप्रतियोगित्वस्य तादृशवह्नौ गृहीतत्वेपि तत्र व्यहस्य तादृशधूमेपक्षत्वे
ऽभेतावग्रहविरहे यात्किंचित्करत्वात् तत्र व्याप्तिपदार्थनिर्वचनमिदं न तत्तु अनुमित्युपयोगिव्याप्तिस्वरूपकथनमिति वाच्यं स्वार्थे
तरप्रसंगात् धूमो वह्निव्याप्य इत्यादौ तत्र धूमत्वादिप्रकारेण हेतुत्वनुपस्थितिस्तत्र धूमादिसमानाधिकरणाभावाप्रतियो
गित्वस्य तद्वेन बोधयितुमशक्यत्वाच्च यत्तु सामानाधिकरण्यस्याव्याप्यवृत्तितामभ्युपेत्य तल्लक्षणं तथा च हेत्वधिकर
णावच्छेदेन साध्याभाववत्त्वविशिष्टसाध्यसामानाधिकरण्याभाववान् साध्याभाववत्त्वसाध्यसामानाधिकरण्योभयाभा
ववान् वाभावो भावांतार्थः केवलान्वयिपि दिग्वाघवछिन्नसंबंधांतरावछिन्नप्रतियोगिताक एव साध्याभावः प्रसिद्धः न
न च प्रमेयमात्रसाध्यकस्थले भावमात्रस्यैव साध्याभाववत्तया साध्याभावनिष्ठसाध्यसामानाधिकरण्यशून्याभा
वाप्रसिद्धिरिति वाच्यं स्वाभावप्रतियोगिसाध्यस्यावृत्तिमत्त्वेन विशेषणीयत्वात् वृत्तेरभावस्यैव तादृशस्य प्रसिद्धेस्त राम०
त्प्रतियोगिनोऽवृत्तेरनुमेयत्वाद्व्यापकताविरहे क्षतिविरहात् इति तदपि न तदात्म्येन प्रमेयमात्रसाध्यकस्थलेवक्त १३७

मात्र एव व्यापकतायाऽउपपादनीयतयोक्तप्रकारासंभवात् पदिचसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यनिष्ठप्रतियोगिक
त्वसाध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्योभयाभाववत्त्वं हेतुसमानाधिकरणाभावे निवेशयतस्तदानायं दोषः
तच्चैवं भेदात्मकस्य सर्वस्यैवाभावस्य तादृशोभयाभाववत्त्वात् तादृशाभावीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगि
ताप्रसिद्ध्याऽव्याप्तिरिति वाच्यं तादृशाभावीयप्रतियोगितासामान्ये साध्यतावच्छेदकसंबंधावच्छिन्नत्वसाध्यवृत्तित्वोभया
भावस्य विवक्षितत्वात् एवं सामानाधिकरण्यस्याव्याप्यवृत्तित्वे साध्यतावच्छेदकसंबंधावच्छिन्नसाध्याभावीयत्वसाध्यव
दनुयोगिकत्वोभयाभाववद्धेतुमन्निष्ठाधिकरणताकात्वमभावे विशेषणीयम् एतत्समाधानमाशंकतेऽन्यथेति प्रति
योगित्वस्याव्याप्यवृत्तित्वेपि प्रतियोगिमतिभेदेहसत्तु घटत्वयाने जोक्तिताभावपरता भाहु प्रतियोगित्वभिन्नप्रतियोगिनिष्ठ
तियोगितावच्छेदकस्वीकारेव्यभिचारिणि आत्मनिष्ठ्याप्तिमाशंक्याह स चेति येन रूपेणेति यद्रूपावच्छिन्नसाध्येऽइत्यर्थः तद्रूपा
वच्छिन्नव्याप्यत्वमिति तथा च धूमत्वादिना वह्न्यादिमन्निष्ठाभावप्रतियोगिनो धूमादेर्द्रव्यत्वादिना तत्वाभाववत्त्वेपिन

ह्यादेः धूमत्वावच्छिन्नव्याप्यतापत्तिः धूमत्वावच्छिन्नव्याप्यत्वं वह्नेरेवेति भावः ननु तत्तद्व्यक्तित्वादिना घटपटादिनिष्ठा
भावप्रतियोगितानिरूपकादौ प्रतियोगितानवच्छेदकरूपत्वावच्छेदेन तदभाववत्त्वं मानाभावादित्यत आह स्वस्येति स्वघ
टपृथिव्यादिनिष्ठाभावप्रतियोगित्वाभावः इतिमत्याद्याकारकप्रतियोगित्वाभावावगाहिप्रत्ययस्यानुभविकत्वात् स्वप्र
मतत्पदस्य प्रतियोगितापरत्वं स्फुटमपि तु प्रतियोगितापदस्य समासाभिधानं ननु शङ्खबुलातिलभ्यंरूपत्वावच्छिन्नप्रतियो
गित्वाभावं परिष्कृत्य रूपत्वादिनिष्ठतदवच्छेदकत्वाभावगर्भितत्वं कुतः स्वीक्रियते इत्यत आह सर्वत्रेति तद्धर्मस्वरूपसंबंधात्म
कतदवच्छेदकतासिद्धौ तद्धर्मविरोधिसामानाधिकरण्यमात्रावगाहिप्रतीतेरबाधकतया रूपत्वे पृथिवीनिष्ठाभावप्रतियोगि
तात्वरूपानुगमत्तन्तद्रूपावच्छिन्नप्रतियोगितावच्छेदकत्वावगाहित्वसूचनाय सर्वत्रेत्युक्तं ननु कारीत्यारूपत्वेनातिरिक्तवृत्ति
त्वरूपं तादृशप्रतियोगितात्वावच्छिन्ननिरूपितमवच्छेदकत्वमेवावगाह्यते न तावतापि बाधकतानिर्वाहः स्वरूपसंबंधरूप रामा०
योरेव विरोधित्वात् यावच्छेदकत्वयोर्विरोधादतो बाधकप्रत्ययांतरमाहुरन्वितीति तादृशप्रतियोगित्वाभावे रूपसामान्यावृत्तिविरि १३८

रोधे ननु तादृशाभावे रूपावृत्तित्वप्रत्ययोऽसिद्धः स्वरूपमेव संयोगपन्नोन्याभावेवृक्षावृत्तित्वप्रत्ययस्यासिद्धिः मुख्यान्यो
न्यान्याभावस्याव्याप्यवृत्तितायाश्च वस्यापनीयत्वात्तत्प्रत्ययः प्रकृतप्रत्ययस्योपपातात् नच रूपत्वेन नतत्प्रतियोगित्वमि
तिशब्दात् रूपत्वावच्छिन्नवृत्तिप्रतियोगित्वाभावः स्वप्रतियोगित्वनिष्ठरूपत्वावच्छिन्नत्वाभावोपि लक्षणत्वात् उत्पत्तितः प्रतीयते
स्वावच्छिन्नत्वांतस्य तत्रीयांतेतोपस्थितस्य नञर्थेनाभावेन समं समासितपदार्थान्वितेन प्रतियोगितयाऽन्वयेऽविरोधात् रू
पं च बाधकप्रत्ययस्य विवादास्पदत्वेपि प्रतियोगित्वे रूपत्वावच्छिन्नाभावस्य अनपसिद्धानुरोधत्वात् प्रत्ययविषयः स्वीकर्तव्यः
नतु रूपे प्रतियोगित्वाभावोऽलक्षत्वेन गौरवस्यैव बाधकत्वादिति वाच्यं एवं सति वृक्षे मूले न संयोग इति प्रत्ययस्यापि वृक्ष
वृत्तिसंयोगसमानाधिकरणमूलत्वावच्छिन्नत्वाभावावगाहितापत्त्या संयोगादेरव्याप्यवृत्तित्वानुपपत्तेः नच संयोगवत्प्रतियोगि
त्वस्याव्याप्यवृत्तिके मूले न संयोग इति बुद्धिपरत्वे न प्रतियोगित्वमिति स्ववच्छेदकपदोत्तरसत्प्रत्युल्लेखि प्रत्ययापत्तिरिति वाच्यं
प्रतियोगितायाश्चाव्याप्यवृत्तितादिरहितपरत्वादेस्तदवच्छेदकतया रूपत्वे रूपाभावप्रतियोगित्वमितिव्यवहारापत्तेः देशका

त्वादेर्विलक्षणाभेदावच्छेदकत्वं सम्भवत्यो नत्ववच्छेदकत्वमात्रवृत्तिसमाधानस्यापि तुल्यत्वात्। ताद्रूप्यावच्छेदकतानिरूपकाभे
वाच्या वह्नीति नियमस्याप्रामाणिकत्वात् पुरुषेतेधूमसाध्यतावच्छेदकावच्छेदकसाध्यप्रतियोगित्वाभावावगाहिज्ञानस्यैवानुमि
तिहेतुत्वेन तु साध्यतावच्छेदकधर्मिकानवच्छेदकत्वग्रहस्य। धूमवृत्तितावच्छेदकतया साध्यतावच्छेदकनिष्ठवह्नित्वत्वादिविषय
तायामवच्छेदककोटौ प्रवेशानौपयिकगौरवात्कदाचिद्वह्नित्वत्वादिना कुचित्स्वरूपेण वह्नित्वादेर्विषयतावच्छेदकतया भा
नमिति नियमस्य कष्टनिर्वाह्यत्वाद्दण्डसंयोगादिहेतुकानुमितौ दण्डादेर्विषयतावच्छेदकत्वानुपपत्तिः। एतन्मते च तद्दण्डत्वादि
विशिष्टावच्छिन्नविशेष्याभावप्रतियोगित्वसत्त्वेपि स्वावच्छेदकभेदेन सर्वकावच्छेदेनापि विरुद्धप्रसक्त्योपगमात् दण्डत्वादिविशि
ष्टावच्छिन्नतदभावस्य विशिष्टविरोधेनेवानुपपत्तेः सक्त्वादिसाध्यकप्रतियोगितानवच्छेदकरूपेणाप्रतियोगित्वाभावोपगमे
प्रतिबन्दिग्राह्यान्यथातिरूपत्वादिनानप्रतियोगित्वमित्यपिताद्दृशप्रतीतिबलात्प्रतियोगित्वादिमत्प्रतियोगित्वाभावसिद्धा
वित्वधेः यस्य कारणत्वे कार्ष्यत्वादेः उक्तरीत्येति दण्डे द्रव्यत्वेन न घटजनकत्वं इति प्रतीतिविरोधेनेदृशः अत्रापीष्यपत्तिसं रा.म० १३९

भेदेन लक्षणे दूषणान्तरमाह अभेपेति। इतिप्रसङ्गपादिति अतिप्रसक्तत्वाद्दृष्टत्वादेरिव प्रमेयधूमत्वादेर्गुरुतयापि धूमाव
भावप्रतियोगितानवच्छेदकत्वेऽविरोधादिति भावः। पुष्कलत्वाच्चेति। तथा च प्रमेयधूमाभाववह्नौ रासभादावतिव्याप्तिरिति भा
वः। एतदिति व्याप्त्युद्धारमाशंकते अथेति। अत्र न लक्षणे। तत्साध्यतावच्छेदकस्य हेतुनिष्ठसामानाधिकरण्यप्रतियोगिताव
च्छेदकत्वं साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसामानाधिकरण्यस्यैव व्याप्तित्वोपगमादिति भावः। चेदित्यनेनारुचिर्हि
निरूपणीयं अत्र समानाधिकरणधूमकेति। अत्र समानाधिकरणो धूमो यस्येति तु तुल्यत्वाद्धूमनिष्ठसामानाधिकरण्यप्रति
योगितावच्छेदकं न तदवच्छेदकमिति। अनतिप्रसक्तस्वस्वरूपसंबन्धकरूपावच्छेदकत्वोपगमादिति भावः। तथा च व
ह्निमान् धूमादित्यादावव्याप्तिरिति भावः। धूमनिष्ठसामानाधिकरण्यप्रतियोगितात्वावच्छिन्नातिप्रसक्तत्वेपि वह्निवृत्ति
प्रतियोगितात्वाद्यवच्छिन्नानतिप्रसक्ततयाताद्दृशप्रतियोगितावच्छेदकत्वं वह्नित्वादेर्दुर्वारत्वमित्याशंक्याह कुत्रचेति
इदं तु गुरुधर्मावच्छिन्नसाध्यकव्यभिचारिणपतिप्रसंगवारणाय गुरुधर्मस्य संबन्धप्रतियोगितानवच्छेदकत्वमभ्युपगमात

मितिजन्यत्वमनुपादेयैवाव्याप्त्यभिधानं वस्तुतः संबंधप्रतियोगितावच्छेदकत्वं गुरौ रपि अत एव स्वविशिष्टसंबंधीत्यादि
पारिभाषिकावच्छेदकत्वनिरुक्तिरपि संगच्छते अन्यथा स्वविशिष्टसंबंधस्य सावच्छिन्नप्रतियोगिकसंबंधरूपतया गुरुधर्मेता
दृशावच्छेदकतायाः प्यनिर्वाहादिति ध्येयं अत एव कंबुग्रीवादिमत्वादिना घटादेरसाध्यतापत्तेरेव तच्छून्यतया पीतिगौरवरू
पबाधकासत्त्वस्व प्रतियोगितानवच्छेदकस्य तदभावावच्छेदकत्वनियमादिति भावः इत्युक्तावपि इत्युक्तया उक्तपतिव्याप्तिप
रीहारेपि नातिस्तारः नलक्षणस्य दोषता साध्यज्ञातीयेति सज्ञातीयत्वं साध्यतावच्छेदकसाधनतावच्छेदकाभ्यां तेन नवृक्ष
दकवह्नित्वाद्यवच्छिन्नसमानाधिकरणवृत्तित्वं धूमत्वादेरित्यर्थः अत एव व्यधिकरणोपाधिसामान्येतो व्याप्तिनिर्वाहः
सामान्यलक्षणानुपगमेप्यनुमानोपयोगित्वसाध्यसाधनसामानाधिकरण्यस्यानवच्छेदकरूपावच्छिन्नस्वसामानाधि रा।४०
करणस्य साध्यतावच्छेदकोभयस्य पुनरन्तरेणासामान्यप्रत्यासत्तौ व्यवस्थापितयोः साध्यसाधनव्यक्तिभेदेन भिन्नानामपि १४०
व्याप्तीनां तत्तपापुरुषज्ञानसंभवेन सर्वसाधारणैकव्याप्त्यावेग्रहाविरहादिति भावः कश्चिदित्यस्वरसबीजं व्यधिकरणापे

नैयायिरितिग्रंथकृतैवात्राभिधानादुक्तरीत्याभेदस्यावश्यकत्वं अन्योन्याभावगर्भव्याप्तिद्वयाभेदपरांक्याह अत्यंतेति अ
त्यंताभावगर्भवदिति अत्यंताभावगर्भव्याप्तिद्वयं यथा सामान्यविशेषभेदेनोक्तमित्यर्थः एतेन सामान्यविशेषभेदेन भे
दगर्भव्याप्तिद्वयानभिधाने न्यूनतेति सूचयितुमेव तथा कारीत्येव भेदेयं ग्रंथकारस्वरस इति दर्शितं नन्वत्यंताभावगर्भलक्षण
योः प्रतियोगितानवच्छेदकावच्छिन्नत्वप्रतियोगित्वमात्राभिधानेन सामान्यविशेषभावः सूचितः इत्यत्रापि तथा भेदेऽभिप्रे
ते तथाभिधीयेतेतिशंकायामन्यथा भेदमाह प्रथम इति आधिक्यादिति पदद्वयप्रतियोगित्वं तद्वृत्तित्वरूपेण प्रथमे साध्यवतो
प्रतियोगितया सामानाधिकरण्यघटकतया च प्रथमद्वयशः द्वितीये च प्रतियोगिसाध्यवद्वृत्तित्वरूपेण प्रतियोगिविशेष्यता
यन्तेऽस्य वृत्तिविशेषणात्वमित्येक एवैतन्निवेशो इत्याशयः इदमुपलक्षणं प्रथमे विशिष्टपरामर्शो निर्वाहोपि द्रष्टव्यः अत्र
प्यवच्छेदकत्वात्पंजाभावमंतर्भाव्यपि तु यथाश्रुतमाक्षिपति अत्रेति नानात्वाद्यसाधकस्थले इति नन्वसाधनाधिकरणाय
न्नविभिन्नं साध्यं तत्रेत्यर्थः प्रतियोगित्वात्तदवच्छेदकत्वादित्यस्य साध्यवत्साध्यवत्त्वयोः पर्याप्तसंबन्धः साध्योऽवच्छेदके

निवेशेपि न निस्तार इति सूचनाय साध्यप्रतियोगितावच्छेदकत्वाभिधानं ऽव्याप्तिरिति। यद्यप्येकाधिकरणसाध्यके एतद्दू
पवान्तेत द्रव्यादिसाध्यादावपि प्रतियोगित्वघटितलक्षणोपयाभ्युपेते उभयत्वावच्छिन्नप्रतियोगिताकभेदमादायासंभवस्त्वसंभ
वतितथापि प्रतियोग्यवृत्तित्वस्य भेदविशेषणत्वोपगमेन तत्र लक्षणासमन्वयः संभवतीत्याशयः पद्रूपावच्छिन्नमितिप
त्पदं साध्यतावच्छेदकपरं स्वानवच्छेदकं स्वावच्छेदकत्वात्यंताभाववत् तत्तद्वह्नित्वादिना विशेषान्योन्याभावप्रतियोगि
तावच्छेदकस्यापि वह्न्यादेरवच्छेदकतानवच्छेदकसामान्यरूपवच्छेदेन स्वावच्छेदकात्यंताभाववत्त्वमित्याशयः नवावच्छे
घवत्त्वस्य नवच्छेदकरूपावच्छिन्नेन स्वावच्छेद्याभावस्य उपगमेपद्रूपविशिष्टावच्छिन्नप्रतियोगिताभाव इति विवक्षया पर्याप्त्या
नप्रतियोगित्वाभावघटितलक्षणमिव सुपरिष्कारमिति कथं तदुपेक्षितमिति वाच्यं स्वावच्छेदकतापर्याप्त्यधिकरणवृत्तित्वस्य सि
द्धतया नस्य स्वसमानाधिकरणात्यंताभावप्रतियोगित्वरूपस्य व्याप्यवृत्तित्वमपि सिद्धांतपि द्वे स्वावच्छेदकैकदेशाय पर्याप्तिसं राम०
वंधेन तदभावसत्त्वादित्यवच्छेदकतायाः पर्याप्त्यनवच्छेदकरूपावच्छिन्नेप्यवच्छेदकत्वाभावः स्वीक्रियत इति प्रतियोगिता १४१

यां स्वव्याप्यवृत्तित्वं तत्प्रसिद्धं तदप्याशयात् नतु वह्निसंयोगवान् धूमादित्यादौ साध्यतावच्छेदकवह्न्याद्यवच्छिन्नेन तद्वह्नि
संयोगादिमदन्योन्याभावप्रतियोगितावच्छेदकत्वसत्त्वादव्याप्तिः नच तत्तद्वह्नित्वादिविशिष्टवह्न्याद्यवच्छिन्नेन तत्त्वेपि
वह्नित्वविशिष्टवह्न्याद्यवच्छिन्नेन तदभावः सुलभः एकस्यापि विभिन्नविशेषणावच्छिन्नस्याविरोधिद्वयावच्छेदकत्वोपग
मादिति वाच्यं एवं सति तद्वह्निसंयोगवान् धूमादित्यादावतिव्याप्तेस्तद्वारणाय विशेषितसाध्यतावच्छेदकावच्छिन्नेनवच्छेद
कत्वाभावस्य विवक्षणीयत्वादुक्ताव्याप्तेर्दुर्वारत्वात् साध्यतावच्छेदकविशिष्टावच्छिन्नस्यानवच्छेदकत्वविवक्षणे चानवच्छिन्न
वह्नित्वादिसाध्यतावच्छेदककस्थलेऽव्याप्तिरित्यत आह वह्न्यादाविति वह्न्यादिसाध्यकस्थले वह्नित्वादेः साक्षादवच्छेद
कत्वाभिधानं दृष्टांतविधया वह्निसंयोगादौ साध्ये स्वाश्रयप्रतियोगिकत्वरूपपरंपरासंबंधेन वह्नित्वादेः साध्यतावच्छेदकता
घटकः संयोगवत्वान्निमादौ च स्वाश्रयप्रतियोगिकसंयोगवत्त्वादिरूप इति नानाविधपरंपरायास्तथात्वसूचनाय तद्दृ
दावित्युक्तं वह्नित्वादेरनुगमकत्वाभिधानेन च तस्य विशेषान्योन्याभावप्रतियोगितावच्छेदकत्वानवच्छेदकत्वेन तदवच्छिन्नेन

दृश्यप्रतियोगितावच्छेदकत्वाभावोपपादकं दर्शितं तादृशेति हेतुमन्निष्ठेत्यर्थः अवच्छेदकत्वमितीति अविशेषितत्तद्
वच्छिन्नत्वस्यैवावच्छेदकत्वाभावसौलभ्येऽतिशेषः वह्न्यादेर्विधेयतावच्छेदकतया अनुमितौ भानमनुरुध्य कल्पनात्तस्माद्
पदितिपक्षव्यक्तिवह्नित्वादिसाध्यकस्थलेषु काधिकरण्याद्धेतुकस्थलेषु पदनवच्छेदकमितिवक्तव्यं न च वह्निर्द्रव्यत्वादि
त्यादौ जातित्वाद्यवच्छिन्नवह्नित्वादेरवच्छेदकत्वाभावसादापत्तावयाप्तेः ऽतिप्रसंगः अविशेषितसाध्यस्य नवच्छेदकत्वग्रह
श्चानिर्द्धर्मितावच्छेदकतयाऽनुमितिहेतुरिति वाच्यं पतोऽविशेषितस्यानवच्छेदकत्वमितस्यानवच्छिन्नोऽवच्छेदकत्वाभा
वोऽर्थः तस्य च साध्यतावच्छेदकप्रकारेणाभासमानेपिग्रहसंभवः उक्तनोपदनवच्छेदकमित्यत्र अवच्छेदकभेदस्य विवक्षि
तान्नेत्युक्तातिव्याप्तिरितित्वं पद्रूपावच्छिन्न अनवच्छिन्नपद्रूपावच्छिन्नमनवच्छेदकमिति अनुगतरूपेणानानाव्यक्तिसा
ध्यके वह्निमान् धूमादित्यादौ वक्तव्यं साध्यतावच्छेदकोऽनवच्छिन्नत्वप्रवेशात् जातित्वादिविशिष्टवह्नित्वाद्यवच्छिन्नस्यानव राम०
च्छेदकत्वमादाय वह्निमान् द्रव्यत्वादित्यादौ नातिप्रसंगः महानसीयत्वादिसहितवह्नित्वादेरत्रावच्छेदकतायामवच्छेदक १४२

तात्तत्राविव्याप्तेः समानाधिकरणात्केवलवह्नित्वाद्यवच्छिन्नोऽवच्छेदकत्वाभाववत्त्वाविरोध इति नाव्याप्तिः यत्रानुगतरूप
विशिष्टनानाव्यक्त्यवच्छिन्नानां साध्यतातत्र तद्रूपविशिष्टसाध्यतावच्छेदकावच्छिन्नस्यानवच्छेदकत्वे तद्रूपविशिष्टाव
च्छिन्नं पत्र च साध्यतावच्छेदकविशेषणस्य पनेनुगतं तद्विशेषणानुगतं तत्र पद्रूपावच्छिन्नविशिष्टावच्छिन्नमवच्छेद
कं तद्रूपावच्छिन्नविशिष्टावच्छिन्नव्यापकमित्यादिकं यादृशरूपेणानुगत्यादिना दर्शितं अत्रापि सर्वत्रानवच्छिन्नत्वे न पद्रू
पं विशेषणीयं तेन नोक्तदोषावकाशः शब्दैक्यस्येति साध्यसाधनभेदेन कार्यैकारणाभेदस्य अवश्यकत्वेत्यादिः व्य
धिकरणापेक्षपि व्याप्यव्यापकभावविरहे प्रतियोगित्वमित्यंतं हेत्वसंगतिमाशंक्यते यद्यपीति उक्तरीत्येत्यादि रूपादिनाना
व्यक्तिसाध्यके पृथिवीत्वादिकव्यक्तिहेतुत्वव्याप्तिवारणानुरोधेनेत्यर्थः सर्वत्रलक्षणेऽ अकिंचित्करस्य व्यधिकरणायोगीति
घटकविशेषणदलविरहाप्रयोजकं विशिष्टेनितादृशप्रतियोगितानवच्छेदकविशिष्टेत्यर्थः सामानाधिकरण्यपरूणपाद
त्यंतं हेतुगर्भविविशेषणं तथा च पतोनव्याप्तिः साध्यसमानाधिकरणवृत्तिधूमत्वादिरूपान्यपितु साध्यसामानाधिकर

रापरूपैवन्नत्तो व्यधिकरणपर्वतीयधूममहानसीयवह्न्याद्योस्तदसंभवः सामानाधिकरण्यविरहात् इत्येतावन्मात्रे तात्प
र्य॰ सामानाधिकरण्यविरहस्यैव प्रतियोगित्वादित्यंते न सूचनात् न तु साध्यविशेषणदलविरहस्य तत्र व्याप्तिविरहप्र
योजकत्वे इत्यर्थः दैशिकव्याप्तौ व्याप्यव्यापकानंतरमुपन्यस्तस्य तत्सत्त्व एव विनष्टस्यापि व्याप्यत्वादेकदेशिव्याप्यतायाश्च
कसाध्यप्रयोजकत्वात् भेदस्य चाव्याप्यवृत्तितानिराकरणं प्रकृते संगमयति अत्रेत्यादिना योऽन्याभावेति व्याप्तिः हेतुसमानाधिकर
राभेदे विशेषणं तेन सत्त्वे तद्भेदस्याव्याप्यवृत्तित्वशंकाधीनां व्यभिचारशंकां न्यूनतताभंगाय अव्याप्यवृत्तित्वसाधक
तपापूर्वपक्षमुपदर्शितां प्रतीतिं मतस्य योपपादयति तथा चेति अनुभूयमानेति अनुभूयमानो विशिष्टभेदोल्लेखो वा
कृत्वाविशिष्टभेदबोधकशब्दाभिलप्यमानविषयत्वं वा कार्यज्ञानविषयताद्दृशवाक्यप्रयोजकत्वं वा यस्यास्तादृश्याद्गुता राम०
र्थः विशिष्टाभावोल्लेखिप्रत्ययस्य विशेषणाभावविषयकत्वे दृष्टांतमाह शिखीति इत्यादिप्रतीतीति वदितीत्याद्यकारि १४२
कापाविशिष्टध्वंसोल्लेखिधावाधकविशेष्यविनाशप्रत्ययस्य लोपप्रतीतेरिदित्यर्थः शिखी विनष्टेत्यादिशब्दस्य मुख्यार्थ

विषयकत्वपरित्यागे बीजमाह बाधकत्वादिति तथैव दृष्टमुख्यार्थविरोधिविषयकप्रतीतिबलादित्यर्थः अत एव गुणे
न संयोगो घटादिप्रतीतिर्विशेषणाभावविषयकत्वप्रतिबंधनवकाश इत्याह यत्रेति यत्र यद्धर्मिकप्रतीतौ विशिष्टभेदवि
शिष्टभेदविषयकत्वे न बाधकं न प्रतीत्यंतरविरोधः तथा प्रतीतिबलात् विशिष्टभेदोल्लेखिप्रतीतिबलात् तत्सिद्धिः
विशिष्टभेदसिद्धिः अत्रापि तत्रेत्यनुषंजनीयं वा नातिप्रसंग इत्याह न गुणादौ भेदासिद्धिप्रसंगः भेदस्याव्याप्यवृत्तित्वव्यवस्था
पनापमूलोक्तबाधकं निराकुरुते अत्रेत्यादिना अत्र भेदपदेन भेदात्यंताभावो भेदस्य वृत्तित्वं भिन्नभेदो वा विवक्षणीयस्ते
तन्नाधिकरणपतित्र भेदस्येति भेदवत्त्व भेदस्यैव प्रतियोगिनोऽव्याप्यवृत्तित्वे तदभावस्यापि तथात्वे संयोगादिरूपत्वे च न
बाधकमिति सूचयितुं मतत्वदृष्टांताभिधानं स्वमतेन तदनुपपत्तेः उभयप्रतीत्यो रविरोधोपपत्तेः संयोगिभेदाभावस्य संयो
गरूपतावच्छेद्यापनापाह यथाहीति प्रतियोगितावच्छेदकावच्छिन्नविरहेऽपि प्रतियोग्यभावज्ञानयोस्तत्तद्रूपेण परस्परम्
तिवध्यप्रतिवध्यकभावः संभवत्येवमाह भेदेन विपरीतज्ञानप्रतिबंधकताभेदस्याखत्वानानुगमनावश्यकत्वादित्यस्तु एवम्

अभावव्यवहारश्चेतिसस्वप्रतियोग्येवस्स्वप्रतियोगितावच्छेदकधर्मएवनअभावाभावस्यातिरिक्तत्वेपिप्रतियोग्यादिज्ञाने
तिनहि तुनाक्वचिदप्यकृतस्ताद्दृशाभावस्यज्ञानसंभवात् अभावव्यवहारोपपत्तेरभावाभावस्यातिरिक्तत्वापिसंभवतीत्याश
येनाह अविशेषेपि चेतिअविशेषसंयोगिभेदाभावस्यसंयोगातिरिक्तत्वे अव्याप्यवृत्तित्वादितिसंयोगादिरूपावच्छेदकधर्मी
वच्छेदकमात्रावच्छिन्नवृत्तिकत्वोपगमादित्यर्थः अतएवक॰पिसंयोगिभेदाभावस्य कपिसंयोगावच्छेदकमात्रावच्छिन्नकपि
संयोगादिरूपत्वादेवननथानस्यकावच्छेदेनाभावविषयकत्वेनबाधकतयाक्ल्प्तकपिसंयोगरूपत्वपक्षेऽसंभवादितिमू
लावच्छेदेनकपिसंयोगस्याद्रेर्भवन्मतेपिताद्दृशज्ञानासंभवादित्यर्थः अतिरिक्तताभतत्वाहअसिद्धेरितिमयानभ्युपग
मादित्यर्थः द्वितीयंदूषयतिनापीति असिद्धिंविवृणोतितद्वृत्तित्वस्येतियद्यपितद्ग्रहोपगमात्तृतीयंदूषयतिनापीति अव्याप्य
वृत्तित्वेनअव्याप्यवृत्तित्वोपगमेनअव्याप्यवृत्तिधर्मावच्छिन्नभेदस्यैवास्माकमव्याप्यवृत्तित्वादितिभावः तज्ज्ञानंभिन्नभेद राम॰
ज्ञानंअसिद्धेरितिकपिसंयोगावच्छेदकमात्रावच्छेदेनैवतदुपगमादितिभावः तस्यकपिसंयोगरूपतयाभवन्मतेपिमूलावच्छे १४४

देनतज्ज्ञानासंभवदित्याहतद्धर्मेति तद्धर्ममात्रपर्याप्तेवसापितयातद्धर्मात्मकतानियमेनएतच्चकपिसंयोगिभिन्नभेदकपिसंयो
गयोस्तादात्म्येहेतुः मूलवृत्तित्वविरोधात्मूलावच्छिन्नत्वविरोधात्उपदर्शितसामान्यनियमएवदृष्टांतेनदूषयतिनहीति
एतदेवासिद्धमित्यतआह आवश्यकेतिभावेनकथमभावव्यवहारोपपत्तिरित्याशंकामपनिनीषुराह अन्यथेतिअन्य
था अभावत्वस्याभाववृत्तित्वेसर्वत्रेति अत्यंतान्योन्याभावयोरभावावपिप्रतियोगितावच्छेदकाभ्यामतिरिच्येयातामि
त्यर्थः तथाचअभावाभावस्यानतिरिक्ततावादिनांसिद्धांतानुरोधिनाअभावत्वंनभावभिन्नत्वंतत्रियत्तंवाकिंतुभावसाधा
रणः स्वरूपसंबंधविशेषसंवतिभेदावच्छिन्नभेदस्यभेदप्रतियोगितावच्छेदकरूपत्वेनकिंचिद्बाधकमितिभावः भेदस्याव्या
प्यवृत्तितांप्रकारांतरेणनिराकुर्वीणास्यमतमाशंक्यनिराकरोतिअतएवेतिअतएवतत्तमाराद्दोषादेवसामान्यतः सक
लात्यंतान्योन्याभावसाधारणरूपेणतत्तद्योर्विशेषयोर्मध्येऽन्यतरस्याननुपपत्त्याऽन्यविषयकतयोपपत्तेनासंभवेनअ
युयोः सः अत्यंताभावप्रतियोगिनोर्विरोधः संकोच्यतामितिसंयोगाद्यभावव्यावर्तकविशेषणमंतर्भाव्येत्यादिस्तेनसं

योगात्यंताभावव्याप्यवृत्तित्वप्रतिबंदिनिरासः कृतः स्वत्रान्यथोपपत्तिमाशंकते हीतिनियमतद्व्यतिरेकग्रहप्रतीतिपूर्वमिति
शेषः संयोगवत्विनेतित्यात्र्यचाभावबुद्धौ प्रतियोगितावच्छेदकप्रकारकबुद्धेर्हेतुतया संयोगप्रकारकोपस्थितेः प्राक्सत्त्वेपिता
यमानतयास्तादृशप्रतीतेर्नतद्वच्छिन्नभेदविषयकत्वसंभवद्दृतिभावः तयोर्युस्थितिविरहदशायांतादृश्यप्रतीतेरपलापः
संभवतीत्याशंक्याहघटांतरमाहप्रतियोगिकोयदितितदसत्त्वेस्वात्संयोगवतोऽभानात्तथाचतदंशेऽभावप्रतियोगि
त्वावगाहनंनसंभवतीतिभावः भासमानविशेषणांश्यतिप्रतियोगिकोऽपि भासमानस्यसंयोगस्येत्यर्थः भासमानइत्य
नेनपूर्वोक्तोविशेषोदर्शितः अंशेतिमयोरन्योन्याभावप्रतियोगितावच्छेदकयोरपिसंकोच्यतइत्यत्तुपस्थितेत्याचवाधकप्र
तीतिविरहेपिनविरोधः संकोचेतिप्रथमावधारणास्यभ्रमत्वकल्पनप्रसंगाहपवाचकत्वत्वात्एवदर्शितप्रतीतिविशेष
रात्यंताभावविषयकत्वमितिनतद्दुल्लादन्योन्याभावाव्याप्यवृत्तित्वमितिभावः सामान्यतोविशेषस्यैकत्वमेवनिराकु रा०
रुतेऽस्त्वन्योन्याभावांतरस्येति एकस्यान्योन्याभावस्यान्यदीयप्रतियोगितावच्छेदकसमानाधिकरणात्यानतदन्योन्याभा १४५

वेतन्नत्प्रतियोगितावच्छेदकसामानाधिकरण्यरूपत्वविरोधः स्फुटः तत्र च तत्तदभावत्वरूपाननुगतधर्माणामेव
अवच्छेदकत्वात् न तु घटभेदसंयोगभेदादिसाधारणस्यैकधर्मस्येत्यर्थः तथा च नप्राथमिकनियमावधारणस्य भ्रम
त्वप्रसंग इति भावः नन्ववच्छिन्नप्रतियोगिताकत्वविशिष्टसामानाधिकरण्यसंबंधेन धर्मविशिष्टान्यत्वमेव भेदस्यसामा
न्यतः प्रतियोगितावच्छेदकविरोधः सुवचः अथ कालिकादिसंबंधेन घटत्वादिमति घटादिभेदस्य सत्त्वादुक्तविशिष्टसं
बंधेन तस्यापि घटत्वादिविशिष्टत्वं स्यादेव न च स्वनिष्ठप्रतियोगितावच्छेदकतावच्छेदकसंबंधेन स्वाधिकरणवृत्तित्व
रूपसामानाधिकरण्यनिवेशान्नकोपि दोष इति वाच्यं कालिकादिसंबंधस्यापि तेन घटत्वादिमतो भेदस्य घटत्वादिनिष्ठ
याः प्रतियोगितावच्छेदकतायाअवच्छेदकत्वात् तन्नभेदप्रतियोगितावच्छेदकतावच्छेदकसंबंधनिवेशेनाननुगमता
दवस्थ्यादितिचेत् सत्यम् स्वावच्छेदकतावच्छेदकसंबंधेन यत्स्वावच्छेदकाधिकरणानवृत्तित्वस्वनिरूपकत्वोभयसंबंधेन
प्रतियोगितविशिष्टान्यत्वस्यैवान्योन्याभावेऽनुगतप्रतियोगितावच्छेदकविरोधरूपत्वोपगमात् यदि चोभयत्वावच्छिन्न

भेदस्यप्रत्येकमुभयत्वाधिकरणवृत्तित्वीक्रियते तेन दास्त्वावच्छेदकाधिकरणवृत्तित्वस्यानेनत्वावच्छेदकाधिकरणतावच्छे
दकावच्छिन्नाधिकरणताकत्वं निवेशनीयम् उभयत्वाधिकरणतावच्छेदकीभूतधर्मस्य नोभयत्वावच्छिन्नभेदाधिक
रणतावच्छेदकइति न दोषः यद्विवगोत्वाभावादिनिष्ठविषयदिभेदो गोत्वाभावादिस्वरूपस्य च घटत्वाद्यधिकरणे सत्त्वाभे
दत्वावच्छेदेन तभीकृप्रतियोगितावच्छेदकविरोधनिर्वाह इति मन्यते तदा भेदत्वरूपानुयोगितासामान्ये निरूपकतया स्वाव
च्छेदकाधिकरणवृत्तितानवच्छेदकत्वनिरूपिततत्तोभयसंबंधेन प्रतियोगिताविशिष्टान्यत्वमेवान्योन्याभावप्रतियोगि
तावच्छेदकयोः सामान्यतो विरोधः स्वीकरणीयः न चैवं सति गोत्वाघभावरूपघटादिभेदस्य घटादौ सत्त्वेपि घटभेदत्वस्य
प्रत्ययादूटत्वावच्छिन्नप्रतियोगितानिरूपितभेदत्वरूपानुयोगितापा घटादिवृत्तितानवच्छेदकत्वादुक्तसंबंधेन प्रतियोगि
ताविशिष्टान्यत्वनिर्वाह इत्यन्योन्याभावस्याव्याप्यवृत्तित्वे तत्स्येपदर्शितविरोधसंकोच आवश्यक इत्याशंक्य विरोधा रप०
नुभवप्रतिरोधेन सामान्यतो विरोधकल्पनैव न संभवतीत्याह अपं नाभावेति वाच्यकसत्वमभ्युपेत्यापि दृष्टान्तवैधर्म्यं १४६

प्रदर्शयन्नन संयोगीति प्रतीतेर्विशेषणासंसर्गाभावविषयकत्वं निराकरोति किं चेतितद्ध्वंसप्रतीयोगित्ववाधात्
श्रास्तो विशेषणाध्वंसविषयतेति तावतापि ध्वंसविषयकत्वमव्याहतमेवेति भावः ननु तथापि ध्वंसे विशिष्टधर्मिप्रतियोगि
कत्वस्य वाधितस्यावगाहनात्तादृशप्रतीतेर्भ्रमात्वोपपत्तिः तदवगाहित्वानुभवापलापे च मूले नकपिसंयोगीतिप्रती
तेर्भेदावगाहित्वानुभवापलापः किं यादृशापिहितइत्यत आह तं रक्तत्वादिति इतिप्रतीतेः इत्याकारिकायां रंगविषयकप्रती
तेः शंकाइति अपि तु तस्याभ्रमत्वमेव कल्प्यत इति शेषः अयं भावः यादृशप्रतीतेर्यादृशव्यवहारजनकत्वं तस्या एव
तदाकारता रंगत्वविषयकप्रतीतितिश्च न रजतमिति व्यवहारः अपि त्विदं रंगमित्येव अतो रंगे इदं रजतमिति प्रतीतेर
जतत्वावगाहित्वामंतरेणेदं रजतमिति व्यवहारजनकत्वासंभवात्तस्यास्तदवगाहित्वकल्पनं इहेत्यनकपिसंयोगीतिव्य
वहारजनकप्रतीतेस्तादृशवाक्यप्रतिपाद्यसंयोगाभेदविषयकत्वमावश्यकं तादृशवाक्यस्यानुयोगिवाचकपदोत्त
रसप्तमीविरहे तासंयोगसंसर्गाभावाबोधकत्वात्संयोगिभेदावगाहनमंतरेण प्रतीतेः संयोगिभेदबोधकवाक्यप्र

प्रयोजकत्वासंभवात् · शिखी विनष्ट इत्यादिशब्दाच्च शिखायामपि नाशप्रतियोगित्वस्य मन्वयोप्यार्थो विवक्षायामन्वयोपपय
दृतस्य शक्यतया तदाकारप्रतीतेः शिखाप्रतियोगिकनाशविषयकत्वसंभवः इह हि न कपिसंयोगीति शब्दाद्वृक्षे संयोगसंस
र्गाभाववोधे न कथंचिदपि संभवति संसर्गाभाववोधे तेन एतस्य सत्त्वेऽपि तेनैवानुयोगिवाचकपदेन सहाकांक्षा पावकृप
मारात्वादिति नोक्तप्रतीतिविशेषणतासंसर्गाभावविषयताबाधकसहकारिणापि शक्यत्वेनेति विशेषणतासंसर्गाभाववि
षयकत्वासंभवेपि शिखी विनष्ट इत्यादिप्रतीतेर्विशेषणाविषयकत्ववत्प्रकृतप्रतीतेर्विशेषणाभेदविषयकत्वसंभव
तिवाधकत्वादिति न विशिष्टभेदस्याव्याप्यवृत्तिताप्रसिद्धिस्तत्रेति किं कृतेन चेति प्रत्यक्षादिप्रतीतेरपि तदनुकूलव्यवहार
वलेन विषयत्वव्यवस्थापकता इत्यालोच्य व्यवहारवलेनैवान्योन्याभावस्याव्याप्यवृत्तितां साधयितुमुपक्रमते युक्त
ते चेति पक्षतादशायामित्यादिस्य समीचतुष्टयं व्यवहाराद्यपि विषयत्वार्थकं स्मृत्यकालीनतया विशेषव्यवहाराणाम राम०
प्रकृतसाधकत्वात्स्वं च व्यवहाराकारे उभयत्रावच्छेदककालबोधकपदं पूरणीयं इत्याद पद इत्यादिपदात् देशिकाव्या १४७

प्यवृत्तित्वसाधकानां मूलेनापि कपिसंयोगीति व्यवहाराणां परिग्रहः इदानीं तस्यामस्त्यादौ इदानींतनीयःस्यामस्ति भेदः प्रतीय
नेइत्युक्तिसंभवात्तस्य जातिरानुधावनं तदिदं इत्याशङ्क्य समर्थयते तदुक्तेः प्रसिद्ध्या तत्र नापि प्रकारः संभवतीति भावः अत एव च
दंउ समान्याभावमुपेक्ष्य नाशानुधावनं तदिदं उपपद्यते नानुसरणं च अनुयोगीति अनुयोगिबोधक पद इत्यर्थः तदनुपपत्तेः
संसर्गाभावप्रतीत्यनुपपत्तेः नञ्पदात्तात्पर्यानुयोगिकसंसर्गाभावबोधे तेन समं संसर्गाभावस्याधाराधेयभावः प्रकार
तयैव भासते इति नियमेन तदुपस्थापकविभक्तेरपि कृतत्वात् इति भावः ननु नञर्थे संसर्गाभावस्याधाराधेयत्वस्य प्रका
रतानियमस्याप्रसिद्ध्या सप्तमीं विनापि प्रकृते रूपादिसंसर्गाभावस्य घटादौ संबन्धसंसर्गमर्यादया भानात्तत्र प्रत्ययः
स्यादेवेत्यत आह नरवल्विति तथा च तादृशनियमानंगीकारे भूतलं न घट इत्यादितोपि स्वाधाराधेयभावसंसर्गकसंसर्गो
भावबोधः स्यादेवेति भावः न च तादृशनियमस्वीकारेऽपि न कथमपि प्रमापत्तिः सामग्रीसत्त्वेन नियमभंगभयस्य कर्पोत्पत्तिवि
रोधित्वासंभवादिति वाच्यं तादृशनियमवादिनां फलाभावेन नञ्समभिव्याहारस्थानघटितापास्तादृशबोधसामग्र्या एव

ल्लोपत्वात् उक्तस्थले विशेषणासंसर्गाभावप्रतीतिमंगीकुर्वे नैव नञ्पदघटितसामग्र्यास्तथाविधबोधोत्पत्तिप्रयोज
कतायावाच्यत्वात् ननु प्रामाणिकैर्भूतलं न घट इत्यादिवाक्यं प्रयुज्यत एव ततस्तात्पर्यसत्वे संसर्गाभावप्रतीतिरिष्टैवे
स्यात्स्याह तथात्वेचेत्तथापि तत्र संसर्गाभावबोधकत्वोपगमे ऽप्रसंगात् प्रामाणिकप्रयोगप्रसंगात् घटादौ घटादिसंस
र्गाभावस्याबाधितत्वात् तस्य च भवतामुक्तवाक्ये न बोधनासंभवादितिभावः ननु नञाधाराधेयभावसंसर्गकसंसर्गाभा
वबोधने इतरविशेषणतयास्वार्थान्वयपरपदजन्यप्रतियोग्युपस्थितिरपेक्ष्यते भूतले न घट इत्यादौ तु तदभावांश
पत्तिः नचैवमपि नापं तद्दंडवानित्यादौ धर्मिणोऽनन्वयेन तद्विशेषणतयास्वार्थान्वयबोधपरत्वं प्रतियोगिवाचकपदस्य
नसंभवतीति कथमुक्तोपपत्तिरिति वाच्यं तत्र तद्दंडवान् न पं दंडो नीलदंडाभाववान् वा दंड इत्येव बोधोपगमेन धर्मिणोऽपि प्रवेशा
न्यत्र धर्मिणा तद्दंडवत्त्वं न कदापि तत्र विशिष्टभेदबोधस्यैव स्वाकारात् तावतोऽन्योन्याभावस्याप्युपहितत्वासिद्धेरित्या राम०
शंक्याह अपि चेति विशिष्टेति विशिष्टपरदंडादिपदोत्तरं नञ्तद्दंडादिपदेष्वपि धर्मिविशेषणतयास्वार्थान्वयपरेभ्यः उपस्थित १४८

स्यार्थः एतेन पदार्थोपस्थितौ पदार्थस्य प्राधान्येन भानेऽपि नासंगतिः प्रतियोगित्वेन प्रतियोगिविषयान्वयानुयोगिता
संबंधेन विशेषणाविषयाइतिपरास्ततात् इतरविशेषणतयोपस्थापितस्य एकपदार्थविशेषणतयास्वार्थान्वयपरपदभि
न्नपदानुपस्थापितस्य अन्यत्र तत्पदानुपस्थापितांशे विशेषणतयान्वयस्य निराकाङ्क्षत्वादयोग्यादित्यर्थः अत्रार्थेना
हृशाव्युत्पत्तिकल्पनमनर्थकं नच तदकल्पनेव ह्रिमान्नास्तीत्यादौ वह्न्यादेरभावविशेषणतयाऽनुपपत्तिरिति
वाच्यं प्रतियोगिपदादन्यद्यदन्यत्कारकादिपदवृत्तिशब्दैकदेशेन न तस्यान्वय इत्येतद्व्युत्पत्तिविरोधेनैव ताहृशान्व
यबोधासक्तेः समासस्थले वह्निमांस्तस्यापि वह्निशब्दात्पूर्वं तस्य च ह्रिमान्नास्तीत्यादौ वह्निसंबंधादेवैक्यादान्वयबा
रणापत्ता तादृशव्युत्पत्त्यंतरकल्पनस्यावश्यकत्वात् नच दंडिनो रूपमित्यादौ संबंधिविशेषणतया भासमानदंडादेः का
रकविभक्त्यर्थे विशेषणतयाभानवारणाय तादृशव्युत्पत्तिकल्पनमावश्यकमिति वाच्यं प्रकृत्यर्थैकदेशे तदन्यपदार्थान्व
यव्युत्पत्त्यंतरविरोधेन तादृशातिप्रसंगस्याप्यनवकाशात् दंडिनाविवत्यादौ दंडादेर्द्वित्वाद्यन्वयवारणाय तादृशव्युत्पत्त्यंतरो

वृस्पकत्वात् इति चेन्न राज्ञः पुत्रधनमित्यादौ च नांशे विशेषणापुत्रादिविशेषणतया विवक्षितस्य राजसंबंधादेस्तेनादि
विशेषणतयाऽन्वयवारणापेक्षव्युत्पत्तिकल्पनमावश्यकं एवं राजपुरुषादिपदानां पत्रे द्वंद्वसमस्तत्र समासघटकपू
र्वपदार्थे विप्रत्ययार्थान्वयात् प्रकृतित्वघटकमव्यवधानमर्थान्तरव्यवधानाभावरूपं वाच्यं न यावत्तत्पुरुषस्य पूर्वप
दोपस्थाप्येपि समुदायोत्तरषष्ठ्या घटस्यान्वयवारणापत्त्या आवश्यकमिति भावः स्वघटपटावित्यादौ घटादिविशेषणात
यासाथोन्वयप्रसिद्धिर्वचनाद्युपस्थाप्यसंख्यादेः चैत्रस्य घटपटावित्यादौ तत्र विषयचैत्रसंबंधादेस्तु घटपटादौ विशेषणात
पाऽन्वयो निर्विवाद इति कथमुक्तव्युत्पत्तिकल्पना नूत्वस्त्वविशेषणाविशेषणतयोपस्थितत्वस्यासाकांक्षत्वात् स्वविशेषणात
पानान्वय इत्येव व्युत्पत्तिः अन्यथा पितुः पस्य पितात्तायेः पूर्ववन्निष्पत्तिरीयः इत्थं च चैत्रस्य घटपटौ पश्यतीत्यादौ कर्म राम०
त्वादिविशेषणतया भासमानचैत्रादिविशेषणस्य द्वित्वं चैत्रसंबंधादेः पटादिविशेषणत्वेन बाधकं घटादेः पटाद्यविशे १४९
षणत्वात् प्राथमिकविशेषणांशेऽपि साकांक्षत्वात् परंपरासाधारणमिति वाच्यं सत्त्वस्ति नापं दंडवानित्यादौ स्वभावांशे दंडि

नोविशेषणत्वानुपगमे दंडस्य तद्विशेषणतयाऽन्वयेपि बाधकविरहेण दर्शितव्युत्पत्तेः प्रकृतानुपयोगप्रसंगात् इति चे
न्न एकविशेषणतयाऽस्वार्थबोधकं पदं अन्यत्र पृथग्विशेषणतया नान्वयबोधकमित्येव व्युत्पत्त्यंगीकारात् पटघटावित्य
त्र विभक्त्यर्थद्वित्वादेरेकदा उभयविशेषणतया भाने नाविरोधात् राजपुत्रधनमित्यादौ तत्पुरुषे च पुत्रधनादेरेकधा
राजसंबंधादेर्नान्वयबोधप्रसंगः तादृशान्वयबोधे तयोरेकांशोऽपरविशेषणतया बोधपरत्वस्य हस्यविरोधादिति आकां
क्षाजिज्ञासारूपान्वयबोधांगं तत्र च पदविशेषजन्योपस्थितिः कारणमिति मतानुसारेणो निराकांक्षतयेत्यभिहितं आ
नुपूर्वीविशेषस्याकांक्षात्वपक्षे तु निरुक्तपदभिन्नपदजन्योपस्थितिरूपकारणविरहो हेतुर्बोध्यः पत्तु नदंडस्याप्र
थमान्तदंडादिपदानानुपूर्वीविरह एव निराकांक्षत्वात् इति तदसत् तथा सतीतरविशेषणतयोपस्थितिकथनस्यानुप
योगितापत्तेः तादृशानुपूर्व्या दंडादेः संसर्गाभावप्रयोजकोन्वदंडादिपदस्य मत्वर्थोविवक्षापादं दंडादिपरत्वेपि दंडादि सं
सर्गाभावबोधानिर्वाहे तान्निमर्शकानुपस्थितेश्च दंडादिपदस्य विशेषणमात्रपरत्वे आधाराधेयभावस्य प्रकारतानु

रोधेनसत्त्वम्पिक्षामनवदधानःशंकते· नचेतिविशेषणमात्रपरमितितथाचदंडादेर्निरुक्तस्यइतरविशेषणातपा
उपस्थितत्वस्याभावान्नतत्संसर्गाभाववोधेदर्शितव्युत्पत्तिविरोधइतिभावः एवंसतिसप्तम्यपेक्षास्मारणपतितया
सतीति· तथासत्यप्यधिकरणसंसर्गाभावयोः संसर्गस्यसंसर्गतयाभानोपगमइत्यर्थः संसर्गाभाववोधप्रसंगादितिवि
शेषणमात्रपरदंडादिपदेभ्योदंडादिपदस्याविशेषादितिभावः इदमुपलक्षणंमत्वर्थीविवक्षायांमतुपोऽभावेनापत्ति
रित्यादिदूषणमपिद्रष्टव्यं· सतिनचैत्रोनदंडइत्यादौदंडादिसंसर्गाभाववोधकप्रसंगेनवितिवसप्तमीमितिनत्रथसंस
र्गाभावेनसमन्वयप्रतियोगिनस्त्वाधाराधेयभावएवसप्तम्यपेक्षानञर्थेनसंसर्गाभावेनसममाधाराधेयभावस्यसका
रतयैवभाननियमात् ननुनञर्थसंसर्गाभाववतोऽभेदान्वयवोधस्याशयेनेतिभावः प्रत्युमितिनदंडोऽत्यादौमत्वर्थविवक्षा
यामितरविशेषणात्पेत्यादिव्युत्पत्तिविरोधेनदंडादेरभावान्वयासंभवात्तदविवक्षायांनञः संसर्गाभाववदर्थकत्वेपिप्र र॥०
तियोगिवाचकपदसमानविभक्तिकात्तुयोगिवाचकपदेननाभेदवोधोपयिकाकांक्षाकल्पनेनतत्संभवतिउक्तानिमसं १५०

गस्यपूर्वोरत्वादितिभावः यद्यपिनदंडीत्यत्रमत्वर्थानुयोगिकप्रकृत्यर्थदंडादिप्रतियोगिकसंसर्गाभावस्यापिनञावोध
नंसंभवतिनकल्पनंमहत्यपेदित्यादौनानुपपत्तिःप्रादुर्भावादित्यादौचप्रकृतिप्रत्ययार्थयोरंतरानञर्थप्रवेशएवदृष्टत्वा
त्वात्तथापिनशपामइत्यादावगतिरेवेतिध्येयं ननुनपचतिचैत्रइत्यादौयाकाक्षात्यादिसंसर्गाभाववोधस्यसमप्रयतासंवं
धेनान्वयात्तुनञर्थसंसर्गाभावेत्वाधाराधेयभावःप्रकारतयैवभासतइतिनियमासिद्धासप्तम्यपेक्षाकपंप्रकृतइस्य
तत्राह· सर्वचेति· सर्वचोक्तातिप्रसंगवारणायसंसर्गाभाववोधेसप्तम्यानियमेनापेक्षितत्वेचयथाश्रुतेति· वैयाकरण
मतेकर्तुरेवत्वेपितैरेवकारेणकृतिसंसर्गाभावोऽत्रवोधः लकारार्थविवापिस्वमतेउपपादयति· वस्तुतइति· द्विविध
विभक्त्यर्थाभाववोधएवसप्तम्यपेक्षानास्तीतिदर्शयितुंनपचतीत्यादिस्थलद्वयाभिधानंत्र्यादिपदाभ्यांपरोनदंडादिस्य
लोपजन्यत्वाद्धभाववोधपरिग्रहः प्रातिपदिकार्थस्याभाववोधइत्यनुपपत्तेरितिस्तदुपपादयिष्याम्नोनवादेप्रतियोग्य
भावौतुल्ययोगक्षेमावित्यादिनोऽपपत्तिप्रकारस्यपत्रक्तोऽसत्त्वेप्रतियोग्यनुयोगिनोः संबंधप्रकारतयैवभासतेन

त्रनञर्थयोरनुयोगिनोरपिसंबंधस्तथैवपक्षेचप्रतियोग्यनुयोगिनोःसंबंधःसंसर्गतयाभानंतत्रनञर्थयोरनुयोगिनोरपितथैवभासतद्रति
नियमःनामार्थयोरभेदान्वयबोधेनसंसर्गतयाभासतइतितदभावेघटःकर्मत्वमित्यादौभेदान्वयविरहात्तत्रापितुप्रकारत्वे
चेतिनामार्थनामार्थयोर्भावस्यापिसंबंधःप्रकारतयैवभासतेत्वत्रतत्त्वंचतदुपस्थापकविभक्त्यपेक्षानियमःप्रथमांतपदा
द्युपस्थापितेत्र्याख्यातार्थस्यसंबंधःसंसर्गतयाभासतइतितदभावस्यापितथाभासतइतितदुपस्थापकविभक्त्यपेक्षा
तिप्रत्योन्याभावव्याप्यवृत्तितामुपपादयतोभ्रममादत्तञइति-वैधर्म्यपरतयेतिवैधर्म्येतदवृत्तिधर्मवत्वंतत्रचशक्तिर्नी
हृयावेत्यन्यदेतत्वैधर्म्यप्रतियोगिनोप्यत्रपातदंतभाविनातेपक्षप्रतियोगिकाभाववत्तिचातिप्रसंगोनत्वाधेयत्वसा
मान्याभाववत्तिवस्थामादिवृत्तित्वाभावस्याप्रत्ययप्रसंगेननजोवृत्तेरनुपपत्तावपिनक्षतिःवृत्त्यावभाववत्तिचरवंडशोवृत्तिद्र राम०
योपगमात्ततुपक्षतादशव्याप्यामहत्याभाववत्त्वविघटेनघटपामवैधर्म्यसंभवःस्वस्मिन्स्ववैधर्म्याभावात्वैधर्म्यस्यभे
दनियतत्वादितिशंकापोविशिष्टवैधर्म्येनभेदनियतत्वमितिसमाधत्तेवैधर्म्येचेतिघटपामिवैधर्म्यंचेत्यर्थःरक्तत्वादिकमेवे १५१

तिरक्तत्वादेःघटामहत्त्वाद्युपलक्षितवृत्तित्वेपितद्विशिष्टावृत्तित्वादितिभावःनवघटामहत्त्वविशिष्टावृत्तित्वंघटामहत्त्वावच्छि
न्नाधिकरणतानिरूपिताभाववत्वंतच्चाभावःघटामहत्त्वेतत्संभवतिपदार्थैकदेशस्यधर्मपसर्जनतयाविघटितत्वंघटा
महत्त्वस्याधिकरणत्वविशेषणतयासंभवादितिवाच्यंधर्मिणःघटामहत्त्वावच्छिन्नत्वसंबंधेनाचयोगमादेवतत्त्वाभावसं
भवात्तस्वस्मिन्विशिष्टवैधर्म्याभावाद्योरोप्यनुमतमित्याहयदाहुरितिएवंचमूलेनकपिसंयोगीवृक्षइत्यादिप्रतीतेरपि
कपिसंयोगादिविशिष्टवैधर्म्यमेवविषयःतच्चकपिसंयोगाद्यभावस्यवत्त्वस्यैकपिसंयोगावच्छिन्नावृत्तित्वात्तद्विभिन्नका
लावच्छेदेनैवविभिन्नावच्छेदेनापिवर्तमानयोरेकाधिकरणतायासंभ्यपरस्यानवच्छेदकत्वादितिनोक्तप्रतीतिवलात्तदै
शिकमव्याप्यवृत्तित्वात्तविभिन्नकालावच्छेदेनैवविभिन्नावच्छेदेनापिवर्तमानयोरेकाधिकरणतायामव्यपरस्यानवच्छे
दकत्वादितिनोक्तप्रतीतिवलात्तद्दैशिकमव्याप्यवृत्तित्वंभेदस्यैवसर्वथैवमूलेव्याप्यव्यापकभावाज्ञानेपीतिनिरुक्तव्या
प्तित्वव्यापकतात्वाभ्यांव्याप्तिव्यापकत्वयोरज्ञानेपीत्यर्थःवस्तुसतोवस्तुगत्यायोव्याप्यव्यापकभावस्तस्यतथात्वेनव्या

प्रितत्वादिनाश्चज्ञायमानस्य च विशेषितस्य षष्ठ्यायेत्वं समासविवरणवाक्यस्य षष्ठ्या प्रतिपत्तिः संभवतीति शेषः॰ व्याप्यव्याप
कभावस्य विशेषणानवच्छिन्नस्य शक्यत्वप्रतिपत्तिसंभवइत्यत आह संबंधित्वेनैवेति भावस्य चावच्छिन्नस्य तो निरू
कव्याप्तित्वादिनाव्याप्त्यादि ऽनेनेति नरूपेण तज्ज्ञानपि काविरहात्तोत्तमात्रपादिरिति भावः संबंधस्य निरूपकघटितत्वमा
शंक्याह निरूपितेति संबंधत्वविशेष्यत्वादिभिन्नविषयतारूपं पदार्थान्तरं वा न तच्च निरूपकघटितमेव इति तत्त्वप्रस्य निरू
पितमित्यर्थः मूलेन चैवमननुगमइति स्वसाध्यादिविशेषघटितनिरुक्तधर्मस्य व्याप्तिलक्षणत्वेऽननुगमः न्त्येकं
एकलव्याप्तिसाधारणापविरहः दोषाय स्वव्याप्यैः कृत्स्नसाध्यादेः काव्याप्तिरिति प्रश्नेऽननुगतस्यैव तत्तत्साध्यादिनिरूपि
तव्याप्तित्वरूपाननुगतत्वलक्षणतावच्छेदकावच्छिन्नस्यैव लक्ष्यत्वात् तन्निरुक्ताननुगतलक्षणावत्त्वेन प्रतिपादनीयत्वात् तथा
चलक्षणतावच्छेदकैक्याभावान्नाव्याप्तिरिति भावः नन्वनुलक्ष्याननुगमाभावान्न लक्षणाव्याप्तिदोषः तथाप्यननुगमितो व्याप्तिज्ञा राम॰
नहेतुतायाश्चाननुगतत्वात् सिद्धान्ते हेतुतायाश्चाननुगतव्याप्तिघटितरूपावच्छिन्नायाव्यभिचारेणासंभवदुक्ताशंकायां दोधि १५२

त्तिकृदाहस्यचेति इत्थं साध्यादिविशेषघटितत्वेनाननुगतायाश्च नतिप्रसक्तेर्नैकरूपेणोकारणतावच्छेदकत्वेरैनि
वेशयितुमशक्यत्वात् तथावक्तृपत्तइति सामान्यतोऽनुमितित्वावच्छिन्नं प्रति व्याप्तिज्ञानत्वेन न हेतुताश्चापि च भावज्ञानेके
नतान्नत्वेन वा हेतुताविशेषसामग्र्येवान्तिप्रसंगात् तत्साध्यादिविषयकतत्तल्लिंगकानुमितित्वमेवाननुगततत्तत्सा
ध्यलिंगादिघटितव्याप्तिज्ञानजन्यतावच्छेदकमतो न व्यभिचार इत्याशयः स्वरूपमशाला वच्छेदकत्वांशे लक्षणात्रय एव
कृपसंगाते रैतल्लक्षणाद्युत्पस्यावहितात्याभावगर्भलक्षणादुपपरतार्थमनिराकुरुते एतेइति चान्तं तात्पर्यान्तिस्वान्यो
त्पाभावगर्भत्वेन लक्षणयोरैक्यमिति द्विवचनसंगतिरिति भावः ताद्दशाभावानभ्युपगमादिति समाधानस्याभिप्रायवि
तर्केणविचारसहत्वं प्रदर्शयितुं युगमेवेत्यादि समाधानमवतारयति नन्वित्यादिना अत्र प्रामाणिके वनि घटो नास्तीत्याद्यनन्य
पासिद्धप्रतीति विषयत्वाभिमतार्थः इति समाधातुरभिप्रायः एकैकाभाववतीति घटो नास्तीत्यादिप्रतीतितः द्वौ नस्त इतीति
तत्र घटपटौ न स्त इत्यर्थः एवमग्रेऽपि विलक्षणत्वादिति तथा च ताद्दशप्रतीतिवैलक्षण्यानुवोधनेन घटत्वावच्छिन्नप्र

तियोगिताकत्वं तद्विषयः अपि तु घटपटोभयत्वावच्छिन्नप्रतियोगिताकत्वमेवेति स्वीकरणीयमिति भावः ननु घटो नास्ति
पटो नास्तीत्यत्रेव घटश्च गौश्च न स्त इत्यत्रापि घटपटत्वावच्छिन्नप्रतियोगिताकत्वेनाभावद्वयं भासते घटपटांशेऽधिकस्य द्वि
त्वस्योपलक्षणतया भानेनैव च प्रतीतिवैलक्षण्यमित्यत आह शब्दादिनेत्यादि भवन्मते शाब्दघटपटौ न स्त इति निश्चयस्यैव
घटादिरूपे प्रत्येकघटत्वावच्छिन्नाभावस्यापि निश्चयसंभवात् प्रत्येकाभावसंशयो न भवत्यत्यतः शब्दादिनेति एकै
काभावसंशयात् अत्र घटो न वेत्यादिसंशयात् उक्तप्रतिपत्त्योक्तरूपेण प्रत्येकाभावविषयत्वे तस्य एतादृशप्रतिबंध
कत्वापत्तेरिति भावः ननु तादृशसंशयानुत्पादे तथापि एकदाचिदिच्छाधीनः संभवतीत्यतो द्वयोरिति तदसमस्याह विषयेति स्वाभावद्वय
रूपविषयस्यानुगतरूपेणाभानेऽपि विनेत्यर्थः अभावद्वयमनुगतरूपेणैव भासत इति शंकनेनेवेति प्रतियोगिकत्वमात्रमित्य गा०
न्नविशिष्टघटत्वादेः प्रतियोगितावच्छेदकत्वविषयत्वमवच्छेदः एतावतोक्तसंशयानुपपत्तिरपि परिहृता तदवच्छि १५२
न्नकोटिकसंशये प्रतियोगितावच्छेदकत्वावगाहिन एवाभावनिश्चयस्य प्रतिबंधकत्वात् द्वित्वसमानाधिकरणेति द्वित्वसा

मानाधिकरणोपलक्षितेत्यर्थः तेन प्रत्येकाभावप्रतियोगितावच्छेदकघटत्वादौ द्वित्वसामानाधिकरण्यस्य स्वत्वविशेषणत्व
विरहेऽपि न क्षतिः प्रतियोगिताप्रकारकत्वानितिचोपलक्षणस्यापि प्रतियोगितावच्छेदकाद्यप्रकारत्वाद्युपगमात् यद्यपि द्वि
त्वसमानाधिकरणत्वं च घटपटद्वित्वसामानाधिकरण्यं च तद्घटत्वादिसाधारणमिति तद्वच्छिन्नाभावादपि घटपटोभय
वत्यपि घटपटौ न स्त इति प्रत्ययापत्तिरेतत्कल्पे यथाक्त इह एतदत्रेति तथापि घटपटद्वित्वसामान्यसामानाधिकरण्यं
तत्सामान्यनिष्ठसामानाधिकरण्यप्रतियोगित्वं वा विवक्षितं तत्र प्रथमपक्षे दोषमाह तादृशेति तादृशो घटपटादिरूपयोर्द्वि
त्वाधिकरणाव्यक्तिविशेषस्तद्विरहेऽपि नित्यया विधीभपदार्थत्वेन घटत्वमपवति तादृशो घटपटादिरूपौ द्वौ न स्त इत्यप्रत्यया
त्तया च तादृशप्रत्ययापत्तिरिति भावः द्वितीये दोषमाह द्वित्वसामानाधिकरण्येति द्वित्वसामानाधिकरण्येन रूपेणाघ
च्यं धर्मितावच्छेदकनिष्ठप्रत्यासत्त्या साध्यधर्मिकहेतुसहचारज्ञानस्य व्यापकताग्रहकत्वमित्यभिप्रायः यदि व्यापकताभ्र २०४

ममात्र एव सहचारभ्रमस्य हेतुत्वमविवादं स्यात्तदैवोक्तयुक्त्या व्यापकताग्रह सामान्ये सहचारग्रहस्य हेतुतास्यात्तदेवने
तु निपतान्वयव्यतिरेकानुविधानमेवासिद्धमित्याह विरुद्धेपि हीति क्रमयोगपद्याभ्यां न क्रमयोगपद्याभ्यामित्यत्र यथासंख्यम
न्वयो बोध्यः कार्यकारणभावइतिनिपतयोर्वापर्ययेमित्यर्थः नच सहचारस्य व्यापकत्वसहचरितत्तयातज्ज्ञानस्य दोष
विषया व्यापकताभ्रमंप्रतिचाकचक्यादिज्ञानस्य रजतत्वादिभ्रमंप्रतीव हेतुत्वं सर्वमतसिद्धमेवेति वाच्यं क्वचिद्व्यापकं
ताभ्रमे दोषविधया तद्धेतुत्वादेवतम्नुमसामान्येतज्ज्ञानसामान्येवातद्धेतुतासिद्धेः सहचारभ्रमंप्रत्यपि उक्तक्रमेणादो
षविधया क्वचिद्व्यापकताज्ञानहेतुता याः सुवचत्वया विपरीतस्यापि वक्तुं शक्यत्वादितिभावः प्रसंगाद्भ्रमबुद्ध्यादिसाम
न्यपरतोद्रिपत्वं व्यवस्थापयतीदं पुनरिति यावद्दिह्लेतिमध्यवर्तिमित्यादिपुरुषमात्रसन्निकर्षभूम्यर्पितत्वं वह्नितत्त्वं
विप्रकृष्टत्वं दूरत्वं दोषं समवहितत्वं वा सभादिदेशेति वा सभाद्यधिकरणदेशेत्यर्थः नग्रहस्त इति तादृशपराणोपलभ्य
तद्रूपार्थः एतन्नवं द्विगुणत्वादिनिष्ठतादृशप्रतियोगितावच्छेदकत्वस्य स्वरूपानतिरिक्तत्वेपि नासंगतिः अभावदेशेति अभावा

घाधिधिकरणतद्देशोत्पर्थः विप्रकर्षादिनेतिस्त्रादिनाव्यवधानपरिग्रहः ग्राहकाभावादितिताद्दशोग्राहकसामग्र्यावारिता
यास्तन्निष्ठाभावप्रतियोगितावच्छेदकत्वेनावच्छिन्नग्राहकसामग्र्यास्त्वभावादित्यर्थः सत्वेप्यग्रहसंभवादितिइंद्रियलब्धेरि
तितास्संनिकर्षादिमतिघटत्वादौसत्वेपिघटादिसूक्ष्मभूमाधिकरणविप्रकर्षादिनात्वनुपलंभसंभवादित्यर्थः अनुपल
ब्धेरितिताद्दशावच्छेदकत्वरूपप्रतियोग्युपलंभाभावस्येत्यर्थः प्रतियोगिसत्वविरोधित्वलक्षणोप्रतियोगित्वप्रसंतितत्प्रतियोगि
कत्वरूपेत्यर्थः यद्वृत्तिविशेषणाविशेषितस्यताद्दशावच्छेदकत्वरूपप्रतियोगिनस्तदुपलंभाभावापत्त्यामूलशैथिल्येना
नुपलब्धिप्रयोग्यतापादकत्वादितिभावः तत्सामान्याभावइतिधूमाधिकरणसन्निकृष्टेतद्देशेतनिष्ठाभावप्रतियोगितावा
च्छेदकत्वाभावग्राहकयोग्यानुपलंभसंभवात्सामान्यपदंउपनीतभानियोग्यानुपलंभानपेक्षणात्तल्लौकिकेतियथैव
मीदृशीव्याप्तिर्नगृहीतैवलौकिकप्रत्यक्षासंभवेपिनांतरसापेक्षस्योपनीतभानादेवसंभवात्तत्तथाताद्दशावच्छेदकत्व रा०म०
स्यलौकिकसंनिकर्षीतत्सामान्याभावस्यवाभावत्वादिसामान्यप्रत्यासत्तितोभानेनताद्दशावच्छेदकत्वोपलंभेनतत्सामान्या २०५

भावस्योपनीतभानसंभवइतिवाच्यं एवमपिसामान्यप्रत्यासत्तेस्स्वयमनीपतपातइनस्तुपगमपक्षेतद्ग्रहानुपपत्तेर्धूवी
रत्वादित्यशेकामपतिनीक्षुराहपरं स्वितिविरोधस्फुरणादिवरणादितिधूमत्वावच्छिन्नाभावेधूमादिविरोधग्रहादिवशादि
त्यर्थः गृहीतधूमविरुद्धाभावप्रतियोगितावच्छेदकत्वादिरूपव्याप्तिरिति किं हेतुकान्यनुमितिः उक्तविरोधग्रहस्यचैताद्दश
हेतुमत्ताग्रहसंपादकतयैवोपयोगितावोध्यासाध्यप्रसिद्धिंविनाप्यभावसाध्यकव्यतिरेकिप्रवृत्तेर्नसाध्यप्रसिद्धेरपेक्षा
धूमाभावादौधूमवद्भिन्नत्वसामान्याभावरूपस्यविरोधस्यासुकदृशालौकिकप्रत्यक्षासंभवेनधूमत्वादिरूपपक्षेउ
क्तहेतुग्रहोपिदुर्घटः एवं ताद्दशहेतुत्वाभावस्याप्युक्तरीत्यालौकिकप्रत्यक्षासंभवेनव्यतिरेकसहचाराद्यग्रहोपितथैव
तउक्तंकपंचिदितिसाध्यप्रसिद्धेरनपेक्षणात्कैश्चिल्लिंगकव्यतिरेकानुमानात्धूमवद्भिन्नत्वमभावप्रतियोगिएतदव
टाद्भिन्नत्वादित्याद्यनुमानेनपक्षतावच्छेदकावच्छेदेनाभावप्रतियोगित्वसिद्धावितिपक्षधर्मतावलाद्धूमवद्भिन्नत्वसामान्या
भावरूपविरोधभानेननताद्दशोपनायकत्वानवलाद्धूमाभावादौधूमविरोधग्रहसंभवेनपक्षेउक्तहेतुमत्वग्रहः संभवति

एवमप्रसिद्धसाध्यकानुमानात् धूमविरहद्धाभावप्रतियोगितावच्छेदकत्वमभावप्रतियोगिघटत्वात्वहित्वादित्याद्यनुमा
नेनोक्तरीत्याऽत्रद्धाभावच्छेदकत्वासामान्याभावभानेनोपनायकज्ञानबलाद्व्यतिरेकदृष्टान्ते उक्तहेतुव्यतिरेकग्रहसं
भवइतिभावः पद्मप्युक्तरीत्याऽभावप्रतियोगित्वसाध्यकानुमाने धर्मिताभेदनोपस्थितस्यापि धूमसमानाधिकरणा
भावप्रतियोगितावच्छेदकत्वसामान्याभावस्य वह्नित्वादावुपनीतभावसंभवस्तथापि किंचिद्धर्मिविशेष्यकमप्युपनायक
तज्ज्ञानं संभवतीतिसुत्यादनाप्रसिद्धसाध्यकानुमानमित्तिहितं नचव्याप्तिग्रहे अनुमानान्तरापेक्षायामनवस्थिति
वाच्यंचिरानुमितव्यापकतावच्छेदकत्वस्मरणादित्तोपिप्रकृतानुमित्युपधायकतदुपनीतभानसंभवेनानवस्थितविरल
बाधिज्ञानानुमितिवास्ताप्तनपेक्षणेनदोषानवकाशात् वह्न्यभावे धूमविरोधस्याभानदशायां तदुभयसामानाधिक
रण्यस्यापि भानसंभवात् गृहीत धूमव्याप्यवह्निकस्यवह्न्यभावे धूमविरोधनिश्चयोत्पत्तेः स्वाभावेचउपस्थितिमात्रेनै रा०म०
वस्वविरोधः स्वनिश्चयः स्वव्याप्यवृत्तित्वग्रहं विनास्वस्मिन्स्वाभावसामानाधिकरण्यापग्रहादित्तिवह्नित्वादावित्यत्वभिधाय २०६

धूमत्वादाविति तस्यानएवेति व्याप्तेर्लौकिकप्रत्यक्षासंभवादेव व्याप्तेर्लौकिकप्रत्यक्षोपगमेऽप्यानुमानिकादिविपरीतज्ञान
स्यलौकिकप्रत्यक्षाविरोधित्वयाऽप्यनुमानिकव्यभिचारस्य ग्रहदशायामपि लौकिकव्याप्तिज्ञानमुपपद्यते चेत्तु पक्षं भासंगतिः
उपनीतभाने पुनरानुमानिकादिव्यभिचारज्ञानमपि विरोधीति दर्शयति निर्णयात्मनीति निर्णयात्मनि दोषविशेषाजन्ये
उपनीतभाने संशयादिसाधारणस्य विपरीतज्ञानमात्रस्यैव प्रतिबंधकत्वादिति योऽत्र नाएतच्चाग्राह्यसंशयस्य प्रत्यक्षनि
र्णयप्रतिबंधकत्वापत्तौ वैयोक्तं संशयस्य संशयाप्रतिबध्यत्वनिर्वाहाय निर्णयात्मनीति मंडूकरसांजनादिरूपदोषज
न्येऽस्यागत्या उपनीतभानस्यानुमानिकाद्युरगत्वाभावज्ञानाप्रतिबध्यत्वादतत्रान्यांतं लौकिकसन्निकर्षजन्यनिर्णयस्यानु
मानिकादिविपरीतज्ञानाप्रतिबध्यतयाऽउपनीतिभान इति लौकिकसन्निकर्षजन्यप्रत्यक्षव्यत्ययः प्रत्यक्षत्वनिवेशाद
नुमित्यादेः संशयाप्रतिबध्यत्वनिर्वाहः संशयादिसाधारणस्येत्येतेनप्रतिबध्यतावच्छेदककोटौ संशयान्यत्वस्यानिर्णय
त्वानिवेशः सूचितः तन्मते संशयाऽनुमित्यादौ च विपरीतनिर्णयस्य प्रतिबंधकत्वांतरं तोध्यं विवेचितं चेदमधस्तात्

हसंशयस्याप्रतिबंधकत्वावादिनां मतमाह सा धारणेति साधारणो दोषविशेषात्तन्योपनीतभानेनिश्चयात्मनो विपरीत
ज्ञानमात्रस्यैव प्रतिबंधकत्वादित्यत्वपः साधारणस्य संशयनिश्चयसाधारणस्य तथा च पूर्ववत्संशयात्पत्त्वेन प्रतिबध्यत
वच्छेदकमिति भावः उपनीतभानत्वमत्र कल्प्ये लौकिकसन्निकर्षजन्यनिर्णयान्यज्ञानत्वेमत्वं तत्त्वानुमानिकादेर्णपि विपरीत
निर्णयस्य लौकिकसन्निकर्षजन्यमपि संशयं प्रति विशिष्टिन प्रत्यकृत्वा निवेशादासुमित्यादौ न प्रतिबंधकत्वांतरकल्पनसंशु
यस्य संशयाप्रतिबंधकत्वमुपपादयपि तु निर्णयमात्र इति ज्ञानमात्रस्येति ज्ञानपदं हि तत्त्वार्थकं तदभाव च हूतित्वस्य व्याप्यत्वे लौ
किकप्रत्यक्षमुपपादयतां मतमाह तन्न धूमादाविति देशांतरेति अवदित्तविप्रकृष्टदेशत्वार्थः दूंद्रशसंभावनाविरहो देशां
तरावृत्तिरयं धूमोपदिवक्ष्यमाणावृत्तिः स्यात्तदा तत्र वेनोपलभ्येतेति निष्पादितुपलंभाद्विघटकापत्तिनिर्वाहकपकृतावच्छेदकेनि
श्चयउपपुत्स्यंते पकृतावच्छेदकातिरिक्तविशेषणविशिष्टिन प्रतियोगिमत्तायादकापपत्तेरयोग्यानुपलब्धिसकृतयादेशां राम०
तरवृत्तौ व्यभिचारवारणायदेशांतरावृत्तित्वस्यायादकविशेषणात्तयावश्यकत्वे न तस्य पकृतविशेषणात्वमप्यावश्यकमि २०७

तिहृदं यं धूमांतरे व्यभिचारसंशयसत्वेन पक्षेव्याप्यवत्तानिश्चयोपयोगिव्याप्तिधूमत्वावच्छिन्नत्वनिश्चयो न संभवतीत्याशंका
निराकरणार्थमाह लाघवादिति व्यभिचारसंशयप्रतिबंधकतायां लाघवत्तानस्यो नैजकत्वादिति भावः प्रतियोगिग्राहका
तिरिक्तविशेषणानवच्छिन्नत्वस्यापादकविशेषणतायामावश्यकत्वाद्देशांतरावृत्तित्वस्य च प्रतियोगिग्राहकत्वेन तद्व
च्छिन्नापादककापत्तेर्नयोग्यानुपलंभनिर्वाहकत्वेत्यादिरस्वरसो वर्द्धीत्यनेन सूचितः ॥ श्रीगणेशाय नमः ॥ ॥ तर्कोपत्रा
नुमित्यौपयिकव्याप्तिनिश्चयविरोधिशंकानिवृत्तिरूपेपत्तेन्नत्रतर्ककारणीभूतस्यापादकनिश्चयस्य व्याप्तिस्वाघविरहस्य
कृतावच्छेदकादीनां निश्चयस्य विरोधिनी याशंका तन्निवृत्त्यर्थमपि तर्कान्न पूर्वं तर्कांतरमुपेयं तर्कपूर्वमपि च तत्त्रानक तत्
निश्चयविरोधिशंकांतरनिवृत्त्यर्थं तर्कांतरं इत्यनवस्थिततर्कधारास्वीकारप्रसंगइत्याशंकते मूलेतर्केस्येति व्याप्तिमूलकु
त्वेन व्याप्त्यादिनिश्चयजन्यत्वेन पावदिति पत्रत्र याशंकायास्तर्कान्यतोऽनिवृत्तिस्तत्रैव शंकानिवृत्त्यर्थं तर्कस्वीकारादित्यर्थः
घ पत्रयादृशतर्के उत्पत्स्यमान इति शेषः यादृशतर्कात्पूर्वमित्यर्थः व्याघातेनशंकैव नावतरतीति निवृत्तिर्व्याघातेनैवाशंका॥ के
वलद्विरोधिनी

गा.टी.

ति तत्वत्वर्यंकारणांतराभावप्रयुक्तः सिद्धातीत्यर्थः केचित्तु बाधाभावेनैवतद्विरोधिनीशंकानावतरतितर्कोन्यस्यविरोधितयै
वताहृशशंकाविरहइतियावत्तद्विवरणंयंतितर्कविनै तत्कोर्तर्कविनैवताहृशतर्ककारणाव्याप्यादिनिश्चयसंभवोप
पद्यतर्थः तथाचतत्रैवविधिदन्त्रानवस्थितिमाक्कीदृशतर्कविरोधिनीत्यकीदृशशंकानांतर्कोन्यस्यकस्यप्रतिबंधकत
स्ता यानिवृत्तिरित्याशंक्यांतर्कविशेषविरोधिशंकाविशेषेपुन्त्रनन्यप्रतिबंधकताव्यवस्थापकंशंकाविशेषाणांतेषांदुरपह्नव
प्रवृत्तिविशेषानिर्वाहप्रसंजकत्वंप्रदर्शयन्नुपादानस्यतत्वप्रतिबंधकत्वमभिधत्तेतथाहीत्यादिनातस्मात्तदुपादानेमेव
शंकाप्रतिबंधकमितिसंतेनधूमोपदीत्यादितर्कस्यप्रकृतव्याप्तिग्रहानुपयोगित्वेतासूर्वतर्कोतरानपेक्षामुत्पादनस्यान
वस्थापन्त्रतुमित्यौपयिकव्याप्तिग्रहासंभवाद्वेपोद्धारतुपयोगितेत्याशंकांपरिहरति ह्यीपुं दीर्वितिकारोव्याप्तिग्रहोपयोगि
तमन्वयव्यतिरेकेनकार्यकारणभावग्रहंप्रत्युपयोगितयाप्रकृतेतर्कस्यप्रकृतोपयोगितांघटयिष्यन्नवह्निधूमकारण राम०
यरं तभावाहकान्वयव्यतिरेकप्रदर्शयतिधूमाशनेत्यादिनान्वयव्यतिरेकग्रहविषयसमुदायमध्येन्यकारणारसभादिम २०८

समुदाय-

परो४ व५ व६ पि८

नंतभाव्यकारणमात्रघटितसमुदायस्यान्वयव्यतिरेकग्रहसंभवेताहृशसमुदायत्वसामानाधिकरणमात्रेणाग्रधूमंका
रणत्वसंदेहेपितत्समुदायांतर्गतस्यकस्यापि व्यभिचारदर्शनासंभवेनएततत्समुदायमभिचारिधूमाकल्पनेलाघव
प्रतिसंधाननचेततत्समुदायत्वावच्छेदेनकारणतानिश्चयात्तर्केवैयर्थ्यस्यादितितत्तदंतर्भावस्यावश्यकत्वमाविष्कर्तुं
रासभपादानंस्यवश्यंसेतेषामितिधूमसामग्रीएततत्समुदायांतर्गतेवेत्यवधार्येत्यर्थः एतदवधारणंचधूमेवह्निसम
वधानकालीनवह्नितत्समवधानेतरयावत्कारणकत्वस्यापाद्यव्यतिरेकस्यनिश्चयेउपपुत्पत्तेतदनिश्चयेवह्नितत्सम
वधानेतरयावद्धूमकारणवन्निवृत्त्यासमवधानकालेयावद्धूमकारणवृत्तस्यदुर्निरूपत्वात्तत्समुदायांतर्गतेषुपिवस्त्व
तरेषुधूमकारणत्वसंशयसंभवात् केचित्तु अवश्यंसेतेषामितिधूमोहुताशनरासभायन्यतमकारणकइतिनिश्चये
त्यर्थः सामान्यरूपेणकारणताग्राहीएताहृशनिश्चयश्चाहेतुकएवोत्पन्नस्यतदुत्पत्ताहृशशंकानिवर्त्तकतयाधूमस्यवह्नि
कारणकत्वनिश्चायकतर्कसंपादकइत्याहुः तन्निर्विंशिकादावितिकतयाधूमकारणकत्वमात्रनिश्चयादेवाहेतुकत्वशंकानि
तर्केवैयर्थ्यमित्याविष्कर्तुंरासभपदोपादानं वो ध्यं यत्तु तत्सु तादृशान्वयव्यतिरेकग्रहदशायांअकारणेपिकारण संवहतत्त्वसंभवा
त्समवधानकालेतादृशयावत्किंचिद्भावस्तत्वदशायांवह्निसमवधानकालीनवह्नितत्समवधानेतरयावत्कारणकत्वनिश्चयासंभ
वात्तर्केपिअनुपपन्नइत्याशंकापरोयं अवधार्यसंदिग्धेरत्यंतमंथः यस्यचव्यतिरेकेपीत्यादिग्रंथेनाकारणेकारणत्वाभावनिश्चयं

ह्नितसंभवात् उक्तसमुदायांतर्गतकारणकत्वनिश्चयपर्य्यंतानयेकृरणा तत्संदिग्धवृत्तिश्चायमेरोतीत्यनेनान्वयः किंभेना
नीतिधूमकारणत्वहुताशनाद्यन्यतमत्वव्यापकतन्मूनवृत्तिविलत्वर्थः अयंच संशयो विशिष्यकारणतानिश्चये तको
पयोगितानिर्वाहकस्यवह्निधूमज्ञान कोनवेतिविशेषरूपेणसंशयस्यसंपादकः अन्यतमत्वावच्छेदेन कारणतानि
[redacted] श्चयेनातृशसंशयासंभवादितिप्रदर्शितः नन्वेवंकमेणासन्नहुतांतर्गतस्यवह्नेरितरास
भादेरपिकथंन धूमत्वावच्छिन्नंप्रतिकारणतानिश्चयः व्यक्तिविशेषवह्न्यसमवहितात्उत्पत्त्वेरितरासभाद्यसमवहि
ताजन्यत्वस्यापिसत्त्वनिश्चयतया धूमत्वसामानाधिकरण्येनवह्निजन्यतायाः इतरासभादिजन्यतायाश्चापिग्राहकस्य
तर्कस्यसंभवात् धूमत्वसामानाधिकरण्येनवह्निजन्यत्वनिश्चयमार्गोवह्न्यभावारोपात्तदवच्छेदेनवह्निजन्यतायाः इवे
धूमत्वसामानाधिकरण्येनरासभादिजन्यत्वस्य हेमारोपात्तदवच्छेदेनरासभादिजन्यतायाअपिसत्वग्रहात्वा धूमत्वावच्छे १०९
देन वह्न्यसमवहिताजन्यत्वस्यापिदुर्निश्चयतया वह्निजन्यताग्राहकस्यापिधूमसामान्यपक्षकतर्कस्यासंभवात् रामः

तत्संभ योयोगात् सामानाधिकरण्येनकारणत्वस्यावधारितत्वादवच्छेदकावच्छेदेनविपरीतकोटिभानंनसंभवतीति
सामानाधिकरण्येनात्तदवगाहितालिभायकानिचिन्तत्वके सामानाधिकरण्येनविपरीतकोटिभानंनसामानाधिकरण्येनाभावकोटि
र्नितद्धूमविरोधीत्वेतदुरयकानिचि तथेत्यनेनभावकोटिसामानाधिकरण्यसंवलनेनविपरीतकोटिसामानाधिकरण्याद्वेतुखः

पदिचवह्न्यसमवधानकालीनवह्नितद्व्याप्येतरयावत्कारणकत्ववद्रासभाद्यसमवधानकालीनतत्तद्व्यापारेत
रयावत्कारणकत्वस्यरासभाद्यसमवहिताजन्ये धूमेऽसत्वात्तंनतत्ररासभादिजन्यताग्राहकतर्कोऽभ्रांतानाम्भवत
ति रतिश्चतएवचतद्धूमत्वावच्छिन्नंप्रत्यपिनतेषांहेतुताग्रहइत्युच्यतेतदापि वह्नितत्समवधानेतरयावद्धूमकार
रासस्य णानांवह्न्यसमवधानकालीनत्वग्रहदशायांतत्ररासभासत्वे धूमेकारणत्वसंदेहे धूमेपारिभाषिकसंवहस्यमाणा ते
जन्यत्वस्यनिश्चयोनसंभवतिरासभस्यापितयाविधयावत्कारणांतर्गतत्वेनसंदिग्धयात्तस्यवह्न्यसमवधानका
लीनत्वादर्शनेन धूमेविशिष्टसंशयात् इत्याशंकानिराकरणायाहउक्तलाघवेनोक्तसमुदायत्वावच्छेदेन धूमका
रणतानिश्चयासंभवप्रदर्शनायचधूमत्वावच्छिन्नेवह्नित्वावच्छिन्नस्यैवतन्मूनवृत्तिमहान्तसिप्यवह्नित्वावच्छिन्नस्यका
पिजन्यतानिश्चयेतु वीरस्वेत्याशंकापरिज्ञिहीर्षुव्यभिचारनिरूपणेनरासभत्वावच्छिन्नस्यकारणतातिरोहितेनिश्चीय
णं तेदृष्टाहतत्वचेतिपश्चादपिधूमांतरेरासभादेर्व्यभिचारदर्शनेपितद्धूमत्वावच्छिन्नंप्रतिरासभादेःकारणतासंदेहोनापैति

धूमादिनिश्चयात्

गा॰टी॰ तथापि यत्र सामान्यं यत्र सामान्यस्य प्रयोजकत्वमसति बाधके तद्विशेषे तद्विशेषस्यैवेति नियमात् सामान्यकारणताविर
बधे हावधारणादेव विशेषकारणताविरहावधारणमित्यर्थः धूमत्वावच्छिन्नं प्रति महानसीयवह्नित्वेन कारणताग्राह
नि कतर्कावतारसंभवेपि व्यभिचारनिश्चयादेव न तद्ग्रहः यावद्व्यभिचारो न स्फुरति तावत्तु तत्र धूमत्वा
पेक्षया धूमत्वस्य जन्यतावच्छेदकत्वे लाघवं च प्रतिसंधत्ते तावद्धूमत्वावच्छिन्नं प्रति तद्व्यापकतानवच्छेदकरूपावच्छि
न्नस्यापि कारणतान्निश्चिनोत्येव उत्तरकालं च व्यभिचारस्फूर्तौ निश्चिनोति तादृशकारणतानिश्चये भ्रमत्वं ग्रहस्तद् त्वव्य
य तिभावः यस्येति व्यतिरेकविशिष्टतद्व्यापारभिन्नसकलधूमकारणसमवधानकालीनतदधिकरणानिष्ठधूमोत्प
वह्नित्वपूर्ववर्तित्वाभावः प्रतीत्यर्थः तस्य कारणत्वमेवेति धूमस्याधिकरणदेशावच्छिन्नतदभाववत्त्वाद्वह्नित्वस्य कार
णकत्वाभावरूपं समवहितान्यत्वविशिष्टतदसमवधानकालीनतत्तद्व्यापारेतरयावत्तत्कारणकत्वरूपतन्न राम॰
दृ कारणकत्वव्याप्यधर्मदर्शनेन तत्कारणकत्वाभावमापादकीकृत्य निश्चितं तादृशधर्माभावापादनसंभवादिति भावः २१०

निश्चयेन पं४

तादृशाक्रमेण कार्य्यकारणभावग्रहे तर्कस्य हेतुत्वे मानाभावात् प्रतिबंधकशंकाविघटनद्वारा तर्कस्य उपयोगितां द तत्र
र्शयति तत्र चेति स्वकारणत्वसंदेहः धूमवह्निकारणकत्वाभावसंदेहः विरोधितां एकत्रैककालावच्छेदेनानुत्पद्यमान
मत तां निवर्त्तत इति तथा च ग्राह्यसंशयस्य प्रत्यक्षनिश्चयप्रतिबंधकत्वमवलंब्य तदभिहितं न तु प्रतिबंधकत्वमतः संशय
तर्कस्य सामग्रीविघटनेन तदभावज्ञानप्रतिबंधकस्य तदभावापादककोटिनिश्चयो योपयोगीति भावः व्याप्यतर्कहेतुरापाद्य
व्यतिरेकनिश्चयः आपादककोटिकशंकां निवर्त्तयिष्यति आपादकस्यापाद्यव्याप्यतया आपाद्यव्यतिरेकस्यापाद
कव्यतिरेकव्याप्यतया तन्निश्चयस्य विशेषदर्शनत्वादिति किं तर्केणेत्यत आह आपाद्यव्यतिरेकस्यापादकव्यतिरेकव्याप्यत्वेपि
तादृशव्याप्तिप्रतिसंधानानियमेन तर्कस्योपयोग इति वा चं आपाद्येन आपादकव्यापकत्वाज्ञानस्य तर्ककारणतयात
दृशज्ञाननियमेनापाद्याभावे आपादकाभावव्याप्तिज्ञानस्य किंचित्करत्वात् पुरुषत्वाभावे करादिमत्त्वाभावव्याप्तिग्रहेपि क
रादिव्यापकत्वेन पुरुषत्वादिग्रहसहितपुरुषत्वाद्यभाववत्ताहस्यकरादिसंशयानिवर्तकत्वादिति चेन्न तर्ककारणीभूतज्ञा

तर्क ४

गा॰टि॰ ननाशेपितर्कसत्वेशंकानुत्पत्त्यनुबोधेनतर्कस्योपयोगित्वात्तन्नचपूर्वंज्ञातस्याप्याव्यतिरेकज्ञानस्यनाशेपितन्मूलका
ऽज्ञानसत्ताहृशज्ञानादापादकाभावज्ञानाद्युक्तरकालमपिशंकानुत्पादनिर्वाहात्तर्कस्यकिंचित्करत्वमेवेतिवाच्यंकुत
धा श्चित्प्रतिबंधकाज्ञाहृशज्ञानानुत्पादेपितर्कराशंकाप्रतिबं[illegible]तत्स्याहार्य्यशंकायाविशेषदर्शनानिवर्तनीयतयातादृ
त्य शशंकायाश्चप्रतिबंधकाभावपितत्सामग्रीसत्वेनिश्चयोत्पत्तिसंभवात्तत्सामग्रीविघटनायतर्कापेक्षेतिमिश्राः ननु
कार्य्यकारणभावग्रहस्यैवकाप्रकृतोपयोगितायत्तेंदंयेनतद्ग्राहकतर्कविरोधिशंकापांव्याघातउपद[illegible]तदुत्पत्तत्र २४
हस्यानुसंधेयत्वेतिव्याप्तिग्रहार्थमपेक्षणीयदूरत्पर्षः तदधीनत्वादितिकार्य्यत्वस्यव्यभिचारविरोधित्वेनकार्य्यतानि
श्चयस्यविशेषदर्शनतयाव्याप्तिव्याप्यव्यतिरेकनिश्चयेभुवयाधूमोयदिवह्निव्यभिचारीस्यात्तर्हिवह्निजन्योनस्या
दित्यादृशतर्कोत्थापकतयाव्यभिचारशंकानिवर्तकत्वादितिभावः नचकार्य्यतायाव्याप्तिघटितत्वात्कार्य्यता राम॰
ज्ञानमेवव्याप्तिज्ञानंनतुतदधीनमितिवाच्यंकार्य्यताघटकव्याप्तेःकार्य्याव्यवहितप्राक्कालावच्छिन्नकार्य्याधिक श्री

क्षणा॰

कारणभाव॰

रणावृत्त्यभावाप्रतियोगित्वरूपव्यापकताघटिततयाप्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगित्व
रूपव्यापकताघटितानुमित्योपयिकव्याप्तेस्तत्वेऽस्यत्वात् इहकार्यताघटकतयाऽनुमित्योपयिकव्याप्तेरभावेपिकार्य्य
ताप्रसत्ताहृशव्याप्तिनियतत्वरूपकार्य[illegible]यग्रहकालेपिकारणाभावव्यभिचारशंकानोत्पद्यतेविशेषदर्शनाभावस्यकार्य्य
सहवर्तितयाहेतुत्वा[illegible]तियाहर्यसंशयस्याप्रतिबंधकत्वामतेप्रा[illegible]व्यभिचारसंशयेपि व्याप्तिनिश्चयात्मक सत्ये
एवकार्य्यकारणभावनिश्चयःसंभवतीत्यतोपिकार्यकारणभावग्राहकतर्कविरोधिशंकाविरहोपपादनंप्रकृतोप
देश योगितामासादयतीत्याशयेनाहसामानाधिकरण्येनेति एकाधिकरणवृत्तित्वघटितेत्यर्थः अन्योन्याधिकरणेकार्य्य यदा
तत्रतदवच्छिन्नपूर्वक्षणेकारणसत्त्वरूपःपरस्तादृशव्यतिरेकःयत्राधिकरणेयदाकारणाभावस्तत्रतदव्यवहितोत्तरक्ष
णेकार्य्याभावरूपःतद्ग्राहकतर्कप्रमाणस्यतत्त्वेवहेतुहेतुमद्भावस्यैकदेशानिष्ठाभवसंयोगादिरूपसमानाधिकरणप्र
वद त्यासत्यवच्छिन्नकार्य्यकारणभावेग्रहेतेऽविषयीकुर्वतःतस्यैवकार्य्यकारणभावग्रहस्यैवव्याप्तिपरिच्छेदकत्वात्तन्नका

तादृशविशेषणाभावमादाय विपर्य्ययपर्यवसानवारणाय तस्य पक्षविशेषणतयोपादानं अतो वह्निरेवेत्यादिशंकाहृयनिराकरणमप्युपपद्यते तर्क०५
तदुभयस्याप्याप्यव्यतिरेकनिश्चयाविरोधित्वेपि विशिष्टपक्षग्रहविरोधित्वात्तर्कविरोधित्वादित्युपाध्यायप्रभृतयो व्याचक्षते

ग०टी० ०पि निश्चयरूपत्वादित्यर्थः यदा कार्य्यं तदव्यवहितप्राक्क्षणे कारणं यदा कारणाभावस्तदव्यवहितक्षणे कार्य्याभाव इत्येता
दृशान्वयव्यतिरेकग्रहमात्रस्य कालिकप्रत्यासत्त्यवच्छिन्नकार्य्यत्वस्य व्याप्तिविरोधिव्यभिचाराभावतर्कतया कार्य्यका
रणाभावस्य सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्वोत्कीर्तनं वह्न्यसमवहितातजन्यत्वविशिष्टवह्निसमवहितातजन्यत्व
व्याप्यादिकं जन्यत्वाभावव्याप्यः वह्न्यसमवहितातजन्यत्वविशिष्टधूमत्वं प्रकृतावच्छेदकं घटादौ व्यभिचारवारणाय वह्न्य
समवहितातजन्यत्वरूपमापादकविशेषणमुपात्तं तत्र वह्न्यसमवहिततज्जन्यत्वसाधारणविशिष्टाभावत्वप्रकारेण वह्नि
समवहिततज्जन्यत्वरूपस्यापादकाभावस्य जन्यत्वरूपापाद्याभावेन सिद्धावपि पक्षीभूतधूमे तद्विशेषणोपादानं व्यर्थ
पाद्याभावे न विशिष्टस्यापादकस्याभावसिद्धेर्विशेषणे वह्निसमवहिततज्जन्यत्वरूपविरोध्यभावपर्यवसानार्थमित्यु
पाध्यायप्रभृतयो व्याचक्षते तेन तत्र भवतु विशिष्टाभावत्वरूपसामान्यधर्मपुरस्कारेण कृतिः तादृशसिद्धेरप्रमानप्रकृतया राम०
वह्निसमवहिततज्जन्यत्वेन वह्निसमवहिततज्जन्यत्वाभावकोटिकशंकाविरोधित्वविरहेपि तदवच्छिन्नापादककापत्ते २१२
त्वेन वह्निसमवहितजन्यत्वाभावकोटिकशंकाविरोधित्वविरहेपि तदवच्छिन्नापादककापत्ते तदवच्छिन्नप्रकारकज्ञानविरोधि
त्वेन वह्निसमवहितजन्यत्वाभावत्वावच्छिन्नापादककस्य प्रकृततर्कस्य तादृशशंकाविघटनद्वारा वह्निसमवहितजन्यत्वत्वावच्छिन्नानि

स्तदवच्छिन्नप्रकारकज्ञानविरोधित्वेन वह्निसमवहिततज्जन्यत्वावच्छिन्नानिश्चायकतासंभवादिति दर्शितम् पक्षविशेष
णसार्थक्यं पदकृत्यमुक्तं तद्रूपावच्छिन्नापादककतर्कस्यैव तद्रूपावच्छिन्नविशिष्टज्ञानप्रतिबंधकता तथारूपं यदि गुरा अ
न्यत्वविशिष्टसत्त्वावत्स्यात् गुणान्स्यादित्यादितर्कावतारदशायां रूपं सत्त्वावदित्यादिज्ञानानुदयप्रसंगादिति नोक्त
विशिष्टापादककतर्कस्य वह्निसमवहिततज्जन्यत्वकोटिकशंकाविरोधित्वेति मन्यते तदा तादृशपक्षविशेषणोपादा
नेपि न तस्य तादृशशंकाविरोधितानिर्वहतीत्यतस्तादृशपक्षविशेषणोपादानेन दृष्टाशंकां निराकृत्य तादृशविशेष
णोपादानसार्थक्यप्रतिविपर्य्ययपर्य्यवसानेन विपर्य्ययेपि तत्कोटिमात्रपर्य्यवसानेपि न इति तत्कोटितावच्छेदकावच्छिन्न
क साधकविपर्य्ययप्रतियोगितावच्छेदकावच्छिन्नापाद्यकसत्वयोः तदभावशंकेति तदवच्छिन्नाभावशंकेत्यर्थः तेन धू
मजनकतेजस्वीनस्यात् निर्धूमः स्यादित्याद्यापत्तेर्धूमजनकतेजस्त्वादिना वह्निमात्रपर्य्यवसायित्वेपि न वह्निमात्रवे
त्यादिशंकाविरोधित्वं विपर्य्ययानुमानादन्यादृशशंकाया निवृत्तिस्तर्कादप्याहार्य्यसाधारणतादृशशंकाया

गा॰टी॰ तु

एवेत्तिंपर्य्यवसितार्थः ननु विशेषितविशेषितसाधारणात्तद्धर्म्मावच्छिन्नापादककतर्कस्यैव तदवच्छिन्नकोटिकशंकाविरोधित्वं तथासति उक्तातिप्रसंगायातात् नापि शुद्धतद्धर्म्मावच्छिन्नापादकतर्कमात्रस्य तथात्वं गुणकर्मभिन्नसामान्यवद्गुणकर्मान्यत्वविशिष्टसत्तावत्स्यात् द्रव्यं स्यादित्येतादृशतर्कस्य शुद्धसत्तात्वावच्छिन्नापादककत्वविरहेपि सत्तात्वावच्छिन्नविशिष्टधीविरोधित्वानुभवादित्यवधारणतात्पर्य्यार्थः मात्रपदप्रयोजनमाह न्यथेति येन केनापि रूपेण तत्तद्वच्छिन्नविशिष्टधीविरोधित्वानुभवा तदभावशंकानिवर्तकत्वमित्यर्थः व्यापकतानवच्छेदकप्रकारेणानुमितौ साध्यभानान कोटिपर्य्यवसायिनस्तर्कस्यैव तदभावशंकानिवर्तकत्वमित्यर्थः व्यापकतानवच्छेदकप्रकारेणानुमितौ साध्यभानानभ्युपगंतृप्राचीनमतानुसारे पुनस्तत्तत्कोटिमात्रपर्य्यवसायित्वं तद्धर्म्मोपमात्रविधेयताकानुमितिप्रयोजकापघाभावकत्वं तदवच्छिन्नाभावशंकाविरोधिताप्रयोजकमितिपर्यवसन्नं तत एव विपर्य्यपदमित्यादेरर्थः तन्मते समानविषयकत्वेनैव विरोधित्वानस्युपगतिवं धकतया विशेषणावत्तानिश्चयकालीनविशिष्टाभावानुमितेर्विशेष्याभावमात्रविधेयकत्वनिर्वाहः तथा सत्यन्यथेत्यस्यापि तत्तत्कोटितदितरपर्य्यवसायिनोपितर्कस्य तदभावशंकाविरोधित्वेइत्येवार्थः

कोटि श्र राम॰ २१३

वह्निपदं वा॰

वह्नित्वघ्न्येति वह्निजन्यत्वदसमवहिततज्जन्यान्यतरीनस्यादित्यर्थः व्याप्यप्रतियोगितान्यत्वं चाग्नेनिर्वेह्यमाणं पारि
भाषिकं ग्राह्यं तेन वह्निसमवहिततज्जन्यघटादौ न व्यभिचारः वह्निसमवहितपरत्वन्यतरत्वं च नातिरिक्तो भेदः येन वह्नि
जन्यत्वपर्य्यवसायितानस्यात् किंतु स्वप्रतियोगितावच्छेदकीभूततत्तद्भेदप्रतियोगितावच्छेदकं तत्तद्धर्म्मस्वरूपमेवेत्या
स्व शयेनेदं अत एव धूमालोकान्यतरत्वस्य धूमत्वालोकत्वोभयरूपतापक्षेपि नहेतुनावह्निव्याप्यतानुमाने धर्मिभेदविरहेणा
वैयर्थ्यसंभवतीत्याशंक्य धूमत्वत्वाद्यप्रवेशेन परामर्शग्रन्थे दीधितिकृत्समाधास्यति नच वह्निपदस्य वह्निसमवहि
तपरत्वपक्षे वह्निसमवहिततज्जन्यभेदविशिष्टवह्न्यसमवहिततज्जन्यभेदस्याजन्यत्वनियतत्वया तत्तो गुरुतया व्याप्रतियो सम
गितानवच्छेदकत्वेन तदवच्छिन्नभेदरूपान्यतरत्वाप्रसिद्धिरिति वाच्यं एकभेदविशिष्टापरभेदात्यन्ताभावस्यैवान्यतरत्व
स्यात्रविवक्षितत्वात् तुल्ययुक्त्या तस्यापि वह्निसमवहिततज्जन्यतादिरूपानतिरिक्तत्वात्तस्य समानाधिकरणवह्निमत्वह्न
राणंतरोत्पन्नत्वरूपवह्निसमवहिततज्जन्यत्वस्याधिकरणदेशावच्छिन्नवह्न्यभाववत्क्षणानंतरक्षणोत्पन्नत्वरूपतद

तत्र

ति समवहितजन्यत्वसाधारणस्योत्पन्नत्वस्यानुगतस्याभावेपि न तादृशान्यतरत्वत्वावच्छिन्नतदत्यन्ताभावरूपादेकाप्रसिद्धिः पा
त्र वह्नित्वशून्यान्यतरजन्यानस्यादितिपाठेवह्निशून्यपदं वह्नित्वशून्यपरं न्न तथा वह्निपदमनर्थकं स्यात्तद्वह्नेरपि वह्नि
त्वशून्यत्वात् वह्निशून्यजन्यपदेनैव वह्निवह्निभिन्नजन्यतयोर्लाभात् वह्निवह्नित्वशून्यान्यतरत्वंच वह्न्यावृत्तिसद्ह्नित्वशू
न न्यावृत्तियत्तच्छून्यत्वं न तु तदितरभिन्नत्वं वह्निभिन्नत्वसति वह्नित्वशून्यभिन्नत्वस्याप्रसिद्धेः गुरुधर्मस्याभावप्रतियोगि
तावच्छेदकत्वोपगमात्तदन्यतरजन्यतात्वस्य जन्यतात्वसमनियतत्वेपि न तदवच्छिन्नाभावाप्रसिद्धिः आदिपदात्किं
चिज्जन्योनस्यात् उत्पन्नोनस्यादित्यादितर्कपरिग्रहः तथा चापत्तेः वह्निजन्यत्वाभावशंकानिवर्त्तकत्वापत्तेः वह्निपद
स्य वह्निसमवहितपरत्वपक्षे वह्निसमवहितजन्यत्वाभावशंकानिवर्त्तकत्वापत्तेरित्यर्थः अस्यापितर्कस्य वह्न्यसमव
हितजन्यत्वसाधारणरूपेण वह्निजन्यत्वपर्य्यवसायित्वादितिभावः तथापर्य्यवसायित्वा निरुक्तनतत्कोटिमात्रपर्य्यव राम॰ २५४
सायित्वा विशेषतोव्याप्यव्यापकाभावनिष्ठ्यातद्रूपावच्छिन्नतिरूपितयाव्याप्त्यर्थश्चनिर्वहतीतिशेषः सामान्यतदृति
तद्रूपवन्मात्रवृत्तिधर्मावच्छिन्ननिरूपितयावा

व्याप्त्यनुपपत्तेस्तथाचतादृशयात्तद्धर्म्मव्यापकधर्म्मावच्छिन्ननिरूपितव्याप्त्यापि क्वचिन्निर्वहतीत्यर्थः पक्षधर्मत्वला ता
भसहकृतपक्षेतद्रूपावच्छिन्नेतरव्यापकतावच्छेदकरूपाक्रांतस्यवाधवलात् इतरवाधादिसहकृतपरामर्शस्यव्यापक
तानवच्छेदकेनापिविशेषरूपेणसाध्यानुमितिजनकत्वादितिभावः तत्संपत्तयेजन्यत्वव्यापकतावच्छेदकीभूतवि
शिष्टाभावत्वाक्रांतस्य वह्न्यसमवहितजन्यत्वरूपविशेषणाभावस्य धूमत्वावच्छिन्नेवाधनिश्चयसंपत्तये पक्षे धूम
त्वावच्छिन्ने विशेषणीभूतितिम्ब्रन्ययाजन्यत्वस्य वह्निसमवहितजन्यत्वत्वावच्छिन्नाव्याप्यतयातद्रूपावच्छिन्नसाध्यक
त्वेनमकृततर्कस्यतद्धर्मावच्छिन्नाभावशंकानिवर्त्तकत्वानुपपत्तेः उपस्थितेनिश्चितेविशिष्टाभावेबुद्धेः विशिष्टाभा
वत्वावच्छिन्नसाध्यकानुमितेः विशेष्याभावमात्रावलंवितत्वात् विशेष्याभावमात्रवृत्तिधर्मावच्छिन्नप्रकारकत्वनि
प यमात् तादृशधर्मोश्रयमात्रविधेयकत्वनियमाद्वाविशेषणवत्तानिश्चयस्यैवविशिष्टाभावत्वाक्रांतविशेषणाभावरू
पैकविशेषवाधरूपत्वादितिभावः नचतर्कस्यशंकानिवर्त्तकत्वेविपर्य्ययानुमितिफलोपधानमतंत्रंपत्किंचित्कारणा

गा॰टी॰ ीयद्रूपावच्छिन्नाभाववत्ताज्ञानाधीनापादकाभावानुमितेरसतिप्रतिबंधके तत्कोटितावच्छेदकावच्छिन्नप्र५

एव — विरहेणातदनुपधानस्यालेपितस्यतथात्वात्स्वतंत्रापाद्याभावस्यतद्रूपावच्छिन्नसिद्धियोग्यत्वैवतर्कस्यतद्रूपावच्छि
न्नाभावशंकानिवर्तकतोपयोगिनीवाच्यातथा चैतादृशेतरबाधनिश्चयश्रूत्यकालेपियोग्यतायाश्चव्याहतत्वात्तर्कस्य
पक्षेतादृशनिश्चयसंपादकविशेषणदानमप्रयोजकमितिवाच्यंपर्वतोनिर्वह्निःस्यान्निर्धूमःस्यादित्यादितर्कस्याभौमव
ह्निबाधानवतारदशायांभौमवह्नित्वावच्छिन्नाभावशंकानपनायकत्वात्प्रकृतप्रकृतावच्छेदकावच्छिन्नधर्मिकप्रकृत
तर्कोपयिकव्याप्त्यवगाहकत्वानियमःतद्रूपावच्छिन्नापाद्यविषयकत्वस्यैवतर्कैतत्कोटितावच्छेदकावच्छिन्नाभावशं
काविरोधित्वप्रयोजकत्वात्प्रकृतावच्छेदकेवृद्ध्यसमवहितानुत्पत्त्यप्रवेशनस्यावश्यकत्वात्धूमादिलिंगकद्रव्यत्वाव
च्छिन्नसाध्यकानुमितौवह्नित्वावच्छिन्नप्रकारकताविरहानुत्पन्नियमासंभवइतिप्रकृततर्कौपयिकव्याप्त्यवगाहित्वम
पाद्याभावत्त्वानविशेषणंपत्रंधूमस्तत्रवह्निरित्युक्ततर्कप्रयोजकव्यतिरेकव्याप्तिज्ञानजन्यायांवह्न्यभावलिंगकधूमाभा राम०
वानुमितौवह्नित्वावच्छिन्नप्रकारकत्वविरहान्नियमासंभवइतिप्रकृतापाद्याभाववत्तावगाहित्वंव्याप्तिज्ञानविशेषणंशुद्ध २१५

न्निर्धूमःस्या॰

पर्वतत्वावच्छिन्नपक्षकस्यपर्वतोनिर्वह्निःस्यादित्यादितर्कस्यापिस्वभौमवह्निशून्यःपर्वतइत्याकारकस्वतंत्रनिश्च
यदशायांपर्वतोभौमवह्निमानित्यादिसंशयनिवर्तकत्वेपुनरसतिप्रतिबंधकेयादृशनिश्चयसहकृतयद्रूपावच्छिन्ना
भाववत्ताज्ञानजन्यापादकाभावानुमितेस्तत्कोटितावच्छेदकावच्छिन्नप्रकारकतानियमःतादृशनिश्चयविशिष्टत्वेस
तितद्रूपावच्छिन्नापाद्यविषयकत्वमेवतादृशशंकाविरोधित्वप्रयोजकंवाच्यंप्रकृतावच्छेदकेवह्न्यसमवहितजन्यत्व
विशेषणप्रवेशेनचतादृशनिश्चयविशिष्टनिर्वाहायैवस्वतंत्रतादृशनिश्चयविशिष्टःशुद्धधूमत्वावच्छिन्नपक्षकतर्को
पिशंकानिवर्तकइतिध्येयंद्रव्यत्वसामानाधिकरण्यमात्रेणावह्न्यसमवहितजन्यत्वाभावनिश्चयसहकृतात्शुद्धधूमत्वा
वच्छिन्नपक्षकविशिष्टाभावव्याप्यवत्ताज्ञानात्तादृशपक्षेवह्निसमवहितजन्यत्वत्वावच्छिन्नप्रकारिकानुमितिःप्रकृता
वच्छेदकावच्छेदेनतस्याधनिश्चयस्यैवापरविशेषप्रकारताप्रयोजकत्वात्स्वयथापृथिवीत्वसामानाधिकरण्येनतन्नीलत्वा
रूपबाधवत्तात्पृथिवीत्वावच्छेदेनगंधादिहेतुनानीलेतररूपानुमितिप्रसंगादितितुनसाधुसामानाधिकरण्यमात्राव

समवहित४

गाद्यनुमितौ तादृशविशेषबाधवत्त्वादप्यपरविशेषप्रकारकत्वेऽविरोधात् अत्र विशिष्टाभावस्य विशेष्याभावविशेष
णाभावाभ्यामतिरिक्तत्वे नोक्ततर्कस्येतरबाधवत्त्वेऽपि विशेष्याभावमात्रपर्य्यवसायित्वानिर्वहति इतरबाधस्याप न
स्या कत्तावच्छेदकानाक्रांतधर्म्माभासकत्वात् अनतिरिक्तत्वेऽपि वह्निजन्यत्वत्वेन विशिष्टाभावपर्य्यवसानं प्रकृते तु घटत्व
ह्निजन्यत्वत्वविरोधितद्रूपावच्छिन्नभिन्नत्वविशिष्टविशिष्टाभावत्वावच्छिन्नबाधाग्रहात् नहि सौरभेतरगंधवृत्तिजातिवि
[redacted] शेषावच्छिन्नगंधबाधग्रहे दृश्यायां गंधत्वावच्छिन्नसाध्यकानुमितौ सौरभत्वेन गंधाभासस्येष्यापि तु तादृशगंधभिन्नगंध
त्वेनैवमत्रापि वह्न्यसमवहितजन्यत्वभिन्नविशिष्टाभावत्वेनैव पर्य्यवसानं भवेत् न च वह्निजन्यत्वत्वेन विपर्य्ययपर्य्य
वसानाय वह्निजन्यत्वभिन्नत्वविशिष्टविशिष्टाभावत्वावच्छिन्नाभावत्वेनैव पक्षे विशेषणीयमिति वाच्यं वह्निजन्यत्वभि
स्य न्नविशिष्टाभावत्वस्य वह्न्यसमवहितजन्यतायां च समनियतत्वया गौरवेणातादृशविशिष्टाभावस्य प्रतियोगितानवच्छेद राम०
कतया तदवच्छिन्नाभावाप्रसिद्धेरित्यस्वरसात् संत्यक्तमापाद्यप्रतियोगिकोटौ निवेशयितुमुपक्रमते वस्तुतस्त्विति तत्र वह्निसे २१६

त्वविशिष्ट२ ह्य२ समवहित४

मवहितजन्यपदस्य यथाश्रुतार्थपरतां प्राचीनैरनिराकृतां प्रथमतो निराकरोति वह्न्यजन्यमपीति नांतरीयकवह्निके घटा क
दौ स्वसमानाधिकरणवह्निमत्क्षणावृत्तिसामग्रीजन्यत्वरूपस्य तादृशक्षणाव्यवहितोत्तरक्षणोत्पन्नत्वपर्य्यवसितस
वह्निसमवहितजन्यत्वपदार्थस्य वह्न्यसमवहिताजन्यत्वस्य च सत्त्वादिति भावः वह्निजन्यत्वपर्य्यवसितं वह्निजन्यत्व
स्वरूपं वह्निसमवहितजन्यत्वं वाच्यं वह्निसमवहितजन्य[redacted]पदार्थतावच्छेदकं वाच्यं चान्यथा यथाश्रुतवह्निसमवहि
शिष्ट तज्जन्यत्वस्याशुद्धस्य वह्न्यसमवहिताजन्यत्वविशेषितस्य च वह्निजन्यत्वाव्याप्यत्वेन प्रकृततर्काद् वह्न्यसमवहिताजन्य
त्वविशिष्टवह्निसमवहितजन्यत्वनिश्चयेऽपि तादृशनिश्चयस्य तत्संपादकतर्कस्य च वह्निजन्यत्वाभावशंकायामविरोधि
तया तादृशशंकायां बाधकाविरहेण कार्य्यकारणभावनिश्चयानुपपत्तेः न च वह्निसमवहितजन्यत्वस्य वह्निव्याप्यत्वनि
यततया तन्निश्चयादेव व्याप्तिनिश्चयेन निर्वाहात् कार्य्यकारणभावग्रहोऽकिंचित्कर इति वाच्यं स्वाव्यवहितपूर्वकाला
नि: वच्छिन्नत्ववह्निमति तादृशवह्निशून्ये च पटुत्पत्तेस्तत्साधारण्येन वह्निसमवहितजन्यत्वस्य वह्निव्याप्यत्वाभावात् एवं
न च वह्न्यसमवहिताजन्यत्वविशिष्टवह्निसमवहितजन्यत्वस्य वह्निव्याप्यत्वनियततया तन्निश्चयादेव व्याप्तिनिश्चय इति वाच्यं तादृश
विशेषणविशिष्टस्य केवलजन्यत्वस्यापि वह्निव्याप्यत्वनियततया वह्निसमवहितजन्यत्वनिश्चायकतर्कवैफल्यात् ॰

धूमसमवहित २

धूमत्वावच्छेदेनापाद्यव्यतिरेकनिश्चयासंभवादुक्ततर्कतो धूमसामान्ये वह्निसमवहितत्वजन्यत्वनिश्चयासंभवेन व्याप्तिवि धू
शेषसिद्धेवैतत्तर्कस्यैतादृशजन्यत्वनिश्चायकतया तादृशनिश्चयस्य च तर्कं विनापि वह्न्यसमवहिताजन्यत्वनिश्चयवत्
संभवे न तर्कवैफल्यात् स्वापाद्यकोटिप्रतियोगिविशेषणार्थकमिति स्वापाद्यकोटिप्रतियोगिविशेषणार्थकमित्य
र्थः तथा च घटादिसाधारणस्य केवलवह्निजन्यत्वाभावस्यापादकत्वेपि तत्र वह्न्यसमवहिताजन्यत्वरूपविशेषणाभा
न वात्पक्षस्य तद्विशिष्टजन्यत्वाभावरूपापाद्यस्य सत्त्वान्न व्यभिचारः एवं च पक्षे वह्न्यसमवहिताजन्यत्व[illegible]विशेषणांत
र्भावं विनापि विशिष्टाभावस्यातिरिक्तत्वेपि च वह्निजन्यत्वमात्रपर्यवसायिता निर्वहतीति भावः वह्न्यसमवहितजन्यत्वं च
वह्न्यसमवहितत्वजनकसामग्रीकत्वं वह्न्यसमवहितत्वं च स्वाधिकरणदेशावच्छिन्नवह्न्यभाववत्क्षणवृत्तित्वं एवं च स्वा
धिकरणदेशावच्छिन्नवह्न्यभाववत्स्वाव्यवहितपूर्वक्षणकत्वमेव पर्यवसितं वह्न्यसमवहितजन्यत्वं तदभावस्तु तद रा० २१७
न्यत्वं वा सत्त्वं तथा स्वाधिकरणदेशावच्छिन्नत्वस्याभावेति विशेषणं जन्यमात्रस्यैव किंचिद्देशावच्छिन्नवह्न्यभाववत्स्वाव्य

वहितपूर्वक्षणकत्वे न विशिष्टाभावस्यापाद्यत्वे प्रतियोग्यप्रसिद्धिः सत्त्वं तादृशजन्यत्वयोरुभयाभावस्यापाद्यत्वे चेष्टापत्तिः
धूमे सत्त्वं तादृशोभयाभावेन उभयाभावस्याक्षतत्वादित्यतादृशानुपपत्तेर्नावकाशः केचित्तु स्वसमानाधिकरणवह्निमदन्य
स्वाव्यवहितपूर्वक्षणकत्वं यत्तदन्यत्वं वह्न्यसमवहिताजन्यत्वं वह्नेः स्वसमानाधिकरणत्वनिवेशाद् [illegible]घटाद्यव्यवहित त
प्राक्क्षणस्यापि देशांतरवृत्तिवह्निमत्त्वेपि न तत्र व्यभिचारः एवं च यादृशघटादिव्यक्तेरधिकरणे कदाचिदपि वह्निर्नासी
त्तत्र सत्त्वं तत्सत्त्वेपि विशेष्यदलस्य स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितपूर्वकालत्वस्य तत्र वह्नितत्समवधाने त
स्यावत्स्वकारणकालरूपस्य तत्रासत्त्वादेव विशिष्टाभावनिर्वाहान्न व्यभिचार इत्याहुः तदसत् तथा सति स्वक्षणीय
विशेष्यदलार्थे निवेश्यवह्निमदधिकरणघटादिकमुपेक्ष्य नांतरीयकवह्निके व्यभिचारवारणरूपप्रयोजनदर्शनेन मू न
नतापातात् अजन्ये व्यभिचारस्य यथाक्रम तज्जन्यत्वनिवेशनेनैव वारणात् पारिभाषिकतदर्थविवक्षायां प्रयोजनाभा
ति द्धजन्ये चैवं नांतरीयवह्निकदृत्तिनांतरीयकत्वं तत्तर्थमनपेक्षितोपि दैवात्स्वाव्यवहितप्राक्क्षणे सामग्र्युपहितवह्निपे

क० स० प्र३

स्य सत्वया व्यभिचारवारणायेति तत्र वह्निजन्यत्वाभावस्यापादकस्य वह्न्यसमवहितजन्यत्वस्य च सत्वादिति भावः वह्न्य
समवधानकालीनेति वह्न्यसमवधानकालीनानि स्वाधिकरणदेशावच्छिन्नवह्न्यभाववत्क्षणवृत्तीनि वह्नितत्सम
वधाने [redacted] तरास्तिपावन्ति स्वकारणानि तज्जन्यत्वमित्यर्थः यस्य
एतत्प्रसिद्धिश्च वह्निजन्ये धूमादौ द्रष्टव्या अत्र च पावत्वविशिष्टेषु वह्नितत्समवधानेतरस्वकारणेषु वह्न्यसमवधान
कालीनत्वं विवक्षितं तेन नान्तरीयकवह्निकघटादौ यावन्ति वह्न्यसमवधानकालीनानि स्वकारणानि तज्जन्यत्वस्याहृ
तत्वेपि न क्षतिः पावत्तत्सु वह्नितत्समवधानेतरतादृशघटादिकारणेषु वह्न्यसमवधानकालीनत्वाभावात् यद्वि
वेन वह्निसमवधानोत्पत्तिक्षणात् पूर्वं वा तादृशघटादेरनुत्पादः वह्निसमवधानकालीनस्य तादृशकारणस्यापि पाव राम०
त्वादृशत्वं तत्कारणान्तर्गतत्वात् इदृशाभिमतो हि शब्दविशेषप्रभावं स्फु यपि तु व्युत्पत्तिसिद्धपूर्वपदार्थविशेषकान्यबोधजनक २१८
वृहन्नीहियोगक्रमेचार्थे विभुरेणातितयाविधेति केचित्तु जन्यत्वानिवेशप्रयुक्तलाघवमनुसृत्याहृतयाविधेतिव्याचक्षुः न

नुशोभनं स्तमितिपि वृहन्नीह्यर्थस्य संबन्धस्य जन्यत्वरूपत्वात् तादृशं पद्यस्य तत्त्वाभावकूटस्य तत्तद्भेदकूटस्य वा विशि
ष्येवापादनीयतया ग्राह्यपायकोटौ तादृशप्रायावत्कारणजन्यत्वादेरनिवेशेन लाघवगौरवविचारानवकाशाच्च नाम र
त घ्यकवह्निकस्यापि घटादेर्यत्किंचित्कारणस्य तत्प्रागभावादेर्वह्न्यसमवधानकालीनत्वात्तद्दोषतादवस्थ्यमतो यावदि
ति ननु पादृशघटस्य यत्कारणं विलंबेन पूर्वं नोत्पादस्तादृशचरमसंयोगादिरूपं कारणं वह्निसमवधाननाशकालपर्यं
ई तमासीन्न व्यभिचारः तादृशविवक्षायामपि दुर्वारस्तत्र च वह्न्यसमवधानकालीनत्वं वह्निसमवधानप्रागभावकाली
अ नत्वं तादृशचरमसंयोगादीनां चातथात्वान्न तत्र घटादौ व्यभिचार इति वाच्यं तद्वह्निसमवधाननाशकालस्यापि भावि
नत वह्न्यन्तरसमवधानप्रागभावकालीनयातेषामपि तथात्वादिति चेन्न दीपयावत्कारणत्वावच्छेदेन स्वाधिकरणदेशावच्छि
प्य न्नवह्निसमवधानाभाववत्क्षणवृत्तित्वस्य विवक्षितत्वात् उक्तस्थले यावतां कारणानां मध्ये कं तथाविधक्षणवृत्तित्वेपि
मिलितानां न तादृशक्षणवृत्तित्वं वह्निसमवधाननाशक्षणानां तथाविधघटादिकारणान्तर्गतचरमप्रागभावानधिकरण

पीयर यावत्

त्वात्तद्वह्निसमवधानप्रागभावकृत्यानोचतदंतर्गतवत्तमसंयोगाघनधिकरणत्वात् इति तदीयकारणनिष्ठपावत्वस्यतादृशो
नेकेनचिदपिकृरोननिरूपितायांवृत्तावच्छेदकत्वविरहेणतादृशघटादौविशिष्टदंडाभावस्याकृतत्वात्. तत्तद्व्यक्तिसमवहि
तात्तन्यत्वविशिष्टस्यतद्वह्निसमवधानप्रागभावकालीनवह्नित्वसमवधानेतरयावत्कारणकत्वस्याभावस्यापादनी
यस्यतो नव्यभिचार इत्यपिकेचित्. धूमादिजननयोग्यसमुदायस्यासमानकालीनेष्व [redacted] नादिव्यक्तिघटितस्यपावत्वेन समुदायं
कुत्रापिकृतानंगीकारात् तथाप्यप्रसिद्धिरतः कारणपदं फलोपहितकारणपरं बोध्यं यावद्धूमकारणांतर्गतवह्नित्वसमव
धानयोर्वह्न्यसमवधानकालीनत्वाभावाद्धूमेपिनैतद्दलप्रसिद्धिसंभव इत्यतोवह्नित्वसमवधानेतरत्वकारणविशेषणा
मुपात्तं अथवह्नेर्वह्निसमवधानाभाववत्त्वोत्पत्तिक्षणवृत्तित्वाद्वह्निमदस्यकारणविशेषणत्वमनर्थकं नच वह्निसंयोगा
भावेनवह्न्यसमवधानपदार्थः किंतुकालिकसंबंधावच्छिन्नप्रतियोगिताकोवह्न्यभावस्यवह्न्युत्पत्तिक्षणे नतादृशः त राम० ॥
स्यकालिकसंबंधेनवह्निमत्वादितिवह्नेर्वह्न्यसमवधानकालीनत्वं निर्वहतीतिवह्निभेदनिवेशनमभावस्यकमितिवाच्य २१९

वह्निमतोपिवह्न्युत्पत्तिक्षणस्यदेशविशेषावच्छिन्नतदभाववत्त्वात्. नचवह्निसमवहितत्वत्पटादिसामग्र्यधिकरणक्षण घ
स्यापिदेशांतरावच्छिन्नवह्न्यभाववत्त्वपात्वाधिकरणाद्दृशावच्छिन्नवह्न्यभाववत्त्वस्याविवक्षितत्वात्वह्न्युत्पत्तिक्षणस्य च
धूमाधिकरणावच्छेदेनवह्न्यभाववत्त्वाविरहात्तवह्नेर्वह्न्यसमवधानकालीनत्वमितिवाच्यं यदापत्रपस्याधिकरणतावि
यामकः संयोगादिस्तदधिकरणमेवतदानीतदृत्तावच्छेदकं अन्यथा ऽन्यदेशांतरवह्नौ दिनांतरे वात्रातेर्घ्य मणिघटादा नीरूप
विहायसंघट इत्यादिप्रतीतिप्रसंगात् एवंचवह्न्यादेः स्वोत्पत्तिक्षणावृत्तितत्कालीनसंबंधतः स्वावयवस्यैवावच्छेदकत्वं
नतुस्वसंयोगिनो धूमवतः तदानीत्तनतत्संयोगाभावादितितत्रधूमवदवच्छेदेनवह्न्यभाववत्त्वस्याक्षतत्वात्तवह्नेरपितदस
मवधानकालीनत्वस्यदुर्वारत्वात्. मैवं यत्रवह्निसमवधानदशायांमहाघटनाशस्तदुत्तरक्षणेनववह्निसमवधानप्राक्का च
नै लीनैर्वृत्तावदपवसंयोगादिभिर्वह्निमतिखंडघटोत्पत्तिस्तादृशखंडघटस्यपावत्वं द्रव्याभावसंयोगादिरूपकारणानांव
ह्निसमवधानप्राक्कालीनतयातत्रवह्न्यसमवधानकालीनयावत्कारणकत्वमक्षतमेवेतिव्यभिचारः नचमहाघटोत्पत्ति

यमि.

दृशापामितादृशखंडघटोत्पत्तिवारणाय महाघटनाशव्यक्तेरपि तद्धटं हेतुतायाश्चावश्यकत्वात् तद्धटं दितकारणसमुदा
पस्यैव वह्न्यसमवधानकालीनत्वाविरहात् नव्यभिचार इति वाच्यं यत्र महाघटस्य समवायिसमवधानोत्तरं महाघटाधिकरण
कार्यान्तरं
कपालसंयुक्तकपालं तदा तु महाघटारंभककपाले खंडघटोत्पत्तिस्तत्र पूर्वं तत्संयोगव्यक्तिविरहादेव तद्घटोत्पत्ति
वारणसंभवेन महाघटनाशव्यक्तिहेतुताया मानाभावात् नवत्तत्संयोगत्वनाशत्वेन ताः कस्य हेतुत्वमिस्य विनिगमना
विरहः सामान्यरूपेण तन्नाशहेतुतावकत्वस्यैव संयोगादिव्यक्तिहेतुत्वे विनिगमकत्वात् एवं चैतादृशव्यभिचारवारणाय खे
त्पत्तिप्रयोजकमत्यासत्तिविशिष्टानां कारणानां वह्न्यसमवधानकरणावृत्तित्वं विवक्षणीयं तथा च सति तादृशघटजनक
प्रयोजक
स्वसमवायसंबंधावच्छिन्नप्रतियोगिताकद्रव्यरूपप्रतिबंधकाभावस्य तद्घटोत्पत्तिप्रयोजकत्वे तत्कपालप्रत्यासत्तिवि
शिष्टस्य महाघटाधिकरणकालिकसत्वेन व्यभिचारवारणसंभवात् एवं च खोत्पत्तिकरणधूमोत्पादकसंयोगरूपप्रत्यासत्तिविशि राम०
ष्टस्य वह्नेः सत्वात् तस्य न वह्न्यसमवधानकालीनत्वमिति वह्निभेदनिवेशनमपि व्यर्थं यद्वा आगन्तुककपालसंबंधस्यापि तादृशत्वस्य २२०

=घ= =ण=
यद्रूपावच्छिन्नं कारणं यदधिकरणप्रत्यासन्नं सत् स्वोत्पत्तिप्रयोजकं तत्तदधिकरणनिष्ठविशिष्टतत्तत्कारणसमुदायवत्त्वं वह्न्यसम
वधानक्षणकत्वविवक्षणात् सामंजस्यं ध

सन्निपातविशिष्टद्रव्याभावस्य तादृशकारणेऽनपायइतिमन्यते तदा स्वाधिकरणदेशावच्छेदेन वह्न्यभाववान् यः क्षणः तद्व
कारण
च्छिन्नस्वप्रयोजकवह्नितत्समवधानेतरकारणाधिकरणतासमुदायकत्वमेव विवक्षणीयं तादृशसमुदायान्तर्गता याः पूर्वं
घटारंभककपालविष्टद्रव्याभावाधिकरणताया स्त्वयावि धक्षणानवच्छिन्नत्वेन नव्यभिचारः एवं च धूमोत्पत्तिप्रयोजकं यदधि
संबंधा
करणतासमुदायान्तर्गतस्य संयोगावच्छिन्नवह्न्यधिकरणत्वस्य वह्न्युत्पत्तिक्षणानवच्छिन्नतया तादृशक्षणमादाय स्वाधि
करणदेशावच्छिन्नवह्न्यभाववत्क्षणावच्छिन्नतत्समवधानेतरका[redacted]रणाधिकरणतासमुदायकत्वस्य धूमे प्रसिद्धावसं
भवेन वह्निपदवैयर्थ्याभावात् परंतु वह्न्यसमवधानकालीनत्वस्य समानाधिकरणवह्निमदन्यक्षणावृत्तित्वरूपमेव विवक्षितं
तथा च वह्न्युत्पत्तिक्षणस्यापि धूमसमानाधिकरणवह्निमत्तया वह्निपदसार्थक्यमिति कश्चिदाह तदसत् स्वाधिकरणावृत्तित्व
विशिष्टवह्निमदन्यत्वस्य वह्न्युत्पत्तिक्षणसाधारणतया तन्निवेशे वह्नौ तत्त्वनिवेशं विनाप्युपपत्तेः स्वाधिकरणवृत्तित्वोपलक्षि
तवह्निमदन्यत्वनिवेशे वह्नौ तत्त्वनिवेशनस्यावश्यकत्वात् एवं स्वसमानाधिकरणवह्निमदन्यक्षणावृत्तित्वं यदि वह्न्यसमवधा

नकालीनत्वं तदास्वसमानाधिकरणवह्निमत्त्वाव्यवहितप्राक्क्षणत्वरूपवह्निसमवहिततज्जन्यत्वस्य विशेषणतया पैव साधं
जन्यस्य वह्न्यसमवहिताजन्यत्वरूपनिषिद्धरूपघटितत्वमन्यथा तु स्वरूपमनर्थकं स्वाधिकरणदेशावच्छिन्नवह्निसमवधानाभावव
त्क्षणवृत्तित्वं यदि पुनर्वह्न्यसमवधानकालीनत्वं तदा सकलसाध्यघटव्यक्तिपर्यन्तस्वाव्यवहितप्राक्कालावच्छिन्नवह्निसमवधान
वति तादृशतत्समवधानाभाववति चोत्पत्तिस्तत्र तादृशघटव्यक्तेर्वह्निसमवहितजन्यतया स्वाधिकरणयत्किंचिद्देशावच्छि
न्नवह्न्यभाववत्क्षणवृत्तितया वत्कारणकतया च तत्र व्यभिचारः स्यादिति स्वत्वं तेन निषेधद्वयोपादानसाफल्यमिति (धूमकारणतावच्छे
दकतया गतस्य वह्निसमवधानस्य वह्न्यसमानकालीनत्वाभावाद्वह्निसमवधानेतरत्वं कारणविशेषणमित्युक्तं न च धूमजनक
तद्वयवद्वयसंयोगस्य वह्नितत्समवधानेतरस्य वह्न्यसमानकालीनत्वाभावाद्धूमेपि न विशिष्टलक्षणस्य निर्वाह इति वाच्यं
तत्समवधानपदेन धूमोत्पत्तिप्रयोजकवह्निव्यापारपरंपराया एव विवक्षितत्वात् धूमावयवद्वयसंयोगादेरपि धूमावयव रा०म०
वह्निसंयोगवद्वह्निव्यापारत्वेन तत्समवधानेतरत्वविरहात्तच्चैवं वह्निजन्यवह्न्यभिघातादिजन्यधूमावयवेकम्पाकजन्य २२१

धूमावयवरूपादौ व्यभिचारः तत्र वह्न्यसमवहितातज्जन्यतायाः वह्न्यसमवधानकालीनवह्निसमवधानेतरयावत्कारणकत्वरूप
जन्यतायाश्च सत्त्वेनाप्यापत्त्यादिति वाच्यं संयोगसंबंधेन स्वाधिकरणदेशस्य निरुक्तजन्यतागर्भे निवेशयतया स्वपदेन कर्मादे
रुपादानासंभवेन निरुक्तजन्यतायास्तत्रासत्त्वात्तु वह्निसमवहिततज्जन्यपदस्य वह्निजन्यार्थकत्वं जन्यपदस्य चपथाश्रुतार्थ
त्वमस्तु पेत्यापि नान्तरीयकवह्निके प्रकारान्तरेण व्यभिचारं वारयतां मतं दूषयितुमुपन्यस्यतिपश्यति आपादककोटौ वैयर्थ्य
वकारेण याद्यप्रतियोगिविशेषणत्वव्यवच्छेदः विपर्ययपर्यवसायितानिर्वाहाय पक्षांशे तस्य विशेषणत्वमावश्यक
मेवेति ध्येयं वह्न्यघटितसामग्र्यजन्यत्वमिति वह्निसमवहितजन्ये घटादौ चनतादृशसामग्र्यजन्यत्वं वह्नेस्तदकारणतया त २
दुत्पत्तिप्रयोजककारणसमूहात्मकतत्सामग्र्यघटकत्वादिति न तत्र व्यभिचार इति भावः अग्रेति वह्नौ धूमजनकतानि
श्चयात् पूर्वमित्यर्थः तदा सिद्धेः धूमे वह्न्यघटितसामग्र्यजन्यत्वानिश्चयात् वह्नेर्धूमजनकत्वसंदेहे धूमसामग्र्यां वह्न्यघटित
त्वस्यापि संशयादिति भावः ननु वह्न्यसमवहिताजन्यत्वस्याद्यप्रतियोगिविशेषणत्वेऽवह्नेरव्यभिचारित्वादिदं काष्ठ

पस्यकथंतर्कविरोधितातन्नतितस्यपक्षविशेषणतयातादृशशंकायाः पूर्वमतद्रूपविशिष्टपक्षस्यहेतुविरोधित्वासंभवादित्यत श्र
स्याहस्त्वेनेतिएतन्मतद्रूपस्यर्थः दृष्टापत्तिपर्य्यवसिते तिव्याप्यस्यविशिष्टाभावस्यदृष्टतापर्य्यवसितेत्यर्थः दृष्टत्वंपक्षेऽवाधित
त्वंपक्षसत्वमितियावत्तत्रदृष्टज्ञानफलकाचमनेनतात्पर्य्यवसानेनबोध्यं धूमेवह्न्यसमवहितत्वस्यसंदेहेनव्यापकसत्वद
भावविशिष्टत्वत्वाभावस्यापिसंशयादितिभावः दृष्टापत्तिशंकायाश्चकारणीभूतव्याप्यव्यतिरेकनिश्चयविघटकतयातर्कवि
६ रोधित्वंबोध्यं नन्वेवमपिस्वहेतुकस्योत्पत्स्यतेनिश्चितोपशंकायाएतन्मतेकथंतर्कविरोधितातथाहिसंप्रदायमतेउत्पत्तित्व
रूपउत्पत्त्यभावस्यापादकतयाउत्पत्तित्वरूपतदभाववतिस्वहेतुकत्वशंकामूलशैथिल्यशंकापर्य्यवसापिनी एतत्तस्यासत्त्वांत
त्ववह्न्यसमवहिताहेतुकत्वसहितवह्निसमवहिताहेतुकत्वरूपापादककोटिकाशंकाजायतेततद्विरोधिनोपधापत्वह्न्यसमवहित
हेतुकत्वेसतिवह्निसमवहिताहेतुकःस्यादहेतुकःस्यात्तत्ववह्न्यसमवहितात्तोत्तासमवहितात्तव्यतिरेकस्यप्रसिद्धेरित्येतादृशतर्के रम० २२२
ष्विष्टापत्त्याऽसंभवात्साचमूलशैथिल्यशंकैवव्यापकाभिमताभाववतिव्याप्याभिमतसत्त्वापाद्यव्यभिचारत्वादिति॥एतन्मतेचो

नितादृशशंकासत्वेनविषयप्रमेआपाद्यव्यतिरेकनिश्चयाऽपादके आपाद्यव्यभिचारज्ञानमेवेतिअत्राप्यहेतुकत्वशंका २
त्पत्तित्वंनापाद्यव्यतिरेकः अपितुवह्न्यसमवधानकालीनोक्तापादककारणकत्वंतद्विशिष्टंचाकारणकत्वशंकानावतरत्येवेति
नोक्तदिशाऽहेतुकत्वशंकापादमूलशैथिल्यशंकापर्य्यवसानंनवापाद्यव्यतिरेकवत्तयानिश्चितेधूमेऽहेतुकत्वशंकाव्याप्यसं नी
शयविषयापादकीभूतवह्न्यहेतुकत्वशंकामादधतीमूलशैथिल्यशंकायांपर्य्यवस्यतीतिकश्चित्धर्मिणिव्याप्याभाववनि
श्चयसहितायाआपादकशंकायाआपादकेव्यापाद्यव्यभिचारशंकारूपत्वात् पक्षेव्याप्याभाववनिश्चयस्यचतर्केपूर्वमवश्य
प्रयत्नात्तप्रदेवाहेतुकत्वशंकायांसत्यांधूमेसकारणकत्वघटितापाद्याभाववनिश्चयएवनसंभवतीत्युच्यतेतदापाद्यव्यतिरेक
निश्चयविघटकतयाधूमेऽहेतुकत्वशंकादृष्टापत्तिशंकैवेतिवाच्यं नहिव्याप्याभाववत्तयानिश्चितेपिरूपांतरेणव्यापादक
वत्ताज्ञानंव्यभिचारज्ञानविधयाविरोधिकिंतुतादृशाभाववत्तरूपेणैवतादृशापादकव्याप्यतावच्छेदकीभूतेनाहेतुकत्वेन पनो ५
प्रकारसंशयोहेतुःसचनसंभवतिधूमेनादृशयावत्कारणकत्वज्ञानेनापाद्याभावनिश्चयेनप्रतिबंधादित्युक्तप्रतीकमत्ववि
शिष्टेऽहेतुकत्वशंकातस्तद्विशिष्टएववह्न्यहेतुकत्वशंकाभविष्यतितदानीतद्विशिष्टव्याप्यव्यतिरेकनिश्चयस्तत्रैपितघ्रं

नतुरूपांतरेणाभिन्नधर्मिनावच्छेदकधर्मत्वान्नादृष्टानसंभवतीतिप्रागेवोदितं

दृशाभाववविशिष्टेनादृष्टापादकसंशयेचतेनरूपेणाव्याप्यसंशयएवहेतुः परस्परोपरागेणाविषयीकृतिन व्यभिचारस्यहेतुरूपतोऽएवंधूमत्वादिरू सत्वात्
कानादृशाव्यतिरेकनिश्चययोरापाद्यापादकत्वेनपरस्परोपरागेणाविषयीकृतत्वेनव्यभिचारस्फुरणमेवाभिप्रेतंतुतकीनुसरणात्कथंचेतर्कमुच्छिद्यात्तर्हिकाल
पेरापकेवव्यहेतुकत्वसंशयेऽव्याविनाप्यहेतुकत्वशंकासुलभएवतामिवोच्छेतुतकीनुसरणात्कथंचेतर्कमुच्छिद्यात्तर्हि
संहेतुकत्वशंकानिराकरणायासेनपक्षधर्मिकतं धूमेऽहेतुकत्वशंकाव्याप्यव्यतिरेकनिश्चयविघटकतयाऽदृष्टापत्तिरूपेतित रुनि
हेतुकत्वशंकानिराकरणायासेनपक्षधर्मिकतंधूमेऽहेतुकत्वशंकास्यात्तदाउत्पन्नमात्रएवतस्यास्याःतथाचसहेतुकत्वस्यनेकुत्रापिप्रसि
द्धिनपतउत्पन्नतयानिश्चितेपिधूमेऽहेतुकत्वशंकास्यात्तदाउत्पन्नमात्रएवसाऽस्यात्‍ तथाचसहेतुकत्वस्यनेकुत्रापिप्रसि
द्धिरितितदभावशंकापाएवासंभवदुत्पन्नस्याहृत्तीयापुनरित्यादिपुनःशंकेनदृष्टापत्तिपर्यवसितत्वव्यवच्छेदःव्याघा
स्तर्क प्रसिद्धिस्थलेदृष्टापत्तेरयोगात् साचव्यक्तीभविष्यत्यग्रेव्यापादकेतिव्यापादकमिहव्याप्तत्वंवह्निकारणाकत्वाभावरू
पंतदप्रसिद्धिपर्यवसानंततत्स्वरूपज्ञानविरोधः उत्पन्नमात्रेऽहेतुकत्वसंशयेपक्वचिदपिसहेतुकत्वघटितवह्निहेतुकत्वरूपप्रति
योगिनोऽनिश्चयेनतदभावज्ञानासंभवात्तत्वाभाववुद्धेःप्रतियोगिनःकुत्रचिन्निर्णयोनपिकृतिश्चयिपितुप्रतियोगिनिप्रतियो राम०
गितावच्छेदकनिश्चयपर्यवसितत्वाचसर्वत्राहेतुकत्वशंकादशायांसर्वत्रहेतुतायांअपिसंशयात् हेतुतामांवच्छादिवृत्तित्वनिश्च २२३

याऽसंभवेनप्रतियोगितावच्छेदकप्रकारकनिश्चयस्यापिप्रकृतेदुर्लभत्वात् अहेतुकत्वसंशयःतद्दीपनिपतपूर्ववर्त्तिसामान्ये
तेऽप्युत्पन्नयासिद्धत्वसंशयः तेनोत्पन्नयासिद्धसामान्येवतद्दीपनिपतपूर्ववर्त्तितासंशयःअतःप्रतियोग्यप्रसिद्ध्याऽहेतु
कत्वसंशयानुपपत्तिर्निर्णयांकनीयान्यादिपदादापाद्यपरिग्रहःआपाद्यप्रतियोगिनःसहेतुकत्वघटितस्वरूपसंभवत्वान्
कालीनोत्कपावत्कारणकत्वस्यहेतुत्वाप्रसिद्ध्याऽप्रसिद्धिरितिभावःअथकार्यांतरेसहेतुकत्वप्रसिद्धिदशायांधूमधर्म्मि
कहेतुकत्वाशंकायाव्याप्यसंशयविधयाधूमेतादृशापावत्कारणकत्वाभावरूपापाद्यकोटिकसंशयसंपादकत्वादिष्टाप
त्तिशंकायुपर्यवसानंसंभवतितत्कथमहेतुकएवोऽयंतत्स्यात् इतिशंकायाधूमपदानुषंगेनधूममात्रधर्मिकत्वमुपगम्य
ष्टापत्तिपर्यवसायितान्याख्यातेतिचेन्नअपत्तिमयाऽवधूतेपिधूमेयदाऽहेतुकत्वसंशयस्तदाकार्यांतरेपितत्संभवेनस
हेतुकत्वप्रसिद्धेर्दुर्लभत्वात्नन्वुत्पत्तिमत्वादन्यतादृशशंकाविरोधिरूपंसंभवतीति अववह्नेरित्यत्रमूलेऽवह्निपदस्यवह्नि
भिन्नार्थकत्वेवह्निभिन्नजन्यत्वंतन्यानजन्यत्वंवाकोटिःस्यात्तत्कोटिकशंकायाःनप्रकृतेविरोधितासंभवतिमयमेपदं

साधारणत्वात् द्वितीये च वह्न्यजन्यत्वशंकापर्य्यवसितया ः तत्र शंकास्तर्कोत्तपूर्वं त्रुटिच्छेदत्वात्तदभावसाध्यप्रतियोगि
कोटौ निवेशासंभवाद्वस्तुतस्तु ह्यावेष्टेः वह्निरिति वह्निशून्यत्वात् वह्न्यसमवहिता तत्तथा च वह्न्यसमवहितजन्यत्वकोटिकत्वं शंका
यां लब्धं तादृशव्याप्याप्रतियोगिकोटिप्रविष्टवह्न्यसमवहितजन्यत्वविरोधिविषयकत्वात्तर्कोविरोधितोपपत्तिः मूले
द्वत्पन्न इत्यादि तर्के उत्पद्यमाने इति शंकास्यात् इत्यादिशंकाप्यपेतसंभावनार्थकलिट् सर्वत्र शंकायां स्वक्रियाव्याघातः धू
मादौ गृहीतवह्न्याद्यन्वयव्यतिरेकात्तु विधानस्य पुंसो धूमार्थितया च वह्न्यादौ प्रवृत्तेर्विरोधस्तदभावापादकत्वमिति यावत्
व्यापादनकारमेवाह प्रदीतिरहीता च व्यतिरेको यो हेतुर्वह्निः स्वं विना कार्य्योत्पत्तिं धूमेन तदसमवहितजन्यत्वं कार्य्यसामान्ये
हेतुकत्वेविशेषः उपादानं समवधानं कथं कुर्य्यात् वह्न्यादिसमवधानेन प्रवर्त्तत इति यावत्तेन विनापि तत्संभवादिति त
दसमवहितादपि तत्संभवतीत्यादिज्ञानस्य प्रवर्त्तकं कारणात्मगृहविरोधिनः सत्वादित्यर्थः तस्मात्तादृशप्रवृत्तिनिर्वाह एम०
नुरोधात्तु उपादानं वह्न्याद्युपादानं शंकाप्रतिबंधकमास्थीयत इति शेषः अन्ये उपादानपदस्य भावव्युत्पत्त्या प्रवृत्त्यादिपरत्वेन २२५

संभवतीत्यत्रत्यादेः शंकाविरोधित्वविरहादतो व्याचष्टे दीधितौ तदुपादानमितीति करणव्युत्पत्त्या तदुपलक्षणान्तस्य उपा
दानं यस्मादिति बहुव्रीहिसमासादरादित्यपि बोध्यं तदेव कार्य्यमिति वह्न्यादिकार्य्यधूमादौ त्यर्थः वह्न्यादौ धूमादिप्रयोजक
ताज्ञानस्य धूमादौ वह्न्यादिप्रयोज्यत्वरूप वह्न्यसमवहितजन्यत्वावच्छिन्नैकधर्मविषयकतया तत्शंकाप्रतिबंधकत्वोपपत्तिः
एवं तस्यादिकार्य्यमत्पन्नस्य यासिद्धभोजनादौ तन्निपतपूर्ववर्त्तित्वाभावव्यावर्त्तकतत्प्रयोजकत्वज्ञानस्य कार्य्यसामान्ये
हेतुकत्वशंकानिवर्त्तकत्वं प्रयोजकत्वं च कारणत्वादन्यदेव स्वरूपसंबंधविशेषः कारण कारणादिसाधारणाद् इति पूर्वं तन्नि
श्चयेपि न कारणतामाह क तर्के वैयर्थ्यं न नु कारणत्वस्येव प्रयोजकत्वस्यापि प्रथमं दुर्निश्चयतया कथं तन्निश्चयाच्छंकाप्र
तिबंध इत्याशंकायां प्रकारान्तरमनुसरति तादृशान्वयेति धूमादिधर्मिक वह्न्याद्यन्वयव्यतिरेकानुविधायित्वान्वयव्यतिरेकानि
श्चयपरत्वेनेत्यर्थः तदन्वयव्यतिरेकानुविधायित्वस्य तदजन्यानां तत्त्वरिप्यकं वह्निसाधारणानियः श्चनकात्पूर्वं प्रापि संभवति
प्रत्यक्षतो यत्र न वह्निस्तत्र न धूम इति निश्चयविरोधिशंकाया नवकाशात्तादृशनिश्चयेन तदजन्यत्वशंकाविरोधीत दन्व

पव्यतिरेकात्तु विधापि त्वस्य तदजन्यत्वे तदीपकसाधारणातपा तदजन्यत्वाव्यावर्तकत्वादिति न तत्कृतैवैयर्थ्यमिति भावः अ
श्रेत न पत्त्यपिकारः स्वक्रियापदमित्यनंतरं योऽयः उक्तरीत्या संबंध स्वक्रियाव्याघातइति प्राक्तनक्रियापदस्य प्रवृत्ति परतया
एव संभवाच्छ्रेतनमिति केचित्तु स्वक्रियाव्याघात इति ग्रंथस्य प्रवृत्यभावप्रसंजनपरत्वमिध्याऽस्तित्वत्पादिवत्तृमाराममताभे
दः स्यादिति ग्रंथकारमतेताहृशग्रंथस्य सकलशंकानां स्वक्रियया प्रतिबंधइत्येवार्थः स्वक्रियायाः शंकाप्रतिबंधकत्वे प्रमा
णाकांक्षायां दिहीत्यादिहीत्यादिना स्वक्रियया शंकाया अप्रतिबद्धत्वे प्रवृत्यनुपपत्तेरभिधानं तस्मात्तु यादानमिति ग्रंथेन
स्वक्रियया शंकाप्रतिबंधकत्वोपसंहारः एवकारस्य प्रतिबंधकमित्यनंतरं योऽयः इत्थं चाश्रेतनमपीत्यपिकारो पयास्या
नस्य एवं प्राक्तन स्वक्रियापदस्य सुघ्नापकइत्याहुः तन्नाभिप्रमत्तताहृशग्रंथस्य परार्थानुमानस्य लाभिप्रापकतया एतन्मते रा०म०
चस्वार्थानुमानस्य तत्परतया विशेषात् स्वक्रियापदस्य यथाश्रुतार्थपरत्व परित्यागानौचित्यात् तत्परमेवेति तदुपादान २२५
पदं पत्परं तत्परमेवेत्यर्थः उपादानपदस्य प्रवृत्त्यादिपरत्वत्यागबीजं स्वयमेवाह कृत्यादेरिति आदिपदाच्छेदिदृष्ट्या

पारपरीग्रहः भानभावादिति विशेषविनिश्चयपर्यवतत्यात्वादिति भावः ननु तत्तत्फलसाधनताज्ञानजन्यत्वात् कृतिवृपितत्तत्
फलसाधनताविषयिके वस्वीक्रियतेतत्प्रत्ययभोजनं करोमीत्याद्याकारकतदनुभवात् अत एव एकफलगोचरेच्छासहि
तापरफलसाधनताज्ञानात्प्रवृत्तिवारणाय विशिष्य तत्तत्फलगोचरेच्छात्वेन तत्तत्फलसाधनताज्ञानत्वेन प्रवृत्ति
हेतुताया आवश्यकत्वादेकफलेच्छादिजन्यप्रवृत्त्यादावन्यफलेच्छादेर्व्यभिचारस्यानावकाशः तत्तत्फलेच्छादिजन्यताव
च्छेदककोटौ तत्तत्फलसाधनत्वावगाहित्वस्य निवेशात् नच तत्तत्फलेच्छादिजन्यतावच्छेदककोटौ तत्तत्फलोद्देश्यक
त्वनिवेशेनैव व्यभिचारासंभवात्तत्साधनताधीः कृतिविषयत्वेमानाभावइति वाच्यं उद्देश्यत्वस्य फलविषयतापा अनुभ
वविरुद्धतया तत्तत्फलसाधनत्वेनोपायांतरविषयकेन फलांतरसाधनत्वेन चैतदुपायविषयकेन ज्ञानेन जनितायां फल
द्वयोपायद्वयविषयकप्रवृत्तौ तत्फलसाधनताधियो व्यभिचारवारकतया च उपायविषयतानिरूपितफलविषयतोप
गमे उपायफलयोः संबंधविषयाकार्यकारणभावभानस्यावश्यकत्वात् नहि तयोः संबंधोऽत्र भासते तद्विषयद्वयो

निरुप्यनिरूपकभावोदृष्टचरः एवंचकृतेः कार्य्यकारणभावविषयकतयातद्विषयकस्यज्ञानस्यैवशंकाविरोधित्वमप्याहत
मेवज्ञानत्वमनंतर्भाव्यसंशयान्यविरोधिविषयप्रकारकत्वेनैवप्रतिबंधकत्वात् निविशतां संस्कारस्यापि तेनागुणालौकिक
मानसप्रत्यक्षजनकोज्ञानविशेषगुणपाशंकयकृतेः शंकोच्छेदकत्वंप्रकारांतरेणापि निराकरोति कारणतापरहितितथाचशंका
निवृत्तौतर्कावतारे सतिकार्य्यकारणभावग्रहः कार्य्यकारणभावग्रहेप्रवृत्तिः प्रवृत्तौचसत्यांशंकानिवृत्तिरित्यन्योन्याश्र
यइतिभावः परीक्षाकारस्तुनास्यतर्कस्यकारणभावनिश्चयोपयोगितामनुमन्यते किंतुप्रथमंसामानाधिकरण्यप्रत्य
सत्त्विमनंतर्भाव्यकार्यकारणभावेनिश्चितेलाघवादव्याधारत्वरूपवह्निसमवधानाभावस्यधूमानुत्पादप्रयोजकत्वेचा
वधृतेवह्न्यधिकरणादेशानुत्पत्तिकत्वशंकायांत्वव्याप्यत्वशंकासंभवेनव्याप्तिग्रहोनसंभवतीतिवह्निविकरणदेशोत्पत्ति
कत्वनिश्चयपायमयंतर्कइत्याह दीधितिकृतादृशमेववाचोभंग्याउत्पादिनामतमेतत्प्रदर्शयिष्यतेतथाचसतिप्रवृत्तेः राम०
कार्य्यकारणभावग्रहसापेक्षत्वेनान्योन्याश्रयप्रयोजकमित्युपादानादिपदमपिकृतिपरतयैवव्याख्यातव्यंज्ञानत्वाद २२६

हितमेवसंशयान्यविरोधिविषयकत्वंशंकाप्रतिबंधकताप्रयोजकमंगीकारतत्रेदंचिंतनीयंविरोधित्वस्यप्रतिबंध
कतावच्छेदकशरीरेज्ञानत्वानंतर्भावेविरोधिविषयकानुभवसंस्कारस्यापिशंकाप्रतिबंधकत्वापत्तिः संस्कारस्यहत्तज्ञा
तिविशेषनिवेशनेतुकिमपराद्धंज्ञानत्वेन नचतादृशमितिवाच्यंज्ञानज्ञानोऽप्रामाण्यांतरसत्वेविनिगमनाविरहात्तत्पु
रस्कारेणापिप्रतिबंधकत्वांतरभावस्यकल्पयितुमशक्यत्वात्तस्मात्तथात्वमितिवाच्यंज्ञानत्वावच्छिन्नाभावस्यनिश्चिताव्य
भिचारकत्वंकत्वावनंतरंशंकानुत्पादानिश्चयेत्वतादृशज्ञानत्वावच्छिन्नाभावस्यातथात्वमित्यस्यैवविनिगमकत्वादि
तिभावः ननुवह्निशून्येततज्जन्मत्वावच्छिन्नानुत्पादप्रदर्शनेपिधूमत्वापरच्छेदेनवह्न्यन्वयव्यतिरेकानुविधायित्वंनयका
तेनिश्चितुंधूमांतरोत्पत्त्याधिकरणेतवह्न्यभावशंकायागुरुत्वात्तयाचसामन्यतेधूमत्ववह्नित्वाभ्यांकार्य्यकारणभा
वावधारणांतर्कादपिनसंभवतिवह्न्यजन्यतयाधूमत्वावच्छेदेनैववह्निसमवहितान्यजन्यत्वेसतिजन्यत्वाभावस्यापत्ति
संभवात्तादृशाप्तेः धूमत्वसामानाधिकरण्येनवह्न्यजन्यत्वसंशयानिवर्तकत्वात्तादृशसंशयदशायांचधूमत्वस्य

जन्यतावच्छेदकत्वनिर्व्वापसंभवात् नहिप्रकृतावच्छेदकावच्छेदेनापत्तिस्तत्सामानाधिकरण्यमात्रेणापादकज्ञानं
निवर्त्तयितुमिष्यते यतो हि सामान्यापादकज्ञानं यादृशीमापत्तिं जनयति सा तादृशज्ञानेऽनिष्टसाधनत्वमपनयन्ती दुष्टाऽवि
घटनद्वारा मणिमंत्रादिवत्तत्स्वतन्त्रतया तन्निवर्त्तयतिस्म अवच्छेदकावच्छेदेनापत्तौ च तदवच्छेदेनैवापादकवत्ताज्ञानं हेतुः
तदेकदेशेऽप्युपगतस्य तत्सामान्येऽनिष्टाप्रसंजकत्वात् न वा प्रकृतावच्छेदकसामानाधिकरण्यमात्रेणापादकज्ञानं नि
वर्त्तनक्षमः तत्सामानाधिकरण्यमात्रावगाही तर्कः प्रकृते संभवति धूमत्वसामानाधिकरण्यमात्रावगाहित्वे ह्यसमव
हितत्वान्यत्वशंकाया अपि किंचिद्धूमेऽन्वयव्यतिरेकानुविधानान्निर्व्वापनिवर्त्तनीयापाताज्ञाततत्कत्वयाता तादृशतर्के हेतौ धूमत्व
वच्छेदेनापाद्यव्यतिरेकनिर्व्वापस्यानुदयात् नचापत्तौ समानधर्मितावच्छेदककापाद्यव्यतिरेकनिर्व्वापमात्रमपेक्षितं सच
वच्छेदकावच्छेदेन तत्सामानाधिकरण्यमात्रेण वा व्यतिरेकमवगाहतामिति वाच्यं विरोधिविषयकस्यैव निश्चयस्य
तर्कहेतुत्वोपगमात् यथा च तद्व्यतिरेकसामानाधिकरण्यमात्रस्य च तत्सामानाधिकरण्याविरोधित्वात्तद्व्यतिरेका राम० २२८

वच्छेदकत्वस्यैव वक्तव्यत्वात् अथैवं तर्कस्याहार्य्यारोपरूपतास्वतएव च प्रमेयत्वादिसामानाधिकरण्येन गुणत्वादिव्य
तिरेकनिश्चयेपि द्रव्यत्वादिना तत्सामानाधिकरण्येन गुणवत्त्वाद्यापत्तिरूढेति तथा चांशतः ऽप्यापत्तिशंकानुच्छेदात् धू
मत्वसामानाधिकरण्यमात्रेण वह्निजन्यत्वशंकानिवर्त्तकतर्कानुदयेन सामान्यतः कार्य्यकारणभावानिश्चयवह्नित्वे
धूमसामानाधिकरण्याभावप्रतियोगितावच्छेदकत्वसामान्याभावग्रहविरोधित्वात् तादृशावच्छेदकत्वरूपव्यभिचारशंकायाः
कथं निवृत्तिः धूमत्वसमानाधिकरणजन्यताप्रतियोगिकजनकतायाः सामानाधिकरण्यस्यावच्छेदकत्वस्य वा तादृशप्र
तियोगितावच्छेदकत्वाविरोधित्वात् तद्ग्रहाशंकतेप्यक्षयीति न्यायात्तन्न सिध्यतीत्यर्थः ननु धूमत्वसमानाधिकरणजन्यतायां
धूमत्वान्यधर्मावच्छिन्नत्ववाधसहकृतात् तदवच्छिन्नत्वग्राहकजन्यतात्वादिहेतो धूमत्वावच्छिन्नत्वं सिध्यतीत्यतस्तत्र ह तदार
णीतिपथानुसारात् दीनां वह्नित्वसमानाधिकरणजन्यताकत्वेपि न तदवच्छिन्नजन्यताकत्वम्यपि तु तदवान्तरधर्मावच्छिन्नज
न्यताकत्वमेव तथा प्रकृतेपि स्ववान्तरधर्मस्यावच्छेदकत्वेपि जन्यतायां धूमत्वसामानाधिकरण्योपपत्तेरित्यर्थः तथा चावां

तरधर्मस्यावच्छेदकत्वसंभावनया नतज्जन्यतायां धूमत्वान्यावच्छिन्नत्वबाध इति भावः विशेषाणां कार्य्यकारणभावग्रह इति
विशेषधर्म्मावच्छेदेनान्वयव्यतिरेकदर्शनाज्जायमानः सामान्यधर्म्मसामानाधिकरण्येन कार्य्यत्वकारणत्वग्रह इत्यर्थः
सामान्यत एव सामान्यधर्मावच्छेदेनैव तत्कार्य्यकारणभावं परिच्छिनत्ति विषयीकरोतीत्यर्थः नान्वयः एवकारेणावि
शेषधर्माणामवच्छेदकत्वावगाहित्वाव्यवच्छेदः विरोधिशंकासत्त्वे सामान्यधर्मसामानाधिकरण्येनापि न कार्यकारण
भावग्राहकसामग्रीसंभव इत्यत आह तर्केणेति उक्ततर्केणेत्यर्थः तद्विरोधिशंकायां तादृशकार्य्यकारणभावग्रहविरो
धित्वं सामान्यधर्मावच्छेदेन कार्य्यकारणभावाभावशंकायामपनीतायां सत्यां जायमानः वन्हेर्वं कस्यचित्सामान्यध
र्मस्योपस्थितौ तदन्तरधर्मावच्छेदेन कुत्रचिदपि कार्य्यकारणभावग्रहो न स्यादपि तु तादृशसामान्यधर्मावच्छेदेनेत्या
शंकामपनिनीषुः सामान्यधर्मसामानाधिकरण्येन कार्य्यकारणभावग्राहकसामग्र्या तन्मात्रावच्छेदेनैतद्ग्रहनने ऽपकृ रा.म०
ष्टीयांतरमाह सामान्यव्यभिचारानिर्णयेति सामान्यधर्मावच्छिन्नविशेष्यताकप्रकृतकार्य्यत्वाभावानिश्चयेत्यर्थः एते २२८

नवह्नित्वाद्यवच्छेदेन तृणादेः संयोगविभागादिविशेषसाधारणगुणत्वाद्यवच्छेदेन च कर्म्मादेर्जन्यताग्रह प्रसंगो वा इतः
तृणादिकं विनापि वह्न्याद्युत्पत्तिदर्शनेन वह्नित्वादिसामानाधिकरण्येन तृणाद्यजन्यत्वनिश्चयात् प्रत्येकं तादृशाद्यन्व
यव्यतिरेकानुविधायिष्वपि वह्नित्वानुगतगुणविशेषाणां तरस्य जातिरूपस्य प्रागसिद्धेः क्रियान्वयव्यतिरेकानुविधायिसं
योगविभागादिषु संयोगत्वादिना संकरप्रसंगेनानुगतजातेरसंभवाच्च तत्र द्वितीयप्रयोजकसत्त्वमव्याहतमेवेति ध्येयं सक
तिसामान्यधर्मे धूमत्वसामानाधिकरण्येन वह्निजन्यत्वस्य संशयात् निश्चयानुधारणात्तस्य च बाधनिश्चयाभावरूपस्य का
रणत्वे नैवोपयोगितावोधान च गंधमात्राभावसामानाधिकरण्येन गंधवत्तानिश्चयेऽपि तदवच्छेदेन गंधाभावतां भावग्रहाद्व
भितावच्छेदकांशे ऽनतिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहित्यामिव विशिष्टानुद्धौ न तत्सामानाधिकरण्यमात्रावगाहित्वा
धनिश्चयो विरोधी न तु स्वरूपसंबंधरूप तदवगाहित्वाभिति वह्निमान्दौ स्वरूपसंबंधरूपजन्यतावच्छेदकत्वग्रहे कथं तत्सा
मानाधिकरण्यमात्रेण तृणाद्यजन्यत्वनिश्चयो विरोधीति वाच्यं अनुभवानुरोधेनान्यूनानतिरिक्तत्वनिपतविलक्षणा

स्वरूपसंबंधरूपावच्छेदकत्वावगाहित्वाभ्युपगमेऽपि तु द्वेसामानाधिकरण्यमात्रावगाहिबाधनिश्चयस्य प्रतिबंधकत्वोपगमात् गंधप्रा
गभावादेस्तत्त्वावच्छेदकत्वमप्यादृशमेव कथंचित्तु व्यभिचारान्निरोपपदप्रमावच्छेदकावच्छेदकभावविरहनिश्चयपरतयाप्याकुरुते
तत्त्ववच्छेदकावच्छेदकभावस्य संसर्गो विषयाभावे तद्विरहनिश्चयस्याविरोधित्वात् नच वह्नित्वादिधर्मिकावच्छेदकतास्य वं
धावच्छिन्नजन्यत्वाभावनिश्चयपरमेव तदास्तामिति वाच्यं वह्नित्वावच्छेदेन जन्यतावगाहिनः स्वरूपतो वह्नित्वाद्यात्मक
धर्मितावच्छेदकावगाहिज्ञानस्य तादृशाभावग्रहधर्मितावच्छेदकप्रकारेण वह्नित्वादिविषयकतया तत्प्रतिबध्यत्वासंभवा
त्तत्त्वननुगतागुरुविशेषांतरानुपस्थितौ तथा वत्तमुच्यान्वयव्यतिरेकानुविधायित्वं गृहीतं तावत्साधारणस्य सामान्यध
र्मापेक्षया गुरोरपि स्थूलवृत्तिधर्मस्यानुपस्थितौ तत्पर्यः एतेन विशिष्टानुभवत्वाद्युपस्थितिकालीनतद्व्यापकविशिष्टज्ञान
त्वावच्छेदेन न विशेषणज्ञानादिजन्यताग्रहः निरस्तः नहि तत्र स्मरणे व्यभिचारनिर्णयः संभवति मन्मते स्वस्मरणस्या राम० २२९
पि निर्विकल्पकरूपस्यासंभवात् प्रकृते धूमानिष्ठतायापावत्सु वह्न्यन्वयव्यतिरेकानुविधायित्वग्रहस्तावद्धूमाद्यन्य

तमत्वस्य ग्रहसत्त्वादेस्त्राप्युपस्थितेः कुम्भत्वेन वह्निजन्यताग्रहदशायां संभवात्तदुपस्थितिसत्त्वे च तदूहोपपत्तये विशेषण
त्वानुसरणं तादृशधर्मोपस्थितिसत्त्वे च न तदपेक्षयाऽधिकदेशवृत्तिधर्मस्यावच्छेदकत्वग्रहः संभवति सामान्यध
र्मस्यावच्छेदकत्वेऽवच्छेदकजन्यतायास्तदधिकरणीभूताधिकदेशवृत्तित्वकल्पनेन गौरवं विशेषधर्मस्य तथात्वेन तदक
ल्पनेन लाघवमिति प्रतिसंधानेन प्रतिबंधादिति तादृशधर्मोपस्थितिविरहापेक्षा एतादृशलाघवधर्मांतरस्य न्यून
वृत्तित्वमुपयुज्यत इति तदभिहितं एवं धर्मांतरस्पर्शी गौरवे च तद्घटकनानावस्तुपुंजावच्छेदकतायाः कल्पनीय
तया गृहीतान्वयव्यतिरेककार्यांतरावृत्तित्वे च कार्यांतरेऽन्यधर्मावच्छेदेन कार्यत्वांतरस्य कल्पनीयतया नोक्तला
घवावकाश इत्यतोऽनुगतगुरुशरीरस्यैवोपस्थितादृशलाघवज्ञानेऽप्युपेत इति ध्येयं लाघवप्रतिसंधानेति तद्धूमत्व
तत्तद्वह्नित्वानां कार्यकारणभावावच्छेदकत्वेनान्यकार्यकारणभावकल्पनेन गौरवं धूमत्ववह्नित्वयोस्तदवच्छेदकत्वेऽपु
नस्तदकल्पनेन लाघवमित्यादिप्रतिसंधानेत्यर्थः इदृशं च प्रतिसंधानं एव कारणमपि विशेषधर्मावच्छेदेन कार्यकारणा

भावाग्रहे पुरस्कृतेऽत्रादिपदात् समनियतधर्मान्तरापेक्षया गौरवप्रतिसंधानाभावपरिग्रहः तेन धूमत्वाद्यपेक्षया गुरुणा
धूमत्वादिसमनियतधूमत्वप्रकारकप्रमाविषयत्वादिरूपेणाव्यवहिताद्विज्ञानत्वग्रहनिरासः ननु सामान्यधर्मसामानाधिक
रण्यमात्रेणान्वयव्यतिरेकग्रहस्य सामान्यव्यभिचारानिरासपादिसहकारेण सामान्यधर्मावच्छेदेन कार्य्यकारणभावस्याह
कत्वमपि दूषितं पत्तश्चाहुर्गानामिणौ चेति स्वानुभवसिद्धाविरोधः तथैव सामान्यधर्मावच्छिन्नकार्य्यकारणभावग्रा
हकतयैव स्वान्वयव्यतिरेकाविति विशेषाणामिति शेषः ननु कृत्जन्यत्वाभावस्य कार्य्यप्रतिबंधकसत्त्वोक्तसामग्रीतः सा
मान्यधर्मावच्छेदेन कार्य्यकारणभावग्रहः संभवतीत्यतश्चाह फलबलेनेति स्वानुभवसिद्धफलान्यथानुपपत्त्येत्यर्थः
लाघवज्ञानादिसहकृतायामिति कस्यापि वह्निधूमस्य वह्न्यजन्यत्वे धूमत्वापेक्षया गुरुशरीरः कश्चन धर्मो नानाविशेषधर्मा
वाजन्यतावच्छेदकाः स्युरिति गौरवं धूमत्वावच्छेदेन तज्जन्यत्वेन तथेति लाघवमित्यादि लाघवज्ञानाद्यभावविशिष्टा
याइत्यर्थः अत्रादिपदाद्विशेषदर्शनपरिग्रहः सामान्यव्यभिचारशंकाया धूमत्वादिसामानाधिकरण्येन वह्न्याद्यजन्य

त्वशंकायाः प्रतिबंधकत्वमित्यस्य धूमत्वावच्छेदेन वह्न्यादिजन्यत्वग्रह इत्यादिः नचैवं लाघवज्ञानादिसत्त्वेग्राह्याभाव
निश्चयदशायामपि प्रत्यक्षविशेषापत्तिः संशयस्य विपरीतनिश्चयसाधारणविपरीतज्ञानत्वेनैव प्रतिबंधकतया त
स्यप्रतिबंधकत्वांतराभावादिति वाच्यं विपरीतनिश्चयानंतरं संशयादिवारणाय संशयादिसाधारणग्राह्यज्ञानत्वाव
च्छिन्नं प्रति विपरीतनिश्चयत्वेन स्वतंत्रप्रतिबंधकताकल्पनस्यावश्यकतया तत्र च लाघवज्ञानाद्यभाववैशिष्ट्यानिवेश
नात् दृशप्रतिबंधकतावच्छेदकावच्छिन्नस्य सत्त्वेनोक्तापत्तेरनवकाशात् भ्रमानंतरं विशेषदर्शने जातेपि भ्रमनाशानंत
रमेव प्रत्यक्षनिश्चयापगमेन निश्चयप्रतिबध्यतावच्छेदककोटौ प्रत्यक्षनिश्चयभेदानिवेशात् इदं च प्रत्यक्षनिश्चये ग्राह्य
संशयस्य प्रतिबंधकतामभ्युपेत्याभिहितं स्वमते तु विशेषदर्शनवत् लाघवज्ञानस्यापि विपरीतकोटिभानविवर्तकत्वे
न निश्चयोपयोगितावोध्या इदमत्रावधेयं पत्रोपदर्शिततर्कावतारपूर्वसमये एव धूमत्वसामानाधिकरण्येन वह्न्यसम
वहितजन्यत्वशंकाजनकसाधारणधर्म्मदर्शनाद्यात्मकदोषादिसमवधानं दैववशाद्भवतीति तत्रापि दृशशंकाविरहप्र

योजकस्य दुर्लभतया धूमत्वावच्छेदेनाव्यभिचारव्यतिरेकनिश्चयासंभवात्सामानाधिकरण्यमात्रावगाहितर्कोनावतारतुमीष्टे
इतितादृशस्थलाभिप्रायकोयंसामान्यधर्मावच्छेदेनजन्यतान्यहोपायप्रयासः यत्रचतर्कोनस्वेदोषादिविरहात्तादृशशंका
तुदयः तत्रधूमत्वावच्छेदेनवह्न्यसमवहितजन्यत्वनिश्चयात्तत्सामानाधिकरण्यमात्रेणापादकवत्ताज्ञानसहितात्तस्य
सामानाधिकरण्यमात्रेणापत्तिः सुलभेतितत्सत्वसामान्यकार्यकारणभावः सुग्रहः स्पष्टमेवनावतारप्रयासेनतदभिप्रायेणोव
वक्ष्यति क्वचिद्वह्निं विनापि भविष्यतीत्याकारिकायाश्च शंकायास्तर्कोविरोधित्वाभिधानसंगतिः अन्यथाप्रकृतावच्छे
दकावच्छेदेनाप्रसक्तौ तादृशशंकायाश्चविरोधित्वानुसंगतमापद्येत नचैवमप्यन्वयव्यतिरेकानुविधायित्वज्ञानस्यापादा
नपदार्थस्यतादृशशंकाविरोधित्वाभिधानमसंगतमेवतादृशशंकाविरोधितोऽवच्छेदकावच्छेदेनान्वयव्यतिरेकग्रहस्याशक्य
त्वादितिवाच्यं उपादानपदेनान्वयव्यतिरेकग्रहवच्छंकाविरहस्यप्रयोजककारणांतराभावस्यापिविवक्षितत्वादितिसर्वं समं रा०म०
जसं वस्तुतस्तुक्वचिद्वह्निं विनापीतिशंकापि धूमत्वावच्छेदेनवह्न्यसमवहितजन्यत्वकोटिविषयिण्येवपूर्वशंकायांस्वा २३१

व्यवहितप्राक्कालावच्छिन्नवह्न्यभाववन्मात्रोत्पत्तिकत्वं द्वितीयायां चमात्रार्थोनंतर्भाव्येनतादृशाभाववद्वृत्त्युत्पत्तिक
त्वकोटिरित्यतएवशंकयोर्भेदसंभवादितिउपाध्यायास्तु समन्वयव्यतिरेकदर्शनेऽप्यतीतानागतधूमेवह्न्यसमवहितजन्य
त्वशंकासंभवान्नधूमत्वावच्छेदेनतदजन्यत्वनिश्चयः संभवतीतिनसामानाधिकरण्येनापादकशंकाविरोधिनीसामानाधि
करण्येनापत्तिः संभवतीत्याशंक्यधूमत्वावच्छेदेनतन्निश्चयमुपपादयन्सामानाधिकरण्येनापत्तिमुपपाद्यादपितुग्रंथांतरेण
तादृशशंकापरिहारमुपपादितवंतः तत्रचवह्न्यसमवहितजन्यत्वस्यपक्षविशेषणत्वेधूमत्वावच्छेदेनतन्निश्चयेपिनोक्त
शंकाक्षुद्रधूमत्वसामानाधिकरण्येनवह्न्यजन्यत्वशंकानिरासः संभवतीतिक्षुद्रधूमत्वावच्छिन्नपक्षकतर्कस्यैवतन्निव
र्तकत्वादितिप्रयासेवैयर्थ्यमतस्तदभ्युपगमेपिवह्न्यसमवहितजन्यत्वस्याप्यादककविशेषणत्वमुपेक्ष्यापादकतयांगी
कोरेतद्विशेषणानिवेशेनवह्निसमवहितजन्यादिपदस्यवह्निजन्यादिपरतयाचतदेवमतंपरिष्कृत्यदर्शयतिस्वपरेत्वि
तिधूमत्वावच्छिन्नस्यवह्न्यसमवहितजन्यत्वसैतन्वयः तथाचधूमत्वावच्छेदेननिश्चितस्यवह्न्यसमवहितजन्यत्वस्याभ्य

तिरेकोधूमत्वसामानाधिकरण्येनापादनीयइत्यर्थः तथाचोक्तप्रयासमंतरेणैवतादृशानर्कोद्धूमत्वावच्छेदेनवह्निजन्यत्वंस
निश्चयमितिभावः ननुसूक्ष्मत्वावच्छिन्नस्यवह्न्यजन्यत्वेनोत्पत्त्यन्वयात् धूमत्वावच्छेदेननिश्चितेनवह्न्यजन्यत्वेनापादनीयद
तिधूमत्वावच्छिन्नस्यापादनीयइत्यनेनान्वयेनवाधूमत्वावच्छेदेनापादनीयइत्यर्थः तद्धर्मावच्छेदेनापत्तेस्तत्सामानाधि
करणमात्रविषयकापादकसंशयाविरोधितायाः प्राग्भावस्यापत्तेनतादृशापत्तेरकिंचित्करत्वात्तज्जन्यत्वविशिष्टस्य
तितेनाजन्येनव्यभिचारइतिभावः नांतरीयकवह्निकेव्यभिचारवारणायवह्न्यसमवहितजन्यपदस्यवह्न्यघटितसामग्र
जन्यार्थकतानाभ्युपेयाऽपितुजन्यत्वमेवप्रमाणवतयापारिभाषिकंनिर्वचनीयमित्येतत्सूचयितुंवह्न्यसमवहितजन्यत्वस
पथाक्ततत्त्वमहितंश्रेयेतनस्यतद्धेत्पस्यवह्न्यसमवहितजन्यत्वपरामर्शकतामाविरुद्धत्वेतुंतद्धेविशेष्यविषयाप्रविशितं
विशेष्यविशेषणभावविपर्यासेकृतिविरहात् विरोधिशंकानिराकरणप्रकारंदर्शयन्धूमत्वावच्छेदेनवह्न्यसमवहिता राम०
जन्यत्वविशिष्टस्यस्वघटतामाहतच्छ्रेतिमनसेवस्तुमहामित्यनेनोन्वयः मनसैवेत्यस्यउपनयसहकृतेनेत्यादिः एतावतावह्न्य २३२

समवहितजन्यत्वसामान्याभावस्यायोग्यपिशाचादिजन्यत्वप्रतियोगिकतयाप्रत्यक्षासंभवइतिसार्वभौमाभिहितदूष
णमुद्धृतंउक्तन्यायेनेतिलिंगेनाशाननासंभेत्याधुक्तप्रणाल्येत्यर्थः वह्निप्रयुक्ततत्कारणकलापजन्यत्वग्रहेणधूमोत्पाद
कसामग्र्यांवह्निसमवधाननियतरूपवह्निसमवहितत्वग्रहेणतद्व्यतिरेकजन्यत्वशंकानिरासादितिधूमसामग्रीत्वाव
च्छेदेनवह्निसमहितत्वशंकाप्यानुदयादित्यर्थः तथाचतादृशशंकाधीनायाधूमत्वावच्छेदेनवह्न्यसमवहितत्वोत्पादक
सामग्रीकत्वशंकायान्वनवकाशत्वद्दवच्छेदेनतादृशसामग्रीकान्यत्वनिश्चयात्स्वाधिकरणदेशावच्छिन्नवह्न्यभावत्वा
व्यवहितप्राक्क्षणकत्वशंकानिवृत्त्यातादृशप्राक्क्षणकान्यत्वरूपवह्न्यसमवहितजन्यत्वनिश्चयः संभवतीतिभा
वः ननुतथापिधूमसामग्रीत्वसामानाधिकरण्येनवह्न्यसमवहितत्वशंकासंभवात्तदधीनाधूमत्वसामानाधिकरण्ये
नवह्न्यसमवहितस्वसामग्रीकत्वशंकास्यादेवेतिकथंधूमत्वावच्छेदेनवह्न्यसमवहितजन्यत्वनिश्चयः नचैवंतत्वापव
च्छिन्नसमूहेधूमोत्पादकसामग्रीत्वस्यान्यथ्याचारेकेणानिश्चयदशायांतादृशसमूहस्यवह्न्यसमवहितस्यधूमोत्पादक

(सामग्रीत्वस्यानुपपत्तेः) तत्संशयाद्धूमोत्पादकसामग्रीत्वरूपेणावह्न्यसमवहितत्वसंशयो भविष्यतीति स च वह्निविरहे त
थाविधाद्धूमानुत्पाददर्शनेन वह्न्यसमवहिततादृशसमूहे धूमोत्पत्तिप्रयोजकत्वनिश्चयादेव निवर्त्तते इत्युपाध्यायोक्तं सम्य
क् क्वचिद्वह्निं विना तथाविधसमूहाद्धूमानुत्पाददर्शनेऽपि वह्निसमवहितादेव क्वचित् सहकार्य्यन्तरसमवहितादपि तादृशस
मूहाद्धूमो भविष्यतीति शंकानपायेन तादृशसमूहत्वावच्छेदेन धूमोत्पत्तिप्रयोजकत्वस्य दुर्निश्चयत्वादित्याशंक्य वह्न्य
समवहिततादृशसमूहे इतरानपेक्षया धूमोत्पादकत्वाभावस्येतरापेक्षपातस्याभावस्य च मिलितस्य धूमोत्पादकत्व
सामान्याभावव्याप्यस्य निश्चये विरोधिन्याः शंकाया निवृत्तिप्रकारमाह वह्निविरहेऽपीति तादृशसमूहस्योत्पत्तिनान्वितं
वह्न्यसमवहिततादृशसमूहस्येत्यर्थः निरतिशयस्यैव धूमजनकत्वसंदेहस्यायोगादित्यन्वयः अतिशयः सहकार्य्य
न्तरसमवधानरूपो विशेषः तथा च सहकार्य्यन्तरमन्तरेणापि वह्नेर्धूमे प्रयोजकतायाः संदेहस्यानुदयादिति पर्य्य
वसितार्थः तथाविधात्वह्न्यसमवहिततादृशसमूहाद्धूमानुत्पाददर्शनेनेति तथाविधसमूहे धूमानुत्पादाव्यवहि राम०
२४५

तप्राक्क्षणावच्छेदेन तदधिकरणस्य तस्य दर्शनेनेत्यर्थः तस्येतरानपेक्षत्वधूमोत्पादकत्वव्यावर्त्तकत्वादिति भावः ता
दृशस्येन्धनादिसमूहस्य आसाद्यसहकारीकृत्य जनकत्वस्योत्पत्तिप्रयोजकस्य त्वार्थस्य च तथात्वेऽन्वयः ननु संभा
वनापीति स्फुटीकर्त्तुं व्यासमासेन लिखनं संभावनाया अयोगादित्यत्र च पङ्क्तिचिदिति पत्र वह्निं विनाऽपीन्धनादिसमूहाद्धू
मानुत्पादो दृष्टस्तत्रेत्यर्थः अवधृतस्य निश्चितस्य एतेन 'वह्निविरहस्य तादृशसमूहकालीनधूमानुत्पादप्रयोजकत्वं स्फु
टं' तद्विरहस्य चात्यर्थमल्पत्वमिति तत्कल्पनरूपं लाघवबीजं स्फुटीकृतं वह्निविरहस्यैवेत्यादि तादृशसमूहसमव
धानानन्तरं धूमसामान्यानुत्पादस्य वह्नित्वावच्छिन्नविरहमात्रप्रयोज्यत्वनिर्णयेनेत्यर्थः तत्तद्धूमत्वावच्छिन्नानुत्पादेत
दवच्छिन्नहेतुतावच्छेदकतत्तद्विन्नत्वावच्छिन्नाभावस्यापि प्रयोजकत्वात् सामान्यपदोपादानं इत्थं चेतरसहकारे
ण धूमोत्पादकताया व्यावर्त्तकस्येतराप्रयोज्यस्य समवधानकालीनधूमानुत्पादकत्वस्य दर्शनान्नोक्तशंकाशकास्पद
मपीति भावः तदुपादानपदेन वह्निसमवहितमात्रोपादानं विवक्षणीयं तच्च तदीयवह्निसमवहितत्वपरामर्शकत्वमेवसंभव

तितर्दर्थे वह्नेरुपादानमित्यत्र वह्निपदं वह्निसमवहितपरं तथा व्याचष्टे वह्नेरिति वह्निसमवहितमात्रगोचरस्य कृत्यादेः शं
काविरोधिता विरहात्तु उपादानपदं वह्न्यसमवहिताजन्यत्वनिश्चयपरतया व्याचष्टे अत्रेचेति नियमव्यवस्थापितेति त
स्यैव वह्निसमवहितस्यैवोपादानं यस्मादिति तु अपपदं तु श्रीहेवाम्रपनोपनया एवकारलभ्यमवधेयहृदयस्येत्यर्थः वह्न्यस
मवहितानुपादानस्य वह्न्यसमवहितागोचरधूमार्थप्रवृत्त्यभावस्य प्रयोजकेऽ इति तादृशप्रवृत्तिजनकवह्न्यसमवहित
धर्मिकधूमज्ञानताग्रहविघटननिर्वाहकत्वमित्यर्थः एतेन वह्न्यसमवहितजन्यत्वशंकानिवृत्तिस्तर्ककारणावह्न्यसमवहि
ताजन्यत्वनिश्चयापार्थमपेक्ष्यते तेन मुसाकृद्वितकोर्थैनाद्ःशंकानिवृत्तिश्चापदिता तादृशनिश्चयमपेक्ष्यैव ततदानोन्यामयाःदु
तिदोषानवकाशः एवं तर्ह्युक्तोपायेन तदुत्पादाद्रूपस्यैव शंकानिवर्तकत्वाभिधानात् संदर्भविरोधश्चेति दूषणमनवकाशमिति चकार्ये
वेदितव्यं प्रागपि तन्निश्चयस्यैव शंकानिवर्तकत्वात्तत्र निरुक्तवह्न्यसमवहिताजन्यत्वज्ञानेरातन्मात मालनृत्यमिश्राघ राम०
श्युपगतमन्वयव्यतिरेकानुविधायित्वज्ञानस्य शंकानिवर्तकत्वमाकृमुमुपन्यस्यतिपन्निति अन्वयव्यतिरेकानुविधायि २३४

त्वस्य वह्निमत्वेऽग्निसकृद्योऽउत्पन्नत्वे सति उत्पन्नत्वस्यैव वा पूर्वकृशो वह्निव्यतिरेकेऽनुत्पादमानन्तुस्येत्यर्थः अत्र तर्को
ऽसत्यंतनिवेशाद्रासभगगरायादौ न व्यभिचारः ज्ञानं धूमधर्मिकनिश्चयः विशेषदर्शनं तपाम्राह्याभावव्याप्यदर्शनविष
याशंकाप्रतिबंधकं धूमधर्मिकवह्न्यसमवहितजन्यत्वशंकाप्रतिबंधकं वह्न्याद्यन्वयव्यतिरेकानुविधायित्वस्य वह्न्यसमव
हिताजन्यत्वव्याप्यत्वादिति भावः नन्वेवं वह्न्याद्यन्वयव्यतिरेकानुविधायित्वनिश्चयस्यैव धूमे वह्न्यजन्यत्वशंकामपि विशे
षदर्शनतया निवर्तकत्वापत्तौ किं तर्कस्य प्रतिबंधकत्वकल्पनेनेत्यत आह तद्वेवेति एवकारोऽप्यर्थः अन्वयव्यतिरेका
नुविधानमपीत्यर्थः तर्कघटकं प्रयोजककोटीभूतज्ञानविषयतया तर्कनिर्वाहकं तथा च तर्कात्मकमानसज्ञाने प्रा
गुपस्थितपदार्थानां तर्कः ऽपनयसमर्थ्यादपाभानंवाधकाभावात्तद्यन्वयाद्यनुविधानज्ञानात्मकमिति तर्कस्यत्वात्तन्त्रैव
शंकाप्रतिबंधकत्वविरहेऽपि विशेषदर्शनविधया एवं तथात्वस्याकृततयात्तर्कस्य शंकानिवर्तकत्वाभिप्रायेण मूले तदुपन्या
सस्यनासंगतिः अत्र वस्तुतो व्यवधाशंकानिवर्तकत्वेनाभ्युपगमादित्याशयः एतत्स्वतर्कस्यैवान्वयव्यतिरेकानुविधा

ग०टी० नज्ञानात्वादित्यादिमिश्रसमाधानमनुसृत्यतदन्वयाद्यनुविधानज्ञानस्यतदज्ञन्यत्वशंकाप्रतिबंधकत्वाभ्युपगमेनाभि
२३५ हितं वस्तुतस्तदन्वयाद्यनुविधानस्यनांतरीयकतत्कसाधारणस्यतज्जन्यत्वाव्यावर्तकत्वान्नतज्ज्ञानस्यतदज्ञन्यत्व
शंकानिवर्तकत्वमप्रसक्तमेवेतिपरमार्थः दर्शितमिश्रग्रंथेतर्कपदं तर्कस्थलीयतज्ज्ञानपरतयाव्याख्यायतर्केकार
णीभूतान्वयाद्यनुविधानज्ञानसत्वात्तर्कोपि दुरपह्नवइतिहरिदासभट्टाचार्याणांमिश्राभिप्रायवर्णनमनुसृत्यतर्कं
चित्तदेवतर्कघटकमिति दीधितिग्रंथेअन्वयाद्यनुविधानज्ञानमिवशंकाविघटनतयावातर्कसंपादकमित्यर्थपरतया
व्याख्यायदीधितिकृतामपितादृशमेवाभिप्रायंवर्णयंति तत्रसत्तर्केवैयर्थ्यशंकायांतर्कोत्पत्तौबाधकविरहाभिधा
नस्यानुपयुक्तत्वात् नचतत्रसामग्रीवशात्तर्कोत्पत्त्यभिधानेसंभेदेनान्यत्रवैयर्थ्यमितिन्यायेनतर्कस्यसार्थकत्वं
स्याप्यतद्रूतिवाच्यं अन्वयाद्यनुविधानग्रहस्यजनितर्कस्यशंकानिवर्तकतायाःस्वीकृत्यएवतादृशन्यायावकाशात् रा०म०
तादृशस्थलेचतर्कानुत्पत्तावेतस्यतथानुकल्पनावकाशात् नचतर्कात्पूर्वंअन्वयव्यतिरेकानुविधानग्रहस्यावश्य २३५

कत्वेपितर्केदशायांतत्सत्वानियमात्तत्प्रतिबंधकतयासर्वत्रतर्कानंतरंशंकावारणासंभवात्तर्कस्यापिप्रतिबंधकत्व
कल्पनमावश्यकमितिवाच्यं एवंसतिमूलस्यैतादृशस्थलेशंकानिवृत्त्युपयोगित्वाभिप्रायकतासंभवात्तदुपरित
र्कवैयर्थ्यशंकायाएवानवतारात् यत्रचकोटयोंतरविरहाच्छंकानवतारस्तत्रस्वतःसिद्धशंकाविरहस्थलतयाम
लस्यतदन्यस्थलएवतर्कस्यशंकानिवर्तकत्वपरतयाऽभ्युपसंभेदस्थलेतर्कसार्थक्यप्रदर्शनस्यासंगतत्वा
च्च एवंचमिश्रग्रंथस्यापिदर्शितदिशायथाश्रुतार्थपरत्वमेवसम्यगितिध्येयं अन्वयव्यतिरेकानुविधानाबाधस्यशं
काविरोधित्वेमूलस्यापिस्वरसंदर्शयन्नाह तदुक्तमितिपदिहीत्यादेस्तादृशबोधस्यशंकाविरोधित्वपरत्वाभावेविरहीतान्वच
पव्यतिरेकत्वाभिधानवैयर्थ्यादितिभावः वह्निव्यतिरेकानुविधायित्वंतद्व्यतिरेकसमानाधिकरणव्यतिरेकप्रतियोगि
त्वंतद्व्यतिरेकव्यापकव्यतिरेकप्रतियोगित्वंवातत्रधूमत्वावच्छिन्नाभावेवह्न्यभावसामानाधिकरण्यस्यग्रहसंभवेना
पिधूमत्वावच्छेदेनस्वग्रहमपिघटादिसाधारणतयावह्न्यसमवहितजन्यत्वाव्यावर्तकमितितन्निष्ठव्यस्यनतच्छंकानि

वह्नेकात्वमित्याह पञ्चुष्टिकस्येति नियमगर्भस्य यत्किंचिदधिकरणोत्तदन्वयव्यतिरेकानुविधानस्य तत्पर्य्यं व्यभिचारि
त्वात् वह्न्यसमभिहिताजन्यत्वव्यभिचारित्वात् द्वितीयं घटादिव्यावृत्तत्वेन वह्न्यसमवहितजन्यत्वविरोध्यपि धूमत्वा
वच्छेदेनतु पुंसंधूमत्वसामानाधिकरण्येन वह्निव्यतिचारित्वसंदेहदशायां धूमत्वावच्छिन्नाभावेवह्न्यभावव्यापकत्वग्र
हासंभवात् लाघवज्ञानादिवशात्कथंचित्तन्निश्चयेपि तु उक्तजन्यताग्राहकतर्कवैयर्थ्यं निपतनान्वयव्यतिरेकानुविधायि
त्वस्यैव जन्यतात्मकतया योगेवतन्निश्चयात् नवा तथासिद्धानिरूपकत्वसहितमेवतज्जन्यतात्मकं तत्तु प्रागनिश्चित
मितितन्निश्चायकतयातर्कसार्थक्यमितिवाच्यं अन्यथासिद्धानिरूपकत्वाविशेषितस्यापि नियतान्वयव्यतिरेकानु
विधायित्वस्य व्यभिचारित्याव्वर्त्तकतया तन्निश्चयस्यैव व्याप्तिनिश्चयसंपादकत्वेनतादृशविशेषणघटितजन्यतापदार्थ
निर्णयस्य प्रकृतेऽकिंचित्करत्वादित्याशयवानाह नियतस्यचेति नियमगर्भस्येत्यर्थः उक्तभेदसंपादकत्वादिति प्रकृ ग.म०
तोपयुक्तजन्यतांशाभिन्नत्वादित्यर्थः अन्वयव्यतिरेकानुविधायित्वज्ञानस्याशंकाविघटनतावाधूमत्वावच्छेदेनवह्नि २३६

समवहिताजन्यत्वनिश्चायकतावादिनामिदं दूषणमित्यवधेयं दीधितिकारमतेतु तत्तद्धूमत्वावच्छिन्ने वह्न्यसमवहितान्य
त्वनिश्चयविरोधिशंकानिवर्त्तकंतज्ज्ञानंतद्विवर्त्तकत्वंच धूमत्वावच्छेदेनान्वयव्यतिरेकानुविधायित्वान वक्ष्याहितेऽपि
तत्तद्धूमत्वावच्छिन्नविशेष्यकतज्ज्ञानस्याहृत्तत्तद्धूमत्वावच्छिन्नाभावेचवह्न्यभावव्यापकतायाः स्फुग्रहत्वेन तत्तद्धू
मत्वावच्छिन्नेनियतान्वयव्यतिरेकानुविधायित्वस्फुरहमेवतादृशाग्रहेराजन्यताग्राहकतर्कवैयर्थ्यमित्यपिनाशंक
नीयंतर्कंविनाधूमत्वावच्छेदेनव्याप्तिनिश्चयसंपादकस्य धूमत्वावच्छेदेनजन्यतानिश्चयस्यानिर्वाहात् नचतत्तद्धूम
त्वावच्छिन्नधर्मिकान्वयव्यतिरेकानुविधानबोधमूलकतर्कस्यलाघवज्ञानसहकारादेवधूमत्वावच्छेदेनजन्यताग्राह
कत्वमेवंच धूमत्वसमानाधिकरणेपनतदन्वयव्यतिरेकानुविधानरूपजन्यतांशनिश्चायकप्रमाणेनापिलाघवज्ञानस
हकाराद्धूमत्वावच्छेदेनतन्निश्चयजननसंभवात्तत्एवचधूमत्वावच्छेदेनव्याप्तिनिश्चयोपपत्तेस्तर्कवैयर्थ्यंदुर्वारमेवे
तिवाच्यं पतस्तत्तद्धूमत्वावच्छेदेनवह्निजन्यत्वकल्पनापेक्षयाधूमत्वावच्छेदेनतत्कल्पनेलाघवमुक्ततर्केणैव धूमत्वा

वच्छिन्नस्य वह्निजन्यताग्रहे सहकारिता दृशं चलाघवं च न त्वन्यथासिद्धत्वघटितकार्य्यकारणभावकल्पनायामिवोपपद्यते
नतु निपतपीवोपपर्य्यमात्रकल्पनेन तद्धूमत्वरूपविशेषधर्मान्तं निपतान्वयव्यतिरेकानुविधायितावच्छेदकत्वस्य उभयम
तसिद्धत्वादिति भावः तच्चिंत्यमिति धूमत्वावच्छेदेनान्वयव्यतिरेकनिश्चये लाघवज्ञानापेक्षापाच्चावश्यकत्वे धूमत्वसा
मानाधिकरण्येन व्यतिरेकज्ञानमूलकादेव ततः कीदृशलाघवज्ञानं वैशेन सामान्यधर्मावच्छेदेन वह्निजन्यताग्रहेऽस्तु
किमुक्तप्रयासेनेति चिन्तावीजं वीध्यं केचित्तु उपादानपदं यथाश्रुतप्रवृत्तिपरमेव न च प्रवृत्तेः कार्य्यकारणभावनिश्चयप
सापेक्षत्वात् तदधीनशंकानिवृत्तेः कार्य्यकारणभावनिश्चयाधीनत्वेनान्योन्याश्रयः कार्य्यकारणभावनिश्चयस्य शंकानि
वृत्त्यधीनतर्कमूलकत्वादित्याशंकानीयं अन्वयव्यतिरेकदर्शनेनैव विनापि तर्कं कार्य्यकारणभावनिश्चयसंभवात् त
द्विरोधिशंकायाश्चान्वयव्यतिरेकनिश्चयेनापि निवर्त्तनसंभवात् न चान्यथासिद्धत्वशंकाया नान्वयव्यतिरेकधीर्निवर्त्तयि राम०
तुं प्रभवतीति न भिन्नत्वतित्तर्कमपि कृते वैनिवार्यंतर्कं विनापि कारणांतरविरहेण कदाचिदन्यथासिद्धत्वशंकाविरहसंभ २३७

वात् एतेन धूमत्वावच्छेदेनान्वयाद्यनुविधानस्य निश्चये तु प्रयोजकतया तत्सामानाधिकरण्येन वह्निजन्यत्वशंकानि
पत्तनस्य वज्ञापनेन ततः कथं धूमत्वावच्छेदेन वह्निजन्यतानिश्चयः तूत्पत्तिपरास्तं केवलोपस्थित्यादिविरहेण लाघवज्ञाने
नवातादृशशंकापाश्चापि निवृत्तिसंभवात् अयं तर्कं विनैव कार्य्यकारणभावनिश्चयस्य तर्कविरोधिशंकानिवृत्त्यर्थ
मुपगमेन तर्कवैयर्थ्यं तन्निश्चयार्थमेव तर्कानुसरणादिति चेन्न कार्य्यकारणभावनिश्चितेपि सामानाधिकरण्यप्रत्या
वह्निजन्यत्वनिश्चयं विना धूमेतद्व्याप्तिनिश्चयासंभवः सामान्यतो वह्निजन्यत्वस्य वह्निसमवेतरूपादिसाधारणस्य
वह्निव्याप्यत्वाद्यावर्त्तकत्वादिति सामानाधिकरण्यप्रत्यासत्त्या वह्निजन्यत्वनिश्चयार्थं दर्शिततर्कस्यापेक्षितत्वात्
प्रत्यासत्तिविशेषावच्छिन्नत्वाविशेषितस्यैव तादृशप्रत्यासत्त्यवच्छिन्नत्वविशेषितस्यापि जन्यत्वस्य प्रकारांतरेण निश्च
यसंभवेपि तत्र धूमत्वावच्छेदेन तन्निश्चयविरोधिशंकाविरहप्रयोजकांतरस्यानवधानस्यासौ तत्र तन्निरोधकतर्कं सार्थक्यप
संभवात् एवं च वह्निसमवहितजन्यपदं सामानाधिकरण्यप्रत्यासत्त्या वह्निजन्यपरं अत एव समवहितपदमप्यर्थव

त्ववह्निसमभिहितजन्यपदत्वसामानाधिकरण्यातिरिक्तप्रत्यासत्त्यावह्निजन्यत्वपरं जन्यो न स्यादित्यस्य च वह्निजन्यो न
स्यादित्यर्थः अथवाऽरेदेवेत्यस्य च वह्निभिन्नादेवेत्यर्थः तथा च तादृशशंकाद्वितीयशंकाया च वह्निजन्यत्वकोटिकैतयाः
प्रकृततर्के दृष्टापत्तिशंकाया विषयाविरोधित्वशंकयोर्भेदः पूर्वत्र च कार्यकारणभावनिश्चयाधीनप्रवृत्तेरेवग्राह्य
भावविषयकतया विरोधित्वं न च कार्यकारणभावनिश्चयाधीनायाः प्रवृत्तेः शंकानिवर्त्तकत्वकथनमसंगतं कार्य्य
कारणभावनिश्चयार्थमेवान्वयव्यतिरेकदर्शनादितः शंकानिवृत्तेरावश्यकत्वादिति वाच्यं प्रत्यन्वयव्यतिरेकदर्श
नाद्यधीनशंकानिवृत्तिसंपाद्यकार्य्यकारणभावनिश्चयव्यक्त्या सह कार्य्यांतरविरहानुत्तर्कोज्जन्मितस्तदधीनप्रवृत्तु
त्वमेव च सह कार्य्यांतरसमवधानं तदव्यवहितप्राक्क्षणीयान्वयव्यतिरेकदर्शनादिकं नासीत्तत्र पूर्वोत्पन्नकार्य्यकारण
भावनिश्चयाधीनप्रवृत्तितः शंकानिवृत्तिमंतरेण तु पुनः कार्य्यकारणभावनिश्चयः संभवतीति तत्कीनुपपत्तिरिति ता राम०
दृशस्थलाभिप्रायेण कार्य्यकारणभावनिश्चयाधीनप्रवृत्तेऽशंकाविरोधित्वाभिधानसंगतेरिति सर्वसामंजस्यमि २३८

त्याहुस्तेषामतत्समुपन्यस्यतिकेचित्त्विति पत्वेजन्मानोप्युपादानपदं स्वान्वयव्यतिरेकानुविधानज्ञानपरमेव तदधीनशंकानि
वृत्तिमूलकः कार्य्यकारणभावनिर्णयस्तु शंकानिवर्त्तकतया नाभिहितः अपि त्वायव्यतिरेकनिश्चयविषयासाक्ष
तर्कोपयोगित्वेनेवेदं दृश्यन्त्वाप्रत्यक्षः समभिहितपदसार्थक्यायैव तर्क आशयाधेजन्यपदस्य पूर्वोक्तपरत्वापेक्षया वह्निज
न्यत्वोविन्याश्चेति तदस्वरसादेवोक्तमिति उपादानपदस्य प्रवृत्तिपरत्वे कार्य्यकारणभावनिश्चयस्य तर्कपूर्वमेव क्षयमपेक्षे
णीयतया तर्के वैयर्थ्यमित्याहुरपि समतन्मतस्यतदुपपादकानतयोपन्यस्तत्वाएतन्मतस्यतदुपपादनपरत्वविरहे दीधिति
कृतोपितर्कव्याख्यानावसरे एतन्मतमनुपन्यस्य तदुपपादनमेवेति ग्रंथव्याख्यानावसरे तदनुपन्यासस्यानिर्बीज
त्वपातात्तु व्यभिचारग्रहायेति यत्र संयोगेन धूमस्तत्र संयोगेन वह्निरिति व्याप्तिनिश्चयापेक्षयार्थः अधिकरणस्य जनकत्व
शंकानिरासार्थमित्यधिकरणेऽपि वा वह्निर्धूमं जनयिष्यतीति शंकाधीनायाविशेषणत्वाद्धि जीपासामानाधिक
रण्यातिरिक्तेति संयोगपन्यसंबंधावच्छिन्नवह्निनिष्ठजनकत्वानिरूपकत्वे वह्निनिरूपितसंयोगेनसंबंधावच्छिन्न

न्यताशून्यत्वेच सति संयोगसंबंधावच्छिन्नवह्निनिष्ठजनकताप्रतियोगिकसंयोगसंबंधावच्छिन्नजन्यताशून्यः स्याद्
ह्निजन्योन स्यादित्यर्थः सत्यंतं चापादककोटौ एवं यावत्प्रतियोगिकोटौ एव वा निवेशनीयं संयोगातिरिक्तसंबंधेन धूमं प्र
त्येव संयोगेन वह्निः कारणं संयोगेन धूमं प्रति संयोगातिरिक्तेन संबंधेनैव वा वह्निः कारणं इत्येतादृशशंकायां दशायां सं
योगेन वह्नेर्व्यापकत्वनिश्चयात् योगाद्विशिष्टदले उत्पत्तायां जनकताया च संयोगसंबंधावच्छिन्नत्वनिवेशनं तादृशज
न्यताप्रसिद्धिर्वेहि तन्या लोकादौ संयोगसंबंधावच्छिन्नवह्निनिष्ठजनकतानिरूपितताद्दृशजन्यताशून्यस्यापिव
ह्निसमवेतरूपादिः या कश्चपार्थिवरूपादेः च वह्निजन्यत्वाद्व्यभिचारः इतिचरमसंबंधोपादानं वह्निनिष्ठताद्दृशजन
कतानिरूपितताद्दृशजन्यताशून्यस्यापि संयोगान्यसंबंधावच्छिन्नवह्निजन्यताशून्यस्यापिवधूमस्यान्यसंबंधाव
च्छिन्नवह्निनिष्ठजनकतानिरूपितसंयोगसंबंधावच्छिन्नजन्यतयापि वह्निजन्यत्वनिर्वहतीत्यप्रयोजकत्वशंकानि दाम०
वाशाय एतत्सत्यंतं न चैवमपि वास्तवव्यभिचारावारकत्वपातस्यैवपर्थ्यं तुष्परिहरमेवेतिवाच्यं तथात्वेपि व्याप्तिग्रहोप २३९

पिकृतयाभास्योपकत्वात् अतएवासाधारणपवारकस्यापि अग्रिमसेतस्यार्थकत्वं वक्ष्यते अर्थविशेषणतास्थले व्याप्तिसत्त्वेप
रार्थत्वं मानसं च तस्य आधिक्यरूपनिग्रहस्यानसंपादकतया दोषत्वं न तु स्वार्थानुमाने किंचित्करमेवतत् अस्तु
वा संयोगान्यसंबंधावच्छिन्नवह्निनिष्ठजनकत्वाप्रतियोगिकत्वसंयोगान्यसंबंधावच्छिन्नत्व उभयाभाववद् वह्निजन्य
तशून्यत्वमेव सत्यंतार्थः अस्तु उभयाभावस्यानिवेशात्केवैपरीत्यसंभावना वह्निजन्योनस्यादित्यनंतरं इतिप
र्यवसितत्वकीव तार इतिपूरणीयम् आधिक्यरूपातिरिक्तस्याप्यसत्वासामानाधिकरण्यप्रसत्त्यासत्त्वात् वह्निजन्य
त्वस्याभावेपि वह्निजन्यत्वसामान्याभावो न वर्तते तत्प्रयोजकत्वशंकासंभवात् कथमपं तर्कः इत्यत आह प्रत्यासत्त्व
प्रतितया च जन्यजनकताव स्वप्रत्यासत्तिवृद्धिनित्वनियमावधारणेन मिलितोक्तविशेषणत्वयाभावसामान्याभा
वव्याप्तिनिश्चयः सुवचस्वेतिभावः ननु धूमे सत्यं तस्य इति निश्चयपतया नापं तर्कः संभवतीत्यत आह प्रत्यासत्त
तरं शालिवह्निसत्त्वइति तादात्म्यादिना वह्निसंबंधिनीत्यर्थः धूमानुत्पादादिने निर्धूमानुत्पादद् शंनेनेत्यर्थः आदिप

दैनसंबंधांतरघटितव्यतिरेकव्यभिचारपरिग्रहः सार्वभौममतमाक्षिपति इदमेव चेतिन्यायव्यवहितमतमेवेत्यर्थः वा
चाभेद्येतितथाचईदृशादिशेषकार्य्यकारणभावस्यतर्कात्पूर्वंनिश्चितत्वेपितर्कस्यावैयर्थ्यमुपपादितमंतीन
नुसारतं अरोरत्याहेत्यः एतन्मतेपिपयाक्रान्तउपादानपदार्थः कार्य्यकारणभावनिश्चयाधीनाप्रवृत्तिरेवशंकावि
रोधीनां कार्य्यकारणभावनिश्चयः पूर्वमत- वान्वयव्यतिरेकनिश्चयाधीन एव न तु तर्कमपेक्षतेत्यतो वान्यो
न्याश्रयः स्ववृत्तेरेवभविष्यतीत्यादिशंकाकारणाभावविषयिणीनां प्रवृत्तिर्धूमानुत्पत्तिवह्न्याधारताविरहयोः प्रयोज्य
प्रयोजकभावनिश्चयसंशयाविरोधिनी वह्न्याधारताविरहप्रयोज्यधूमानुत्पत्तिकत्वस्य वह्न्यनाधारोत्पत्तिकत्वस्य व्याव
र्त्तकतयातन्निश्चयस्यतत्संशयविरोधित्वात् तत्कारणकत्वस्य च तत्संसर्गवधानविरहप्रयोज्यानुत्पत्तिकत्वव्याव त०
र्त्तकतयासंशयानन्तर्गतद्विषयकस्यतद्घटकाविघटनयाप्रयोज्यप्रयोज्यप्रयोजकभावनिश्चायकत्वात् एवं प्रयोज्यप्रयो २४०
जकभावनिश्चयविरोधितया किंचिदप्रयोज्याभावप्रतियोग्युत्पत्तिकत्वं हेतुकत्वकोटिकत्वेनोपशंकाथितर्के

विरोधिनीवह्न्यनधिकरणानुत्पत्तिकत्वनिश्चयस्यैवउत्पत्त्याश्रयप्रवृत्तित्वविशिष्टेउत्पत्तिविशेषसंबंधेनस्तुद्वेवा
धूमेवह्निव्यभिचारसंशयविघटनया व्याप्तिनिश्चायकत्वसंभवेन तर्कवैयर्थ्यमिति वाच्यं व्यभिचारशंकानिवृत्ता
वपि धूमे वह्न्यधिकरणानुत्पत्तिकत्वसंदेहानिवृत्त्या उत्पत्त्याश्रयप्रवृत्तित्वविशिष्टेउत्पत्तिविशेषसंबंधेनस्तुद्वेवाधू
मसामान्ये वह्निसामानाधिकरण्यनिश्चयासंभवेन तादृशवह्निसामानाधिकरण्यघटितव्याप्तेर्दुर्निश्चयावह्न्य
पावह्न्यधिकरणदेशानुत्पत्तिकत्वसंशयानिवर्तकप्रकृततर्कस्य तादृशव्याप्तिनिश्चयोपयोगित्वात् ननूक्ततर्कं
विनाधूमांतरेवह्न्यधिकरणादेशानुत्पत्तिकत्वसंशयस्यात्पत्तेर्निवृत्तिः संभवति नित्यसाधारणस्य वह्न्यनधिक
रणादेशानुत्पत्तिकत्वादेर्व्यावर्तकत्वात् एतत्सहितस्योत्पन्नत्वस्य तद्विरोधित्वेपि विशिष्टस्य धूमेऽग्रहे दृश्यापातं तर्कसा
ध्यकाव्वं नच व्याप्यव्यतिरेकनिश्चयविधया धूमो विशिष्टोत्पन्नत्वग्रहस्य तर्ककारणतया तदावश्यकतेति वाच्यं स
त्पंनदनस्यापादकविशेषणतापन्ने विशिष्टाभावस्यानापाद्यतया विशिष्टनिश्चयस्यानावश्यकत्वात् अत्रापाद्य

तिरेकनिश्चयस्यशंकाविरोधितयातर्कवैयर्थ्यस्यविशिष्टाभावापाघत्तावादिनांदीधितिकृतांमतएवतत्स्वरूपद्ववत्वात्
न्वचसत्वंतस्यापादकविशेषणतानापन्नेपिविपर्य्ययपर्य्यवसायितानिर्वाहापतस्यपक्षविशेषणतायाम्रावश्यकत
यापक्षेतत्सहितस्योत्पन्नत्वस्यनिश्चयस्यावश्यकइतिवाच्यं तावतापक्षेवभयनिश्चयप्रौव्येपिविरोधितावच्छेदकरू
कविशिष्टाप्रत्वेननिश्चयस्यातथात्वात् सर्वं एतत्व्याप्तिविशिष्टवह्न्यधिकरणादेशानुत्पत्तिकत्वविरोधग्रहस्यानावश्य
कतयात्तद्ग्रहदशायामपितर्कस्यसार्थकत्वमवगंतव्यंवह्न्यानधिकरणोत्ति उभयत्राधिकरणत्वंउक्तनिश्चयसंयोगेनग्राह्ये
त्रनंश्वरपक्षेननुवह्निकारणाकत्वस्यामान्यतोवह्निसमवधानविरहप्रयोज्यानुत्पत्तिकत्वस्यव्याप्यंनतुसंयोगरूपतत्
समवधानविरहप्रयोज्यानुत्पत्तिकत्वस्यापिवह्निसमवेतरूपादिसाधारणेतिकथंतद्विषयिणोपप्रवृत्तिर्वह्निसंयोगविरहप्र
योज्यानुत्पत्तिकत्वंसंयोगेनवह्न्यानधिकरणादेशोत्पत्तिकत्वव्यापकत्वेकंनिश्चायपप्रिव्याप्तिनचसंयोगघटितसामानाधिक रा॰प॰
रणप्रत्यासत्त्यावह्निकारणाकत्वंसंयोगेनवह्न्यधिकरणत्वविरहप्रयोज्यानुत्पत्तिकत्वनियतमितित्तद्विषयकमुपादानेम २४१

वतन्निश्चयोपदितिवाच्यंसंयोगघटितसामानाधिकरण्यप्रत्यासत्त्यावह्निकारणाकत्वस्यप्रसंगनिश्चयेतस्यैवविशेषदर्शन
तयासंयोगेनवह्न्यधिकरणादेशोत्पत्तिकत्वनिश्चायकतासंभवेनप्रकृततर्कवैयर्थ्यप्रसंगेनयत्रसंबंधविशेषप्रवतंतभा
वेनस्वरूपसंबंधविशेषरूपकार्यकारणभावःप्रागवगतःतत्रैवतर्कोपयोगितापाःस्वोकरणीयतत्तयावह्निसंयोगवि
रहप्रयोज्यानुत्पत्तिकत्वस्यचतन्तुनिश्चयत्वेनप्रकृततर्कोनुपपत्तिस्तत्राशंकासमाधानत्वादित्यतन्त्राहतादृशानुत्प
त्तिकत्वेतिसंयोगेनवह्न्यनधिकरणादेशानुत्पत्तिकत्वनिश्चयत्वेनपर्थःवह्निसंबंधाभावस्यवह्निसंबंधप्रतियोगिकाभाव
स्याप्युवह्निधूमयोर्हितुहेतुमद्भावनिश्चयवशात्दृशामाणालाघवात्परस्परासंबंधपेक्षयालघुशरीरत्वात्तादृशसंबं
धाभावस्यसंयोगरूपसंबंधाभावस्यतथात्वावधारणात् प्रयोजकत्वनिश्चयात् अत्रचउपादानपदस्यघथाकृतार्थ
परतोपपत्तर्थमेवएतावानप्रयासःअन्यथाउक्तरीत्याधूमत्वावच्छेदेनव्याप्तिनिश्चयविरोधिन्याधूमत्वसामानाधिकर
णेनव्यभिचारशंकायाविरोधिताधूमत्वावच्छेदेनवह्निजन्यतानिश्चयस्यजननेनैवतर्कसार्थक्यसंभवेतदुपेक्षायामनु

चितत्वात् सैव च न संगच्छते प्रवृत्तेः शंकाविरोधित्वस्याभिप्रेतत्वेपि दिट्ठीत्यादिनाउपादानं कथं कुर्य्यादित्यं तेन शंकासंभाव
नपातत्वस्य तेप्रकृतत्वस्यात् प्रसंगत्वस्यासंगत्यापत्तेः नहि कार्य्यसत्वप्रतिबंधानुपादस्य संजकं कार्य्यकारणभावनिश्चयप्रव
र्तितप्रवृत्तिसामग्रीसत्वेतदुत्पत्तौ वाधकाभावात् न च कार्य्योत्पत्तिपूर्वप्रतिबंधकाभावस्यावश्यकत्वपाशंकोत्थानात्पूर्वं मु
पादानरूपतत्प्रतिबंधकाभावस्याशक्यापादनत्वात्तदापत्तिपरतयातद्ग्रंथसंगतिरितिवाच्यं एवमप्युपादानस्य शंकाप्रति
बंधकत्वासिद्धिमंतरेणानादृश्यापत्त्ययोगात् इष्टापत्त्या शंकाविरहंग्रसाध्यतन्निर्वाहकत्वाउपादानस्य शंकाप्रतिबंधक
त्वस्यावश्यापत्तपरतयातस्मात्तदुपादानमेवेत्याभिधानस्यदुष्टसंगमकत्वात् एवं धूमत्वावच्छेदेन वह्निमदुत्पत्तिकत्वानिश्च
योऽप्यकिंचित्करः हेतुतावच्छेदकावच्छेदेन साध्यसामानाधिकरण्यज्ञानस्यानुमितावनपेक्षितत्वात्तदपेक्षायामवृत्तिसा
धारणादृश्यत्वावच्छिन्नलिंगकानुमितिविलोपप्रसंगात् धूमत्वसामानाधिकरण्येन वह्निमत्त्वत्पत्तिकत्वं च प्रागेवनिश्चितं न त॰प्र॰
त्वपत्यतिरेकग्रहस्यतद्विपक्षत्वादितितर्कवैयर्थ्यंदुर्वारमेवएवं प्रवृत्तेः शंकाविरोधित्वमप्यप्रमाणदूषितं दत्यादि चिंतावी २५२

जंबीर्थ्यमिश्रात्मपादानपदस्य पर्यासतार्थकत्वोपपादनतापि एवं वराोपंतितर्कस्यव्याप्तिग्रहमूलकत्वेनानवस्थेतिशंकाव
स्वाधीनुमानस्यत्वासिद्धापिकाङ्क्षचितकोद्युपास्य त्यादि पृ शंकाकारणाविरहेणापिमूलशैथिल्यादिशंकाविरहसं
भवेन सर्वत्रतर्कानपेक्षणात्नवस्थानिवृत्तेर्व्याघातोपदर्शनेव पर्य्यवसानमपि तु परार्थस्थले घूमादिनाकार्य्येणा वह्न्यादि
साधनावसरे प्रतिवादिनानुमानाप्रामाण्यपादिनाचार्वाकेन व्यभिचारशंकापाममस्थाप्तिग्रहो न जायत इत्युक्तिं तं व्याप्तिग्र
हस्वीकारयितुं वादिनाशंकानिवर्त्तकतर्कस्योद्भावनेपमतर्केविरीधिमूलशैथिल्यादिशं[illegible]स्त्वात्तर्क एवतावत्तरतीति
परेणोत्तरपितं तच्छंका -- विरोधितर्कांतरोपन्यासेपितत्तर्कविरोधिविरोधिशंकांतरं परेणोद्भावनीयमितिएवं तत्रैव परे
णाशंकोद्भावनसंभवात्तर्कोपन्यासानवस्थयापरार्थानुमानोच्छेदः इत्येवतर्कस्येत्यादिशंकार्थः एवं च यावदाशंकमित्या
देरनवस्थासमाधानपरत्वस्य यावत् परेणाशंकोद्भावनं क्रियते तावदेव तर्कोपन्यासः यत्र शंकासत्वेपरस्याप्रवृत्तिर्व्या
घातः तत्रव्याघातोपदर्शनेनैव शंकोद्भावनासंभवान्न तर्कोपन्यासः इतिनतदुपन्यासानवस्थेत्यत्र तात्पर्यम् एवं चन

कीनुसरणादित्यस्यतर्कोपन्यासादित्यर्थः व्याघातेनेति व्याघातोपपादनेनेत्यर्थः शंकं शंकैव नावतरतीति स्वशंकोद्भाव
तं न संभवतीत्यर्थः तर्कं विनैव व्याप्तिग्रह इति तर्कोत्तरमनुपन्यस्यापि परं प्रति व्याप्तिग्रहस्वीकारणात्संभवदुक्त्यर्थे
के व्याप्तिग्रहमूलकीदृशतर्कोपन्यासानंतरं तद्विरोधिकीदृशशंकायाः स्ववृत्तिव्याघातेनोद्भावनासंभवदुक्ताकांक्षांशं
तथा हीत्यादिग्रन्थः इति तच्छंकास्यादिति इति तर्के उपन्यस्ते इति शंका न संभवतीति परेणोद्भावनीय इत्यर्थः केसर्व
त्र शंकायां स्वक्रियाव्याघातकत्वं स्वक्रियाविरहप्रयोजकत्वमिति यावत् यदि ह्रीत्यादि नानादृशस्वक्रियाविरोधविरो
धस्फुटीकरणं तेन विनापि तत्संभवादिति उक्तशंकाविरोधे न वह्निधूमादीनां हेतुहेतुमद्भावनिश्चापकतर्कोनवता
रणावह्न्यादिकं विना धूमादिसंभवशंकोदयादित्यर्थः धूमादौ वह्न्याद्यजन्यत्वशंकायाश्च निराकरणादिति यावत्त
स्मात् शंकायाः प्रवृत्तिविरोधित्वात् तदुपादानमेव धूमाद्यर्थिनः परस्य वह्न्यादौ प्रवृत्तिरेव शंकाप्रतिबंधकमूलशैथिल्या रा०म०
दिशंकपाकथं तर्कोऽवतरेदिति शंकाविरोधिप्रवर्तमानस्य स्वप्रवृत्तिव्याघातकशंकापदिसत्त्वशंकनस्यैव निपाप्रयोजक २४७

त्वादितिभावः एतदेव दृढयति न संभवतीति तस्य धूमादेः तद्वह्न्यादिकं इत्याशंकेत इति तर्कविरोधिशंकासत्त्वेन कारण
तानिश्चापकतर्को नवतारापेक्षशंकाज्ञापत इति विचारदशायां शंकेतेत्यर्थः तदेव द्याशंकेत इति विचारदशायामि
त्यादिः पश्चिमत्वाच्छंक्यमान इति व्याशंकामानस्य परस्य परस्परत्वद्वत्यर्थः स्वक्रियाव्याघातः स्वप्रवृत्त्यनुपपत्तिः उक्तशंका
यां शंकाप्रवृत्तेर्विरोधज्ञानं प्रतिबंधकमित्येव व्याघातेनपत्रेत्यादि नोक्तमित्यभिमानिनां मतमुपन्यस्य निरास्यति
एतेनेति तन्नाप्यनवस्थैति शंकानिवृत्त्यर्थे तन्निश्चयापेक्षायामनवस्थित्यर्थे नियमघटितविरोधनिश्चयार्थमपि तद्विरोधि
शंकानिवर्तकतर्कापेक्षणादितिभावः स्वक्रियापायं प्रवेति वादिप्रवृत्तेरेवादिनः शंकायां प्रतिबंधकत्वेनाभिधानात्तु वि
रोधग्रहस्येत्यर्थः एतदेव मतमुपन्यस्यति भिन्नाश्रितस्तीति व्यभिचारशंकानिरासहेतुत्वेनेति परेणोद्भावितायास्तादीपन्न
भिचारशंकाया निवर्तकत्वेनेत्यर्थः तंप्रति परं प्रति इंप्रति परेणाप्रमूलशैथिल्यादिशंकोद्भावनस्य निवृत्तपद इति यावत्
व्याघातेनप्रमुपदर्शयत इति सर्वज्ञस्वक्रियाव्याघात इत्यादिनेति शेषः व्याघातोपदर्शनाकारमाह मैवं शंकिष्ठा इति माशं

कानुमानंवपेक्ष्यपरंप्रतीतिव्यभिचारशंकापाः प्रतिबंधकत्वेनव्याप्तिनिश्चयोनसंभवतीत्युक्ताव्यानुमानप्रामाण्यनिराकृती
रंवार्वाकंप्रतीत्यर्थः व्याप्तिग्रहोपायंप्रदर्शयन्नियतव्यभिचारज्ञानविरहसहकृतसहचारदर्शनस्यव्याप्तिग्रहसामग्रींप्रदर्शना
चर्सर्वव्यभिचारशंकेतिव्यभिचारशंकानुपस्थितिमात्रेणाप्रकृतोव्याप्तेर्ग्रहसामान्यायांसर्वत्रैवभविष्यतीत्यदनुपस्थितिदशा
यांप्रतियोगिज्ञानविरहेणतदभावघटितव्याप्ते तिर्ग्रहत्वादितिशंकानिवारणायपक्षेचनविपक्षबाधकतर्कोद्भाव्यभिचारशं
कानिवृत्तिर्भविष्यतीत्यभिहितंतत्रतथैः मूलत्वेपिष्पलैतिमूलशैथिल्यादिशंकायाः तर्कविरोधिन्याः सर्वत्रसंभावनातर्के
एवनावतरितुंमभवतितन्निकेरणार्थमपितर्कोनरस्वीकारेऽनवस्थेत्युक्तावकंप्रतीत्यर्थः व्याघातोपमुपदर्शयतद्दूतिप
व्याघातेवेत्यादिनाउपन्यस्तत्वकोत्प्रयोजकाधीनकाचित्कशंकाविरहप्रधारणाकांक्षानिवृत्त्यर्थंततमाशोकय्यनी
येनथाहीत्यादिनानतसहकारिणीशंकानतः प्रवृत्त्यभावस्यापत्तिः प्रदर्शितंतत्रतथैः एवंचतस्मात्तदुपादानेमेवशंकाप्रति रघु०
बंधकमित्यनेनप्रवृत्तिव्योपकाभावमुद्रपांशंकाविरहोत्राप्येकेत्यर्थकेनशंकाविरहेममाराजाभिधीयतेतन्तुशंकावि २४४

रहमपेक्ष्यकथितिन्तुपादानपदस्यप्रवृत्तिपरेत्तैवनिर्वहतीतितकांकास्पदर्शनपरस्यपदिहीत्यादिग्रंथस्यार्थसंक्षेपेणास्व
पमाहमैवमिति सर्वत्रैवशंकाभविष्यतीतिमाशंक्याहत्यर्थः तथास्वतिसर्वदैवतर्कविरोधिशंकोत्पादेत्तवैवेतितत्त्वापी
त्यर्थः व्याहन्येवननोत्पाघरतशंकयातर्कोनवतारेणानवापिकारणातानिश्चयासंभवान्नहिसंभवतीत्यादिनापिशंका
सचिच्छावीक्षप्रवृत्त्यसंभवस्वोक्तदूषणापरिहारोपदर्शितिपदितिव्याघातत्रिपापरामर्शः शंकुरितिप्रपयादेनास्वव्याभावोदर्शितः
व्याघातेतशंकैवनानरतीत्यत्रविरोधरूपव्याघातबुद्धेः प्रतिबंधकविधयाशंकाविरहप्रयोजकत्वेनास्तपर्पितस्येमानि
नामनवस्थाशंकामूलत्वस्वनिराकरोतिसहानवस्थाननियमः तदभावनियतत्वंतन्नापितत्रज्ञानापेक्षापामपेक्ष्यनवस्थे
तिनियमस्यव्याप्तिरूपतयानदूहविरोधिशंकानिवृत्तावपितंकीतरापेक्षणादितिभावः स्वक्रियायाएवेतिपद्यपिक्रियापाप
दस्यान्वयव्यतिरेकानुविधानवाचपरतयातस्यचविशेषदर्शनविधयैवविरोधित्वेनव्याप्तिग्रहेपिक्षानादवस्थ्यमिवमपि
तथापिकालांतरस्थहोनव्याप्यवस्थिदकधर्मप्रकारेणव्याप्यदर्शनस्यापिशंकाविरोधित्वयामविच्छिन्नतर्कव्याप्तिग्रह

धारायामुपगमस्यानावश्यकत्वेनेति ध्येयं एवकारेण व्याघातबोधव्यवच्छेदः एवं च व्याघातेन शंकैव नावतरतीत्यत्र व्याघात
पदं न विरोधरूपव्याघातपरं अपि तु तर्कानुपनिपातशंकाप्रतिबंधकतावच्छेदकधर्मवत्त्वपरं तथा च यार्थस्य प्रयोजकत्वमे
व प्रतिबंधकस्य वाच्यवहितप्राक्कालीनत्वनियमप्रतिबंधकतावच्छेदकधर्मवत्त्वस्यापि कार्यानुत्पादप्रयोजकत्वादिति नान
वस्थाशंकास्पदमिति भावः शंका चेदस्त्यास्येव न चयं कानवस्थेत्यारौ व्याघातावधिराशंकातर्कः शंकावधिर्मतद्र्तिकारिक
वस्याशंकास्पदमिति भावः शंका चेदत्रमास्येव न च यं कानवस्थेत्यारौ
पाशंकायाः कश्चिद्व्याघातप्रयोज्यानुत्पत्तिकत्वमभिहितमावाप्येस्तु परिरवंडनकृतां शंकानिवृत्तिः प्रवृत्तिप्रतियोगिकविरो
धरूपव्याघातः आश्रयतासंबंधेन शंकाप्रत्यासक्तोध्यपतत्प्रतिबंधकदृत्युमतं तत्र संभवति व्याघातस्य शंकाश्रितत्वेन
शंकोत्पत्तेरेव तत्र व्याघातरूपप्रतिबंधकसमवधानसंभवेन तदुत्पत्तेरावश्यकत्वात् आघातस्य तत्प्रतिबंधकत्वव्याघाता
दित्याकृतमनुपपन्नस्य निराकरोति अत एवेति व्याघातोपदर्शितशंकाप्रत्यासत्त्वयाशीक्रियतद्रतिशेषः शंकाद्रस्तीति तदाशं रघु०
कोत्पादोत्स्वप्रसंगी कार्यद्रत्यर्थः न चेदिति शंकाप्रत्यासत्त्वो घातस्वेत्रास्ति तदा प्रतिबंधकासमवधानाच्छंकाजायेतैवे २४५

त्यर्थः अतो व्याघातावधिः व्याघातप्रयोज्यानुत्पत्तिका आशंकादृत्ति कुतस्तर्कः शंकावधिः शंकानुत्पादप्रयोजक इति वा
कुतर्कविरोधिशंकाया व्याघातानिवर्त्यत्वेऽनवस्थ्यातर्कस्यैवानतरादित्यर्थः अथ वा तर्कः शंकावधिः शंकाव्य
वधिकः पत्र व्याघातोच्छेदकाविच्छेदः तत्र तर्कानुपयोगात्तर्कधारायामपि विच्छेद इति यावत् एतावता नानवस्थावकाश
इति कुत इत्यर्थः न हि व्याघातः शंकाश्रितः प्रतिबंधकविधया शंकानुत्पादप्रयोजक इत्युच्यत इति शेषः किं तु स्वक्रियैवेति
आचार्याणां स्वक्रियानिष्ठप्रतिबंधकतावच्छेदकधर्मवत्त्वरूपव्याघातस्यान्यथैव शंकानुत्पादप्रयोजकत्वरूपेणाशं
काविरोधित्वेनात्पर्यादिति भावः ननु स्वक्रियापा अपि शंकानिवर्तकत्वं विचारासहं तस्याः शंकाविरोधित्वस्य वा नि
वर्तकतासंभवात् तत्र च शंकाप्रतियोगिकविरोधस्य विरोधघटकशंकासत्त्वस्याप्यावश्यकत्वात् शंकानिवर्तकतायाश्च
व व्याघातादिस्यात् आह नवेति क्वचिदपि विरोधित्वानाच्छंकानिवृत्तिरेवं न स्यात् सर्वत्रैव तृष्यावितर्कसंभवादित्यर्थः तथा
च सर्वानुभवसिद्धं कराद्दिनिरासस्यानुत्पादि शंकानिवर्तकत्वमपि भज्येत पदि च विरोधप्रतियोगितं कदाचित्कचि

तस्यत्वस्यवतत्प्रतियोगिकविरोधस्तन्निवर्तकस्यनिर्वहितत्तत्तुपदापत्त्रनिवृत्तिमिहितात्तदातत्रविरोधप्रतियोगित्वाचमध्य
पेक्ष्यत्वस्युक्तेनतदातुल्यप्रकृतेऽपीतिभावः ननुव्यभिचारादर्शनसहकृतस्यसहचारदर्शनमात्रस्यव्याप्तिग्राहकत्वोपगमे
भूयोपदर्शनस्यव्याप्तिग्राहकतापत्त्यायीतिभावः ननुव्यभिचारादर्शनसहकृतस्यसहचारदर्शनमात्रस्यव्याप्तिग्राहक
त्वोपगमेभूयोपदर्शनस्यव्याप्तिग्राहकताप्रवादोभज्येतेत्यतआहनचैतादृशेतितदादरः भूयोदर्शनस्यतर्कसंपादक
द्वाराव्याप्तिग्रहोपयोगित्वेत्यर्थः प्रथमव्याप्यव्याप्तिज्ञानसंनिवेशप्रथमदर्शनेऽप्यतादृशतर्कप्रवृत्तिः संभवतीतितर्केऽपिसाध्य
साधनभूयः सहचारदर्शनमकिंचित्करंतथापिपत्त्रमहानसेप्रथमंसहचारदर्शनेऽपिगोप्त्वेचवह्निंविनाधूमउत्पद्यतामितिशं
काजातारोष्वेववह्निधूमयोः सहचारदर्शनेनचतत्रिवृत्त्याकोशुपस्थित्यादिविरहेराचान्याधिकरणांतर्भाविराशंकात्वु
दयेनतर्कावतारस्तत्रद्वितीयदर्शनस्यएवकंभेरात्ततीयादिदर्शनस्यापिक्वचिदपेक्षासंभवइतिनासंगतिः नवान्वाधिक रा०म०
रणांतर्भाविरात तथाशंकापामपिमहानसीयधूमेवह्निसमवहितान्यत्वनिश्चयपर्यंभवेनधूमत्वावच्छेदेनायत्तिः संभवत्य २४६

वेतिद्वितीयादिदर्शनमकिंचित्करमेवेतिवाच्यं एवमपिक्वचिद्धूमत्वसामानाधिकरण्योपनायत्तिनिर्वाहकतयालाघवत्ता
नासमवधानस्यलेधूमत्वावच्छेदेनवह्न्यसंभवहिताजन्यतानिश्चयेद्वितीयादिदर्शनस्योपयोगित्वात् ननुसन्मतप
दप्रयोजकइतिनधूमः सहचारग्रहः तर्केसहकारीकृतैवव्याप्तिग्रहोपयोगीत्यर्थः अतएवनतदाहितेतितर्कसहकारीक
तस्यव्याप्तिग्रहोपयोगित्वस्वीकारएवतत्रसंस्कारस्यव्याप्तिग्रहजनकतापत्त्याऽऽवश्यकत्वात्तस्यप्रमाणांतरस्यात्
तर्कद्वारातस्यतथात्वेचतज्जन्यसंस्कारस्यहेतुतायांप्रमाणाभावेनतत्रप्रमाणांतरताप्रशक्तिः उक्तापादकाभावादित्यर्थः
तर्कस्यापिशंकानिवृत्तिद्वारैवव्याप्तिग्रहोपयोगितयाव्याप्तिग्राहककारणत्वाभावात्प्रमाणांतरत्वप्रसक्तिरितिभावः भूयो
दर्शनजन्यसंस्कारस्यतर्ककारणतयातथात्वस्यतर्कोपयोगित्वाभिमानेनतादृशसंस्कारस्यतर्ककारणतयाप्रमाणां
तरत्वप्रशक्तिंतादृशसंस्कारस्यतर्ककरणत्वमभ्युपेत्यैवनिराकरोतितर्कस्येतितथापाधेनवाधितंवाधम्मात्रापत्तिः
तत्रज्ञानकज्ञानविषयापाद्यव्यतिरेकावगाहित्वंस्वीकृत्यप्रमाणत्वमुपपादनीयमितिभावः तच्चित्यादिमूलग्रंथेनतत्पदं

पदि सहचारग्रहदर्शनपरं तदा ऽसंगतिः सहचारज्ञानस्य विशेष्यताज्ञानविषयाप्रत्यक्षद्वयशाब्दानुमानजनकत्वेऽपि व्याप्तिज्ञाने हे
तुत्वात् अतो व्यभिचारज्ञानविरहेत्यनेन पूर्वोक्तव्यभिचारग्रहदर्शनपरतया तद्व्याचष्टे दीधितौ तदिति व्यभिचारादर्शनं पदि व्यभि
चारनिश्चयः तदाप्यसंगतिर्व्याप्त्यभावनिश्चयाभावस्य शाब्दादिबुद्धावपि हेतुत्वात् अतो व्यभिचारादर्शनस्य संशयसाधारण्या
व्यभिचारज्ञानाभावरूपतां ज्ञानं निश्चयपदं तादिना मूलकृतैव सूचितं समारोपितुं दीधितिकृत् व्याचष्टे व्यभिचारज्ञानसामा
नाभाव इति व्याप्तिग्रहविशेषोपादानबीजमदर्शनपरं व्यभिचारज्ञानाभावाभावविषयीत्वार्थकं तदभावे पीति मूलं पदि व्यभिचा
रनिश्चयस्थलपरं तदाऽसंगतिः तत्र व्याप्तिज्ञानमात्रानुत्पादात् अतः संशयदशापरतया व्याचष्टे तद्व्याचष्टे योग्यता दी
ति न्यादिना साध्यपरिग्रहः शब्दादिनेति न्यादिना अनुमानपरिग्रहः यद्यपि संशयप्रतिबंधकतापन्नव्याप्यदर्शनस्योत्तेज राम०
कत्वया व्याप्यदर्शनरूपानुमाने न तन्निश्चये न व्यभिचारावकाशस्तथापि सामान्यव्याप्यवत्ताज्ञानजन्यापत्ते लाघवता तादि २४७
वच्छिन्नविशेषप्रकारिकायां तादृशसंशयोत्तरानुमितौ व्यभिचारो बोध्यः तच्चेति तत्पदं तर्कपरतया वर्णितस्तथा सत्त्वपिन

पुंसकत्विं गतां कथं विरुपपादयतो भवता मा हन्तादि इति स्वविन्नास्वरसो व्याख्यातार्थः तर्काविरहस्थले व्यभिचारे रागतर्कस्याहेतुत्वा
द्धेतुपदस्पर्शं तर्काविरहद्वारे यथोगितापरत्वे तत्पदस्पर्शं तर्काविरहपरतया एव व्याचितत्वाद्बोध्यः परार्थस्थले व्यभिचारसं
देहानुकूलतर्कविरहयोरुद्भावनात्तज्ज्ञानं विरोधीति तदभावयोरपि ज्ञानमेव व्याप्तिग्राहकं व्यभिचारनिश्चयाभाव
एवं च स्वरूपसत्तया तदुत्पत्त्यभिमानेनाशंकते मूले नन्विति व्यभिचारादर्शनवत् व्यभिचारानिश्चयवत् व्यभिचारसाधारण्यं
व्यभिचारसंदेहदशासाधारण्यं न ततो व्याप्तिनिश्चयः संभवतीति शेषः संशयनिवर्तकस्यैव निश्चापकत्वादिति भावः ख
रूपसतो रितितया च तया विधयोः संशयविरोधितोक्तेः संशयदशावाहत्तत्या व्याप्तिनिश्चापकत्वं संभवत्येवेति भावः
एवं च परार्थस्थले प्रतिवादिनः स्वव्यभिचारसंदेहोद्भावनं तदुद्भावने व्यभिचारो व्यभिचारसहचरित व्यभिचारज्ञानवि
षयत्वज्ञानाभावस्य व्यभिचारसंदेहो भविष्यति न तु व्याप्तिनिश्चयः इत्यभिसंधायैव ननु व्यभिचारज्ञानज्ञानेन तदभा
वज्ञानासंभवेन कारणाभावाद्व्याप्तिनिश्चयो माभूत् तदुत्पाशयेनाऽनुकूलतर्कविरहोद्भावनमपि स्वकीयव्यभिचारसंश

प्रज्ञापकतापि च ननु अनुकूलतर्कज्ञानविघटनायेति न व्यभिचारज्ञानाभावानुकूलतर्कयोर्न तु हेतुतासामान्याकीनाश
यः अप्रयोजकत्वात् अनुकूलतर्काभावो ऽभावत्वं संगच्छते तां स्वरूपसत एवानुकूलतर्कस्यापादकत्वं कथं निवर्तकतया तदभावनि
श्चायकत्वे नसाध्यतच्छून्यत्वादिनिश्चयापि वादिनो ऽनुकूलतर्काविनाज्ञानकस्तद्वज्ञानकस्तु उपन्यासः कथमुपपद्यतां
तिचेदित्थं पक्षयोर्निर्वह्निः स्यान्निर्धूमः स्यादित्याद्याकारेणतर्कोपन्यासः किंचित्तत्र निर्वह्नित्वनिर्धूमत्वयोः समभिव्याहृतभवना
र्थकास्य धातुमयां निर्वह्नि निर्धूमयोरस्याधारस्य धर्मरूपो ऽभावः स्यत्यास्यते संभावनार्थकपदविहितदायतां चहेतुहेतुमद्भावा
पन्नतदारोपविषयत्वबोधः व्याख्यातपदाभ्यां च दर्शितमात्रयत्नरूपं कत्वं प्रयमापदार्थबोध्यते अत्र व्याप्तार्थद्वारा पिक्रि
यान्वितस्य स्वार्थस्याख्याते न बोधने तु पति विरोधविरहात् अत एव गुरुमतेन कलंजभक्षणं पेदिस्पत्र कलंजभक्षणाभावविषयकं कार्यमिति बोधः न्यायमते च कलंजभक्षणं बलवदनिष्टानुबन्धित्वविशिष्टेष्टसाधनत्वाभाववदिति तत्र धात्वाख्या राम०
तार्थयोरन्वयतत्रार्थस्य भानात् तथा च तत्र निर्वह्नित्वारोपविषयोपपत्तद्वारोपविषयत्वसंयोगसनिर्धूमत्वारोपविषयत्वास २५८

पदित्वबोधः निर्वह्नित्वारोपस्तर्ककारणमापादकज्ञानं निर्धूमत्वारोपश्च तर्क एवतयोरारोपत्वेनैव भानमुपपन्नेनतु त्वेन
अतो ह्रदादौ व्याहार्यवह्न्यभावप्रमया धूमश्रमसहकारेणधूमाभावापत्तिज्ञानेऽपि तत्रास्यार्थकस्यह्रदोपदिनिर्वह्निः स्या
न्निर्धूमः स्यादिति वाक्यस्याप्रामाण्यापत्तावाहृश्यस्य तर्कबोधकवाक्यस्य तज्ज्ञानस्याऽबोधस्य च साक्षात्परकीयतर्कोत्पादा
नाजनकत्वेपि व्याप्याव्यापकापादकयोर्व्याप्यज्ञापकभावप्रयोजकव्याप्यस्मारकत्वप्रसमादन्वद्वारा साक्षात्तर्ककारणव्या
प्तिबोधजनकोदाहरणप्रयोजकतयापरकीयतर्कसंपत्त्युपयोगः अत्र तु मानस्यले साध्यहेत्वोर्व्याप्यज्ञापकभावबोधक
हेत्वंशमात्रस्यानुमित्युपयोगवत् न च उदाहरणवाक्याद्यप्रबोधे पितर्ककारणमाहार्यापादकवत्ताज्ञानस्यवाक्येन जन
नासंभवात्परकीयतर्कसंपादनासंभवइति वाच्यम् पर्वतो न वह्निमानित्यादिप्रतिवादिवाक्यादाहृदिनः साध्यनिर्देशेन
सहितात्संशयोत्पत्त्यानन्तरं पुंसः स्वतन्त्रेच्छाप्रयोज्याहार्यनिश्चयोत्पत्तेः स्वत एव मध्यस्थस्याहार्यापादकवत्ताज्ञानसं
भवेन वादिमुखाद्युपादानेन तर्कसंपादनासंभवात् ननु तर्कस्य स्वतः प्रमात्वं तस्योपमात्वनियमात् नापि

प्रमात्वकार्याद्यव्यतिरेकनिश्चयतन्यत्वंप्याप्रिप्रमाज्ञत्यत्वंबाधूमस्याद्रव्यत्वत्वमदृश्यायाभुत्पन्नात् धूमोपदिवह्निव्यभि
चारीस्यात् द्रव्यंस्यादित्यादितर्कोह्याप्रिप्रमायाव्याप्तिप्रमानुत्पादस्यचानिर्वाहादित्याशंकानिराकरणपरतयासमाधा
नसाम्यसूचकंविशेषदर्शनेत्यादिमूलोक्तदृष्टांतंसंगमयति तद्विशिप्रेवेतिप्रमायाउत्पादाभ्द्रमस्येत् पक्षेरेभावादित्य
र्थेःव्यभिचारःव्याप्तिप्रमापांसत्तर्कस्यव्यतिरेकव्यभिचारःतद्भ्रमेतकोभासस्यचान्वयव्यभिचारइत्यर्थेःपद्यायोगंहेत्वोरत्वपः
समानंस्फूटीकरोतिवोध्येतिवोध्यत्वंप्रकृतनिश्चापविषयत्वंसत्यत्वासत्वंविद्वितिनमुप्रमात्वभ्रमत्वेइतिशेषः पुरुषेपुरु
षत्वव्याप्यतपाश्यत्वादिभ्रमात्पुरुषत्वप्रमापाउभयादाभ्द्रमस्यचानुत्पादातितिभावःतर्कस्यापीतिसत्यत्वासत्यत्वइत्य
मनुषज्यते ननुव्याप्याादिप्रमाज्ञत्यत्वतदभावरूपेइतिशेषःयथाश्रुतार्थेऽश्वत्वस्यवतूयमाणत्वानात्पर्यार्थमाहतत्र
चेतिधार्मिणःविशेष्यस्यवोध्यादीत्यादिपदात् वीध्याभावत्वस्यफूलीभूतहानाप्रमात्वप्रयोजकस्यपरिग्रहःतथा
चविशेष्यतासंबधेनतत्संसर्गकतत्प्रकारकप्रमाभ्रमौप्रतितत्संसर्गविशेषणताविशेषाभ्यांतद्धर्मीविशेषतःसंस
राम० २४९

गौवच्छिन्नतदभावौहेतूव्यतोनतदभाववतितत्प्रमापात्तद्वतिचतभ्द्रमस्यप्रसंगइतिभावःविशेष्यविशेषणान्यंतभो
व्यकालिकप्रमासाका्यकारणभावोहेयःविशेष्यतयोऽत्रपुरुषादौपुरुषत्वप्रमादेरनुत्पादस्यकारणाभावनि
वोहत्वासंभवात् अथपुरुषत्वप्रकारकत्वविःशिष्टप्रमादेर्विशेष्यतया ऽत्रापादनंपुरुषत्वप्रकारतानिरूपितपुरु
षादिनिष्ठविशेष्यतापादनपर्य्यवसितंतच्चनसंभवतिपुरुषांतरेऽपतत्पुरुषनिष्ठापाःपुरुषत्वप्रकारतानिरूपितवि
शेष्यतायाऽत्रभावेएतद्व्यक्तित्वाभावस्यैवकारणतावछेदकसंबंधावच्छिन्नकारणाभावानात्मकस्यापिसभवापादि
नापुरुषत्वाभावस्यप्रयोजकत्वादितिचेन्नएवंसतिउक्तकार्य्यकारणभावकल्पनापाअपिनिष्फलत्वात्तन्द्वारणो
पातिप्रसंगांतरप्रशक्तेःअनित्यविशेषणातत्संबंधावगाहिप्रमायांविशेषणस्यतत्संबंधस्यवाहेतुतानसंभवति
तस्याविद्यमानतादशायामपिसमारूपतदुपनीतभानोदयात्एवंतत्संसर्गकानित्यप्रतियोगिकाभावप्रमेयविशेषणा
स्यतत्संबंधावच्छिन्नाभावस्यप्रतियोगिरूपतपानतयात्वसंभवइतितत्प्राप्यन्यकारणमाहवोध्यादिमदितिवाकारे

व्यवस्थितविकल्पपरः नित्यप्रमायां लाघवेन विशेषणस्य हेतुत्वौचित्यात् प्रमात्वस्य विशेषणाभेदभिन्नत्वात् तदवच्छेदक
र्ण्यकारणाभावभेदस्यावश्यकत्वात् सन्निकर्षस्य च तत्तद्वृत्तित्वविशिष्टत्वेनैव हेतुतासामान्यत आश्रयत्वं तदवच्छेद
कसंबंधः अतः सन्निकर्षस्यानुगतस्याननिर्वचत्वेपि न क्षतिः ज्ञानरूपप्रत्यासत्तेर्विषयतानाश्रितत्वेपि तद्वृत्तित्वद्विष
यत्वसंबंधेनोक्तरूपेण हेतुत्वोपगमात् धर्मस्येव धर्मिणोप्युपलक्षणतया कारणतावच्छेदकत्वं तद्वृत्तित्वं च विशेषणांश्च
तेन अविद्यमानधर्मिविशेष्यकप्रमानुपपत्तिर्वाऽतिप्रसंगः ननु तत्तद्वृत्तिविषयतासंबंधेन तर्कत्वेन हेतुत्वेन द्विती
यकल्पापेक्षया गौरवं तर्कत्वं मानसत्वव्याप्यजातिविशेषः अनाहार्यकत्वेपि साध्यरूपविषयोपरागेणानुमितित्वस्येव
लौकिकसन्निकर्ष- लक्षणेविषयमात्रोपरागेणासाक्षात्कारित्वस्येव व्याप्यमात्रोपरागेण तर्कत्वस्य ग्रहनिर्वाहादित्यत
आह स्वपमिति उक्तव्यभिचारगौरवयोः परीहारमाशंकते अथेति तन्निवर्त्तकत्वेन विपरीतज्ञाननिवर्तकत्वेन तच्चनि राम० २५०
वर्त्तकत्वं च तर्कस्य विपरीतापादकतर्कस्य तथा च तत्प्रकारणात्पैव निर्वाह इति भावः स्वपंविशेषदर्शनहेतुत्वानुपग

मादायात्तत्त इति तथा विशेषदर्शनसाधारणरूपेण तर्कस्य प्रमाप्रमासाधारणनिश्चयविशेषहेतुत्वं अन्यत्र विपरी
तज्ञानानुत्तरप्रत्यक्षस्थले तत्र विपरीतज्ञानोत्तरप्रत्यक्षे तस्यापि तर्कस्यापि अपिकारो विशेनसमुच्चायकः विशेष
तः बाध्यादिमद्विशेष्यकत्वविशिष्टेन विपरीतज्ञानविरोधित्वेन विशेषधर्मेणाकारणत्वं विपरीतज्ञानोत्तरप्रमा
दिरूपप्रत्यक्षनिश्चयत्वावच्छिन्नंप्रतिकारणत्वं गौरवादिति प्रमाप्रमसामान्यप्रयोजकप्रत्यक्षनिश्चयप्रयोजकस्य
भाजादेवप्रमादिरूपप्रत्यक्षनिश्चयनिर्वाहादिति भावः ननु किंप्रमादिसामान्यप्रयोजकं न तावद्धर्मिणो विशेषणादि
मत्वं अनित्यप्रमादिसाधारणाभावस्योक्तत्वात् नापि साध्यादिमद्धर्मिसन्निकर्षः अनुमित्यादौ तदहेतुत्वात् न च
तादृशधर्मिवृत्तित्वेनैव तद्धेतुता यथा उक्तत्वादनुमित्यादिसाधारणासंभवइति वाच्यं सर्वत्र कार्य्योत्पत्तौ कारणतावच्छे
दकोपलक्षितप्रकारसत्वायाः प्रयोजकत्वमलं गतिप्रसंगात् न च वृत्तिमत्वेनैव तस्य हेतुता बाध्यादिमद्वृत्तित्वपत्वस्य सा
सत्तिरिति वाच्यं वृत्तिमत्वस्य तादृशसंबंधेन नियतपूर्ववर्त्तितापा अवच्छेदकं पदमात्र विषयत्वात् दिरूपधर्म्मान्तरं त

व्यापकत्वेनान्यथासिद्धिनिरूपकत्वादित्यान्याहुःकंचेतिकारणत्वमतइतिकारणत्ववादिनांनैयायिकानांमतद्
त्यर्थः।एतेनवक्ष्यमाणकारणतायानिर्विकल्पकनिरूपितानामभ्युपगंतुंमीमांसकमतेऽसंभवेपिनक्षतिः।नैःप्रमात्व
स्यकार्यतावच्छेदकत्वानुपगमादितिध्वनितंविशेष्यसंबंधेनविशेष्यनिष्ठेनस्वविषयतत्तद्विशेषणत्वत्वतादृशतत्
द्विशेषणवदन्यत्वरूपसंबंधेनज्ञानंत्वावच्छिन्नमेवेत्यर्थः।प्रमाज्ञमेतिविशेष्यतासंबंधेनप्रमात्वभ्रमत्वावच्छिन्नंप्रति
हेतुरित्यर्थः।नत्वद्वृत्तितत्वदन्यवृत्तिविषयतासंबंधेनापिभगवज्ज्ञानसाधारणोनज्ञानत्वेनहेतुतासंभवतीतिविशेष्य
विषयकस्यापिभगवज्ज्ञानस्यनियमतःप्राकृसत्वादित्यवधेयंतत्तद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वरूपस्यप्र
मात्वस्यार्थसमाजग्रस्तत्वेपितत्वद्वृत्तिविशेष्यतासंबंधेनज्ञानत्वावच्छिन्नंप्रतितादृशसंबंधेनस्वविषयतत्वत्वसंबंधेन
वाज्ञानत्वेनहेतुताकल्पनमावश्यकंमन्यथादोषसमवधानंविनापितत्वइवतदभाववत्त्वस्तत्प्रकारकज्ञानविषय राम०
तापत्तेर्दुर्वारत्वात्प्रमात्वस्यत्वेविशेषसामग्र्यांतराभावेननतद्भूतस्तत्प्रकारकज्ञानविषयत्वेपत्यप्रयोजकंसन्निकर्षादित २५१

स्यप्रकृतसाधारणपातत्तच्चैवमपिस्वनेकवृत्तिघटत्वादिप्रमायांघटत्वादिज्ञानस्यउक्तप्रत्यासत्त्यासत्याकप्रकारत्वक
ल्पनमफलंतत्तद्व्यक्तिवृत्तिविषयतासंबंधेनज्ञानंप्रतितादृशसंबंधेनस्वविषयतत्तद्व्यक्तित्वसंबंधेनवाज्ञानत्वेनयाज्ञा
त्वेनावश्यकल्पनीयहेतुतयैवघटादौघटत्वादिग्रहापत्तिप्रसंगवारणसंभवात्इतिवाच्यंतादृशसंबंधावच्छिन्नप्रतियोगि
ताकत्वाभनंताभावानांपटादौघटत्वादिग्रहाभावप्रयोजकत्वापेक्षयाएकैकेषांघटादिवृत्तिविषयतासामान्य
संबंधावच्छिन्नज्ञानाभावानांस्वविषयघटत्वादिसंबंधावच्छिन्नाभावानांवातथात्वेलाघवेनतादृशसंबंधेनविशेष
णज्ञानहेतुतासिद्धिरित्यनंपश्चाद्वितेन मूलेनतत्कांतरायेक्षेतितत्तर्कमूलीभूतव्याप्त्यादिग्रहापत्तकांतरापेक्षते
थः।पूर्वपक्षोपदर्शितंतत्कांतरापेक्षज्ञातमात्रवानकीयव्याप्तिज्ञानेनतर्कस्यव्यभिचारसंबंधवतिस्वस्तिचेतिसंभवतिएव
वतिचेत्यर्थः।व्याप्तिस्मरणंतद्विनैवेतिशेषः।तस्यतर्कजन्यतावच्छेदकतयोपप्रत्यक्षत्वमूलत्वादितिभावः।ननुतदा
ज्ञानंप्रत्यक्षमूलत्वमेवानुभवंविनास्मरणायोगादित्यतआहतदाभीनिति स्वंतभावकस्यसहचारदर्शनादेरभावात्

तथा चागत्या तत्कार्यांतरीयानुभवजनितसंस्कारोद्बोधं कल्पयित्वा स्मरणमुपपादयितेति भावः ननु जातमात्रीय प्रवृत्ति
ज्ञाने तर्कापेक्षाविरहेऽपि न निस्तारः तदुत्तरं स्तन्यपानादिजन्यबाहुविच्छेदे तत्कोपजननासंभवेन वह्न्यादिव्याप्तिग्रहस्यासंभ
वादित्यत आह तन्मूले तत्स्वनुभवमूलोचेति एतभवजन्यभवानुभवमूलाचेत्तत्र्यंवं स्वप्नेपीति तर्कं विनैवेति शेषः स्व
नादिसिद्धेति स्वनादिप्रसिद्धिप्रवाहविषये त्वर्थः कार्यकारणभावो धूमवह्न्यादिव्याप्तिरित्याह कात कं मूलं विरोधस्वभे
द्याभेदाबोधतादात्म्यादिना तु हात्संग्यादिव्याप्तिरित्याहकोचिंशायापदिहृक्वान्यतदात्म्यस्यात् कहतदात्मानस्याभेदा
भेदयोर्विरोधादित्या तर्केत्यनादिसिद्धत्वस्यस्वरूपमतःशंकाविरोधिविवेत्तज्ज्ञापकप्रमाणानुपेगासंभवइत्यतोदेधित्य
विदधिति स्वनादिसिद्धत्वज्ञानस्यवऽध्यादावत्यादिसिद्धकारणताकत्वनिश्चयस्यप्रयोजकत्वे विशेषदर्शनतया व
ह्न्यादिधर्मिकधूमकारणत्वादिविरहशंकाविरहप्रयोजकत्वं न तु अग्राह्याभावनिश्चयतयात्वनिश्चयेन वह्न्यादौका राम०
रणतया स्वनादिप्रसिद्धिविशेष्यत्वस्यैव वाचगाहन्यात्र तु कारणतायाः परार्थाभिमापकत्वेन स्वरूपसद्विरोधितापि २५२

रत्वेपि नासंगतिः स्वनादिसिद्धत्वसाधकांतराभावेऽनुमानप्रामाण्येपि विवदमानं प्रतिशंकाविरोधित्वायानस्यउपनास्ता
नहेत्वात् इत्याशयेनाह परेतिवा कारोऽनास्थायां स्वरूपसद्विरोधितायाः प्रामाण्यकत्वात् स्वान्वयव्यतिरेकमग्रहीव
तीव वह्न्यादौ धूमादिकारणत्वसंदेहस्य दूरपरास्तत्वपावऽसंभवापवस्तत्तत्स्वरूपसद्विरोधित्वं विचारसहं भवत्वनुमावा
मूलं तु परार्थाभिमापकमेव व्याप्यानेनानुमानप्रामाण्यस्य तदोपयिकव्याप्तिनिश्चयविषयतायाश्चावश्यकत्वात्
तदन्यथानुपपत्त्यैव कार्यकारणभावादेः स्वनादिसिद्धत्वासिद्धिरित्याशयेनशंकापास्त नन्वथास्वरूपसंगतिरिति ध्येयं मूले
तर्केस्यतर्कस्य तर्कविषयसंवह्न्यादेः स्वनादिसिद्धव्याप्तिकत्वज्ञानं तादृशकारणता वादिनिश्चयः स्वर्थोपत्तेः या
र्थक्येपि व्याप्तिग्रहायेकूपात्स्वनवस्थापादकत्वतयाऽनुमानांतर्भावावलंबनमनुचितं इत्याशयेन व्यावच्छेदो धितो
स्वानुमानत्वादितिप्रवृत्तिः फलोपधानं तर्कस्य प्रमाणविधया स्वनौपाधिकत्वग्राहकत्वं तत्सहकारितया तत्राधं
दूषयति मूले तर्कस्येति द्वितीयं शंकते व्यभिचाराशंकेति व्यभिचारः सोपाधित्वं स्वतोपि व्याप्तिपदमनौपाधिकत्वपरं शंका

विरहेणात्तर्कस्यान्यथासिद्धिमाशंक्याह दीधितौ दूरेणेति मूले व्यभिचारादितर्कस्य कारणत्वमन्येषामनुमतमित्याशये
नशंकांनिवर्तकतया प्रयोजकत्वस्य तथात्वे व्याप्तिग्रहएव तथास्त्वमिति भावः अनौपाधिकत्वं तर्कं विनैव गृह्यते अत एव तर्के
नयेन्तृणो व्याप्तिग्रह इति मतांतरमाह पत्त्रिनीति साधनात् प्रमाणांतरेणानिश्चयात् अभावग्रहउपाधित्वाभावग्रहः सग्रह इति
विरोधिशंकानिवृत्तौ अनौपाधिकत्वमनमास्तु ग्रहे प्रमाणांतरस्य तत्राभावात् अनुमानमित्र स्य प्रमाणस्य तत्राभावादि
त्यर्थः व्यभिचारनिश्चयाभावएव व्याप्तिग्रहे ऽपेक्षितः न तु तच्छंकाविरहो पि तथा च तर्कस्यानपेक्षणीयत्वमनवस्थेति वा
दिनां मतमाश्रित्य पतियेचेति अनुमानमात्रोच्छेदे हेतुं पूरयति दीधितौ अनिश्चितेति पक्षे साध्यनिश्चये व्यभिचारनिर्णयोत
दितरत्वेन साध्यव्यापकताग्रहः संभवतीत्यतो ऽनिश्चितसाध्यकानुसरणसंभवित्वादिति पक्षेतरत्वोपाधित्वग्रहसत्त्वादिः
नन्वेवमपि नानुमानमात्रोच्छेदः निश्चितसाध्यकएव सिषाधयिषातः संभवादित्यत आह पक्षेति तथा चानुमानमात्रोच्छेद इ राम०
निर्मूलत्वमिद् इति भावः सत्प्रतिपक्षो व्यापकत्वरूपोपाधित्वे न दूषकतायाः किंचित्यादिना स्वयमपि वक्ष्यमाणत्वान्न हि व २५३

मुपाधित्वेनेत्यादिग्रंथासंगतिः इत्यतो व्याचष्टे उपाधित्वेनेति व्यभिचारेणोन्नेत्यादेः साध्यव्यभिचारानुमापकव्यभिचार
प्रतियोगित्वेनेत्यर्थः एवं चपक्षस्थले नोपाधिरित्यत्राप्येतदेवोपाधित्वं बोध्यं मूले साध्यव्यापकत्वेन तद्व्यतिरेकादिति साध्य
व्यापकत्वेनानिश्चीयमानस्यापि तस्य पक्षे व्यतिरेकनिश्चयं इत्यर्थः साध्याभाववर्तकतया साध्यवत्त्वबुद्ध्युत्पादप्रयोजकत
याव्यतादृशानिश्चयस्य किंविधपाविरोधित्वमित्याशंकायामाह व्यापकेति केनेपत्राद्यावश्यकत्वात् तथा च व्यापकव्यति
रेकनिश्चयस्य तदभावव्याप्यवत्ताज्ञानमुद्रयैव तद्वत्ताग्रहविरोधित्वमिति भावः अनुमानमात्रोच्छेदकतज्ज्ञानं पक्षेतरत्वपक्ष
कसाध्यव्यापकत्वापादकतर्करूपं परमतेनेतिने पाधिकनये पक्षे रप्रसिद्ध्यतेदतिरिक्तत्वघटितसाध्याप्रसिद्धेरिति भावः त
तत्प्रयोजकत्वं ॥ ॥तर्कटिप्पनी समाप्ता॥ ॥लाघवादित्यस्य हेतुं पूरयति प्रतियोगीत्यादिपदात्प्रतियोगिवैय
धिकरण्यपरिग्रहः विशेषणाविरहेणेति अत्यंताभावगर्भव्याप्तिघटकीभूतात्यंताभावविशेषणस्यात्राप्रवेशेनेत्यर्थः भे
दस्याव्याप्यवृत्तिता निराकरणेन दर्शितात्यंताभावस्थलीयस्य प्रतियोगित्वासमानाधिकरणपादेरप्यनिवेशादिति भावः

हेतुसामानाधिकरण्यग्रहे किंचिदवच्छिन्नहेतुमद्वृत्तित्वग्रहे ग्रहस्वात्यंताभावे प्रमात्वरूपो भेदेऽनुपपत्तौ प्रमात्वनिवेशस्य वैयर्थ्यापत्तेरित्यपि
पितत्वविशेषणांतरं अवश्यं प्रवेशनीयमिति अन्यथा साध्यताभावाभावग्रहेणानुमितिर्न स्यादिति विशेषणांतरप्रवेशे तु
हेतुमन्निष्ठभेदविशेषप्रतियोगितावच्छेदकत्वाभावग्रहे तादृशावच्छेदकत्वग्रहस्यैव विरोधितया नानुपपत्तिरिति भावः के
लाघवं अधिकविशेषणाप्रवेशप्रयुक्तमिति शेषः प्रतियोग्यसामानाधिकरण्यादिघटित व्याप्तिज्ञानहेतुतायां तु स्वस्य शं
कते नन्वेवमिति अनुमितिर्न स्यादिति प्रतियोग्यनुपस्थितस्य तदा प्रतियोग्यसामानाधिकरण्यस्याभावेऽपि ग्रहे तथा तद्घटित
व्याप्तेरपि दुर्ग्रहत्वादिति भावः अत्रेष्टापत्त्यसमाधानमाशंक्य ते नन्वेति प्रतियोगिसमानाधिकरणत्वेनाज्ञायमानादिति तथा च
प्रतियोगिसामानाधिकरण्यानुपस्थितिकालीनस्य हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वसामान्याभावग्रहस्यापि सत्य
हः तादृशसामान्याभावस्यापि प्रतियोगिसामानाधिकरण्येनाज्ञायमानापेऽपि हेतुमन्निष्ठाभावास्तत्तत्प्रतियोगितावच्छेद राम०
कत्वप्रतियोगिकत्वादिति भावः अज्ञायमानत्वं तत्कालावच्छिन्नं तत्तज्ज्ञानविषयत्वाभाववत्त्वं न तु तत्कालीनतत्तज्ज्ञानस्या २५४

विषयत्वं प्रतियोगिसामानाधिकरण्यानुपस्थितिदशायां तत्कालीनतज्ज्ञानाप्रसिद्ध्याऽनुमित्यनुपपत्तेः न च ज्ञानांशे तत्तत्पु
रुषीयत्वस्यावश्यनिर्वचनीयतया पादृशशरीरावच्छिन्नस्य पुंसः कदाचिदपि क्वचिदप्यभावे प्रतियोगिसामानाधिकरण्यग्रहो
नास्ति तस्यानुमित्यनुपपत्तिः तद्दीपत्वज्ञानाप्रसिद्धेरिति वाच्यं शरीरविशेषानन्तं तं भोग्यत्तत्तदात्मसमवेतत्वरूपतत्पुरु
षीयत्वस्यैव निवेशनीयतयाऽप्रसिद्ध्यनवकाशात् तत्कालावच्छिन्नोपः स्वविषयकप्रतियोगिसामानाधिकरण्यग्रहवि
रहस्तद्वत्तत्पुरुषकत्वस्य तत्कालावच्छिन्नतत्पुरुषीयत्वस्य विषयकत्वोभयाभाववत्प्रतियोगिसामानाधिकरण्यप्रक
रकज्ञानसामान्यकत्वस्य तत्कालावच्छिन्नतत्पुरुषीयज्ञाननिरूपितत्वस्वत्तित्वोभयाभाववत्प्रतियोगिसामानाधिकर
णप्रकारतानिरूपितविशेष्यतासामान्यकत्वस्य वा अभावविशेषणत्वोपगमात् एतेन यस्मिन्नभावे कस्यापि प्रतियोगिसमा
नाधिकरणधर्मी नासीत्तद्विषयकतज्ज्ञानस्याप्रसिद्धावपि न साध्यतावच्छेदके हेतुमन्निष्ठतत्प्रतियोगितावच्छेदकत्वज्ञान
दशायामनुमित्यापत्तिः व्यभिचारज्ञानदशायामपि तत्तयाविषयत्वात् किंचिदभावप्रतियोगितावच्छेदकत्वाभावस्य ग्रहादनुमि

त्वापत्तिरतो यावंतद् इति पदस्य त्रय याश्रुति कालपुरुषाणां विशिष्य निवेशो नानुगमो दुर्वारः एवं संयोगीसत्त्वादित्यादौ द्रव्यप्र
तियोगिसमानाधिकरणत्वेन ज्ञायमानसंयोगाद्यभावभिन्नाभावसामान्यप्रतियोगितानवच्छेदकत्वस्य संयोगत्वादौ सत्त्वहेत्वा
दितिप्रसंगः हेत्वधिकरणसामान्यप्रतियोगिसमानाधिकरणत्वेन ज्ञायमानान्यत्वनिवेशने कपिसंयोगाभाववान्मेयत्वादित्या
दौ कपिसंयोगाद्यात्मकाभावे पि तस्याहृतत्वाद् अनुमित्यनुपपत्तिः अतो पक्षे हेत्वधिकरणप्रतियोगिसमानाधिकरणत्वेन ज्ञाय
मानो यस्तद्धेत्वधिकरणनिष्ठ तदीयाधिकरणताभिन्नहेतुमन्निष्ठाधिकरणताकाभावप्रतियोगितानवच्छेदकत्वग्रहो हेतुर्वा
च्यः न चाप्रपत्त्यानुगमाद्रूप्यतत्तु गमः स्वप्रतियोग्यधिकरणत्वेनाज्ञायमाने हेत्वधिकरणवृत्तित्वमभावविशेषणं तु पक्षेत्या
दिकल्पानुसारेणैव संगच्छते न चापि स्फुटत्वान्नेनुपेक्षणीयान्यदोषमाह तादृशाभावेत्यादिना तादृशाभावग्रहः तादृशहेतुसमा
नाधिकरणयावदभावप्रतियोगितावच्छेदकत्वाभावग्रहः अवच्छेदकत्वे तद्रूपेण प्रतियोग्यवगाहित्वं तु मितिहेतुरिति शेषः राम०
तादृशावच्छेदकत्वेन प्रतियोग्यवगाहित्वं च न द्रव्यत्वपर्याप्तप्रतियोगितावच्छेदकताकत्वं अतो न हेतुमन्निष्ठयत्र भावप्रतियो २५५

गितानवच्छेदकमित्यादिज्ञानाद् अनुमितिप्रसंगः तदसंभवात् तादृशस्य ग्रहस्य हेतुसमानाधिकरणाभावप्रतियोगितावच्छेद
कत्वसामान्याभावावगाहित्वसंभवात् सामान्याभावग्रहे सामान्यघटितविशेषरूपावच्छिन्नवत्ताविषयस्य विरोधित्वादिति
भावः तथा चैतावान् प्रघट्टकफलमिति भावः प्रातिस्विकरूपेण तत्तदभावप्रतियोगितावच्छेदकत्वेन प्रतियोगिविषयकोऽ
भावकूटग्रह एव हेतुरिति शेषः असंभवादिति तादृशग्रहस्यैवासंभवादित्यर्थः तत्तदभावत्वेन तावदभावानां युगपदनुपस्थि
तिरिति भावः रूपान्तरेण येन केनापि रूपेण तदभावप्रतियोगितानवच्छेदकत्वप्रतियोगिकैकाभावग्रहो हेतुरिति शेषः न या
वद्विशिष्टप्रतियोगितावच्छेदकं न निवेश्यमिति भावः यद्यप्येवमपि साध्याभावेऽप्रतियोगिसामानाधिकरण्यग्रहकालीना
नुमित्युत्पादकस्य प्रतियोग्यसमानाधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वाभावग्रहस्यासंग्रहः तादृशप्रतियोगि
तानवच्छेदकत्वस्य प्रतियोगिसमानाधिकरणत्वेनाज्ञायमानेऽवस्तुत्वात् अपः प्रतियोगिसामानाधिकरण्येन हेतुमन्निष्ठः कश्चि
दन्योऽभावस्तत्प्रतियोगितावच्छेदकत्वाभाववत्त्वविरहात् तथापि तदंशे तन्नानुमितौ प्रतियोगिसामानाधिकरण्येन ज्ञायमान

प्रतियोगिसमानाधिकरणाभावांतरप्रतियोगितावच्छेदकत्वस्यापि साध्याभावान्याभावप्रतियोगितावच्छेदकत्वत्वादिनाऽ
भावांतराग्राहित्वेनः प्रतियोग्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वज्ञानादेव तदाऽनुमितिरित्यभिमानः तादृशज्ञा
नस्य प्रतियोग्यसमानाधिकरणघटितव्यभिचारज्ञानाविरोधितया व्यभिचारधीदशायामतिप्रसंगमाह वह्नित्वेति अत्रापी
त्यंतेनानुमितेर्विघ्नापत्तिशंका व्युदासाय व्यभिचारज्ञानसत्त्वे दर्शितं तदुक्तिज्ञानादिति एतादृशज्ञानस्य विशेषाभावावगाहित्वे
न दर्शितव्यभिचारग्रहाविरोधित्वेन तद्दशायामापत्तौ बाधकाभावादिति भावः अनुमितिप्रसंगादिति वह्नित्वावच्छिन्नाभावस्य
हेतुसमानाधिकरणान्यथाऽन्यग्रहविषयस्याभावस्य हेतुसमानाधिकरणयावदभावप्रतियोगितावच्छेदकत्वप्रतियोगिकत्वा
दिति भावः हेतुसमानाधिकरणत्वेन ज्ञायमानश्चेति तत्तया च उक्तव्यभिचारज्ञानदशायां हेतुसमानाधिकरणत्वस्यापि व
ह्नित्वावच्छिन्नाभावस्य तेन रूपेणाज्ञायमानत्वात् तत्प्रतियोगितावच्छेदकत्वाभावानवगाहिनः उक्तज्ञानान्नानुमित्यापत्तिरिति दा०म०
भावः उक्तरूपेण हेतुमन्निष्ठवह्नित्वावच्छिन्नाभावप्रतियोगितावच्छेदकत्वस्य चिन्तनतया ग्रहे संभवात् तादृशहेतुसमानाधिक २५६

रणत्वेन ज्ञायमानप्रतियोगिसमानाधिकरणत्वेन ज्ञायमानयावदभावप्रतियोगितावच्छेदकत्वाभावग्रहसंभवात् व्यभिचारग्र
हेत्वसत्त्ववह्नित्वावच्छिन्नाभावाभानेन हेतुमद्वृत्तित्वेन ज्ञायमानसकलाभावानां वह्नित्वानवच्छिन्नत्वेन भानादिति भावः तथा
चलत्वानुमित्यापत्तिरिति भावः वास्तवहेतुसामानाधिकरण्यनिवेशपक्षेऽप्यत्र नातिप्रसंगस्तथापि तेन रूपेणाज्ञायमानत्व
निवेशेऽतिप्रसंगमाह धूमाधिकरणेति तादृशप्रमेयत्वादेरपि एतद्धूमाधिकरणावृत्त्यभावप्रतियोगितावच्छेदकत्वत्वेन निरु
क्तयावदभावप्रतियोगितावच्छेदकत्वाभावप्रमेयत्वादेरपि धूमाधिकरणांतरानुपस्थित्या एतद्धूमसमानाधिकरणाभावाभा
मेव हेतुसमानाधिकरणत्वेन ज्ञायमानत्वादिति भावः प्रमात्वकथनेन रासभादेरनुमानं दृष्टांतीकृत्य बाधितार्थविषयकत्वलाघ
वज्ञानादिरूपदोषं विनाऽप्यस्य व्यभिचारिलिंगकानुमित्यतद्यथातुरीयसभादेरिति दृष्टांतेन च न तदा वह्न्यनुमितावविघ्नाप
त्तिशंका निरस्ताऽनुमितिप्रयोजकाविशेषे कस्यचिन्नानुमितिः कस्यचिद्वेति विनिगमनाविरहात् हेतुसमानाधिकरणाभा
वत्वमात्रेणाऽसाध्याभावानां हि तत्प्रतियोगितावच्छेदकत्वग्रहेऽपि हेतुसमानाधिकरणवह्नित्वानवच्छिन्नाभावत्वादिना

हृदाभाववद्विषयकतत्प्रतियोगितानवच्छेदकत्वग्रहसंभवे वास्तववह्नित्वावच्छिन्नाभावविषयकव्यभिचारज्ञानदशायामपि हृदं
तरेणातादृशाभावविषयकतत्प्रतियोगितानवच्छेदकत्वग्रहाद्दनुमित्यापत्तिः संभवतीति मूलतात्पर्यमपि दर्शयति वह्नि
त्वावच्छेदेनेति वह्न्यप्युक्तत्वग्रहे हेतुविकरणो वह्नित्वावच्छिन्नाभावे यद्यपि मानं हि हेतुमन्निष्ठप्रयुक्ताभावप्रतियोगितावच्छेदकत्व
स्यापि वह्नित्वे ग्रहसंभवात् तादृशग्रहासंभव इति वह्नित्वावच्छेदेनानुक्तत्वमदशायानुसरणं सतीति च हेतुमति वह्नित्वावच्छिन्ना
भावभ्रम इति पूरणीयं प्रकृतग्रहस्य हेतुसमानाधिकरणत्वेन प्रकृतग्रहस्य हेतुसमानाधिकरणत्वेन ज्ञायमानयावदभावांत
र्गतवह्नित्वावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वावगाहित्वात् निर्वाहाय प्रयुक्तप्रतियोगिकाद्वित्वभावे हेतुसामानाधिकरण्या
वगाहित्वविशेषणेनाभावशं तोपपन्नपि धूमसमानाधिकरणेति तत्प्रतियोगितानवच्छेदकं तत्तद्व्यक्तिप्रतियोगितानवच्छेदकं
ग्रहेपि च ननु मानादिरूपतुपपत्तेन तथा च तत्र नानुमित्यापत्तिरिति भावः नन्वित्यादिपूर्वपक्षे समाधत्ते नैवमिति तेषां साध्यतावच्छे राम० २५७
दकविशेषणतापन्नानुमितिजनकग्रहविषयानामभावानां विरोधिग्रहविषयत्वेपि रूपविशिष्टविषयकग्रहत्वावच्छेदेन विरो

धितात् रूपविशिष्टत्वं स्वतस्तादृशग्रहविषयत्वस्य यथाकृतस्य केवलात्प्रतियोगितायां नातिप्रसंगः स्वत्रच यत्वतत्त्वविवेशिनानु
गमात् विरोधिग्रहविषयविषयकज्ञानत्वेन विरोधित्वान्न हि तत्त्वस्य च शिरोवेष्टनेनोपादित्सायां वा पृथक्त्वात् विरोधित्वेनैवज्ञा
नकत्वात् मननुगमपतिता दृशीतिपर्वापित्तक व्यभिचारावगाहित्समूहालंबनधी विरोधित्वमतिप्रसक्तं तथापि तादृशग्रहस्य
स्यप्रतिबंधकत्वस्याविवक्षितत्वात् दोषः तच्च तादृशालौकिकग्रहत्वव्यापकप्रतिबध्यताकत्वं तादृशावच्छेदकत्वविषयिता
वच्छिन्नप्रतिबध्यताकत्वविवक्षया अतिप्रसंगवारणमनुपादेयं प्रतियोगिव्यधिकरणहेतुसमानाधिकरणवृत्त्यभावेन रा
भावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नविषयकग्रहत्वावच्छिन्ननिरूपितांप्रतिबंधकतामादायातिप्रसंगस्य दुर्वारत्वात्ता
दृशावच्छेदकत्वत्वावच्छिन्नविषयितासामान्यावच्छिन्नप्रतिबध्यतानिवेशे गौरवात् तादृशावच्छेदकत्वग्रहत्वपर्याप्तप्रति
बध्यतावच्छेदकतानिवेशेपि पर्याप्तिपदार्थविवेचनया गौरवात् हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वसामा
न्याभावग्रहस्य प्रतियोगिवैयधिकरण्यानवगाहित्वात् स्यापि विरोधित्वात् प्रतियोगिवैयधिकरण्यविषयतामादाय तथैवस्य

तत्समविवध्यतावच्छेदकत्वायोगात्तादृशज्ञानासंग्रहाच्च प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेद
कत्वत्वावच्छिन्नपर्याप्त्यभावच्छेदकताकप्रकारतावच्छिन्नप्रतिवध्यतानिवेशे तु नायं दोषः सामान्यज्ञानीयप्रतिबंधकतानि
रूपितप्रतिवध्यतापाच्चापि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकप्रकारतात्वेन तादृशप्रकारतावच्छिन्नत्वात्तत्प्र
तियोगिव्यधिकरणहेतुसमानाधिकरणवंह्न्यभावेन तदभावप्रतियोगितावच्छेदकत्वप्रकारतामादाय नातिप्रसंगः तादृशप्रका
रतावच्छेदकतायाः वंह्न्यभावेनराभावघटितधर्म एव पर्याप्तत्वात्प्रतिबंधकत्वे च प्रतिबंधकतावच्छेदकीभूतायाः साध्यतावच्छे
दकविषयतानिरूपिताभावविषयतानिरूपितानुयोगित्वविषयता तद्गुत्वमतो न तादृशावच्छेदकत्वाभावव्याप्यवत्ताज्ञानस्या
धारणं तादृशावच्छेदकत्वाभावव्याप्यवह्न्यभावान्याभावप्रतियोगितावच्छेदकत्वाभावत्वादिप्रकारेणाव्याप्यवत्ताज्ञानीयव्याभि
धर्मितावच्छेदकविषयितांतर्गतानुयोगित्वविषयतायाव्यभिचारज्ञानप्रतिबंधकतावच्छेदककोटौ प्रयोजनविरहेणानिवेशात् राम०
त्वघटकव्यापकसामानाधिकरण्यप्रपदभावव्याप्तिज्ञानप्रतिबंधकतायां व्याप्तिधर्मितावच्छेदकधर्मविशेषविषयिताऽनिवेशा २५८

त्प्रमावत्त्वव्यापकत्वनिरूपकतावच्छेदकतयाभासमानधर्मावच्छिन्नांश एव तादृशसामानाधिकरण्यावगाहित्वाभावः प्रतिबं
धकतायांतंत्रत्वात्सर्वत्र तादृशव्याप्यवगाहि नोदर्शितज्ञानादप्यनुमितिप्रसंगात् दुर्वारः एवमुक्तावच्छेदकत्वव्यापकाभा
वत्ताज्ञानस्यापि प्रतिबंधकतावच्छेदकीभूतकथितानुयोगित्वविषयतावत्त्वाहतोऽप्यनुमितिप्रसंगः न चानुयोगित्वविष
यतायामवच्छेदकत्वत्वावच्छिन्नविषयितानिरूपितत्वनिवेशान्न व्यापकाभाववत्ताज्ञानादनुमितिप्रसंग इति वाच्यं तादृशा
वच्छेदकत्वव्यापकवह्न्यभावातिरिक्ताभावप्रतियोगितावच्छेदकत्वाभाववद्वह्निमानितिज्ञानीयानुयोगित्वाविषयिताया
अवच्छेदकत्वत्वावच्छिन्नविषयितानिरूपितत्वस्याक्षतत्वात् यद्यपि तत्र समानाधिकरणाभावप्रतियोगितावच्छेदकधर्मप
त्वरूपव्यापकत्वविशिष्टधर्मीतरावच्छिन्नाभावेन तद्धूतायह्विरीधीधूमव्यापकतावच्छेदकधर्मवत्त्वमहानसीयवह्निर्गोत्वी
ति बुद्धावपि धूमवत्ताज्ञाननोदयात् तथापि तद्वन्निष्ठभेदप्रतियोगितानवच्छेदकत्वरूपव्यापकत्वस्य ह्धर्मितावच्छेदकपर्या
प्तप्रतियोगितावच्छेदकताकाभावस्यैव तादृशव्यापकत्वस्य हितत्वधर्मितावच्छेदकधर्मान्तरावच्छिन्नाभावएव तद्धूतायाहवि

रोधित्वमनुभवसिद्धमेव न च तादृशतद्व्यापकताग्रहविशिष्टधर्मितावच्छेदकावच्छिन्नाभावज्ञानप्रतिबंधकतयैवोपपत्तौ
व्यापकत्वविशिष्टतद्धर्मितावच्छेदकावच्छिन्नाभावज्ञानस्य पृथक्प्रतिबंधकत्वमेव न कल्प्यते व्यापकताविषयकज्ञानां
तरविशिष्टज्ञानप्रतिबंधकतामादायैव नातिप्रसंगः ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतायास्तदविवक्षणीयत्वात् एतेन व्या
पकसामानाधिकरण्यरूपतदभावव्याप्यत्वग्राहिपूर्वोक्तज्ञानादपि नातिप्रसंगः आहार्याभावविषयद्धर्मे व्यापकताग्रहस्थलेऽतिप्रसक्तं
न तद्वत्ताज्ञानस्यापि प्रतिबंधकत्व यावत्तत्प्रतिबंधकतावच्छेदकया आहार्याभावधर्मिकतद्धर्मव्यापकताग्रहविशिष्टतद्धर्मवत्ताज्ञा
नत्वस्य व्यापकसामानाधिकरण्यरूपतदभावव्याप्तिविशिष्टवत्ताज्ञानसाधारण्येन ईदृशविशिष्टज्ञानस्य पृथक्प्रतिबंधकत्वा
भावात् ज्ञानद्वयसाधारणप्रतिबंधकताया उक्तविशेषणेनैव वारणादिति वाच्यं पृथक्पावच्छिन्नेन निरुक्तव्यापकत्वं गृहीतं विशे
षणांतरविशिष्टतद्रूपावच्छिन्नाभावग्रहद्वारणापन्नतद्धर्मनिष्ठप्रतियोगितावच्छेदकत्वपर्याप्त्यवगाहित्वस्य तत्तद्धर्मपर्या रा॰ ०
प्त्यप्रकारताविशेषावच्छेदकत्वस्य वा निवेशनीयतया व्यापकताविशिष्टतद्धर्मितावच्छेदकविशेषावच्छिन्नाभावग्रहस्य २५९

पृथक्प्रतिबंधकताया आवश्यकत्वात् व्यस्तवाज्ञानद्वयप्रदर्शितविशिष्टज्ञानयोरनतिप्रसक्तेन केनचिद्रूपेण एकमेव
प्रतिबंधकत्वं तथापि कथितानुपयोगित्वविषयतायामवच्छेदकत्वतावच्छिन्नविषयितानिरूपितत्वनिवेशे वह्न्यभावाव
च्छेदकभेदावगाहिज्ञानसंग्रहानुपपत्तिः एवं च तत्तदभावव्याप्तिविशिष्टज्ञानतदभावव्याप्तिविशिष्टावच्छेदकताविशेषा
भावत्वादिविशिष्टज्ञानसाधारणस्य निखिलपत्वादेः प्रकारतावच्छेदकतापर्याप्त्यधिकरणतद्धर्मविशेषणान्तविशेष्यनि
वेशपरं निर्वचनपातन्निवेशात् पृथक्प्रतिबंधकताकल्पनस्यावश्यकतया तादृशावच्छेदकत्वाभावव्याप्यावच्छेदकतावि
शेषाभावज्ञानीयसाध्यतावच्छेदकविषयतानिरूपिताभावविषयतानिरूपितानुयोगित्वविषयतायामपि निरुक्तज्ञानप्र
तिबंधकतावच्छेदककोटिप्रवेशोऽस्त्वसत्त्वेति तादृशज्ञानादनुमितिप्रसंगो दुर्वार एवेत्यत आहुः तादृशावच्छेदकत्वग्रहवा
वच्छिन्ननिरूपितप्रतिबध्यतावच्छेदकविषयतावच्छिन्नत्वेन तादृशग्रहप्रतिबंधकताया निवेशनीयतया न तादृशावच्छेदक
ताभावव्याप्यवत्ताज्ञानादिसाधारणतदभावव्याप्यवत्ताज्ञानीयविषयतायाः तद्वत्ताज्ञानप्रतिबध्यतानवच्छेदकत्वा

त् न चैवं तादृशप्रतिबध्यताशालिज्ञानत्वेनैव हेतुतास्तु किं प्रतिबंधकतानिवेशेनेति वाच्यं प्रतिबंधकत्वानिवेशे संश
यात्मकतादृशप्रतियोगितानवच्छेदकत्वग्रहादप्यनुमित्यापत्तेर्दर्शितोभयविधज्ञानसाधारण्यानिष्पत्तेश्च गुर्वेव च तथा
तन्निवेश्यसंशयवारणासंभवात् न च तादृशप्रतिबंधकताशालिज्ञानत्वेन हेतुत्वे तादृशप्रतियोगितानवच्छेदकं च वह्नित्वं
इत्याकारकात् साध्यसमानाधिकरणहेतुमत्पक्षावगाहिनः स्वातंत्र्येण तदवगाहिसमूहालंबनज्ञानादनुमित्यापत्तिः
तद्वारणाय पक्षविशेष्यतानिरूपितहेतुविषयतानिरूपितसामानाधिकरण्यविषयतानिरूपितसाध्यविषयतानिरूपिता
या तादृशप्रतिबंधकतावच्छेदकीभूतसाध्यतावच्छेदकविषयता तच्छालिज्ञानत्वेनैव हेतुता वाच्या तथा च संशयवारणाय
मशक्यमेव संशयस्याप्रतिबंधकत्वेऽपि प्रतिबंधकतावच्छेदकविषयत्वशालित्वादिति वाच्यं स्वावच्छेदकतादृशसाध्य
तावच्छेदकविषयितावत्त्वविशेषणताविशेषोभयसंबंधेनैव तथाविधतथाविधप्रतिबध्यकतावत्त्वेनैव हेतुतायाः स्वीक राम०
रणीयत्वात् संशयादितोऽनुमित्यापत्तिवारणासंभवात् तदभावव्याप्यवत्तानिश्चयप्रतिबंधकतावच्छेदककोटिगर्भव्याप्ति २६०

तावच्छेदकविषयताविशेषविरहसंभवेऽपि तु तादृशसाध्यतावच्छेदकनिष्ठविषयतानिरूपिताभावविषयतानिरूपितस्वा
वच्छेदकीभूतावच्छेदकत्वातिरिक्तप्रकारत्वानिरूपितावच्छेदकत्वविषयतावत्त्वघटितोभयसंबंधेनैव तादृशग्रहप्रतिबंधक
तायाः कारणतावच्छेदकत्वं स्वीकरणीयं प्रतिबध्यतायां तु न निवेशनीया स्वावच्छेदकभेदग्रहे स्वावच्छेदकत्वमपि पारतंत्र्येण स्वा
वच्छिन्नप्रतियोगिताकत्वसंबंधेन भेदांशे प्रकारतया भासते तेन यथा च तादृशभेदात्मकाभावविषयतानिरूपितप्रतियोगि
तावच्छेदकत्वत्वातिरिक्तप्रकारतानिरूपिताया प्रतिबंधकतावच्छेदकीभूतावच्छेदकत्वविषयतात्वं तत्र निरुक्तमेव स्वा
यथा स्वावच्छेदकीभूतावच्छेदकत्वविषयतायां तादृशाभावविषयतानिरूपितविषयतानिरूपितत्वमेव निवेश्यं न तु तादृश
भावविषयतानिरूपितत्वं स्वावच्छेदकत्वात्मताभानग्रहे च तादृशाभावविषयतानिरूपितायाः स्वानुयोगितात्मकसंबंधनि
ष्ठसांसर्गिकविषयतानिरूपितत्वमवच्छेदकत्वविषयतायामक्षतमेवेति न तादृशग्रहासंग्रहः ज्ञानद्वयसाधारणप्रतिबंध
कताविशेषणानां वारणं पूर्ववत् ननु प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकं वह्नित्वं

स्याकारकज्ञानस्यप्रतियोगितैवप्यधिकरणाविषयकताद्दशज्ञानस्यचप्रतियोग्यनधिकरणत्वप्रकारताभिन्नापहेतुप्र
कारताभिन्नप्रकारतातदनिरूपितायाःऽधिकरणविषयतायास्तद्वृत्तिरिक्तप्रकारतानिरूपितायाः आधेयत्वविषयतायातद
तिरिक्तप्रकारतानिरूपितायाश्चाभावत्वावच्छिन्नविषयतायाश्चैकैकेनाविषयत्वाकुर्वंनिवेशेनानुगमःसंभवति उभयथा
धारणस्यानिष्प्रयत्वस्यापिकथंचिन्निर्वक्तुंशक्यत्वादितिकिंप्रतिबंधकताघटितनिरुक्तरूपेणहेतुतयेत्याशंकायांतादृश
रूपेणहेतुतायाःप्रयोजनांतरमाह अथैवंतिअन्यथाअवच्छेदकत्वविषयतानिरूपितात्यंताभावविषयतायाःकारणा
तावच्छेदकत्वेअवच्छेदकभेदग्रहस्यावच्छेदकत्वावच्छिन्नविषयतानिरूपितभेदविषयतायास्तथात्वे अवच्छेदकत्वात्यंता
भावग्रहस्यासंग्रहप्रसंगात् नचावच्छेदकत्वविषयतानिरूपितायाविषयतायानिरूपिताभावविषयताशालित्वेनहेतुत्वे
रनुगमःसंभवतिअवच्छेदकत्वाभावग्रहस्याप्यवच्छेदकत्वविषयतानिरूपितायासांसर्गिकविषयतायानिरूपिताभाववि राम०
षयताशालित्वादितिवाच्यंतथासत्यवच्छेदकताभेदावगाहिज्ञानमादायातिप्रसंगादितिभावः नतुसाध्यतावच्छेदक २६१

धर्मिकतादृशप्रतियोगितावच्छेदकताव्यहविरोधित्वेनानुगमेहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नि
त्वादिसाध्यतावच्छेदकस्थलेतादृशसाध्यतावच्छेदकधर्मिकतादृशप्रतियोगितावच्छेदकत्वप्रकारकज्ञानस्यानियमत
आहार्यरूपत्वयातत्प्रतिबंधकतायाअप्रसिद्ध्याकारणतावच्छेदकाप्रसिद्धिरत आह हेत्वाभासेचेतितथाचप्रकृतसाध्य
तावच्छेदकधर्मिकतादृशप्रतियोगितावच्छेदकताप्रकारकग्रहत्वंप्रतियद्रूपावच्छिन्नविषयतानिरूपितयद्रूपावच्छिन्न
प्रकारिताकत्वव्यापकतातद्रूपावच्छिन्नविशिष्टरूपावच्छिन्नप्रकारकग्रहप्रतिबंधकतावच्छेदकीभूयाप्रकृतसाध्यतावच्छे
दकविषयतातस्याःकारणतावच्छेदकत्वमुपगंतव्यप्रकृतेच शुद्धवह्नित्वत्वावच्छिन्नविशिष्यकतादृशप्रतियोगिताव
च्छेदकत्वप्रकारकाहार्याप्रग्रहेपितादृशग्रहत्वंप्रतिबंधकःतादृशविशिष्टवह्नित्वविशेष्यकव्यापकतावच्छेदकत्व
ग्रहइतिनदोषःशुद्धवह्नित्वत्वावच्छिन्नविशेष्यकव्यापकतावच्छेदकत्वग्रहस्यतादृशग्रहप्रतिबंधकत्वेपितादृश
प्रतिबंधकतावच्छेदकीभूततादृशानवच्छेदकत्वविशिष्टवह्नित्वविषयताशालित्वमितिनेतादृशज्ञानात्वविशिष्टव

ह्नित्वावच्छिन्नविधेयकानुमितिप्रसंगः। अत्र च यादृशप्रकृतसाध्यतावच्छेदकविषयताशालिनिश्चयपाश्चवहितोत्तरोत्प
न्नानाहार्यमानससामान्ये प्रकृतसाध्यतावच्छेदके तादृशावच्छेदकत्वेन विशिष्टावगाहित्वाभाववत्तादृशविषयताशालि
निश्चयपक्षे न हेतुर्वेति रीतिर्न संभवति तथा सति तादृशविशिष्टवह्नित्वावच्छिन्नसाध्यकस्य लेसाध्यतावच्छेदकधर्मिक
मेयत्वादिनिश्चयस्यापि कारणत्वप्रसंगात् दर्शितरीत्तावपि पद्रूपावच्छिन्नप्रकारितात्वेन व्यापकतेत्यंतमुपरिचाप
कमात्रं वह्नित्वत्वावच्छिन्नविशेष्यकहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वप्रकारकयद्यत्वं नैव प्रतिबध्यधीभू
तज्ज्ञानस्य कारणतावच्छेदककोटौ निवेशः साध्यतावच्छेदकादिभेदेन कार्यकारणभावभेदस्यावश्यकतया शब्दे कस्या
किंचित्करत्वादित्यवधेयं अथैवमपि पत्र हेतुव्यापकतावच्छेदकतावच्छेदकत्वमात्रेणैव वह्नित्वादेः साध्यतावच्छे
दकतानतु तद्विशिष्टवह्नित्वत्वादिना तत्र व्यापकतावच्छेदकताशपरित्यागो निर्धर्मितावच्छेदकत्व व्यापकतानवच्छेद राम०
कत्वज्ञाने भवेत्तत्र स्वव्यापकतावच्छेदकत्वज्ञानाप्रतिबध्यतयानोक्तरीत्या प्रतियोगिविपक्षिकरणच्छिन्न हेतिततत्रा २६२

पकताज्ञानयोरनुगमसंभवः नचशुद्धेन हेतुव्यापकतावच्छेदकत्वेन विशिष्टस्य वह्नित्वादेर्यत्र साध्यतावच्छेदकता तत्रत
द्वच्छिन्नेव्यापकतावच्छेदकत्वान्तरानवगाहिनापि शुद्धतदवच्छिन्नविशिष्टसमानाधिकरणहेतुमत्ताज्ञानादनुमितिसि
कारणत्वोक्तरीत्या व्यापकताद्वयानुगमकोपेक्षितवाच्यम् वह्नित्वत्वाद्यसहितेन व्यापकतावच्छेदकत्वेन साध्यताव
च्छेदकावगाहिनो ज्ञानस्य व्यापकतावच्छेदकत्वान्तरानवगाहिनोपि तेन रूपेण वह्नित्वादिप्रकारकानुमितिजनकत्वेव
ह्नित्वादिसहितेन तेन रूपेण वह्नित्वादिविषयस्य व्यापकतावच्छेदकत्वान्तरानवगाहिनोपि तेन रूपेण वह्नित्वादिप्रकार
कानुमितिजनकत्वे वह्नित्वादिसहितेन तेन रूपेण वह्नित्वादिविषयस्य व्यापकतावच्छेदकान्तरानवगाहिनस्तेन रूपेण
तद्विषयकानुमितिजनकताप्रयुक्तफलवैषम्यस्याधिकह्नित्वादिव्यापेनानुचितत्वाद्व्यापकतावच्छेदकत्वविशेषितव
ह्नित्वाद्यप्रकारकतत्प्रकारकानुमितिविलयप्रसंगात् इति चेत्र पत्र शुद्धव्यापकतावच्छेदकत्वेन साध्यतावच्छेदकतातत्रा
पि विशिष्यतया तत्तद्विशिष्टाभावघ्नवच्छेदकत्वरूपप्रतियोगिविशेषित धर्मितावच्छेदकीकृतावच्छेदकावच्छेदेन व्यापक

कतानवच्छेदकत्वावगाहिनोऽनाहार्यज्ञानस्यासंभवेन तद्विरोधित्वे नैव व्यापकतावच्छेदकत्वावच्छिन्नधर्मिकद्विविधव्याप
ताज्ञानस्यानुगमसंभवात् नन्वेकरूपेणानुमितिहेतुत्वे वह्नित्वं स्वाभावप्रतियोगितावच्छेदकं वह्नित्वं प्रतियोगितानवच्छेद
कमित्यादिज्ञानादप्यनुमित्यापत्तिस्तादृशज्ञानानामपि सामान्याभावावगाहित्वेन प्रतियोगिसामानाधिकरण्याभावप्रतियो
गितावच्छेदकत्वरूपविशेषधर्म्मप्रकारकग्रहविरोधित्वादित्यानन्याहपदि चेति तादृशज्ञानानामपि व्यभिचारज्ञानविरोधि
त्वयाते भ्योऽनुमित्युत्पादोपगमे क्षतिविरहाद्यदि चेत्तु कं स्वानवच्छेदकत्वादीत्यादिपदात् प्रतियोगितावच्छेदकत्वसामान्या
भावावच्छेदकत्वसामान्याभावयोः स्वसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावस्य च परिग्रहः तादृशावच्छेदकत्वा
दीति समानाधिकरणाभावप्रतियोगितावच्छेदकत्वादीत्यर्थो आदिपदात् केवलप्रतियोगितावच्छेदकत्वादिपरिग्रहः
तद्विरोधित्वं च तादृशग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबंधकताशून्यत्वस्य ज्ञानविशेषणात्स्वाभावप्रतियोगितानवच्छे एम०
दकं हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकं च वह्नित्वमिति समूहालंबनस्य ग्रहप्रसंगात् तादृशप्रतिबंधकता २६२

नवच्छेदकत्वस्य विषयिताविशेषणतयाप्येतानुधारणं स्वाभावप्रतियोगितावच्छेदकं वह्नित्वमित्यादिज्ञाननिष्ठप्रतिब
ध्यताया लौकिकसन्निकर्षाजन्यवह्नित्वत्वावच्छिन्नविविशेष्यकसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाव
च्छिन्नप्रकारकग्रहत्वव्यापकप्रतिबध्यतात्वेन निवेशनीया न तु तादृशतादृशग्रहत्वावच्छिन्नप्रतिबध्यतात्वेन भेदकूटनि
वेशाय तत्र गौरवात् स्वाभावप्रतियोगितावच्छेदकत्वप्रकारकतादृशग्रहत्वव्यापकप्रतिबध्यतात्वेन निवेशेनुल्पपुत्तयाऽनु
मित्यनुत्पादकत्वसामानाधिकरण्यप्रसाधनीयत्वानवगाहिनः समानाधिकरणाभावप्रतियोगितानवच्छेदकं वह्नित्व
मित्यादिज्ञानादनुमित्यापत्तिरतः स्वाभावीयसामानाधिकरण्यावगाहिज्ञानपर्यंतनिवेशेनं प्रतियोगिसमानाधिकर
णहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वग्रहत्वावच्छिन्नप्रतिबध्यतानापि समानाधिकरणाभावप्रतियोगिता
वच्छेदकत्वप्रकारकतादृशग्रहएव वर्त्तमानतयाऽप्रसिद्धिरतस्तादृशग्रहत्वव्यापकत्वस्य प्रतिबध्यतायां निवेशः वस्तुत
स्तु तादृशग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकतानवच्छेदकत्वस्य प्रतियोगिसमानाधिकरणहेतुसमानाधिकर

रणीभावप्रतियोगितावच्छेदकत्वप्रकारकग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकविषयितायां निवेशापि
कृपालाघवात् तादृशप्रतिबध्यतायामेव तादृशग्रहत्वाव्यापकत्वं निविश्यानीयं तावतैवाभावप्रतियोगितानवच्छेदकं वह्नि
त्वमित्यादिज्ञानवारणासंभवात् तद्दीपप्रतिबध्यतायास्तथाविधग्रहत्वाव्यापकत्वाद्धित्यवधेयं एतावता यत्र तेनान्योन्याभा
वघटितव्याप्तिरूपं तत्राभावघटितव्याप्तेः ज्ञानस्य कारणतावच्छेदककोटौ प्रतियोगिवैयधिकरण्यविषयता निवेशनीयाम
व्यवस्थायां तेनान्योन्याभावघटितव्याप्तिज्ञाने हेतुतायां लाघवं निराकृत्यवास्तवस्तादृशशरीरलाघवमपि स्वमतमाश्रि
त्य निराकरोति अन्योन्याभावस्येति वस्तुतः विशेषणादानमिति व्याप्तिशरीरेपि प्रतियोग्यसामानाधिकरण्यविशेषणात्र
विशेषावश्यकत्वमित्यर्थः अत्रेदं तत्त्वं प्रतियोगिवैयधिकरण्यावगाहितदनवगाहिज्ञानयोः पृथगेव हेतुता अस्यलिंगकानु
मितौ व्यभिचारवारणाय कारणतावच्छेदकस्यावश्यं विवेशनीयतया परस्परं व्यभिचारानवकाशात् नचैवं पृथक्कारणताक
ल्पनापेक्षया उक्तानुगतरूपेणाहेतुताकल्पनमुचितमिति वाच्यं प्रतियोगिव्यधिकरणाहितसमानाधिकरणाभावप्रतियोगि ग० २६४

तावच्छेदकत्ववतितादृशावच्छेदकत्वाभावप्रकारकंहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्ववतितादृशावच्छे
दकत्वाभावप्रकारकमित्याकारकयोरप्रामाण्यग्रहयोः पृथक्पृथगभाववैशिष्ट्यनिवेशानुरोधेन कारणताद्वयकल्प
नायाश्चावश्यकत्वात् नचाप्रामाण्यग्रहास्कंदितज्ञानस्यव्यभिचारज्ञानाप्रतिबंधकतयैव ततोऽनुमित्यापत्तिवारण
संभवात् अप्रामाण्यज्ञानानास्कंदितत्वस्यनिवेशएवनास्तीतिवाच्यं अप्रामाण्यज्ञानविशिष्टस्यापिज्ञानस्यतदभा
वदशायांअप्रामाण्यग्रहाभावविशिष्टत्वेनव्यभिचारज्ञानप्रतिबंधकत्वात् कारणीभूताभावप्रतियोगित्वरूपप्रति
बंधकत्वस्यकिंचित्कालावच्छिन्नत्वविरहेण कारणतावच्छेदकविशिष्टप्राक्सत्तायाः फलोपधानेतंत्रत्वोपगमेनाप्य
निस्तारात् नचव्यभिचारग्रहप्रतिबंधकतावच्छेदकतापर्याप्त्यधिकरणधर्मविशिष्टत्वेनहेतुत्वोपगमादेवनाप्रामाण्य
ग्रहविशिष्टज्ञानादनुमित्यापत्तिरितिवाच्यं अवच्छेदकतायाव्यासज्यवृत्तित्वस्यदूषितत्वात् प्रतिबंधकतावच्छेदकता
घटकस्याऽनन्तादेरपितत्पर्याप्त्यधिकरणतया अप्रामाण्यादिग्रहकालेऽनुमित्यापत्तेर्वज्रलेपत्वात् एवं प्रतियोगिव्य

धिकरंणहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकाभाववतिसाध्यतादृशप्रतियोगितानवच्छेदकप्रकारकांहे
तुसमानाधिकरणाभावप्रतियोगितानवच्छेदकाभाववतितादृशप्रतियोगितानवच्छेदकप्रकारकं इत्याकारमरार
काप्रामाण्यग्रहकालीनज्ञानस्यापि उक्तव्यभिचारज्ञानप्रतिबंधकतयातत्तोऽनुमित्यापत्तिवारणापत्तादृशाप्रामा
णपग्रहाभावयोः पृथक्पृथगेव निवेशनीयतयाक्कानुगमइति अथप्रतियोगिवैयधिकरणपविषयकव्याप्तिज्ञानस्य
हेतुत्वंनविचारसहंतथाहिप्रतियोगिवैयधिकरणपशरीरेप्रतियोग्यधिकरणत्वावच्छिन्नसामान्यभेदोनिवेशपितुम
शक्यः सर्वेषामेवपत्किंचिदभावीयप्रतियोग्यधिकरणतयातादृशभेदाप्रसिद्धेः संयोगसंबंधेनप्रतियोग्यधिकरण
सामान्यभेदस्यगुणादौप्रसिद्धत्वेपिधूमादिरूपहेत्वधिकरणेतदसत्वात् प्रमात्मकतादृशज्ञानस्यक्वचिदप्यसं
भवात् नचतादृशज्ञानंभ्रमात्मकमेवसर्वत्रानुमितिहेतुरितिवाच्यं तथासतिव्याप्यवृत्तिसाध्यकस्थलेप्रमात्म राम०
कपरामर्शजन्यानुमितिविलयप्रसंगात् यत्किंचितप्रतियोग्यनधिकरणत्वंचाव्यावर्तकंस्वप्रतियोग्यधिकरणसामा २६५

न्यभेदनिवेशेचस्वपदस्याभावसामान्यपरत्वे दर्शिताप्रसिद्धितादवस्थ्यात् पत्किंचिदभावपरत्वेचव्यभिचारिण्याव्ये
पिपत्किंचिदभावीयप्रतियोग्यनधिकरणहेतुमत्त्विष्ठाभावप्रतियोगितानवच्छेदकत्वस्यसाध्यतावच्छेदकेसत्वात्तन्ना
पिविशेषदर्शिनामनुमित्यापत्तिश्चतस्तत्तदभावीयप्रतियोग्यनधिकरणहेत्वधिकरणवृत्तितत्तदभावप्रतियोगिता
वच्छेदकत्वाभावग्रहस्यहेतुर्वाच्यः तत्रचतत्तदभावप्रतियोगितावच्छेदकत्वानंपेनकेनापिरूपेणाभावग्रहस्यहे
तुत्वेधूमसमानाधिकरणवह्नित्वानवच्छिन्नप्रतियोगिताकाभावप्रतियोगितानवच्छेदकंवह्नित्वंइत्यादिज्ञानादप्य
नुमित्यापत्तिः तत्तदभावप्रतियोगितावच्छेदकत्वेनतदभावस्यहेतुत्वेतत्तदभावत्वेनतादृशएकत्वाभावानांज्ञानस्य
हस्रेणापिज्ञानंनसंभवतीतिउध्यापसततृषशाभासः एवंपादृशपादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकर
णत्वहेतुमत्तस्तादृशप्रतियोगितानवच्छेदकत्वस्यासिद्धांतलक्षणव्याप्तिशरीरघटकतयाविवक्षितत्वात् तत्तत्व
प्रतियोगितावच्छेदकत्वानंपेनकेनापिरूपेणतत्तत्प्रतियोगितावच्छेदकत्वत्वेनवाऽभावज्ञानस्यहेतुत्वेस्तुतरामुक्त

दोषप्रसंगादिति मैवं स्वावच्छेदकावच्छिन्नानधिकरणत्वसंबंधेन हेत्वधिकरणनिष्ठप्रतियोगितावच्छेदकावत्त्वावच्छिन्नस्य
भास्याभावस्य व्याप्तिघटकत्वे तज्ज्ञानमेवानुमितिहेतुः स्वपदं च परिचायकमात्रं न तु तदर्थस्यापि निवेशः स्वस्य रीत्या
वच्छेदकावच्छिन्नानधिकरणत्वस्यान्पदीपवृत्तित्वनियामकसंबंधताविरहात् संयोगादिनिष्ठप्रतियोगितायास्तादृशसं
बंधेन हेत्वधिकरणवृत्तितामादाय व्याप्त्यवकाशादिति न स्वपदार्थस्य तत्र द्वाकि तेन तत्तत्प्रतियोगितात्वेन वा निवेश
दुर्वेयतादृशविकल्पानवसरः अथवा हेतुमन्निष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकावच्छिन्नत्वाद्यनुगतं प्रतियोगि
वैयधिकरण्यनिरूपकत्वं भेदस्याव्याप्यवृत्तितानभ्युपगंतृमते तेप्रतियोगिताविशेषणादेयंस्य निरूपकानुयोगिताविं
शिष्टनिरूपितत्वस्यावच्छेदकविशिष्टवदनुयोगिकत्वात्मकसंबंधेन प्रतियोगिताविशिष्टान्यत्वं हेतुमन्निष्ठाभावाधिक
रणताविशेषणांशे तस्याव्याप्यवृत्तितामते सम्यगिति दिक्॥ ॥अवच्छेत्यादि पूर्वपक्षे समाधत्ते यत्तेत थापीति प्रतियो राम०
गिवृत्तित्वस्येवेत्येवकारेण प्रतियोगितावच्छेदकावच्छिन्नाधिकरणावृत्तित्वस्य विशेषणत्वव्यवच्छेदः तथा चात्यंताभा २६६

वघटितव्याप्तौ स्वावच्छेदकावच्छिन्नांशस्याधिकरणीत्वमिति भावः अत्र च प्रतियोगिभिन्नत्वं हेत्वधिकरणे निवेशापिं
तु न शक्यते अन्योन्याभावस्याव्याप्यवृत्तित्वेन संयोगि द्रव्यत्वादिसाध्यके हेतुमति संयोगिभेदप्रतियोगितः संयोगिनो
भिन्नत्वस्याकृततया अव्याप्तेरशक्यवारणत्वात् तस्य चाव्याप्यवृत्तित्वेपि तस्याव्याप्यवृत्तित्वभावमादृशायां संयोगिभे
दप्रतियोगिभिन्नहेत्वधिकरणवृत्तिभेदप्रतियोगितावच्छेदकत्वस्य संयोगेऽग्रहादनुमित्यपलापापत्तेरित्यभिप्रेत्य
प्रतियोग्यवृत्तित्वस्य विशेषणत्वमुक्तं अथैवं संयोगि सत्त्वादित्यादाववतिव्याप्त्यापत्तिः सामानाधिकरण्यान्याव्याप्यवृ
त्तित्वाभ्युपगमे न गुणाद्यवच्छेदेन संयोगिभेदस्य प्रतियोगिवृत्तित्वाभावसत्त्वात् हेत्वधिकरणावच्छेदेन तत्त्वस्यावि
वक्षणीयतया अव्याप्तेरनवकाशात् सामानाधिकरण्यस्याव्याप्यवृत्तित्वांशे गौरवदूषितमित्यभिप्रायेणाह इदमत्राव
धेयमित्यादिना प्रतियोग्यवृत्तित्वघटितव्याप्तिलक्षणस्य स्वरूपमेव दूषणीयत्वात् निरवच्छिन्नहेत्वधिकरणवृत्तित्वके
वाभावविशेषणादेवं न तु प्रतियोग्यसामानाधिकरण्यमितिप्राक्तलाघवावकाशादुत्पभिप्रेत्य लाघवांतरमाह नचेति तत्वेन

ग॰ दी॰ २६७

येऽत्यन्ताभावघटितव्याप्तौ साध्यतावच्छेदकसंबंधेन प्रतियोग्यसमानाधिकरणपदनिवेशे संबंधान्तरावच्छिन्नप्रतियो
गिताकसाध्याभावमादायासंभववारणायात्यन्ताभावप्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वस्य निवेशनी
यात्तया गौरवादिति भावः यथाश्रुते तत्संबंधावरोधि तद्रूपत्वस्वरसस्तु नायुक्तं चात्यंताभावप्रतियोगितायामिवान्योन्याभा
वप्रतियोगितावच्छेदकतायामपि साध्यतावच्छेदकसंबंधावच्छिन्नत्वप्रवेशे न लाघवविरहात् अन्यथा समवायादि
नावच्छिन्नद्रव्यादिमतो भेदमादायासंभवप्रसंगात् न चात्यंताभावघटितव्याप्तावपि प्रतियोगितावच्छेदकतायां साध्यावच्छेद
कताघटकसंबंधावच्छिन्नत्वस्य निवेशनोपपत्यानंदशे साम्यं अन्यथा विषयितासंबंधेन वह्नित्ववज्ज्ञानात्यंताभाव
मादाय दोषादिति वाच्यं यतोऽन्योन्याभावघटितव्याप्तावपि साध्यतावच्छेदके प्रतियोगितावच्छेदकतानवच्छेदकत्वं
निवेशनीयं तादृशावच्छेदकतावच्छेदकत्वं च साध्यतावच्छेदकतावच्छेदकसंबंधावच्छिन्नत्वे विशेषणीयं साध्यता
वच्छेदकविशिष्टप्रतियोगितानवच्छेदकत्वपर्यंतनिवेशने नानाव्यक्तिसाध्यके हेतुमन्निष्ठतत्तत्साध्यव्यक्तिमद्भेद रा॰ म॰ २६७

मादायाव्याप्तेः अवच्छेदकतानवच्छेदकरूपविशिष्टेऽवच्छेदकेदकेऽनवच्छेदकत्वस्याप्रामाणिकत्वात् अन्यथा प्रति
योगितानवच्छेदकविशिष्टप्रतियोगित्वप्रतियोगित्वस्य स्ववचनतया अत्यंताभावघटितव्याप्तावपि प्रतियोगिता
नवच्छेदकत्वपर्यंतनिवेशनानर्थक्यप्रसंगात् अवच्छेदकतावच्छेदकतायां संबंधभेदानिवेशे गुरुत्वलघुत्वादि
दौ विषयितासंबंधेन गुरुत्वादिविशिष्टावच्छिन्नभेदमादायाव्याप्तेः न चैकव्यक्तिसाध्यकस्थलेऽन्योन्याभावप्रति
योगितावच्छेदकतानवच्छेदकत्वानिवेशात्तत्साध्यकानुमितिकारणतायां लाघवमस्तु तन्मेवेति वाच्यं नानाव्यक्तिसाध्य
कस्थलेयकावच्छेदकत्वांशानिवेशादत्यंताभावघटितव्याप्तिज्ञानहेतुतायामपि लाघवसंभवेन स्थलविशेषीयलाघ
वस्याकिंचित्करत्वात् अथैवमपि प्रतियोग्यसमानाधिकरणपदनिवेशापेक्षया प्रतियोग्यवृत्तित्वनिवेशे न लाघवम
हुत्वमेवकालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावाभाववान्नाकाशत्वादित्यादावव्याप्तिवारणाय प्रतियोग्यस
मानाधिकरणपदपरित्यागेन निरवच्छिन्नवृत्तिकत्वस्य निवेशयितुमशक्यत्वात् भवतु प्रतियोगिसमानाधिकरणपस्याप्य

ग.टी.

२६८

निवेशनीयत्वात् नचात्यंताभावघटितव्याप्तौ हेत्वधिकरणोप्रतियोग्यनधिकरणत्वेनिवेशनीयं नतुभावेन तदधिकरणा
वृत्तित्वं तथाचान्योन्याभावविशेषणप्रतियोग्यवृत्तित्वस्य नप्रतियोग्यनधिकरणत्वापेक्षया लघुशरीरत्वेनतिवाच्यं प्रति
योग्यनधिकरणत्वमित्यत्रप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वस्यैव निवेशनीयत्वपातदपेक्षया प्रतियोग्यवृत्ति
त्वस्यलघुत्वात् एतन्मते प्रतियोगितावच्छेदकावच्छिन्नत्वानिवेशात् अन्योन्याभावस्याव्याप्यवृत्तित्वे वक्ष्यमाणदो
षेणाप्रतियोग्यनधिकरणत्वनिवेशासंभवात् सामानाधिकरण्यस्याव्याप्यवृत्तित्वमभ्युपेत्य प्रतियोग्यधिकरणा
वृत्तित्वस्यैवात्यंताभावेनिवेशनीयत्वादित्यन्वेत्र अत्यंताभावप्रतियोगिताघटितलक्षणे स्वावच्छेदकविशिष्टवद्वृत्ति
त्वाभावावच्छेदके हेत्वधिकरणाकत्वं प्रतियोगितायां विशेषणं देयं अन्योन्याभावीयप्रतियोगिताघटितलक्षणे स्वाधि
करणावृत्तित्वाभावावच्छेदकहेत्वधिकरणाकत्वंप्रतियोगिताविशेषणमित्यपवनिकर्षः तत्रचावच्छेदकविशिष्टांशनि राम॰
वेशाधिक्यमस्त्वत्यंताभावीयप्रतियोगिताघटितव्याप्तौ तथापिचरमव्याप्तौ तादृशप्रतियोगितानिरूपितसाध्यता २६८

वच्छेदकसंबंधावच्छिन्नावच्छेदकतानिरूपितसाध्यतावच्छेदकताघटकसंबंधावच्छिन्नावच्छेदकत्वाभावो विशेषणं
साध्यतावच्छेदके प्रथमव्याप्तौ चातादृशप्रतियोगितानिरूपितसाध्यतावच्छेदकताघटकसंबंधावच्छिन्नावच्छेदक
त्वाभावो विशेषणं साध्यतावच्छेदके इति चरमव्याप्तौ साध्यतावच्छेदकसंबंधावच्छिन्नावच्छेदकतानिरूपितत्वानिवेशाद्वि
परीतगौरवं अवच्छेदकविशिष्टांशापेक्षया एतदंशस्य गुरुत्वात्तन्न च प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्व
निवेशस्यसंभवतीप्यावश्यकतया अवच्छेदकत्वे निरूपितत्वांशस्यैवेतन्मतेऽधिकमितिवाच्यं स्वावच्छेदकविशि
ष्टस्यसंबंधेनयासाध्यतावच्छेदकसंबंधनिवेशादेवोपपत्तौ प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वस्यभया॰
निवेशनीयत्वात् नचैवमपिसाध्यतावच्छेदकसंबंधनिवेशउभयमतएवेतिवाच्यं गम्यवच्छिन्नावच्छेदकतानिरूपितत्व
स्यैतन्मते निवेशाधिक्येनलाघवानवकाशादितिदिक् तद्विषसंयोगादिवन्नेति यथाद्रव्यप्रत्यक्षत्वंतत्समवेतप्रत्य
क्षावच्छिन्नंप्रतिइंद्रियसंयोगत्वतत्संयुक्तसमवायत्वादिनासन्निकर्षहेतुतायाः कारणतावच्छेदकानतुगमीपिकाऽ

ग.दा. २६९

तावच्छेदकानामप्यननुगमान्नु व्यभिचारः तथात्र कारणतावच्छेदकाननुगमेपि तत्तद्व्याप्तिज्ञानाव्यवहितोत्तरोत्पन्नानु
मितित्वरूपविशिष्टधर्म्माणामेव तत्तद्व्याप्तिज्ञानजन्यतावच्छेदकत्वोपगमेन कार्य्यतावच्छेदकाननुगमान्नु व्यभिचार इत्य
र्थः केचित्तु स्वरूपेणाभावान्योन्याभावगर्भव्यभिचारज्ञानेऽनुगमय्य तद्विरोधित्वरूपानुगतधर्म्मेणोभयविधव्याप्तिज्ञानेहे
तुतां स्वीकुर्वतीति तेषां मतमुपन्यस्य दूषयति पन्निति पद्रूपावच्छिन्नप्रतियोगिताकत्वेनोपस्थित इति पद्रूपावच्छिन्न
प्रतियोगिताकत्वं तु नोपस्थित इति पद्रूपावच्छिन्नप्रतियोगिताकत्वनिष्ठविषयतानिरूपितविषयताश्रयः धर्मिरा
गृह्यमाणः धर्मो विषयतानिरूपितविषयताश्रयः साध्यवत्ताबुद्धिविरहणाद्धि साध्यवत्ताज्ञानप्रतिबंधकतावच्छेदक
विषयताश्रयः तथा च स्वावच्छिन्नपत्संबंधावच्छिन्नप्रतियोगिताकत्वसंसर्गावच्छिन्नपद्धर्म्मिनिष्ठप्रकारताधर्म्मि
निष्ठविषयतानिरूपिताभावविषयता साध्यतावच्छेदकसंबंधेन साध्यवत्ताज्ञानप्रतिबंधकतावच्छेदिकातावच्छिन्नत्व
तत्संबंधावच्छिन्नप्रतियोगिताकत्वसंबंधावच्छिन्नतद्धर्म्मिनिष्ठप्रकारतानिरूपिताभावविषयतानिरूपितसामान्याभा

रम० २६९

करणत्वविषयताशालिग्रहविरोधित्वेन व्याप्तिज्ञानानुमतत्वेति पर्य्यवसितार्थः प्रतियोगितायां यत्संबंधावच्छिन्नत्व
तत्संबंधावच्छिन्नत्वयोः प्रकारतायां पद्धर्म्मिनिष्ठत्वतद्धर्म्मिनिष्ठत्वयोर्निवेशाद्वह्नित्वावच्छिन्नभेदत्वं वह्निमत्त्वावच्छिन्नात्यं
ताभावसामानाधिकरण्यग्रहविरोधिनी हेतुसमानाधिकरणभेदप्रतियोगितानवच्छेदकं वह्नित्वमित्यादिज्ञानानु
वह्न्याद्यनुमित्यापत्तिः वह्निभेदादिधर्म्मितावच्छेदककवह्न्यादिमत्ताज्ञानं प्रति तद्भेदादिधर्म्मितावच्छेदककसंयो
गसंबंधावच्छिन्नवह्न्यभाववत्ताज्ञानप्रतिबंधकतायां वह्निभेदादिनिष्ठविषयताया अपि निवेशादुक्तज्ञानान्न पुन
र्वह्न्याद्यनुमानापत्तिरिति ततो धर्म्मिविषयतानिरूपितेति विधेयस्य धर्म्मितावच्छेदकतापर्य्याप्त्याश्रयोयांशो धर्म्मस्तद्वि
शिष्टविशेष्यतानिरूपितेत्यर्थकं धर्म्मितावच्छेदकतान्येति तु फलितार्थः प्रतिबंधकत्वं च तदभावव्याप्यवत्ताज्ञानादि
प्रतिबंधकताविलक्षणमनुपादेयमतो नातिप्रसंगः पक्षधर्मताद्यविषयकव्यापकताज्ञानकारणापूर्ववत्प्रतिबंध
कतावच्छेदिकायाश्च विशेषणतावच्छेदकसामानाधिकरण्यविशेषणीभवत्साध्यविषयतानिरूपितसाध्यतावच्छे

ग॰दी॰
२७०

दकतानवच्छेदकत्वमेव विरोधित्वपदेन विवक्षणीयं साध्याभाववद्वृत्तित्वादिधीः नानुमितिहेतुर्वत्तस्तदसंग्रहो न दोषाय तादृशी
च साध्यतावच्छेदकविषयतानिरूपिततादृशघटितव्याप्तिग्रहाहितपरामर्शे प्रतियोगितावच्छेदकत्वाभावस्य विशेष्यविधया
न्योन्याभावघटितव्याप्तिग्रहाहितविशेष्यतावच्छेदकविधया विषयत्वेन वक्तव्यत्वेन तत्र साध्यतावच्छेदकांशे प्रतियोगितावच्छे
दकतानवच्छेदकत्वमेव भेदघटितव्याप्तौ निष्टमिति उभयत्रावच्छेदकत्वाभावविशेष्यतया साध्यतावच्छेदकविषयत्वेन व्यभि
चारधीप्रतिबंधकतावच्छेदिका तत्प्रतिबंधकतावच्छेदकीभूत दर्शितसाध्यतावच्छेदकविषयतावत्त्वे न हेतुत्वे वह्नित्वत्वादि
नापदार्थान्तरेऽप्यन्यत्वे ताभावप्रतियोगितानवच्छेदकत्वाभावावगाहित्वम्प्रमा संग्रहः तादृशविषयतायां यत्तावच्छेदकीय
त्वमनिवेशनात् संग्रहे च भेदप्रतियोगितानवच्छेदकवह्निमत्समानाधिकरणहेतुमानितिज्ञानस्यापि समानाधिकर
णविशेषणविषयतानिरूपितव्यभिचारधीप्रतिबंधकतावच्छेदकसाध्यविषयताशालित्वात्तेनाऽनुमित्यापत्तिः वह्नित्व
त्वाद्यवच्छिन्नविषयतात्वेन भ्रमविषयतासाधारणेन प्रतिबंधकतावच्छेदकविषयतानिवेशे च स्वरूपतो वह्नित्वाद्यवगा रामः
२७०

ह्निभेदप्रतियोगितानवच्छेदकवह्निसमानाधिकरणहेतुमानयमितिज्ञानासंग्रह इति दूषणमनवकाशं साध्यतावच्छेदकां
शेऽवच्छेदकतावच्छेदकत्वाभावावगाहि न एव भेदघटितव्याप्तिज्ञानस्यानुमितिहेतुतया तस्य च वह्नित्वत्वावच्छिन्नविषयता
वत्त्वनियमात् तादृशविषयतात्वेनैव प्रतिबंधकतावच्छेदकविषयतानिवेशात् ननु केवलान्वयिसाध्यके साध्यतावच्छेदकाव
च्छिन्नात्यंताभावस्याप्रसिद्ध्या तत्समानाधिकरणपक्षधीरप्रसिद्धेति कथं तद्विरोधित्वेनानुगम इत्यत आह केवलान्वयीति
भ्रमरूपस्यैवेति तद्रूपावच्छिन्नप्रतियोगिविषयतानिरूपिताभावविषयतायाः एव निवेशितत्वात् वास्तवसाध्याभावाप्रस
सिद्धावपि इतराभावांशे प्रतियोगिविषयतानिरूपिताभावविषयतायाः एव निवेशितत्वात् वास्तवसाध्याभावाप्रसिद्धा
वपि इतराभावांशे प्रतियोगितया साध्यप्रकारकस्याप्रसिद्धधीप्रतिबध्यज्ञानस्य प्रसिद्धौ वानुगमनिर्वाह इति भावः तद्भिन्न
मिति अत्र च पदनिवेशादननुगमो दुर्वारः साध्यवत्तात्ता न प्रतिबंधकतावच्छेदकीभावविषयताविन व्यभिचारज्ञानीया
न्यतमत्वेन्याभावविषयतायाः नाननुगमे संभवः व्यभिचारधियेऽभावांशे निरूढभिन्नतावच्छेदकतया तदीयाभावविषयतायाश्च

ग.दा. २७१

साध्यधीप्रतिबंधकतावच्छेदकत्वविरहात्साध्याभावांशे स्वधर्मितावच्छेदकं साध्याभाववन्महानसवृत्तिहेतुरित्याकार
कज्ञानं प्रति हेतुमन्महानसवृत्त्यभावप्रतियोगितानवच्छेदकं साध्यतावच्छेदकं साध्यतावच्छेदकमित्यादिज्ञानस्यापि विरो
धितया ऽभावांशे स्वधर्मितावच्छेदकज्ञानविरोधित्वेनानुगमेन तोप्यनुमितिप्रसंगात् एवं दर्शितव्यभिचारज्ञानस्य प्रतियो
गितांशे साध्यतावच्छेदकाद्यवच्छिन्नत्वानवगाहित्वेपि साध्यतावच्छेदकांशे प्रतियोगितावच्छेदकत्वावगाहित्वानियमात् सा
ध्यतावच्छेदकांशे ऽवच्छेदकत्वाभावग्रहस्यकेपं तद्विरोधिताग्राह्याभावानवगाहित्वात् अशिंमेत्राद्विन्यायेन ग्राह्याभा
वानवगाहिनोपि विरोधित्वोपगमे ऽकाभावघटितव्याप्तिग्रहस्य साध्याभावांतरघटितव्यभिचारधीप्रतिबंधकत्वोपगम
संभवात् किं व्यभिचारज्ञानानुगमेन एवं उक्तानुगतरूपावच्छिन्नव्यभिचारज्ञानसामान्यविरोधित्वं नियतभावघटित
व्याप्तिधीविरोधिताप्रतेन कुत्रापि व्याप्तिबुद्धौ पर्यकिंचिद्विरोधित्वं च समूहालंबनव्यभिचारधिय आदाय घटाभावप्रतियो
गितानवच्छेदकं वह्नित्वमिति ग्रहमहानसवृत्तित्वविशिष्टवह्न्यभावादिसामानाधिकरण्यग्रहमादाय च हेतुसमानाधि

राम० २७१

करणमहानसवृत्त्यभावप्रतियोगितानवच्छेदकं वह्नित्वमित्यादिज्ञानेऽतिप्रसंग इत्यादि चिंतामणौ ज्ञमवधेयं व्यभि
चारज्ञानानुगमं तरेणापि व्याप्तिरिव कत्रूपेणाव्यभिचारद्वययुपादाय तद्विषयकज्ञानविरोधित्वेन व्याप्तिज्ञानानुग
मसंभवात् किं व्यभिचारानुगमेनेति पूर्वमतमेवाह प्रभुस्समूहालंबनविरोधित्वेन व्याप्तिज्ञानद्वयमनुगमयति साध्य
तावच्छेदकद्वितीयविरोधित्वमिति तादृशग्रहसामान्यविरोधित्वमित्यर्थः तेन घटाभावप्रतियोगितावच्छेदकत्वाभ्या
ह्निसमूहालंबनव्यभिचारज्ञानविरोधितामादाय नातिप्रसंगः अत्यंताभावादिघटतयायकताज्ञानस्य साध्याभाववद्वृ
त्तित्वादिरूपव्यभिचारज्ञानविरोधित्वे साधनधर्मिकतादृशव्यभिचारद्वयमहविरोधित्वरूपलघुधर्मेणैवानुगमसंभवाचि
तत्वाच्छेपेनाह साध्याभावेति पूर्ववदिति तादात्म्यार्थः ननु साध्याभाववद्वृत्तित्वं मत्वाघवच्छिन्नहेतुकस्थले प्रकृत
हेतुतावच्छेदकावच्छिन्नधर्मिकानाहार्यव्यभिचारज्ञानाप्रसिद्धा तद्धर्मिकव्यभिचारग्रहप्रतिबंधकग्रहाप्रसिद्धिरित्यतआह
हेत्वाधिकमिति तत्र द्वावत्रापि एकदेशविषयकज्ञानविरोधिता निवेशनीयेति भावः ननु अत्यंताभावघटितव्याप्तिज्ञानस्य

ग-दा· पिहेतुत्वेऽन्योन्याभावगर्भैव तिष्ठतु लविरोधइत्यत आह ग्रंथस्थितिउपलक्षणापरइति अत्र हेतुत्वार्थलक्षणापात्रत्वं
२७२ तान्योन्याभावगर्भव्यापकताघटितव्याप्तिद्वयसाधारणरूपावच्छिन्नपरइत्यर्थः नन्वेवं व्यवच्छेद्याप्रसिद्धिरित्यत आह अ
नौपाधिकत्वेतिमात्रपदेनात्यंताभावगर्भव्याप्त्यव्यवच्छेदलाभः अत्रापि ममूलस्वरसमाह पक्षहेतुत्वेतीति अत्यंताभावगर्भ
व्याप्तेरनुमित्यहेतुत्वे अनौपाधिकत्ववत्त्वस्यानुमित्यौपयिकव्याप्त्यनुमापकत्वमभिदध्यादितिभावः व्यभिचारस्यो
पाधिद्वाराभासत्वानाभासत्वरूपोपजीव्यकविशेषदर्शनपरमूलस्य समुदिततात्पर्यार्थमदृष्ट्वैव व्याचष्टे व्यभिचाराज्ञानस्ये
त्वादिनाव्यभिचाराज्ञानस्य व्यभिचारज्ञानविरहस्य व्याप्तिधीहेतुत्वादितिविरोधिविषयकज्ञानाभाववत्तयेत्यादिः साध्य
धर्मिकसाधनताव्यापकव्याप्यत्वज्ञानस्य तद्धर्मिकसाधनव्यापकताज्ञानवत्समानधर्मिकत्वया मूलोक्तमुपाधिज्ञानाप्रति
वंधकत्वबीजं भिन्नधर्मिकत्वं सुपरिहरमतो बीजांतरमाह विरोध्यविषयकत्वादिति ग्राह्याभाववत्त्वादिविशिष्टादिविषयकत्वा राम०
दित्यर्थः साक्षाद्विरोधित्वेऽपि वा विना मात्रगौरवमन्यथा भाषते पत आह बक्ष्यते चेत्साक्षाद्विरोधिन एवेति कारणीभू २७२

ताभावप्रतियोगिज्ञानविषयस्यैवेत्यर्थः अनुमितिप्रयोजकज्ञानविरोधित्वेनाभासत्वाभिमानमूलामाशंकां निराक
र्तुं मूलकृतामनौपाधिकत्वज्ञानस्य व्याप्तिज्ञानाहेतुत्वमेवोक्तं तदनुवदनुवदंस्तत्र हेतुमाह रूपाधीत्यादिना तद्धेतु
मभ्युपेत्यापि स्वमभिमानं निराकुर्वाणाः समाधत्ते तथात्वेपीति आसत्त्वापीत्यादिति प्रयोजकज्ञानस्य साक्षाद्विरोधित्वे
पि जनकज्ञाने ऽन्यथात्वात् जनकज्ञाने साक्षाद्विरोधिन एवाभासत्वादितिभावः मूले परमुखनिरीक्षणपेतित्र अनुमितौ
तद्धेतुज्ञाने च साक्षाद्विरोधित्वेत्यर्थः सिद्धसाधनवदितिसिद्धेः सिषाधयिषाविरहरूपपक्षताविघटनत्वादेवानुमितिवि
रोधित्वान्नतु स्वत इति मतमान — शमिहितं तस्य स्वतोऽनुमितिविरोधित्वे न परमुखनिरीक्षकत्वासंभवेन दृष्टान्तता वि
रहात्त्वबाधयंथेनस्फुटमेतद्विधास्यते अन्योन्याभावस्याव्याप्यवृत्तित्वमंगीकारेणं व्याप्तिद्वयं दूषयितुमुपक्रमते इदं
पुनरिति प्रतियोग्यवृत्तित्वविशेषितत्वघटितेतिप्रतियोग्यवृत्तित्वविशिष्टितान्योन्याभावघटितस्येत्यर्थः केवलान्वयि
त्वादितिप्रतियोगिन्यपिवृत्तेलक्षणाघटकत्वादितिशेषः इदं चसंयोगिभेदप्रतियोगितायां अव्याप्यवृत्तित्वाभिमानेनव

ग॰ टी॰ २७३

स्तत्तत्प्रतियोगितायाः प्रतियोगिस्वरूपत्वेऽव्याप्यवृत्तित्वासंभवात् अतिरिक्तत्वे च तस्य तथात्वे मानाभावात् मूलेन सं
योगीति प्रतीतिवन्नायं संयोगिभेदप्रतियोगीति प्रतीतिवानुभविकत्वविरहात् तत्प्रतियोगितावच्छेदकरूपत्वोपसंयोगादिरूपा
यास्त्वपि तस्याः प्रतियोगितात्वेनाव्याप्यवृत्तित्वे मानाभावात् स्वप्रतियोगितानुविशिष्टावच्छिन्नाभेदहेत्वधिकरणानिष्ठ
भेदघटितलक्षणांशस्य गेवेनैवमपि स्वस्याननुगमदोषस्तु वारित इति वाच्यं हेतुमन्निष्ठभेदप्रतियोगितावच्छेदकप्रतियोगि
तानवच्छेदकत्वस्यैव साध्यवत्त्वे निवेशनीयत्वादित्येवं धेयं स्वव्यापके इति अत्र स्वव्यापकताप्रतियोग्यवृत्तित्वा विशेषितान्यो
न्याभावघटितैवोध्याऽन्यतो नोक्तदोषः स्वव्यापकतावच्छेदके इति स्वं साध्यं व्यापकतापि पूर्ववत् संयोगादित्वावृत्तत्वात् अतः सं
योगादेर्द्रव्यत्वादेर्वा यत्र साध्यता तत्र तत्सहेतौ संयोगत्वाद्यवच्छिन्नाभावेन संयोगत्वाद्यवच्छिन्नवद्भेदेन च सामानाधिकरण्य
पित्वाव्याप्तेः अव्याप्यवृत्तितावच्छेदकद्रव्यत्वत्वत्वादेरेव साध्यव्यापकतावच्छेदकतया तदवच्छिन्नाभावादिना हेतोः सामा राम॰
नाधिकरण्यविरहात् यत्र द्रव्यत्वाद्यवच्छिन्नस्य संयोगेन साध्यता तत्रैव संबंधेन कस्यचिद्धेतुता तत्र साध्यव्यापकतावच्छे २७३

दकावच्छिन्नाभाववति हेतुतावच्छेदकसंबंधेन वृत्तेरप्रसिद्धावपि न क्षतिः स्वाधिकरणावृत्तितादृशाभावकत्वस्य विवक्ष
णीयत्वात् अतः संयोगो गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादावपि नाव्याप्तिः विशिष्टस्यानतिरिक्ततया विशिष्टेऽपि हेतौ
द्रव्यत्वाभावसामानाधिकरण्यस्य दुर्घटत्वेऽपि द्रव्यत्वाभावविशिष्टहेतुसामानाधिकरण्यस्याक्षतत्वात् अव्याप्य
वृत्तिकेवलान्वयिसाध्यके प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकतावच्छेदकं व्याप्यवृत्तितावच्छेदकं केवलान्व
यितावच्छेदकरूपमेव तदवच्छिन्नाभावादेरप्रसिद्धिरित्याह स्वसमानेति संयोगाभावादिसाध्यके गुणत्वादौ स्वव्यापकसा
ध्यसामानाधिकरण्यरूपव्याप्तेर्वक्तव्यत्वात् द्रव्यत्वादिरूपहेतुविशेषानुसरणाप्रसंग इति यादृशसाध्यकहेतुमात्र एवा
व्याप्तेः तादृशस्मृतिविषयत्वादिसाध्यकानुसरणं स्मृतिविषयत्वादेः स्मृत्यादिविषयवस्तुन्येव स्वविषयकस्मर
णाभावीदृशावच्छेदेनाभावसत्त्वात् कालिकमव्याप्यवृत्तित्वं व्यर्थं ज्ञानविषयत्वस्य व्याप्यवृत्तितया ज्ञानविषयत्व
त्वेन ज्ञानविषयत्वाभावो न प्रसिध्यतीति तद्रूपमुपेक्ष्य स्मृतिविषयत्वेनैव साध्यत्वमनुसृतं न तु विशेषांस्मृतिविषयत्व

प्रमामात्रिकंसामान्यलक्षणाप्रत्यासत्त्याविश्वविषयकानुभवसंभवेऽपिस्मृतेरुद्बोधकाधीनतयाउद्बोधकस्यचफलै
कोन्नेयतयायावदृश्यवस्तुस्मृतौप्रमाणान्तरविरहस्तत्रोद्बोधकस्याप्रामाणिकत्वेनस्मृतिविषयतायामपिप्रामात्वा
त्ततयाचस्मृतिविषयत्वस्यकेवलान्वयितेत्याशयेनसंस्कारविषयत्वानुधावनंननुपत्रस्मृतेर्वप्रामाणिकतातत्रसं
स्कारोऽप्यप्रामाणिकस्तस्यफलैकप्रामाणिकत्वात्नचतद्विषयकस्मृतेरप्रामाणिकत्वेऽपितद्विषयकानुभवघटितसाम
ग्रीतद्विषयकसंस्कारेप्रमाणमितिवाच्यंसंस्कारेप्रमाणान्तरविरहेतादृशसामग्र्याएवाकल्पनात्दित्यनुशयेनउत्पन्नज्ञान
विषयत्वमितिस्वाधिकरणेतित्वहेतुःसंयोगिद्रव्यत्वादित्यादौहेतुमन्निष्ठस्यसंयोगाद्यवच्छिन्नान्योन्याभावस्यनहेत्वधिकर
णावृत्तिकिंचिद्धर्मविशिष्टनिष्ठधर्मानवच्छिन्नप्रतियोगिताकत्वंपरंतत्रसंयोगवत्त्वादिरूपतत्प्रतियोगितानवच्छेदकस्यसकल
हेत्वधिकरणसत्त्वेनतादृशंनकिंचिद्धेत्वधिकरणावृत्तिधर्मानवच्छिन्नतद्भेदप्रतियोगितायाःस्यादितिलक्षणासमन्वयःसं
योगिसत्त्वादित्यादौहेत्वधिकरणगुणादिवृत्तिधर्मानवच्छिन्नैवसाध्यवत्त्वावच्छिन्नभेदीयप्रतियोगितेतिनातिप्रसंगः

तत्रैवसाध्यवत्त्वावच्छिन्नभेदप्रतियोगितायांद्रव्यादिवृत्तिधर्मावच्छिन्नत्वसामान्याभावद्रूपातिव्याप्तेर्वारणायपर्यन्तकिं
चिदितिस्वपदंहेतुतावच्छेदकविशिष्टपरंअन्यतोनद्रव्यंविशिष्टसत्त्वादित्यादावव्याप्तिःस्यात्तादृशधर्मस्यहेत्वधिकरणाद्
द्वित्वंतादृशपर्याप्त्यवच्छेदकताकान्यत्वंप्रतियोगितायांविवक्षणीयमतोविशिष्टसत्त्ववान्जातेरित्यादौविशिष्टसत्त्वाव
भेदस्यप्रतियोगितायाःसत्तावच्छिन्नायाअपिसत्त्वविशिष्टपर्याप्त्यवच्छेदकताकत्वान्नातिव्याप्तिःअत्रचतादृशध
र्मानवच्छिन्नप्रतियोगितानवच्छेदकसाध्यवत्त्वकत्वमेवविवक्षितंअन्यथाप्रतियोगितायाद्विधाविशेषेणान्योन्याभाव
स्यचाधिकस्यनिवेशेनगौरवादित्यवधेयंअत्रचतादृशप्रतियोगितानवच्छेदकसाध्यवत्त्वंतादृशधर्मानवच्छिन्नप्रतियो
गितानवच्छेदकंपरंसाध्यतावच्छेदकविशिष्टंतत्सामानाधिकरण्यंचविशिष्टसत्तावान्द्रव्यनिष्ठधर्मानवच्छिन्नप्रति
योगितानवच्छेदकगुणत्वादिविशिष्टसामानाधिकरण्यपरपर्याप्त्युपलक्षितसत्तावत्ताज्ञानात्कर्मादौगुणाद्यनुमि
त्यापत्तिरित्यतस्तादृशसामानाधिकरण्यसहितहेतुतावच्छेदकस्याप्रसिद्धत्वमाहतद्धर्मेतिहेतुतावच्छेदकविशिष्टवैशि

ग॰दा॰
२७५

सज्ज्ञानमनुमितिहेतुरितिस्फुरणेनापतद्धर्म्मविशिष्टत्वमित्यत्रविशिष्टत्वमित्यत्रविशिष्टपदोपादानंसामानाधिकरण्यस्य
विशेषणतासंभवमात्रेणैवदर्शितः स्वरूपसंबंधेनकालिकसंबंधेनतत्तत्त्वस्यतादृशान्योन्याभावेतियत्किंचित्स्पंदत्व
वद्वृत्तिधर्म्मावच्छिन्नप्रतियोगिताकघटादिमदन्योन्याभावेत्यर्थः अत्रचातिव्याप्तिवारकतालक्षणस्यनसामानाधिक
रण्यघटितव्याप्तिलक्षणस्यतदतिव्याप्तिः एतत्संदत्वादित्यादौधूमजातिमन्नेयत्वाक्तिनिष्ठत्वेनेनतादृशव्यक्तिवृ
त्तिधर्मानवच्छिन्नप्रतियोगिताकत्वरूपंतादृशत्वंघटाद्यन्योन्याभावस्यसंपादितं ननुजातिमद्भेदएवकत्वंनतादृशवृ
त्तित्वाज्जातिमन्नेतिअप्रसिद्धेरितितथाचहेत्वधिकरणीभूतयत्किंचिद्व्यक्तिपदेनज्ञातिभूतस्योपादानासंभवाज्जा
तिमद्भेदानहेत्वधिकरणीभूतयत्किंचिद्व्यक्तित्वावच्छिन्नधर्म्मानवच्छिन्नप्रतियोगिताकइत्यर्थः एतेनेतिग्रन्थव्याप्तेरप्रसंगाति
प्रसंगकथनेनेत्यर्थः अहोऽनुमितिजनकोभूतोऽग्रहोऽप्याख्यातः अप्रसंगातिप्रसंगयस्ततयाव्याख्यातः तथात्वेभेदस्याव्या राम॰
प्यवृत्तित्वेऽव्यापकमेवेतिद्रव्यस्याप्युत्पत्तिकालावच्छेदेनसंयोगाभावप्रतियोगिसंयोगवद्भेदवत्त्वात्संयोगाभावस्या २७५

पिप्रतियोग्यनधिकरणहेत्वधिकरणवृत्तित्वादिभावः यत्किंचिद्व्यक्तिवृत्तिप्रतियोगिकेतियत् किंचिद्व्यक्तिवृत्तिप्रति
योगिसामान्यकेत्यर्थः यत्किंचिद्व्यक्तिवृत्त्यप्रतियोगिकेतियोवत् एतेनवह्न्यादिसामान्याभावस्यापिमहानसीयवृत्ति
यत्किंचित्प्रतियोगिकत्वेपिनदोषः नचविशिष्टसत्तावानज्ञानेरित्यत्रातिव्याप्तिः प्रतियोगिपदस्यप्रतियोगितावच्छे
दकविशिष्टपरत्वेपिविशिष्टस्यानतिरिक्तत्वादितिवाच्यंयत्किंचिद्धेतुमन्निष्ठाधिकरणतानिरूपकतानवच्छेद
कप्रतियोगितावच्छेदककत्वस्याभावविशेषणतयाविवक्षणीयत्वात् तथाविधाधिकरणतानिरूपकतानवच्छेदक
धर्मावच्छिन्नप्रतियोगितासामान्यानवच्छेदकत्वंसाध्यतावच्छेदकविशेषणमितिनिष्कर्षः पूर्ववदितियथाकथंचित्
संबंधेनसाध्यतावच्छेदकसंबंधेनवाहेत्वधिकरणवृत्तित्वविवक्षणेत्यर्थः स्वप्रतियोगिनिष्ठेत्यस्वप्रतियोगितावच्छेदका
वच्छिन्नेत्यर्थः अत्रापिसाध्यावच्छेदकावच्छिन्नाधेयत्वानिरूपकहेत्वधिकरणकप्रतियोगितायाअनवच्छेदकत्वंसाध्यता
वच्छेदकविशेषणमितिपरमार्थः आधेयत्वानिरूपकत्वोपगमइतिआधेयत्वनिरूपकत्वस्यअधिकरणतासमशी

ग॰ दी॰
२७६

लेतयाऽव्याप्यवृत्तिसंयोगादेरधिकरणतावच्छिन्ननिष्ठाधेयतानिरूपकत्वस्याव्याप्यवृत्तित्वौचित्यादिति भावः। अत्र त्वा
नां प्रलयावच्छेदे न संयोगनिष्ठाधेयत्वानिरूपकत्वं कालपरिमाणव्याप्तिप्रयोजकं घटादिभेदस्याव्याप्यवृत्तित्वेन हेत्व
धिकरणद्रव्यादौ संयोगाद्यभावप्रतियोग्यनधिकरणत्वसत्त्वेपि समवायादिरूपसाध्यतावच्छेदकसंबंधे संयोगादिप्रति
योगिकत्वद्रव्यानुयोगिकत्वोभयाभावस्यासत्त्वादुभयाभावघटितप्रतियोगिवैयधिकरण्यविवक्षणे संयोगाद्यभावस्व
द्रव्यानप्रतियोगिवैयधिकरण्यमिति न संयोगादिसाध्यकाव्याप्तिस्तथापि कालिकसंबंधेन गगनादेर्वृत्तिमत्त्वपक्षेऽनुमाद
श्राविवक्षासंभव इत्यभिप्रायेण प्रतियोगिवैयधिकरण्यघटितपारिभाषिकानौपाधिकत्वमेव व्याप्तिरिति सिद्धांतपति
त्त्रत्वं वदेतीति प्रथमं यावत्साध्यव्यापकतावच्छेदकव्यापकतावच्छेदकत्वरूपं व्याप्तिपुरस्कारेऽवच्छेदकत्वाभावद्वयाप्र
वेशेत्वोयंसीयावत्स्वव्यापकतावच्छेदकसाध्यव्यापकतावच्छेदककाचरूपं तामुक्तवान्न समानाधिकरणेत्यादिना
संबंधभेदनिर्बंधनदोषवारणाय प्रथमे व्यापकताद्वयं द्वितीये च व्यापकताद्वयं एकसंबंधेन निवेशितं साध्यतावच्छेदकसं

राम॰
२७६

बंधेन तन्निवेशे यत्र संयोगेन साध्यता तत्र तेन संबंधेन व्यापकताया अप्रसिद्ध्यापत्तेः। द्वितीये च तेन संबंधेन वस्तुमात्र
स्यैव साध्यव्यापकतया तादृशव्यभिचारिण्यतिप्रसंगादिति तन्निवेशः। समानाधिकरणाभावप्रतियोगितावच्छेदकत्वम
विष्टसामानाधिकरण्यांशमात्रस्याव्याप्यव्यापकभावनिवेशे नैवोपपत्तौ तावत्तद्रूपपर्यंतनिवेशनमफलमित्याशये
नाह स्वसमानाधिकरणेति। स्वसमानाधिकरणव्यापकतावच्छेदकत्वविशिष्टसाध्यसाध्यसामानाधिकरण्यत्वंकात्व
मित्यर्थः। सामानाधिकरण्यस्याव्याप्यवृत्तित्वानुपगमात् न तस्य व्यापकतानुपपत्तिः। एतत्कल्पेपि साध्यसामा
नाधिकरण्यस्याव्याप्यवृत्तित्वमप्यदशायां तत्र व्यापकताया असंभवात्। अनुमित्यनुपपत्तिमालोच्याह कल्पांत
रमाह साध्येति। अत्र साध्यसामानाधिकरण्याभाववति हेतुसामानाधिकरण्याभावस्याव्याप्यवृत्तित्वभ्रमस्थले तादृशहे
तुसामानाधिकरण्यभ्रमपर्यवसितस्तत्सत्त्वे चानुमितिरनुभवविरुद्धेऽपहेतौ साध्याभावसामानाधिकरण्याग्रहव
त्साध्यविरोधिसामानाधिकरण्याग्रहस्यापि अनुमितिविरोधित्वादिति तादृशभ्रमकाले हेतुसामानाधिकरण्याभा

ग.दा. २७७ वत्वेसाध्यसामानाधिकरण्याभावव्यापकतावच्छेदकतायाद्रुर्ग्रहत्वेपिनक्षतिः व्यापकतावच्छेदकत्व [illegible] त्वंताभः
वप्रतियोगितानवच्छेदकत्वंनतुभेदप्रतियोगितावच्छेदकतानवच्छेदकत्वगर्भंतथासतिधर्मिणितत्समानाधि
करणाभेदप्रतियोगितानवच्छेदकत्वरूपव्यापकत्वनिवेशेनैवसाध्यस्यधर्मेव्यापकतावच्छेदकत्वपर्य्यन्तनिर्दे
शविरोधादिति॥ ॥ ॥ ॥इतिव्याप्त्यनुगमः॥ ॥ ॥श्रीसंवत् १८३१ मितिकुआरवदी १३ [illegible] वार

रा.म० २७७